# महाभारतम्- वनपर्व

## लक्षालङ्कारटीका-पाठान्तरादिसहितम् (क्रिटिकल् एडिशन्)

## भाग-3




**सम्पादकः**

सि. आर. प्रदीपसिंहाचार्यः चतुर्वेदः



**प्रकाशनम्**

वेद-वेदान्ताध्ययनशोधसंस्थानम्

वसन्तकुञ्ज, नवदेहली

विश्वविद्याग्रन्थमाला -13

वेदवेदान्ताध्ययनशोधसंस्थानम्

# श्रीमन्महाभारतम्

श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-
प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्

## वनपर्व-३

सम्पादकः

सि. आर्. प्रदीपसिंहाचार्यः, चतुर्वेदः

उपसम्पादकाः

देवीप्रसादाचार्यः, आर् विठोबाचार्यः, श्रीनिधि.वि

प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम्.
वसन्तकुञ्ज, नवदेहली.
2021

**विश्वविद्याग्रन्थमाला- 13**

**श्रीमन्महाभारतम्**
**वनपर्व-३**

**श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-**
**प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्**

**सम्पादकः** : सि. आर् प्रदीपसिंहाचार्यः, चतुर्वेदः
**उपसम्पादकाः** : देवीप्रसादाचार्यः, आर् विठोबाचार्यः, श्रीनिधि.वि

**प्रकाशनम् :** **वेद-वेदान्ताध्ययनशोधसंस्थानम्.**
**वसन्तकुञ्ज, नवदेहली.**

© **सर्वे अधिकाराः स्वायत्तीकृताः**

**प्रथममुद्रणम् :** **2021**

**ISBN :** **978-81-998716-7-0**

**पृष्ठसङ्ख्या :** **10 + 442**

**प्रतयः :** **250**

**मूल्यम् :** **200 रूप्यकाणि**

**मुखचित्रविन्यासः:** **कार्तिकः**

**मुद्रणालयः:** **वाणिप्रेस्. मैसूरु**

# Vedic Vedantic Studies & Research Institute

# Śrīmanmahābhāratam

# Vanaparva vol-3

**"Following the Mahābhāratatātparyanirṇaya and Lakṣālaṅkāra; including the Ancient Tulu Recension and Variant Readings.**


## Edited by:

**C. R. Pradeepa simha achaya, chaturveda.**

**Sub-editors**

Devīprasādācārya, R. Viṭhobācārya, Śrīnidhi, v.



## Published by:

**Vedic Vedantic Studies & Research Institute**

**(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)**

Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,
vasant Kunj, New Delhi-110070

**2021**

**Vishvavidyagranthamala -13**

## Śrīmanmahābhāratam - Vanaparva vol-3

"Following the Mahābhāratatātparyanirṇaya and Lakṣālaṅkāra;
including the Ancient Tulu Recension and Variant Readings.

**Edited by:** **C. R**. vd. **Pradeepa simha achaya, chaturveda.**

**Sub-editors :** **Devīprasādācārya, R. Viṭhobācārya, Śrīnidhi, v.**

**Published by:** **Vedic Vedantic Studies & Research Institute**
(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)
Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,

**ISBN :** **978-81-998716-7-0**

**Edition:** **2021**

**copies :** **250**

**©:** **Publishers**

**Price:** **200**

**pages** **10 + 442**

**printed by:** **vanipress. mysore**

# जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्

**पेजावरअधोक्षजमठः,उडुपि**

## अनुग्रहसन्देशः

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

श्रीमन्महाभारते प्रतिपदं धर्मस्य सूक्ष्मगतिः, भगवतः माहात्म्यं च निरूपितम्। इदानीं वेदवेदान्ताध्ययनशोधसंस्थानेन वनपर्वणः अयं तृतीयः भागः प्रकाश्यते। अस्मिन् तीर्थयात्रापर्वणः अन्तिमभागे, जटासुरवधपर्व, निवातकवचयुद्धपर्व च सन्निविष्टे स्तः।

अयं ग्रन्थभागः पाण्डवानां क्षात्रतेजसः, बाहुबलस्य च निदर्शनम्। कपटवेषधारिणः जटासुरस्य वधः। दुष्टशिक्षणे भीमसेनस्य पराक्रमः, इन्द्रलोकात् प्रत्यागतस्य अर्जुनस्य निवातकवचैः सह प्रवृत्तः युद्धप्रसङ्गः इत्यादयो विषया निरूपिताः। तपसा, ब्रह्मचर्येण, ईश्वरास्त्रबलेन च दैत्यान् जेतुं शक्यत इति अर्जुनस्य चरितं बोधयति। एतादृशाख्यायिकाः आपत्कालेऽपि धैर्यं न हातव्यम् इति नीतिं प्रतिपादयन्ति ।

अस्य ग्रन्थस्य सम्पादनं शास्त्रज्ञैः विद्वद् श्रीप्रदीपसिंहाचार्यैः श्रद्धया कृतम्। तैः सह श्रीविठोबाचार्यः, श्रीवि.श्रीनिधि-आचार्यः, देवीप्रसादाचार्यश्च च सहसम्पादकरूपेण महता परिश्रमेण कार्यं कृतवन्तः। एतेषां विदुषां शास्त्रसेवा श्लाघनीया।

अनेन ग्रन्थप्रकाशनेन लोके धर्मजागृतिः, शौर्यजागृतिश्च भवतु। ग्रन्थसम्पादकानां, प्रकाशकानां तथा च सर्वेषां पाठकानां श्रीमन्मध्ववल्लभश्रीवासिष्ठकृष्णानुग्रहः सदा भवतु इति नारायणस्मरणपूर्वकं आशिषः प्रयुञ्ज्महे।

इति नारायणस्मृतयः

**श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादाः**

# निदेशकवचांसि

"सत्ये सर्वं प्रतिष्ठितम्" इति वचनानुसारं, सत्यधर्मयोः पालनेन मनुष्यः देवानां साहाय्यम्, अजेयशक्तिं च प्राप्नोति इति महाभारतस्य वनपर्वणः अयं तृतीयः भागः सोदाहरणं प्रमाणीकरोति। अद्य 'वेदवेदान्ताध्ययनशोधसंस्थानेन' प्रकाश्यमानः अयं ग्रन्थभागः पाण्डवानां धैर्यस्य, शौर्यस्य च ज्वलन्तं निदर्शनम्।

अस्मिन् भागे विद्यमानानि प्रसङ्गानि न केवलं पौराणिकानि, अपि तु तत्त्वगर्भितानि। तीर्थयात्रापर्वणः अन्तिमे गन्धमादनपर्वते प्रवृत्तः भीम-हनुमतोः समागमः भ्रातृस्नेहस्य बलस्य च अद्भुतसङ्गमः। तथैव, कपटवेषधारिणः जटासुरस्य वधः दुष्टशिक्षणे शारीरिकबलमपि अवश्यम् इति सूचयति।

स्वर्गात् प्रत्यागतस्य अर्जुनस्य निवातकवचैः सह प्रवृत्तं युद्धं तु दैवीशक्तेः पुरुषप्रयत्नस्य च समन्वयः (Synthesis of Divine Grace and Human Effort) वर्तते।

ग्रन्थप्रकाशनकार्यम् अस्माकं संस्थानस्य परमं ध्येयम्। एतस्य महायज्ञस्य पृष्ठभूमौ अस्माकं मार्गदर्शकाः, श्रीपेजावरमठाधीश्वराः, परमपूज्य श्रीश्रीविश्वप्रसन्नतीर्थश्रीचरणाः विराजन्ते। पूज्यपादानां "ज्ञानदानात् परं न किञ्चित् दानम्" इति उपदेशं वयं शिरसा वहामः। तेषां पादपद्मयोः वयं सश्रद्धं साष्टाङ्गप्रणामान् समर्पयामः।

ग्रन्थस्यास्य प्रधानसम्पादकाः, शास्त्रविचक्षणाः विद्वान् श्रीप्रदीपसिंहाचार्याः स्वपाण्डित्येन, विमर्शेन च ग्रन्थस्य गौरवम् अवर्धयन्। तेषां श्रमः सर्वथा प्रशंसार्हः। तथा पाठशोधने, टिप्पण्यादिनिर्माणे च अहर्निशं कार्यं कृतवद्भ्यः सहसम्पादकेभ्यः श्रीविठोबाचार्य-देवीप्रसादाचार्य-वि.श्रीनिधि आचार्येभ्यश्च च वयं कार्तज्ञ्यं प्रकटीकुर्मः।

अनेन ग्रन्थेन वाचकवृन्दस्य, शोधच्छात्राणां च ज्ञानवृद्धिः भूयात्, तथा च भारतीयसंस्कृतेः रक्षणं भवेत् इति श्रीहरिगुरुचरणौ प्रार्थये।

विद्वान् डा। धनञ्जयाचार्यः
निदेशकः,

# सम्पादकीयम्

श्रीमन्महाभारतस्य वनपर्वणि (अरण्यपर्वणि) तृतीयोऽयं भागः आध्यात्मिकसाधनायाः तथा क्षात्रतेजसः सङ्गम इव शोभते। अस्मिन् भागे तीर्थयात्रापर्वणः अवशिष्टभागः, जटासुरवधपर्व, निवातकवचयुद्धपर्व च अन्तर्भवन्ति। एतनि त्रीण्यपि पर्वाणि पाण्डवानां जीवनस्य विविधमुखानि दर्शयन्ति।

१. तीर्थयात्रापर्व (अवशिष्टभागः):

लोमशमहर्षिणा सह प्रवृत्तायाः तीर्थयात्रायाः अन्तिमभागे पाण्डवाः गन्धमादनपर्वतं प्रति गच्छन्ति। तत्र मार्गे भीमसेनः सौगन्धिकपुष्पाहरणप्रसङ्गे हनुमता सह संवदति। हनुमद्भीमसेनयोः संवादः, भविष्यति युद्धे अर्जुनध्वजे स्थातुं प्रतिज्ञा च अत्रत्यः अत्यन्तं रोमाञ्चकारी विषयः।

२. जटासुरवधपर्वः

इदं पर्व भीमसेनस्य बाहुबलस्य निदर्शनम्। यदा पाण्डवाः बदरिकाश्रमे आसन्, तदा अर्जुनविरहखिन्नान्, ब्राह्मणवेषधारी जटासुरो नाम राक्षसः कपटेन अपहर्तुं प्रयत्नम् अकरोत्। तस्मिन् समये भीमसेनः तं राक्षसं घोरयुद्धे संहृत्य, धर्मराजं, द्रौपदीं, नकुलसहदेवौ चारक्षत्। "सत्यधर्मरतानां रक्षणाय भगवान् सर्वदा जागर्ति" इति तत्त्वम् अत्र स्पष्टम्।

३. निवातकवचयुद्धपर्वः

इदं पर्व वनपर्वणः शिखरायमानं वर्तते। पञ्चवर्षेभ्यः अनन्तरम् अर्जुनः इन्द्रलोकात् गन्धमादनपर्वतं प्रति प्रत्यागच्छति। अर्जुनः स्वानुभवं कथयन्, देवेन्द्रस्य आदेशेन निवातकवचान् तथा कालकेयनामकदानवांश्च, (ये देवानां कृते अपि अवध्या आसन्, तान् )कथं पाशुपतादिदिव्यास्त्रैः संहृतवान् इति विवृणोति। इदं युद्धवर्णनं अर्जुनस्य लोकोत्तरवीरतां, भावि-कुरुक्षेत्रयुद्धे विजयं च सूचयति।

कृतज्ञतासमर्पणम्:

एतादृशस्य वीररसप्रधानस्य, ज्ञानवर्धकस्य च ग्रन्थस्य सम्पादनं मम परमं सद्भाग्यम्। अस्य महतो ग्रन्थस्य प्रकाशने मुख्यप्रेरणास्रोतोभूताः, श्रीपेजावरमठाधीश्वराः, परमपूज्य श्रीश्रीविश्व-प्रसन्नतीर्थश्रीचरणाः। तेषां "शास्त्ररक्षणं, धर्मरक्षणम्" इति दिव्यसन्देशं सदा मानयामि। पूज्यपादानां चरणकमलयोः सश्रद्धं साष्टाङ्गप्रणामान् समर्पयामि।

तथैव, अस्मिन् कार्ये अस्मान् सर्वदा प्रोत्साहयद्भ्यः वेदवेदान्ताध्ययनशोधसंस्थानस्य निदेशकेभ्यः, श्रीधनञ्जयाचार्येभ्यः विशेषरूपेण कृतज्ञतां निवेदयामि।

अस्य ग्रन्थस्य सम्पादनकार्ये  सहसम्पादकैः महता परिश्रमेण साहाय्यं कृतम्। पाठशोधने, विषयविभागे, टिप्पण्यादिनिर्माणे च विद्वांसः देवीप्रसादाचार्यः ,श्रीविठोबाचार्यः, श्रीवि.श्रीनिधि-आचार्यश्च च यत् सहकार्यम् अकुर्वन्, तत् सर्वथा श्लाघनीयम्। तेभ्यः सर्वेभ्यः मम धन्यवादाः।

अन्ते, अयं ग्रन्थः महाभारतजिज्ञासूनां, विदुषां, शोधच्छात्राणां च ज्ञानवृद्धये भूयात् इति प्रार्थयन्, इदं ग्रन्थकुसुमं श्रीहरिवायुगुरुणां पादारविन्दयोः समर्पयामि।

विद्वद्वशंवदः

प्रदीपसिंहाचार्यः , चतुर्वेदः

# किञ्चिन्निवेदनम्

‘देशे देशे तथा ग्रन्थान् दृष्ट्वा कतिपयान्’ इत्यादि श्रीमदाचार्यैः तात्पर्यनिर्णये अभिहितम् । तेन महाभारते नानाविधाः पाठभेदाः सन्तीति अवगम्यते । पूना महानगरगतभण्डार्कर् प्राच्यविद्यासंशोधनालयेन षट्त्रिंशद्वर्षपर्यन्तं महाभारतमूलपाठमधिकृत्य अधीत्य मुद्रितं च तत् क्रिटिकल्एडिषन्मुखेन । तदेव इदानीम् अत्यन्तप्राचीनपाठान्तरसंवलितः महाभारतपाठः इति अनेकेषां विदुषाम् अभिप्रायः । परन्तु, ततोऽपि अधिकप्राचीनतमपाठः उडुपीनगरस्थनानामठीय-ताळपत्रग्रन्थेषु इदानीं समुपलब्ध इति महान् सन्तोषः ।

पञ्चदशाधिकाः महाभारतताळपत्राः इदानीम् अस्मद्धस्तपथं गताः । तत्पर्यालोचनया मूलपाठनिर्धारणे वयं प्रभवाः स्मः । ताळपत्रगतपाठाः वाविळ्ळप्रेस्द्वारा मुद्रितमहाभारतपाठस्य अत्यन्तसंवादि । यत्र विसंवादस्तत्रापि तात्पर्यनिर्णयानुरोधि पाठ एवात्रादृतः । तदेवं अस्मिन् शुद्धपाठसमीक्षासमये अस्माभिः मूलश्लोकतया पलिमारुमठीयताळपत्रगतपाठः आदृतः । श्लोकसङ्ख्याविषये प्रायः वावीळ्ळक्रम आदृतः । क्वचित् मूलश्लोकाः वावीळ्ळपाठे अदृश्यमाना अपि ताळपत्रे, टि.आर् पाठे, बोरि पाठेपि विद्यमानाः अर्थ-तात्पर्यानुरोधात् अस्मिन् संस्करणे आदृताः ।

एतत्संस्करणाध्ययने अस्माभिरादृतः अध्येतृभिरवश्यं वेदितव्यः विना यद्वदेनेनात्रादृतक्रमा-नधिगमस्तदत्रैवं निरूप्यते ।

*. क्रिटिकल् एडिषन् मध्ये तालपत्रेषु वाविळ्ळे वा अविद्यमानाः श्लोकाः ‘अधिकः/ अथवा ins’ इति निर्दिष्टः । तद्यथा -

एतदिच्छाम्यहं श्रोतुं वदतो द्विजसत्तम ।
आनुपूर्व्येण ये चान्ये राजानो वंशधारिणः ।।

(२) व्यासतो for वदतो (क); विस्तरेण द्विजोत्तम (ग); द्विजोत्तमः; तपोधन;

after line 1 ins (६९६) वर्णसङ्करजो धर्मः कथं तं नास्पृशत्तदा ।
जरासश्चारणं चापि अन्यदेहेषु नः श्रुतम् ।। (अधिकः घपाठे)

* बोरि क्रिटिकल् पुस्तके appendix निर्दिष्टाः केचनश्लोकाः appendix इत्येव श्लोकाधस्तनभागे निर्दिष्टाः ।

*. क्वचितु soubstitute इति पाठान्तर एव निर्दिष्टाः ।

*. श्लोकसङ्ख्याविषये अयं क्रमः अदृतः । प्रारम्भगतसङ्ख्या आपर्वम् अनुवर्तते । अध्यायान्ते आहत-अध्याय-श्लोकसङ्ख्या निर्दिष्टा यथा 'अस्मिन्नध्याये श्लोकाः सन्ति' इत्येवम् ।

*. भागवतमहाभारतयोः ताळपत्रेषु अयमपि एकः पाठभेदः दरीदृश्यते । भागवतपाठेषु शुक उवाच; परीक्षिदुवाच; राजोवाच इत्यादि पठ्यते क्वचित् । क्वचित् श्रीशुकः इत्येव । महाभारते तु सर्वत्र उवाच इति नैव पठ्यते । कुम्भकोणमुद्रितपुस्तके एवं बोरि पुस्तकेपि उवाचशब्दः पठ्यते । अयं नास्माभिरादृतः । केवलं जनमेजयः; भीमसेनः इत्याद्येव ।

* बोरिपुस्तके मध्ये मध्ये अध्यायाः यत्र परिसमाप्यन्ते तत्र वाविळ्ळपुस्तके अध्यायः नैव समाप्यते । एवं टि. आर् कृष्णाचार्यपाठेपि । अत्र प्राचीनतौळवपाठ एव आदृतः । यत्र द्वयोरध्यायोः एकीभावः तत्र बोरिपुस्तकपत्रसङ्ख्या क्वचिद्दत्ता; क्वचिन्नैव ।

*. line interpretation; आनुपूर्वीव्यत्यासः' यत्र दृश्यते तदपि सूचितः । तत्र निर्देशक्रमः एकरूपतया नैव निर्दिष्टः ।

*. पर्वारम्भे महाभारततात्पर्यनिर्णयगताः तत्पर्वकथासङ्ग्रहश्लोकाः उपनिबद्धाः ।

*. महाभारतकथाविषयानुक्रमणिकापि श्लोकानुसारेण प्रत्यध्यायं विस्तरतो निवेशिता

१*.यद्यपि महाभारतलक्षालङ्कारः एम्. एस्. पि द्वारा मुद्रितः । अत्र विद्यमानाध्याय-श्लोकसङ्ख्यादि न वावीळ्ळ-टि.आर् पाठानुसारी इति केवलं विषयमात्रमत्र निवेशितम् । अध्यायसङ्ख्यादि तौळवपाठानुसार्येवेति चावगन्तव्यम् ।।

*.लक्षालङ्कारे व्याख्याताः श्लोकाः क्वचित् वावीळ्ळपुस्तके नोपलभ्यन्ते । टि.आर् कृष्णाचार्यपाठे उपलभ्यन्त इति तेपि मूलश्लोकतया क्वचिद् ग्राह्या भवन्तीत्यस्माकमाशयः । महन्तः प्रष्टव्याः

*. मूलश्लोकाः बृहदक्षरै राराज्यन्ते । अधिकश्लोकाः अल्पाक्षरैः मूलश्लोकमध्य एव अर्थानुगुणाः विषयविशेषगर्भिताः मूलश्लोकानां पूर्वं पश्चाद्वा, पूर्वार्ध-उत्तरार्धमध्ये वा अनङ्कितसङ्ख्याः निवेशिताः । एतेषां महाभारतान्तर्गतत्वं वा अनन्तर्गतत्वं वा न निश्चेतुं प्रभवामः ।।

⁕.तत्र पाठान्तरदानसमये पूना(बोरि)पाठान्तराणि अपि निर्दिष्टानि । तद्यथा-

एवं पाठान्तरदानसमये आदृताः अपरेपि विशेषाः एवं निर्दिष्टाः –

सर्वमूलग्रन्थटीका-टिप्पणीषु महाभारतपाठः

⁕ श्रीमन्मध्वाचार्यैः तत्र तत्र महाभारतवचनानि 'भारते, मोक्षधर्मपर्वणि' इत्यादिरूपेण नामनिर्देशमात्रेणसूचितानि।तानिकेचनउपलभ्यन्ते,नोपलब्धानिबहूनिइत्यनेकेषांप्रवादः। अस्माभिः अस्मिन् संस्करणे श्रीमदाचार्योदाहृतवचननां आकरमपि पर्व-अध्याय-श्लोकसङ्ख्या-निर्देशपूर्वकमाकरः प्रादर्शि । यथा -गीताभाष्ये 'अनन्तग अनन्त' इत्येवोदाहृतम् । अस्माभिः अस्य शान्तिपर्वान्तर्गतत्वं संशोध्य '(सर्वमूलो-) गीताभाष्योदाहृत-महाभारतवचनानि 'इति सङ्गृह्य पर्वारम्भे स्थलनिर्देशपूर्वकं १२-१३१-५ इत्येवं निर्दिश्यते ।।

⁕ सर्वमूलेषु- महाभारतवचनतया अनुदाहृतान्यपि प्रमणवचनानि 'इतिच' इत्येवं रूपेण निबद्धानि । यथा गीताभाष्ये 'पृथिवी धर्ममूर्धनि' इति च ' इति। एतादृशानि वाक्यान्यपि अस्मदीयमहाभारतसंशोधनावसरे संशोध्य आकरप्रदर्शनपूर्वकं निर्दिष्टानि ।

⁕ किञ्च महाभारतवाक्यानि टिप्पणीषु तत्र तत्र प्रासङ्गिकतया उदाहृतानि ।

एवं भागवतयादुपत्ये -शर्यातिकथाप्रसङ्गे आदिपर्ववचनमुदाहृतम् - 'यथोक्तमादिपर्वणि-जिगीषया ततो देवा वव्रिरे.. इत्यारभ्य 'दुहिता वृषपर्वणः ' इत्यन्तः ८० श्लोकाः ।

भरतराट्कथाप्रसङ्गेपि - आदिपर्ववचनम् -'तां विशोध्य तदा राजा देवदूतेन भारत... इत्यारभ्य 'मया शुभे' इत्यन्तो भागः ।

विश्वामित्रप्रसङ्गे गदापर्ववचनमुदाहृतम् -'सतु वव्रे वरं राजन् ब्राह्मणः स्यामहं त्विति । तथेति चावदद् ब्रह्मा सर्वलोकपितामहः इति गदापर्वणि' इति ।।

एवं उद्योगपर्ववचनम् -'प्रतिगृह्य ततो धर्मः... विश्वामित्रस्तथाभवत् ।

एवं शान्तिपर्ववचनम् -च्यवनाद्वरदानेन रुचिकस्य ... ब्राह्मण्यं समवाप्तवान् ।।'

एतादृशग्रन्थसम्पादनकाले सहकृतवभ्द्यः समेभ्यः विदूवभ्द्यः धन्न्यवादः ।।

सम्पादकमण्डली

# वनपर्वणि-द्वितीयभागः

# तीर्थयात्रापर्व

## 03- 04 - 082

## ८२. व्द्यशीतितमोऽध्यायः

लोमशेन युधिष्ठिरं प्रति विन्ध्यगिरेरभिवृद्धेरगस्त्येन तन्निरोघस्य च हेतुकथनम् ।। १ ।।
देवैस्समुद्रशोषणं प्रार्थितेनागस्त्येन तैस्सह समुद्रं प्रति गमनम् ।। २ ।।

युधिष्ठिरः

किमर्थं सहसा विन्ध्यः प्रवृद्धः क्रोधमूर्च्छितः ।
एतदिच्छाम्यहं श्रोतुं विस्तरेण महामुने ।। १ ।।[०१]

लोमशः

अद्रिराजं महाशैलं मेरुं कनकपर्वतम् ।
उदयास्तमने भानुः प्रदक्षिणमवर्तत।[०२]
तं तु दृष्ट्वा तथा विन्ध्यः शैलः सूर्यमथाब्रवीत् ।। २ ।।

विन्ध्यः

य(त)था हि मेरुर्भवता नित्यशः परिगम्यते ।
प्रदक्षिणश्च क्रियते मामेवं कुरु भास्क ।। ३ ।।[०३]

लोमशः

---

(०१) (३)इच्छा महे for म्यहं ); (४) मते for मुने );,
(०२) (१)सारं for राजं); राज for शैलं); (२) एकं; अर्थं for मेरुं); (३) ०स्तमने ,
(०३) (१)तत्रः अथ for तं तु); तु दृष्ट्वा तदा for तथा); (३) हि मेरुर् यथा मेरुर्भगवता प्रदक्षिणश्च ,

एवमुक्तस्ततः सूर्यः शैलेन्द्रं प्रत्यभाषत ।। ४ ।।

सूर्यः

नाहमात्मेच्छया शैलं करोम्येनं प्रदक्षिणम् ।
एष मार्गः प्रदिष्टो मे यैरिदं निर्मितं जगत् ।। ५ ।।(०१)

लोमशः

एवमुक्तस्ततः क्रोधात्प्रवृद्धः सहसाचलः ।
सूर्याचन्द्रमसोर्मार्गं रोद्धुमिच्छन्परन्तप ।। ६ ।।(०२)

ततो देवाः सहिताः सर्व एव विन्ध्यं समागम्य महाद्रिराजम् ।
निवारयामासुरुपायतस्तं न च स्म तेषां वचनं चका ।। ७ ।।(०३)

अथाभिजग्मुर्मुनिमाश्रमस्थं तपस्विनं धर्मभृतां वरिष्ठम् ।
अगस्त्यमत्यद्भुतवीर्यवन्तं तं चार्थमूचुः सहिताः सुरास्ते।। ८ ।।(०४)

देवाः

सूर्याचन्द्रमसोर्मार्गं नक्षत्राणां गतिं तथा ।
शैलराजो वृणोत्येष विन्ध्यः कोप(क्रोध)वशानुगः ।। ९ ।।

तं निवारयितुं शक्तो नान्यः कश्चिद्द्विजोत्तम ।
ऋते त्वां हि महाभाग तस्मादेनं निवारय ।। १० ।।(०५)

लोमशः

---

(०१) (३) शैलं; शैलः for शैल); यैर् for येन);,

(०२) (१) क्रुद्धः for क्रोधात्) (२) स महा चलः; स महाबलः (३) सूर्यfor सूर्या);
(४) ख०ग०घ०मैच्छत् for मिच्छन् );,

(०३) (२) विन्ध्यं (तदा) for सेन्द्राः); समागत्य तम् for महा); (३)स्म for तं)
(४) (ए)व (अ)पि for स्म);,

(०४) (३)०दीप्तवीर्य; वीर्यवन्तं for वीर्यदीप्तं); (४) च; तं for ते);,

(०५) (३)त्वदृ (मृ)ते हि for ऋते त्वां हि ) (४) एतं for एनं );,

तच्छ्रुत्वा वचनं विप्रः सुराणां शैलमभ्यगात् ।
सोऽभिगम्याब्रवीद्विन्ध्यं सदारः समुपस्थितम्(तः) ।। ११ ।।(०१)

अगस्त्यः

मार्गमिच्छाम्यहं दत्तं भवता पर्वतोत्तम ।
दक्षिणामभिगन्तास्मि दिशं कार्येण केनचित् ।। १२ ।।(०२)

यावदागमनं मह्यं तावत्त्वं प्रतिपालय ।
निवृत्ते मयि शैलेन्द्र ततो वर्धस्व कामतः ।। १३ ।।

लोमशः

एवं स समयं कृत्वा विन्ध्येनामित्रकर्शन ।
अद्यापि दक्षिणाद्देशाद्वारुणिर्न निवर्तते ।। १४ ।।(०३)

एतत्ते सर्वमाख्यातं यथा विन्ध्यो न वर्धते ।
अगस्त्यस्य प्रभावेण यन्मां त्वं परिपृच्छसि ।। १५ ।।(०४)

कालेयास्तु यथा राजन्सुरैः सर्वैर्निषूदिताः ।
अगस्त्याद्वरमासाद्य तन्मे निगदतः शृणु।(०५)
त्रिदशानां वचः श्रुत्वा मैत्रावरुणिरब्रवीत् ।। १६ ।।

अगस्त्यः

किमर्थमभियाताः स्थ वरं मत्तः कमिच्छथ ।। १७ ।।

लोमशः

---

(०१) (१)देवः for विप्रः); (२) अन्ययात् (४) ०स्थितं for स्थितः );,
(०२) (१)दातुं; यातुं for दत्तं); (३) गच्छामि for गन्तास्मि);,
(०३) (१)ते तु for स); (२) (अ)द्भिवरेण ह ( हि); ()मिन्नकर्षण ( णः ) ,
(०४) (३)प्रभावेण (४) मा for मां );,
(०५) (२) क०कतग०र्निषूदिताः; ख०घ०र्निवेदिताः, यथा for सुरैः); सर्वे देवैर् for सर्वैर्); निसूदिताः निवेदिताः; निपातिताः(३) अगस्त्यदूरमा० अगस्त्यं द्वारमा ,

**एवमुक्तास्ततस्तेन देवता मुनिमब्रुवन् ।**[०१]
**सर्वे प्राञ्जलयो भूत्वा पुरन्दरपुरोगमाः ।। १८ ।।**

**देवाः**

एवं त्वयेच्छाम कृतं हि कार्यं महार्णवं पीयमानं महात्मन् ।
ततो वधिष्याम सहानुबन्धान्कालेयसञ्ज्ञान्सुरविद्विषस्तान्।। १९ ।।[०२]

**लोमशः**

**त्रिदशानां वचः श्रुत्वा तथेति मुनिरब्रवीत् ।**
**करिष्ये भवतां कामं लोकानां च महत्सुखम् ।। २० ।।**

एवमुक्त्वा ततोऽगच्छत्समुद्रं सरितां पतिम् ।
**ऋषिभिश्च तपः सिद्धैः सार्धं देवैश्च सुव्रत ।। १९ ।।**[०३]

मनुष्योरगगन्धर्वयक्षकिम्पुरुषास्तथा ।
**अनुजग्मुर्महात्मानं द्रष्टुकामास्तदद्भुतम् ।। २२ ।।**

ततोऽभ्यगच्छन्सहिताः समुद्रं भीमनिःस्वनम् ।
**नृत्यन्तमिव चोर्मीभिर्वल्गन्तमिव वायुना ।। २३ ।।**

हसन्तमिव फेनौघैः स्खलन्तं कन्दरेषु च ।
**नानाग्राहसमाकीर्णं नानाद्विजगणान्वितम् ।। २४ ।।** [०४]

---

(०१) (२)तथेतिमुनिरब्रवीत् अगस्त्य उ (३) उप for अभि); स्म for स्थ); (४)कम् for किम्); तदा तेथ; ते तं for तेन); देवता for देवास्तं);,

(०२) (१)एकं; एतं for एवं); वयं for कृतं) हि कार्य for महर्षे); (२) महान्तं for महात्मन्); (४) क०ग०कालेयसृष्टान्; ख०घ०कालेनसृष्टान् for कालेयसञ्ज्ञान्); सुरविद्विषास्वान्; असुरद्विषागणान्; सुरविद्विषाणान्; ०विद्विषोगणान्; असुरद्विषस्तान्; सुरविद्विषाश्च ,

(०३) (३)तपःसिद्धैश्च मुनिभिः (४) सुव्रत; सुव्रतैः; संवृतः; संवृतं ,

(०४) (१)क०ग०घ०फेनौधैसक् स्खलन्तं कन्दरे ष्विव,ख० फैनौधैर् नानाद्विजगणायुतम् ० नघ्ये अर्धं नास्ति, (२)कन्दरै रिव for रेषु च); (अ)पि।। (इ)व for च ); कन्दरेषु च नादितं (४)गणान्वितं; निषेवितं; ०गणैर्युतं,

अगस्त्यसहिता देवाः सगन्धर्वमहोरगाः ।
ऋषयश्च महाभागाः समासेदुर्महोदधिम् ।। २५ ।।

अस्मिन् तीर्थयात्रापर्वणि ८२अध्याये २५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि द्व्यशीतितमोऽध्यायः ।। ८२ ।।

(तीर्थयात्रापर्वणि एकोनचत्वारिंशोऽध्यायः)

# 03- 04 - 083

## ८३. त्र्यशीतितमोऽध्यायः

अगस्त्येन समुद्रसलिले निपीते देवैर्दैत्यहननम् ।। १ ।। देवैः पुनरर्णवपूरणाय पीतोदकोत्सर्जनं प्रार्थितेनागस्त्येन तस्य स्वेन जीर्णीकरणोक्तौ तदर्थं ब्रह्माणं प्रति प्रार्थनम् ।। २ ।। ब्रह्मणा देवान् प्रति भगीरथेन समुद्रपूरणकथनम् ।। ३ ।।

लोमशः

समुद्रं स समासाद्य वारुणिर्भगवानृषिः ।
उवाच सहितान्देवानृषींश्चैव समागतान् ।। १ ।।(०१)

अगस्त्यः

अहं लोकहितार्थं वै पिबामि वरुणालयम् ।
भवद्भिर्यदनुष्ठेयं तच्छीघ्रं संविधीयताम् ।। २ ।।(०२)

लोमशः

एतावदुक्त्वा वचनं मैत्रावरुणिरच्युतः ।
समुद्रमपिबत्क्रुद्धः सर्वलोकस्य पश्यतः ।। ३ ।।

---

(०१) (१)स समुद्रं (२) मुनिः for ऋषिः); (३) सर्वान् for देवान्); (४) देवर्षींश्च; ऋषींश्चापि,
(०२) (१)अहं for एष); ०हिता र्थाय (३) भगवान्; भवतां for भवद्भिर्);;

पीयमानं समुद्रं तु(तं) दृष्ट्वा सेन्द्रास्तदामराः ।
विस्मयं परमं जग्मुः स्तुतिभिश्चाप्यपूजयन् ।। ४ ।।(०१)

देवाः

त्वं नस्त्राता विधाता च लोकानां लोकभावन ।
त्वत्प्रसादात्समुच्छेदं न गच्छेत्सामरं जगत् ।। ५ ।।(०२)

स पूज्यमानस्त्रिदशैर्महात्मा गन्धर्वतूर्येषु नदत्सु सर्वशः ।
दिव्यैश्च पुष्पैरवकीर्यमाणो महार्णवं निःसलिलं चकार ।। ६ ।।(०३)

दृष्ट्वा कृतं निःसलिलं महार्णवं सुराः समस्ताः परमप्रहृष्टाः ।
प्रगृह्य दिव्यानि वरायुधानि तान्दानवाञ्जघ्नुरदीनसत्त्वाः ।। ७ ।।(०४)

ते वध्यमानास्त्रिदशैर्महात्मभिर्महाबलैर्वेगिभिरुन्नदद्भिः ।
न सेहिरे वेगवतां महात्मनां वेगं तदा धारयितुं दिवौकसाम् ।। ८ ।।(०५)

ते वध्यमानास्त्रिदशैर्दानवा भीमनिःस्वनाः ।
चक्रुः सुतुमुलं युद्धं मुहूर्तमिव भारत ।। ९ ।।(०६)

ते पूर्वं तपसा दग्धा मुनिभिर्भावितात्मभिः ।
यतमानाः परं शक्त्या त्रिदशैर्विनिषूदिताः ।। १० ।।(०७)

---

(०१) (१)तं for तु०); (२) सेद्राः for देवाः); तथा सुराः; तदा मगः; सहामराःfor सवा); (४) (अ)भ्यपु; (अ)पि पू for (अ)प्यपू);,

(०२) (१)देवता त्वं for त्वं नस्त्राता); (२) भावन; ०पावनः,

(०३) (१)स for सं ); महात्मभिः for महात्मा); (२) मृदङ्गं for गन्धर्व); चैव for सर्वशः); (३) अनु for अव० );,

(०४) (१)समुद्रं for महार्णवं ); (३) चापानि; सर्वाणि for दिव्यानि );,

(०५) (२) ख०गःघ०-बलतो वेगिभिरून्नदद्भिः,बला for बलैद्); वेगितैः वेगत for वेगिभिद्); उन्नमद्भिः; उल्लसद्भिः; ग्रेज्ञतैर्नदद्भिः,

(०६) (२)०निःस्वनाः (३) सुतुमलं,

(०७) (४)०सूदिताः; पातिताः,

ते हेमनिष्काभरणाः कुण्डलाङ्गदधारिणः ।
निहता बह्वशोभन्त पुष्पिता इव किंशुकाः ।। ११ ।।(०१)

हतशेषास्ततः केचित्कालेया मनुजोत्तम ।
विदार्य वसुधां देवीं पातालतलमास्थिताः ।। १२ ।।(०२)

निहतान्दानवान्दृष्ट्वा त्रिदशा मुनिपुङ्गवम् ।
तुष्टुवुर्विविधैर्वाक्यैरिदं वचनमब्रुवन् ।। १३ ।।(०३)

देवाः

त्वत्प्रसादान्महाभागलोकैः प्राप्तं महत्सुखम् ।
त्वत्तेजसा च निहताः कालेयाः क्रूरविक्रमाः ।। १४ ।।(०४)

पूरयस्व महाबाहो समुद्रं लोकभावन ।
यत्त्वया सलिलं पीतं तदस्मिन्पुनरुत्सृज ।। १५ ।।(०५)

लोमशः

एवमुक्तः प्रत्युवाच भगवान्मुनिपुङ्गवः ।
तांस्तदा सहितान्देवानगस्त्यः सपुरन्दरान् ।। १६।।(०६)

अगस्त्यः

जीर्णं तद्धि मया तोयमुपायोऽन्यःप्रचिन्त्यताम् ।
पूरणार्थं समुद्रस्य भवद्भिर्यत्नमास्थितैः ।। १७ ।।(०७)

---

(०१) (२) बह्वशोभन्त किंशुकाः -ख ।

(०२) (१)०शिष्टास् for शेषास् ); (४) आस्थिताः for आश्रिताः);,

(०३) (४)इदं वचनमब्रुवन्,

(०४) (१)महावाहो; मुनिश्रेष्ठ for महाभाग); (३) वि for च); (४) ०कर्मणः (०विक्रमाः),

(०५) (१)०विप्र; ०भागः; भाग for बाहो); (२) लोक भावनं; पावनं ,

(०६) (३)तान्द्रि; तदा for तथा);,

(०७) (२) क०ख०ग०घ०दद्धि मया तोयं,सत्तमः for पुङ्गवः);,

### लोमशः

एतच्छ्रुत्वा तु वचनं महर्षेर्भावितात्मनः ।
विस्मिताश्च विषण्णाश्च बभूवुः सहिताः सुराः ।। १८ ।।

परस्परमनुज्ञाप्य प्रणम्य मुनिपुङ्गवम्।
प्रजाः सर्वा महाराज विप्रजग्मुर्यथागतम् ।। १९ ।।

त्रिदशा विष्णुना सार्धमुपजग्मुः पितामहम्
पूरणार्थं समुद्रस्य मन्त्रयित्वा पुनः पुनः ।। २० ।।

ते धातारमुपागम्य त्रिदशाः सह विष्णुना।(०१)
ऊचुः प्राञ्जलयः सर्वे सागरस्याभिपूरणम् ।। १९ ।।(०२)

तानुवाच समेतांस्तु ब्रह्मा लोकपितामहः ।
निर्ह्लादिन्या गिरा राजन्देवानाश्वासयंस्तदा ।। २२ ।।

### ब्रह्मा

गच्छध्वं विबुधाः सर्वे यथाकामं यथेप्सितम्।
महता कालयोगेन प्रकृतिं यास्यतेऽर्णवः ।। २३ ।।

ज्ञातीन्वै(तींश्च) कारणं कृत्वा महाराजो भगीरथः ।(०३)
* आनयिष्यद्यदा गङ्गां तदा क्षेमो भविष्यति ।
पितामहवचः श्रुत्वा सर्वे विबुधसत्तमाः ।
पूरयिष्यति तोयौघैः समुद्रं निधिमम्भसाम् ।। २४ ।।(०४)

अस्मिन् तीर्थयात्रापर्वणि ८३अध्याये २४ श्लोकाः सन्ति

---

(०१) (१) प्रोचुः for ऊचुः ); (अ)पि for (अ)भि) पूरणे for पूरणम्) ,
(०२) (२)उपाजमसुः (४) मन्त्रयन्तः परस्परं for पुनः पुनः); भवद्भिर्यसमास्थितैः
(०३) (३)तु; च for वै); (४) ०राजाद्; राजो; भोगो; भागो for राज्ञो); भगीरथः ,
(०४) ( स मुनिर् for समुद्रं );,

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि त्र्यशीतितमोऽध्यायः ।। ८३ ।।

(तीर्थयात्रापर्वणि चत्वारिंशोऽध्यायः)

## 03- 04 - 083

# ८४. चतुरशीतितमोऽध्यायः

युधिष्ठिरेण तत्प्रकारं पृष्टेन लोमशेन तदुपोद्घाततया सगरस्य भार्याद्वये पुत्रलाभप्रकारकथनम् ।। १ ।। अश्वमेधे दीक्षितसगराज्ञया षष्टिसहस्रैस्तत्पुत्रैर्भुवं संचारितस्याश्वस्य समुद्रतीरे अन्तर्धानम् ।। २ ।। पित्राज्ञया हयान्वेषणाय समुद्रतीरं खनद्भिः सागरैः पातालतले तपस्यतो भगवतः कपिलस्य तत्समीपचारिणो हयस्य च दर्शनम् ।। ३ ।। कपिलेन हयचोरत्वभ्रमेण स्वजिघांसूनां सर्वसागराणां नयनानलेन भस्मीकरणम् ।। ४ ।। सगरनिदेशान्निर्गतेनांशुमता कपिलप्रसादनेन पलानयनपूर्वकं पितामहयज्ञमसमापनम् ।। ५ ।। सगर इवांशुमत्यपि स्वर्गते दिलीपेन गङ्गावतरणाय यतमानेनापि तदपारयतैव त्रिदिवगमनम् ।। ६ ।।

### युधिष्ठिरः

कथं वै ज्ञातयो ब्रह्मन्कारणं चात्र किं मुने ।
कथं समुद्रः पूर्णश्च भगीरथपरिश्रमा(प्रतिश्रया)त् ।। १ ।।(०१)

एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन ।
कथ्यमानं त्वया विप्र राज्ञां चरितमुत्तमम् ।। २ ।।

### वैशम्पायनः

एवमुक्तस्तु विप्रेन्द्रो धर्मराज्ञा महात्मना ।
कथयामास माहात्म्यं सगरस्य महात्मनः ।। ३ ।।(०२)

### लोमशः

---

(०१) (२)चाभवन् for चात्र किं); वै for किं); (३) तु for च); (४) ०प्रतिश्रयात्; परिश्रयात्; परिश्रमैः,
(०२) (१)राजेन्द्र for विप्रेन्द्रो); (२) धर्मराजेनधीमता ,

इक्ष्वाकूणां कुले जातः सगरो नाम पार्थिवः ।
रूपसत्त्वबलोपेतः च सापुत्रः प्रतापवान् ।। ४ ।।[०१]

स हैहयान्समुत्साद्य तालजङ्घाश्च भारत ।
वशे च कृत्वा राजन्यान्स्वराज्यमन्वशासत ।। ५ ।।[०२]

तस्य भार्ये त्वभवतां रूपयौवनदर्पिते ।
वैदर्भी भरतश्रेष्ठ शैव्या च भरतर्षभ ।। ६ ।।[०३]

स पुत्रकामो नृपतिस्तप्यते स्म महत्तपः ।
पत्नीभ्यां सह राजेन्द्र कैलासं गिरिमाश्रितः ।। ७ ।।[०४]

स तप्यमानः सुमहत्तपो योगसमन्वितः ।
आससाद महात्मानं त्र्यक्षं त्रिपुरमर्दनम् ।। ८ ।।[०५]

शङ्करं भवमीशानं पिनाकिं शूलपाणिनम् ।
त्र्यम्बकं शिवमुग्रेशं बहुरूपमुमापतिम् ।। ९ ।।[०६]

* लोकधातारमजरममरेशं पुरातनम् ।
दिग्वाससं वृषरथमचिन्त्याद्भुतयोगिनम् ।।

स तं दृष्ट्वैव वरदं पत्नीभ्यां सहितो नृपः ।

---

(०१) (३)गुणोपेतः,

(०२) (१)हैहयान्स हेहयान् समुद्राद्यान् समुत्साद्यान् for समुत्साद्य);) (२)मलङ्कांश्चैव; ससङ्कां चैव; सलङ्का चैव for ताल); (३) कृत्वा च; कृत्वा तु; कृत्वा स राजन्यान् for राज्ञोन्यान्) (४) स for स्व ); चान्वशा (गा)त्ततः; नाम शाश्वतः;चा न्वशासत; अनुशासतः अनुशिष्टवान् for अन्वशासत );,

(०३) (१)उ ( ह्यु )भे राजन्; ह्यभ वतां; तु भवतां (४) पाण्डुनन्दन; अप्सरसो पमा; अप्सरसा समे; अप्सरसोपमे; स्स रसा समे; कुरुनन्दन for भरत );,

(०४) (२)तप्यते; तेपे च; प्रतेपेfor ततापे); स्म; च for सु ); (४) कैलास; कैलाश; कैलाशं,

(०५) (३)क०ख०ग०आससाद,त्र्यक्षं त्रिपुरमर्दनम् । (४)शर्व for त्र्यक्षं ); त्रिषुरघातिनं; त्रिभुवनेश्वर; ०घातकं

घ०-आससाद महात्मासं शर्वंत्रिपुरघातिनम् ।

(०६) (१)शर्वम् for भवम्); (२) पिनाकिं शूलपाणिन (३) उग्रेषुं for उग्रेशं); त्रियम्बकंशिवं श्रेष्ठं,

प्रणिपत्य महाबाहुः पुत्रार्थं(र्थे) समयाचत।
तं प्रीतिमान्हरः प्राह सभार्यं नृपसत्तमम् ।। १० ।।(०१)

यस्मिन्वृतो मुहूर्तेऽहं त्वयेह नृपते वरम् ।। ११ ।।(०२)

षष्टिः पुत्रसहस्राणि शूराः परमदर्पिताः ।
एकस्यां सम्भविष्यन्ति पत्न्यां नरवरोत्तम ।। १२ ।।(०३)

ते चैव सर्वे सहिताः क्षयं यास्यन्ति पार्थिव ।
एको वंशधरः शूर एकस्यां सम्भविष्यति ।। १३ ।।(०४)

लोमशः

एवमुक्त्वा तु तं रुद्रस्तत्रैवान्तरधीयत।(०५)
स चापि सगरो राजा जगाम स्वं निवेशनम् ।। १४ ।।

पत्नीभ्यां सहितस्तत्र सोऽतिहृष्टमनास्तदा।(०६)
कालं शम्भुवरप्राप्तं प्रतीक्षन्सगरोऽनयत् ।। १५ ।।

तस्येमे भरतश्रेष्ठ भार्ये कमललोचने ।
वैदर्भी चैव शैब्या च गर्भिण्यौ सम्बभूवतुः ।। १६ ।।(०७)

ततः कालेन वैदर्भी गर्भालाबुं व्यजायत ।

---

(०१) (१)भवः for हरः); (३) अस्मिन् for य);,
(०२) (४) (ए)व for (इ)ह); वरः for वरम्);,
(०३) (१)पुत्राः षष्टिसह (२) परम for समर); (३) एकस्याः for स्यां); ते for सं ); (४) पलया for ०वया); नरवरोत्तम; नृपवरात्मज; ते च नरोत्तम for तव नरो );,
(०४) (१)तथैव; ते चापि for ते चैव); प्रागेव हि for चैव सर्वे); सहिताः सर्वे (३) वंशकरः,
(०५) (४) एकस्याः for ०स्वां); ततो for तु तं);,
(०६) (३)तत्र for तात); (४) नाति०; सम्प्र; सोपि for सोति);,
(०७) (१)तस्यार्थे; तस्य ते; तस्येमे भरतश्रेष्ठ (२) द्वे for ते);भार्ये कमललोचने ,

शैब्या च सुषुवे पुत्रं कुमारं देवरूपिणम् ।। १७ ।।[०१]

तदालाबुं समुत्स्रष्टुं मनश्चक्रे स पार्थिवः ।
अथान्तरिक्षाच्छुश्राव वाचं गम्भीरनिःस्वनाम् ।। १८ ।।[०२]

अशरीरिणी

राजन्मा साहसं कार्षीः पुत्रान्न त्यक्तुमर्हसि ।
अलाबुमध्यान्निष्कृष्य बीजं यत्नेन गोप्यताम् ।। १९ ।।[०३]

सोपस्वेदेषु पात्रेषु घृतपूर्णेषु भागशः ।
ततः पुत्रसहस्राणि षष्टि प्राप्स्यसि पार्थिव ।। २०।।[०४]

महादेवेन दिष्टं ते पुत्रजन्म नराधिप ।
अनेन क्रमयोगेन मा ते बुद्धिरतोऽन्यथा ।। २१ ।।[०५]

लोमशः

एतच्छ्रुत्वान्तरिक्षाच्च स राजा राजसत्तम ।
यथोक्तं तच्चकाराथ श्रद्दधद्भरतर्षभ ।। २२ ।।

एकैकशस्ततः कृत्वा बीजं बीजं नराधिपः ।
घृतपूर्णेषु कुम्भेषु तान्भागान्विदधे ततः ।। २३ ।।

धात्रीश्चैकैकशः प्रादात्पुत्ररक्षणतत्परः ।[०६]

---

(०१) (१)काले तु for कालेन); (२) गर्भालाबु; लाम्बु; गर्भतुंवं असूयत; व्यसूयत ,

(०२) (१)तमलाबुं; तदलाम्बु; अलाम्बु तत्; ततस्तुम्बं (२) ()थfor स); (३) ख०घ०अथान्तरिक्षाच्छुश्राव, ततो for अथ);(अ)त रिक्षे for क्षात्); (४) निःस्वनाः,

(०३) (३)निष्टयम्य; निष्कृत्य निष्कृत्य (४) धार्यं for गोप्य );,

(०४) (१)भाण्डेषु for पात्रे ०); (३) तत्र for ततः); (४) भागन्नः; भारतfor पार्थिव);,

(०५) (१)निर्द्धिष्टं दत्तं तत्; दिष्टं तत् for दिष्टं ते); (२) जना for नरा ); (४)भूद् for ते); मा ते च्छुद्धिरन्यथा ,

(०६) (१) जीवं जीवं; वाजं ( ज ) पूर्णं for वीजं वीजं) ; ०त्वेप for ०धिपः); क्रुद्धेषु for कुम्भेषु); गर्भान् for भागान्); निदधे for विदधे); पुनः for ततः),

ततः कालेन महता समुत्तस्थुर्महाबलाः ।। २४ ।।[०१]

षष्टिः पुत्रसहस्राणि तस्याप्रतिमतेजसः ।
रुद्रप्रसादाद्राजर्षेः समजायन्त पार्थिव ।। २५ ।।[०२]

ते घोराः क्रूरकर्माण आकाशपरिसर्पिणः ।
बहुत्वाच्चावजानन्तः सर्वाँल्लोकान्सहामरान् ।। २६ ।।[०३]

त्रिदशांश्चाप्यबाधन्त तथा गन्धर्वराक्षसान् ।
सर्वाणि चैव भूतानि शूराः समरशालिनः ।। २७ ।।[०४]

वाध्यमानास्ततो लोकाः सागरैर्मन्दबुद्धिभिः ।। २८ ।।

ब्रह्माणं शरणं जग्मुः सहिताः सर्वदैवतैः ।[०५]
तानुवाच महाभागः सर्वलोकपितामहः ।। २९ ।।[०६]

ब्रह्मा

गच्छध्वं त्रिदशाः सर्वे लोकैः सार्धं यथागतम् ।। ३० ।।[०७]

नातिदीर्घेण कालेन सागराणां क्षयो महान् ।
भविष्यति महाघोरः स्वकृतैः कर्मभिः सुराः ।। ३१ ।।

कपिलं ते समासाद्य विनशिष्यन्त्यसंशयम् ।। ३२ ।।

लोमशः

एवमुक्तास्तु ते देवा लोकाश्च मनुजेश्वर।

---

(०१) (१) कालेन महता षष्टिः,
(०२) (४)सगरस्य महात्मनः,
(०३) (२)आकाशे; आकाशं (४) सहेश्वरान्; सुरासुरान्; चराच०; सहासुं for सहाम);,
(०४) (१)(अ)भ्य ((अ)प्य)धावन्त for (अ)प्यबा) (३) तथा सर्वाणि भूतानि ,
(०५) (१)तदा; तथा for ततो); (४) सर्वदेवताः; देवतैः; वेदितैः,
(०६) (१)महाभाग; ततो ब्रह्मा
(०७) (४) क्रमं for गतम्);,

पितामहमनुज्ञाप्य विप्रजग्मुर्यथागतम् ।। ३३ ।।[०१]

ततः काले बहुतिथे व्यतीते भरतर्षभ।
दीक्षितः सगरो राजा हयमेधेन वीर्यवान् ।। ३४ ।।

तस्याश्वो व्यचरद्भूमिं पुत्रैः स परिरक्षितः ।[०२]
सर्वैरेव महोत्साहैः स्वच्छन्दप्रचरो नृप ।। ३५ ।।[०३]

समुद्रं स समासाद्य निस्तोयं भीमदर्शनम् ।
रक्ष्यमाणः प्रयत्नेन तत्रैवान्तरधीयत ।। ३६ ।।[०४]

ततस्ते सागरास्तात हृतं मत्वा हयोत्तमम्
आगम्य पितुराचख्युरदृश्यं तुरगं हृतम् ।। ३७ ।।[०५]

तेनोक्ता दिक्षु सर्वासु सर्वे मार्गत वाजिनम् ।। १४ ।।
ससमुद्रवनद्वीपां विचरन्तो वसुन्धराम् ।। ३८ ।।

ततस्ते पितुराज्ञाय दिक्षु सर्वासु तं हयम् ।
अमार्गन्त महाराज सर्वं च पृथिवीतलम् ।। ३९ ।।[०६]

ततस्ते सागराः सर्वे समुपेत्य परस्परम् ।
नाध्यगच्छन्त तुरगमश्वहर्तारमेव च ।। ४० ।।[०७]

---

(०१) (१)च ते तु ते; तदा for ततो); (२) मनुजोत्तम; ०जाधिप (४) प्रति for विप्र०);,

(०२) (१)महतिभिर् for बहु); ततो बहु तिथेकाले० व्यचरन्; विचरन्; ()प्यचरद् for ०व्यचरद्); भूमौ for भूमिं); च; स; तु; तैः for सु );,

(०३) महाभागैः महोश्। प्रचरान्; ०शौ प्रसरो प्रचरो ),

(०४) (१)स समुद्रं च for स );,

(०५) (१)तत्र for तात), (२) ज्ञात्वा; दृष्ट्वा for मत्वा ); (३) आगत्य for आगम्य); आचक्षुद् for ०स्युद्); भूयो; पुत्रा for सर्वे); नागन्तव्यमृते हयं ,

(०६) (१)ततः पित्राज्ञया सर्वे (३) सुगयन्तो for अमार्गन्त); महीपाल; हयं राजन् for महा); (४) सश्चेरुः सर्व हि; चेरुस्च for सर्व च);,

(०७) (४)अभि for अश्व); वा for च),

आगम्य पितरं चोचुस्ततः प्राञ्जलयोऽग्रतः ।। ४१ ।।

सागराः

ससमुद्रवनद्वीपा सनदीनदकन्दरा ।
सपर्वतवनोद्देशा निखिलेन मही नृप ।। ४२ ।।(०१)

* स्थितास्सर्वे महीपालास्सागरास्सहितास्तदा।

अस्माभिर्विचिता राजञ्छासनात्तव पार्थिव ।
न चाश्वमधिगच्छामो नाश्वहर्तारमेव च ।। ४३ ।।(०२)

लोमशः

श्रुत्वा तु वचनं तेषां स राजा क्रोधमूर्च्छितः ।
उवाच वचनं सर्वांस्तदा दैववशान्नृप ।। ४४ ।।(०३)

सगरः

अनागमाय गच्छध्वं भूयो मार्गत वाजिनम् ।
यज्ञियं तं विना ह्यश्वं नागन्तव्यं हि पुत्रकाः ।। ४५ ।।(०४)

लोमशः

प्रतिगृह्य तु सन्देशं पितुस्ते सगरात्मजाः ।
भूय एव महीं कृत्स्नां विचेतुमुपचक्रमुः ।। ४६ ।।(०५)

अथापश्यन्त ते वीराः पृथिवीमवदारिताम्

---

(०१) (१)आगत्य for आगम्य); पितरं प्रोचुः; पितुरुद्विग्नाः न ( ह्य )खिलेयं for लेन);,

(०२) (१)मार्गिता for विचिता); (३) अव०; अभि० for अधि०); (४)क०ग०-नाक्ष्वहर्तार-मेव च, वा for च);,

(०३) (१)तेषां वचनं (३) तनयान्; सहितान् for वचनं);,

(०४) (३) (अ) प्यश्वम;(अ)श्व मे; चाश्वं for ह्यश्वं);,

(०५) (२)पितुं for तत०); (३) सर्वा for कृत्स्नां );,

समुद्रे पृश्चिवोपाल पदमार्गं च वःत्त्र्यः ।। ४७ ।।(०१)

समासाद्य बिलं तच्चाप्यखनन्सगरात्मजाः ।
कुद्दालैर्ह्रेषुकैश्चैव समुद्रं यत्नमास्थिताः ।। ४८ ।।(०२)

स खन्यमानः सहितैः सागरैर्वरुणालयः ।
अगच्छत्परमामार्तिं दीर्यमाणः समन्ततः ।। ४९ ।।(०३)

असुरोरगरक्षांसि सत्त्वानि विविधानि च ।
आर्तनादमकुर्वन्त वध्यमानानि सागरैः ।। ५० ।।

छिन्नशीर्षा विदेहाश्च भिन्नत्वगस्थिसन्धयः ।
प्राणिनः समदृश्यन्त शतशोऽथ सहस्रशः ।। ५१ ।।(०४)

एवं हि खनतां तेषां समुद्रं वरुणालयम् ।
व्यतीतः सुमहान्कालो न चाश्वः समदृश्यत ।। ५२।।(०५)

ततः पूर्वोत्तरे देशे समुद्रस्य महीपते।
विदार्य पातालमथ सङ्क्रुद्धाः सगरात्मजाः ।। ५३ ।।(०६)

अपश्यन्त हयं तत्र विचरन्तं महीतले।
कपिलं च महात्मानं तेजोराशिमनुत्तमम् ।। ५४ ।।(०७)

---

(०१) (१)०पश्यंस्ततो for ०पश्यन्त ते),

(०२) (३)तत्र for तत्र); (४) (अ)प्यखनन् स्वंश्व for सवन्तः); चद्ध्यैं; हंस्तैं; धेहेक्लैं डिस्तै०; ० हेल्यं इंसुखैं कुमु मुसलैं for हेल्यै०); कुशलर्म्मकैन्त्रैवः त्त्युनइक् कैश्चैव० यत्नमास्थिताः अस्वनस्तदा) ततःfor तदा);,

(०३) (४)दीर्यमाणः,

(०४) (२)सम्भिन्नकुक्षिसन्धयः भिन्नयत्रास्थिसं धयः; ०जान्वस्थिसन्धयः; स्वगस्थिसन्धयः (०जत्वस्थिसश्रयाः) ०जात्वस्थिसन्धयः; जात्वस्थि भज्जताः,

(०५) (१)वि; तु; नि for हि); (२) वरूणा for मकरा );,

(०६) (२)विशां for मही );,

(०७) (३)मधः; तलं; ०मथो for मथ); ते प्रविष्टास्तु पातालं महीपते; महीतलं; विशां पते for महीतले);,

* विदार्यमाणां पृथिवीं सागरैर्बलदर्पितैः ।

तेजसा दीप्यमानं तु ज्वालाभिरिव पावकम्।(०१)
दृष्ट्वा हि हृषितास्सर्वे बभूवुस्सगरात्मजाः ।। ५५ ।।

ते तं दृष्ट्वा हयं राजन्सम्प्रहृष्टतनूरुहाः ।
अनादृत्य महात्मानं कपिलं कालचोदिताः ।
सङ्क्रुद्धाः समधावन्त ह्यश्वग्रहणकाङ्क्षिणः ।। ५६ ।।(०२)

ततः क्रुद्धो महाराज कपिलो मुनिसत्तमः ।। ५७ ।।(०३)

वासुदेवेति यं प्राहुः कपिलं मुनिपुङ्गवम्।(०४)
स चक्षुर्विकृतं कृत्वा तेजस्तेषु समुत्सृजन् ।। ५८ ।। (०५)

ददाह सुमहातेजा मन्दबुद्धीन्स सागरान्।(०६)
षष्टि तानि सहस्राणि युगपन्मुनिसत्तमः ।
सगरान्तिकमागच्छत्तच्च तस्मै न्यवेदयत् ।। ५९ ।।(०७)

तान्दृष्ट्वा भस्मसाद्भूतान्नारदः सुमहातपाः ।
सगरान्तिकमागत्य तच्च तस्मै न्यवेदमय् ।। ६० ।। (०८)

स तच्छ्रुत्वा वचो घोरं राजा मुनिमुखोद्गतम्

---

(०१) (३)तेजसा for तपसा); तु for तं); (४) ज्वलन्तम् for ज्वालाभिर्);,

(०२) (१)तं for ते); ०तु; ते for तं); महात्मानं; महाराज for हयं राजन्); (४)कालनोदिताः सप्र०for सम); ह्यश्व०;तेश्व०; वाजि ,

(०३) (१)भागः for ०तेजाः); for राज); (२) देवसत्तमः; राजसत्तम, कपिलाख्यो महामुनिः,

(०४) (४) देव for मुनि ); पुङ्गवं (वाः) for सत्तमम्);,

(०५) (३) क०ख०ग०घ०- चक्षुर्विवृतं,स च for सु ); महत्तेजो for महातेजा); (४) नृपात्मजः समागतान् for स सागरान्);,

(०६) (१)विकृतं for विवृतं); (२) सृजत् for सृजन्),

(०७) (४) तत स्तस्मै; तस्मै सर्वं for तच्च तस्मै );,

(०८) (३)आगम्य; आगत्य; आसाद्य for आगच्छत्);,

मुहूर्तं विमना भूत्वा स्थाणोर्वाक्यमचिन्तयत् ।। ६१ ।।

स पुत्रनिधनोद्भूतदुःखेन समभिप्लुतः
आत्मानमात्मनाऽऽश्वास्य हयमेवान्वचिन्तयत् ।। ६२ ।।[०१]

अंशुमन्तं समाहूय असमञ्जः सुतं तदा ।
पौत्रं भरतशार्दूल इदं वचनमब्रवीत् ।। ६३ ।।[०२]

सगरः

षष्टिस्तानि सहस्राणि पुत्राणाममितौजसाम् ।
कापिलं तेज आसाद्य मत्कृते निधनं गताः ।। ६४ ।।[०३]

तव चापि पिता तात परित्यक्तो मयानघ ।
धर्मं संरक्षमाणेन पौराणां हितमिच्छता ।। ६५ ।।[०४]

युधिष्ठिरः

किमर्थं राजशार्दूलः सगरः पुत्रमात्मजम् ।
त्यक्तवान्दुस्त्यजं वीरं तन्मे ब्रूहि तपोधन ।। ६६ ।।[०५]

लोमशः

असमञ्जा इति ख्यातः सगरस्य सुतो ह्यभूत् ।
यं शैब्या जनयामास पौराणां स हि दारकान् ।। ६७ ।।[०६]

क्रीडतः सहसाऽऽसाद्य तत्र तत्र महीपते।

---

(०१) (२)०द्भवं for द्रुतम् );आत्मनात्मानमात्मैवात्मानम्० हयमेधंव्यचिन्तयत्।( विचिन्तयन्) ,

(०२) (२)त्वसमञ्जः सुतं; सोसमञ्जः; समञ्जसः सुतं; असमञ्जसुतं ,

(०३) (१)षष्टिस्तात; मम षष्टि for षष्टिस्तानि); (२) मे महौ० for अमितौ० );,

(०४) (१)तत्र; वत्स; तावत् for तात); (२) पुरा for (अ)नघ); (३) संरक्ष्य ,

(०५) (१)ऋषिशार्दूल for राजशार्दूलः); (२) पुत्रं सगर आत्मनः; औरसं;आत्मजः for आत्मजम्);,

(०६) (१)असमञ्ज (२) (अ)भवत त्वभूत् for ह्यस्म); (४) हि स पौराणां सुरं ( हि) दारकान्,

गलेषु क्रोशतो गृह्य नद्यां चिक्षेप दुर्बलान् ।। ६८ ।।(०१)

ततः पौराः समाजग्मुर्भयशोकपरिप्लुताः ।
सगरं चाभ्यभाषन्त सर्वे प्राञ्जलयः स्थिताः ।। ६९ ।।(०२)

पौराः

त्वं नस्त्राता महाराज परचक्रादिभिर्भयात्।
असमञ्जोभयाद्धोरात्ततो नस्त्रातुमर्हसि ।। ७० ।।(०३)

लोमशः

पौराणां वचनं श्रुत्वा घोरं नृपतिसत्तमः ।
मुहूर्तं विमना भूत्वा सचिवानिदमब्रवीत् ।। ७१ ।।

सगरः

असमञ्जाः पुरादद्य सुतो मे विप्रवास्यताम्।
यदि वो मत्प्रियं कार्यमेतच्छीघ्रं विधीयताम् ।। ७२ ।।(०४)

लोमशः

एवमुक्ता नरेन्द्रेण सचिवास्ते नराधिप ।
यथोक्तं त्वरिताश्चक्रुर्यथाऽऽज्ञापितवान्नृपः ।। ७३ ।।(०५)

---

(०१) (१)ख०घ०जीवतस्सहसाऽऽसाद्य नद्यां चिक्षेप दुर्वलान् । ( अभ्येत्य for असाश्च);) पुरेषु; गले०; गते; गले वि ; पुरा वि ; क्ष्वासु; कुलेषु for सुरे); बालकान्; क्रीडतो for क्रोशतो ); दुर्मतिः for दुर्बलान्); तत्र तत्र महीपते, क०ख०दुर्मतिः; घ०दुर्वनान्,

(०२) (३)ते for च); (अ)पि for (अ)भि ); (अ)भाषन्त (अ)धावन्त for याचन्त ); (४)तदा for स्थिताः);,

(०३) (२) दितो ०दिकाद् for दिभिद्); भयात् for भयैः); (३) अस मञ्जभया० (४) तस्मान्; राजन्; अस्मान्; कस्मान् for ततो); स्मान् for नम्);,

(०४) (१) असमञ्जः (अ)द्य नगरात्; कुमारोद्य for पुरा); (२) पुत्रो मे; नगराद् for सुतो मे); सं for वि०); (३) चेन् for वो) मे प्रियं (४) शीघ्रमेतद् ,

(०५) (१)एवमुक्ते (४) राज्ञां राज्ञो भवाक्षदा; यथाज्ञाकृतवान्नृपः,

एतत्ते सर्वमाख्यातं यथा पुत्रो महात्मना ।
पौराणां हितकामेन सगरेण विवासितः ।। ७४ ।।[०१]

अंशुमांस्तु महेष्वासो यदुक्तः सगरेण हि ।
तत्ते सर्वं प्रवक्ष्यामि कीर्त्यमानं निबोध मे ।। ७५ ।।[०२]

सगरः

पितुश्च तेऽहं त्यागेन पुत्राणां निधनेन च ।
अलाभेन तथाश्वस्य परितप्यामि पुत्रक ।। ७६ ।।[०३]

तस्माद्दुःखाभिसन्तप्तं यज्ञविघ्नाच्च मोहितम् ।
हयस्यानयनात्पौत्र नरकान्मां समुद्धर ।। ७७ ।।[०४]

लोमशः

अंशुमानेवमुक्तस्तु सगरेण महात्मना ।
जगाम दुःखात्तं देशं यत्र वै दारिता मही ।। ७८ ।।

स तु तेनैव मार्गेण समुद्रं प्रविवेश ह ।
अपश्यच्च महात्मानं कपिलं तुरगं च तम् ।। ७९ ।।

स दृष्ट्वा तेजसो राशि पुराणमृषिसत्तमम् ।
प्रणम्य शिरसा भूमौ कार्यमस्मै न्यवेदयत् ।। ८० ।।[०५]

ततः प्रीतो महाराज कपिलोंऽशुमतोऽभवत् ।

---

(०१) (३)प्रियक्यमेण (कामार्थं);विप्रिये तिष्ठन् for हित );,
(०२) (२)हि; च for ह);,
(०३) (१)क०ख०ग०पितुक्ष्व देशत्यागेन पुत्राणां निधनान च ।,देश for तेहं ); त्यागात्तव पितुश्चापि (२) शेषाणां for पुत्रा ); (३)घ०सुतानामक्ष्वनाशाश्व मनो ने तात वोहितम् ।, सुतानामश्वनाशाच्च (४) पौत्रक for पु); मनो मे तात मोहितं ,
(०४) (३)अश्वस्य for हयस्य ); (आ)गमनात् for (आ)नयनात् );पुत्रfor पौत्र);,
(०५) (४)तस्मै for अस्मै );,

उवाच चैनं धर्मात्मा वरदोऽस्मीति भारत ।। ८१ ।।(०१)

स वव्रे तुरगं तत्र प्रथमं यज्ञकारणात् ।
द्वितीयं वरकं वव्रे पितणां पावनेच्छया ।। ८२ ।।(०२)

तमुवाच महातेजाः कपिलो मुनिपुङ्गवः ।। ८३ ।।

कपिलः

ददानि तव भद्रं ते यद्यत्प्रार्थयसेऽनघ ।(०३)

त्वयि क्षमा च धर्मश्च सत्यं चापि प्रतिष्ठितम् ।
त्वया कृतार्थः सगरः पुत्रवांश्च त्वया पिता ।। ८४ ।।(०४)

तव चैव प्रभावेण स्वर्गं यास्यन्ति सागराः ।
शलभत्वं गता ह्येते मम क्रोधहुताशने ।। ८५ ।।(०५)

पौत्रश्च ते त्रिपथगां त्रिदिवादानयिष्यति ।
पावनार्थं सागराणां तोषयित्वा महेश्वरम् ।। ८६ ।।(०६)
हयं नयस्व भद्रं ते यज्ञियं नरपुङ्गव ।
यज्ञः समाप्यतां तात सगरस्य महात्मनः ।। ८७ ।।(०७)

लोमशः

अंशुमानेवमुक्तस्तु कपिलेन महात्मना ।
आजगाम हयं गृह्य यज्ञवाटं महात्मनः ।। ८८ ।।(०८)

---

(०१) (१)राज for तेजाः);,
(०२) (१)तं तु for तत्र); (३) वरकं; च वरम(० उदकं) (४) पावनेच्छया; नाय वै,
(०३) (३)ददामि तुभ्यं for तव); (४) यच्च; यत्त्वं for यद्यत्);,
(०४) (४)कृतस्त्वया तथा पिता; त्वया कृतः for त्वया पिता );,
(०५) (१) कृता ये ते; गता ये ते; अवापुस्ते (३) प्लावनार्थ; प्लव for पाव );,
(०६) (१)प्रभावेण; प्रसादेन ,
(०७) (२)याज्ञियं; याज्ञीयं (३) चास्य; तस्य; तत्र for तात );,
(०८) (४)सुसत्वरः; महामनाः; पितुस्तदा; महायशाः for महात्मनः );,

सोऽभिवाद्य ततः पादौ सगरस्य महात्मनः ।
मूर्ध्नि तेनाप्युपाघ्रातस्तस्मै सर्वं न्यवेदयत् ।। ८९ ।।(०१)

यथा दृष्टं श्रुतं चापि सागराणां क्षयं तथा ।
तं चास्मै हयमाचष्ट यज्ञवाटमुपागतम् ।। ९० ।।(०२)

तच्छ्रुत्वा सगरो राजा पुत्रजं दुःखमत्यजत्।
अंशुमन्तं च सम्पूज्य समापयत तं क्रतुम् ।। ९१ ।।

समाप्तयज्ञः सगरो देवैः सर्वैः सभाजितः ।
पुत्रत्वे कल्पयामास समुद्रं वरुणालयम् ।। ९२।।

प्रशास्य सुचिरं कालं राज्यं राजीवलोचनः ।
पौत्रे भारं समावेश्य जगाम त्रिदिवं तदा ।। ९३ ।।(०३)

अंशुमान् अपि धर्मात्मा महीं सागरमेखलाम् ।
प्रशशास महाराज यथैवास्य पितामहः ।। ९४ ।।(०४)

तस्य पुत्रः समभवद्दिलीपो नाम धर्मवित् ।
तस्मै राज्यं समाधाय अंशुमानपि संस्थितः ।। ९५ ।।(०५)

दिलीपस्तु ततः श्रुत्वा पितणां निधनं महत् ।
पर्यतप्यत दुःखेन तेषां गतिमचिन्तयत् ।। ९६ ।।(०६)

गङ्गावतरणे यत्नं सुमहच्चाकरोन्नृपः ।

---

(०१) (१) ख०ग०ततः,पितुः for ततः); (२) महीपतेः (ते) for महा); (३) (अ)भि for (अ)पि ); (उ) पाघ्राय (४) सवं तस्मै,

(०२) (१)वापि for चापि); (२) तदा for तथा); (४) स्थितं; महात्मनः for उपागतम्);,

(०३) (३)राज्यं for भारं); (४) ततः; नृपः for तदा);,

(०४) (३)०राज्यं; तेजा राजो for राज);,

(०५) (२)भारत; वीर्यवान्; धार्मिकःfor धर्म); (३) तस्मिन् for तस्मै); समादाय; वेश्य (४) त्वंशु०; ह्यंशु for अंशु०); प्रस्थितो वनं ( भवत्; दिवं) for अपि संस्थितः);,

(०६) (२)नृप for महत्); (४) गतिं तेषां विचिन्तयन् ,

न चावतारयामास चेष्टमानो यथाबलम् ॥ ९७ ॥[०१]

तस्य पुत्रः समभवच्छ्रीमान्धर्मपरायणः ।
भगीरथ इति ख्यातः सत्यवागनसूयकः ॥ ९८ ॥

* ० स राजर्षिर्दिलीपस्तु युयुजे कालधर्मणा ।

अभिषिच्य तु तं राज्ये दिलीपो वनमाश्रितः
भगीरथं महात्मानं सत्यधर्मपरायणम् ॥ ९९ ॥[०२]

तपःसिद्धिसमायोगात्स राजा भरतर्षभ ।
वनाज्जगाम त्रिदिवं कालयोगेन भारत ॥ १०० ॥[०३]

अस्मिन् तीर्थयात्रापर्वणि ८४अध्याये १००श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि चतुरशीतितमोऽध्यायः ॥ ८४ ॥

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 085

# ८५. पञ्चाशीतितमोऽध्यायः

भगीरथस्य हिमालये तपश्चरणम् । दिलीपसुतेन भगीरथेन गङ्गां प्रसाद्य धरणीतलावतरणाय गङ्गाया वेगधारणाय तदाज्ञया तपसा शङ्करतोषणम् ॥ २ ॥

लोमशः

स तु राजा महेष्वासश्चक्रवर्ती महारथः ।
बभूव सर्वलोकस्य मनोनयननन्दनः ॥ १ ॥[०४]

---

(०१) (२)महान्तं for सुमहच्); (३) गङ्गावतरणे सक्तः(४) चेष्टयानो ,
(०२) (४)वसुधाधिप (०पः) for भरतं );,
(०३) (१)च for तु); अन्यषिचत तं राज्ये (२) आस्थितःfor आश्रितः),
(०४) (१)महाभाग for मर्ह); (२) भगीरथः; महायशाः for रथः); (४) हृदय for ०नयन० ,

स शुश्राव महाबाहुः कपिलेन महात्मना ।
**पितणां निधनं घोरमप्राप्तिं त्रिदिवस्य च ।। २ ।।**

स राज्यं सचिवे न्यस्य हृदयेन विदूयता ।
**जगाम हिमवत्पार्श्वं तपस्तप्तुं नरेश्वर ।। ३ ।।(०१)**

आरिराधयिषुर्गङ्गां तपसा दग्धकिल्बिषः ।
**सोऽपश्यत नरश्रेष्ठ हिमवन्तं नगोत्तमम् ।। ४ ।।(०२)**

शृङ्गैर्बहुविधाकारैर्धातुमद्भिरलङ्कृतम् ।
**पवनालम्बिभिर्मेघैः परिषिक्तं समन्ततः ।। ५ ।।(०३)**

नदीकुञ्जनितम्बैश्च प्रासादैरुपशोभितम् ।
**गुहाकन्दरसंलीनसिंहव्याघ्रनिषेवितम् ।। ६ ।।(०४)**

शकुनैश्च विचित्राङ्गैः कूजद्भिर्विविधा गिरः ।
**भृङ्गराजैस्तथा हंसैर्दात्यूहैर्जलकुक्कुटैः ।। ७ ।।(०५)**

मयूरैः शतपत्रैश्च कोकिलैर्जीवजीवकैः ।
**चकोरैरसितापाङ्गैस्तथापुत्रप्रियैरपि ।। ८ ।।(०६)**

**लक्षालङ्कारः- कोकिलैजीवजीवकैः इत्यत्र जीवजीवकैः जीवञ्जीवकाख्यैश्चकोरैः ।**

जलस्थानेषु रम्येषु पद्मिनीभिश्च सङ्कुलम् ।

---

(०१) (२)विदीर्यता; विदार्यता for विदू); (४) नरेश्वर ,

(०२) (३)०श्रेष्ठो for श्रेष्ठ); सोथापश्यन्नरेन्द्रस्तु; सोपश्यद्भरतश्रेष्ठ (४) नगेश्वरं; महागिरिं; नरेश्वरः; नरेश्वर for नगो );,

(०३) (२)०बद्धैर्;बलैर् नद्दैर् for ०मद्भिर्); (४) प्रनृत्यन्तं; परिषिक्तं;स नृत्यन्तं for परि),

(०४) (२)प्रासादैर्; सोदरैर् for सोदकैर्); (३) संलीन (४) सिंहव्याघ्र ; सिंहैर्व्याघ्रैर्,

(०५) (३)गङ्गावेगैम् for भृङ्गराजैस्) गजैर् for तथा); चम्प; चश्व; चार्षं मत्तैर्; चाश्म; राजन्; भासैट् for हंसैर् ); (४) दात्यूह; नत्यूहैर् ,

(०६) (२)जीवजीवककोकिलैः; कोकिलैश्च निषेवितं; कोकिलैश्च सुकूजितैः,

**सारसानां च मुधुरैर्व्याहृतैः समलङ्कृतम्   ।। ९ ।।[०१]**

**किन्नरैरप्सरोभिश्च निषेवितशिलातलम्।**
**दिग्वारणविषाणाग्रैः समन्ताद्घृष्टपादपम्   ।। १० ।।[०२]**

विद्याधरानुचरितं नानारत्नसमाकुलम् ।
**विषोल्वणभुजङ्गैश्च दीप्तजिह्वैर्निषेवितम्   ।। ११ ।।[०३]**

**क्वचित्कनकसङ्काशं क्वचिद्रजतसन्निभम् ।**
**क्वचिदञ्जनपुञ्जाभं हिमवन्तमुपागमत्   ।। १२ ।।[०४]**

स तु तत्र नरश्रेष्ठस्तपो घोरं समाश्रितः ।
**फलमूलाम्बुसम्भक्षः सहस्रपरिवत्सरान्   ।। १३ ।।[०५]**

संवत्सरसहस्रे तु गते दिव्ये महानदी ।
**दर्शयामास तं गङ्गा तदा मूर्तिमती स्वयम्   ।। १४ ।।[०६]**

### गङ्गा

**किमिच्छसि महाराज मत्तः किं च ददानि ते ।**
**तद्ब्रवीहि नरश्रेष्ठ करिष्यामि वचस्तव   ।। १५ ।।[०७]**

लक्षालङ्कारः- किञ्चिद्ददामि त इत्यत्र किञ्चित् यत्किञ्चित् ।

---

(०१) (२)हंस for ०भिश्च); (४) आरावैः for व्याहृतैः); सुनि( च वि ); नादितं for समलं),
(०२) (३)आशागज; आशागण; दिग्वारण दिशोगज; दिशाङ्गज; (दिग्गजानां;) दित्त्युर for दिग्गजेन); दिग्गजेन्द्र दिशागज (४) घुष्ट for घृष्टं );,
(०३) (२)द्रुम ; सत्व for रत्न ); समाचितं; समा श्रितं; लताकुलं for समा) (३)विषोल्बण भुजङ्गेंद्रैः,
(०४) (३) क०ख०गःपुञ्जा,
(०५) (१)नृप for नर); (२) समास्थितः; उपास्थितः तपोयोगसम न्वितः (३) सम्भक्षःfor ०भक्षोभूत्); (४) सहस्र ,
(०६) (२)तत्र; दिव्या for दिव्ये);,
(०७) (२)किञ्चिद्; किं स्विद् for किं च); ददामि (३) यद्ब्रवीषि; तद्ब्रूहि वा; तद्वै ब्रूहि for तद्ब्रवीहि); मुनिं for नर); तद्ब्रूहि नृपतिश्रेष्ठ ,

एवमुक्तः प्रत्युवाच राजा हैमवतीं तदा।
नदीं भगीरथो राजन्प्रणिपत्य कृताञ्जलिः ।। १६ ।।(०१)

**भगीरथः**

पितामहा मे वरदे कपिलेन महानदि ।
अन्वेषमाणास्तुरगं नीता वैवस्वतक्षयम् ।। १७ ।।(०२)

तेषामेवं विनष्टानां स्वर्गे वासो न विद्यते ।
यावत्तानि शरीराणि त्वं जलैर्नाभिषिश्चसि ।। १९ ।।(०३)

* तावत्तेषां गतिर्नास्ति सागराणां महानदि।

स्वर्गं नय महाभागे मत्पितन्सगरात्मजान् ।
तेषामर्थेन याचामि त्वामहं वै महानदि ।। २० ।।(०४)

**लोमशः**

एतच्छ्रुत्वा वचो राज्ञो गङ्गा लोकनमस्कृता ।
भगीरथमिदं वाक्यं सुप्रीता समभाषत ।। २१ ।।(०५)

**गङ्गा**

करिष्यामि महाराज वचस्ते नात्र संशयः ।

---

(०१) ( तथा; नदीं for तदा); राजा for राजन् ); ) मुद्र (४) त्मना for नदि);,

(०२) (२)तथा; नदीं for तदा); ।

षष्टिस्तानि सहस्राणि सागराणां महात्मनाम् ।
कपिलं देवमासाद्य क्षणेन निधनं गताः ।। १८ ।।

/*(२)नदि for त्मनाम्); (३) कपिलं for का); देवम् for तेज );,

(०३) (१)गर्वfor एवं); (२) स्वर्गवासो (३) सहस्राणि for शरी०); (४) जलैस्त्वं नाभिवर्षसि (से) ,

(०४) (३)अर्थेन याचामि; अर्थे याच यामि; अर्थेभियाचेहं; अर्थे हि याचामि, (४)स्वर्गवाहिनि; सारसा नदि for वै महां );,

(०५) (१) वचो राजन्; महाराज for वचो राज्ञो); (४)क०ख०गःसुप्रीता समभाषत, प्रीता प्रीतात्मा; प्रतीता for सुप्रीता); प्रत्य० for सम); साधुत्वं सा त्वभा प्रीता तं सा त्वभा०; प्रीता त्वं साधु भा०; प्रीता सम्यगभा; सा प्रीत्या तमभा०; प्रीता समनुभाषत ,

वेगं तु मम दुर्धार्यं पतन्त्या गगनाद्भुवम् ।। २२ ।।(०१)

लक्षालङ्कारः- गगनाच्च्युते यथा भवति तथा पतन्त्याः ।

न शक्तस्त्रिषु लोकेषु कश्चिद्धारयितुं नृप ।
अन्यत्र विबुधश्रेष्ठान्नीलकण्ठान्महेश्वरात् ।। २३ ।।(०२)

तं तोषय महाबाहो तपसा वरदं हरम् ।
स तु मां प्रच्युतां देवः शिरसा धारयिष्यति ।। २४ ।।

स करिष्यति ते कामं पितणां हितकाम्यया।(०३)
तपसाऽऽराधितः शम्भुर्भगवाँल्लोकभावनः ।। २५ ।।

लोमशः

एतच्छ्रुत्वा ततो राजन्महाराजो भगीरथः ।
कैलासं पर्वतं गत्वा तोषयामास शङ्करम् ।। २६ ।।(०४)

तपस्तीव्रमुपागम्य कालयोगेन केनचित्
० गङ्गावतरणं राजन्नयाचत मह्वीपप्तिः ।। २७ ।।(०५)

अगृह्णाच्च वरं तस्माद्गङ्गाया धारणे नृप ।
स्वर्गे वासं समुद्दिश्य पितणां स नरोत्तमः ।। २८ ।।(०६)

अस्मिन् तीर्थयात्रापर्वणि ८५अध्याये २८श्लोकाः सन्ति

---

(०१) (३)तं for तु); दुष्पारं; दुर्वारं; दुःसाहं; दुवीर्अं; निर्धार्य दुर्धरो मम वेगस्तु; मम वेगं तु दुर्वार्य (४) पतन्तं; ०र्ती for न्त्या); भुवि; च्युतां; द्रुतं; भुव;नृप; च्युतः,

(०२) क्षमम् for कच्छ); न तु मां शक्यते कश्चिच्च्युतां धारयितुं क्यात् ,

(०३) स करिष्यति for करिष्यति च); हि for च); साह्यं; कर्म for कामं);,

(०४) (१)ततो राजन्; महाराज for वचो राजन्); (२) ०भागो for ०राजो); भगीरथनृपस्तदा (३) कैलाशं ,

(०५) (४)धारणे for ०णं) नृपः for नृप); स्वर्गावत्यङ्ग् स्वर्गे वासं नरत्त्या न्त त्त्यः; स नरोत्तम ,

(०६) (१)तपस् for ततस्); तीव्रं for तेन);समासाद्य उषागम्य; उपाव्रज्यfor समा);आरण्यः वन ०तीर्थयात्रा आगस्त्यः लोमशतीर्थयात्रा आगस्त्यः गङ्गाय तारः सगरोपाख्यानं; भगीरथवरलाभः ,

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायामगस्त्योपाख्याने अष्टाधिकशततमोऽध्यायः ।। ८५ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 086

# ८६. षडशीतितततमोऽध्यायः

शङ्करेण भगीरथप्रार्थनया क्षितितलमभिपतन्त्या गङ्गाया धारणम् ।। १ ।। भगीरथेन स्वपथानुगतया गङ्गया पितृभ्य उदकदानपूर्वकं सागरपूरणम्, सगर-पुत्राणामुद्धारश्च ।। २ ।।

लोमशः

भगीरथवचः श्रुत्वा प्रियार्थं च दिवौकसाम् ।
एवमस्त्विति राजानं भगवान्प्रत्यभाषत ।। १ ।।

श्रीमहादेवः

धारयिष्ये महाभाग गगनात्प्रच्युतां शिवाम् ।
दिव्यां देवनदीं पुण्यां त्वत्कृते नृपसत्तम ।। २ ।।(०१)

लोमशः

एवमुक्त्वा महाबाहो हिमवन्तमुपागमत् ।
वृतः पारिषदैर्घोरैर्नानाप्रहरणोद्यतैः ।। ३ ।।(०२)

तत्र स्थित्वा नरश्रेष्ठं भगीरथमुवाच ह ।

---

(०१) (१)भाग for बाहो); (२) शुभां for शिवाम्);,
(०२) (२) ख०अर्धद्वयं नास्ति, (३)स वृतः; सर्वतः for संवृतः); पर्वतैर्; परमं; पर्षतैर् for पार्षदैर्); वृतः पाः प रिषदैर्घोरैः,

ख०- भगीरथोऽपि राजर्षिः शर्वेण सह सङ्गतः।
शैलमूर्ध्निहरस्स्थित्वा भगीरथमुवाज ह ।।

श्रीमहादेवः

प्रयाचस्व महाबाहो शैलराजसुतां नदीम् ।। ४ ।।

पितणां पावनार्थं ते तामहं मनुजाधिप।
पतमानां सरिच्छ्रेष्ठां धारयिष्ये त्रिविष्टपात् ।। ५ ।।(०१)

लोमशः

एतच्छ्रुत्वा वचो राजा शर्वेण समुदाहृतम् ।
प्रयतः प्रणतो भूत्वा गङ्गां समनुचिन्तयत् ।। ६ ।।(०२)

ततः पुण्यजला रम्या राज्ञा समनुचिन्तिता।
ईशानं च स्थितं दृष्ट्वा गगनात्सहसा च्युता ।। ७ ।।

तां प्रच्युतामथो दृष्ट्वा देवाः सार्धं महर्षिभिः ।
गन्धर्वोरगयक्षाश्च समाजग्मुर्दिदृक्षवः ।। ८ ।।(०३)

ततः पपात गगनाद्गङ्गा हिमवतः सुता ।
समुद्धूतमहावर्ता मीनग्राहसमाकुला ।। ९ ।।(०४)

तां दधार हरो राजन्गङ्गां गगनमेखलाम् ।
ललाटदेशे पतितां मालां मुक्तामयीमिव ।। १० ।।(०५)

सा बभूव विसर्पन्ती त्रिधा राजन्समुद्रगा ।
फेनपुञ्जाकुलजला हंसानामिव पङ्क्तयः ।। ११ ।।(०६)

---

(०१) (१) तत्र for ततः); श्रुत्वा for स्थित्वा ); नरश्रेष्ठ; नृपश्रेष्ठं ,त्रिपिष्टपात् ,

(०२) (१)ततो for वचो); (२) शङ्करेण उदीरितं (४) तामन्व; तावद; हि सम for समनु);,

(०३) (१)प्रच्युतां तां अथो; तथा for ततो); (२) देवैः for देवाः); सर्वे; सहfor सार्धं ); महर्षयः; प्रजापतिःfor महर्षिभिः); (३) यक्षाश्च; यक्षैश्चfor रक्षांसि ); (४) सञ्जग्मुश्च; समागच्छन् दिदृक्षवः,

(०४) (३)समुद्धन्मत०; द्धूत द्दूत; ० ०दूत्त०; ०द्दृत्त०;,

(०५) (१)महा for हरो); (४) पुण्यं for मुक्ता );,

(०६)(१) (अ)व for वि ); बभौ सा विग्र सर्पती (२) तथा; तत्र for त्रिधा); (४)पङ्क्तिभिः for पडन्यः);

क्वचिदाभोगकुटिला प्रस्खलन्ती क्वचित्क्वचित्
सा फेनपटसंवीता मत्तेव प्रमदाव्रजत् ।। १२।।

क्वचित्सा तोयनिनदैर्नदन्ती नादमुत्तमम्।(०१)
क्वचिदाकाशमावर्तैस्सङ्क्षिपन्तीव सर्वशः ।। १३ ।।(०२)

लक्षालङ्कारः- क्वचिदाकाशम् इत्यत्र आकाशमावर्तान्तस्स्थिताकाशं सङ्क्षिपन्ती क्रमेण सङ्कुचितं कुर्वन्ती ।

एवं प्रकारान्सुबहून्कुर्वती गगनाच्च्युता ।
पृथिवीतलमासाद्य भगीरथमथाब्रवीत् ।। १४ ।।(०३)

गङ्गा

दर्शयस्व महाराज मार्गं केन व्रजाम्यहम् ।
त्वदर्थमवतीर्णास्मि पृथिवीं पृथिवीपते ।। १५ ।।(०४)

लोमशः

एतच्छ्रुत्वा वचो राजा प्रातिष्ठत भगीरथः ।
यत्र तानि शरीराणि सागराणां महात्मनाम्।
प्लावनार्थं नरश्रेष्ठ पुण्येन सलिलेन च ।। १६ ।।(०५)

गङ्गाया धारणं कृत्वा हरो लोकनमस्कृतः ।
कैलासं पर्वतश्रेष्ठं जगाम त्रिदशैः सह ।। १७ ।।

---

(०१) (२)(इ) व च for क्वचित्); (३) सु; सा for स्व ); स; स्व for सा ); क्वचित्तथा प्रयातेन; स्तथा प्रपातेषु; था प्रपातेन; प्रस (०त्सा)तोयनिनदा; ०त्तथा प्रयातेषु हसन्ती for नदन्ती);,
(०२) (आधत्ते; आवृत्य for आवर्तैः ); ),*/

(०३) (२)कुर्वती गगनच्युता (४) उवाच ह for अथा );,
(०४) (१)०बाहो; भाग for राज );,
(०५) (१)राजन् for राजा); ० प्रापयामास धर्मज्ञः पितृदेवान्तिकं नदी। प्लावfor प्राप ); देहाfor देवा );) प्लाव०for पावं );वै; च; स्वःfor ह);,

समासाद्य समुद्रं च गङ्गया सहितो नृपः ।
पूरयामास वेगेन समुद्रं वरुणालयम् ॥ १८ ॥(०१)

दुहितृत्वे च नृपतिर्गङ्गां समनुकल्पयत् ।
पितणां चोदकं तत्र ददौ पूर्णमनोरथः ॥ १९ ॥(०२)

* जह्नुना च धृता मुक्ता जाह्नवी तेन संस्मृता ।

एतत्ते सर्वमाख्यातं गङ्गा त्रिपथगा यथा ।
पूरणार्थं समुद्रस्य पृथिवीमवतारिता ॥ २० ॥(०३)

कालेयाश्च यथा राजंस्त्रिदशैर्विनिपातिताः ।(०४)
समुद्रश्च यथा पीतः कारणार्थं महात्मना ॥ २१ ॥

वातापिश्च यथा नीतः क्षयं स ब्रह्महा प्रभो ।
अगस्त्येन महाराज यन्मां त्वं परिपृच्छसि ॥ २२ ॥(०५)

अस्मिन् तीर्थयात्रापर्वणि ८६ अध्याये २२ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि षडशीतितमोऽध्यायः ॥ ८६ ॥

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 087

# ८७. सप्ताशीतितमोऽध्यायः

युधिष्ठिरेण ऋषभकूटगीरो नन्दापरमनन्दनदीगमनम् ॥ १ ॥ लोमशेन युधिष्ठिरं प्रति

---

(०१) (१)स for च); समासाद्य समुद्रं च (४) सागरं for समुद्रं);,
(०२) (१)त्वेन for त्वे च); (२) समव०; च समं; स समं; तां सम;समु; हि समं for समनु );,
(०३) (४)पृथिव्याम्,
(०४) महाराज for यथा राजन्); ),
(०५) (२)कालेयत्यै ( ०र्थ) कारणार्थ; देवार्थ वै for कारणार्थे); (३)वातापी च (४) राजन्महा for स ब्रह्महा); (अ)सुरः; तथा; विभो for प्रभो);,

ऋषभमुनेर्नन्दायाश्व महिमकथनम् ।। २ ।। युधिष्ठिरेण कौशिकीतरे ऋश्य-श्रृङ्गोत्पत्तिकथनम् ।। ४ ।। रोमपादेनानावृष्टिनिवृत्तये ऋष्यशृङ्गानयनं चोदिताभिः वैश्याभिस्तद्वनगमनम् ।। ५ ।। नन्दाकौशिक्योर्माहात्म्यम् । ऋष्यशृङ्गोपाख्यानम् । राज्ञो लोमपादस्य स्वराष्ट्रे ऋष्यशृङ्गानयने प्रयत्नः ।

वैशम्पायनः

ततः प्रयातः कौन्तेयः क्रमेण भरतर्षभ ।
नन्दामपरनन्दां च नद्यौ पापभयापहे ।। १ ।।(०१)

पर्वतं स समासाद्य हेमकूटम् अनामयम् ।
अचिन्त्यानद्भुतान्भावान्ददर्श सुबहून्नृपः ।। २ ।।(०२)

वाताबद्धा भवन्मेघा उपलाश्च सहस्रशः ।
नाशक्नुवंस्तमारोढुं विषण्णमनसो जनाः ।। ३ ।।(०३)

वायुर्नित्यं ववौ तत्र नित्यं देवश्च वर्षति।
सायं प्रातश्च भगवान्दृश्यते हव्यवाहनः ।। ४ ।। (०४)

एवं बहुविधान्भावानद्भुतान्वीक्ष्य पाण्डवः ।
लोमशं पुनरेवाथ पर्यपृच्छत्तदद्भुतम् ।। ५ ।।(०५)

---

(०१) (१)प्रति for ततः); प्रयाताः कौन्तेयाः (३)घ०नन्दामपरनन्दां, अमर; असुर; परम; चापर for अपर);,

(०२) (१)पर्वतं स ते पर्वतं; देवकूटं ततो गिरिवरे पुण्ये (२) महागिरिं for अनामयम्); हेमकूटे विशां पते (४) नृप; अपि for नृपः );,

(०३) (१)बहुवाता; वाचा यत्रा; वाता यत्रा; वाताबद्धा; सदा चैवा; वाचाला चा; वातबद्धा for वाचो यत्रा); (३) समा for तमा); (४) ()भवन् for जनाः );,

(०४) (१)तत्र for यत्र); ववौ च प्रबलो वायुः,-अधिकः-घ

स्वाध्यायघोषश्च तथा श्रूयते न च दृश्यते।
मक्षिकाश्चादशंस्तत्र तपसः प्रतिघातिकाः ।
निर्वेदो जायते तत्र गृहाणि स्मरते जनः ।।

(०५) (२)प्रेक्ष्य for वीक्ष्य); अद्भुतानुपलक्ष्य सः; दृष्ट्वा तत्राथ भारत (३)पुनरेवं स; परिपप्रच्छ; पुनरे

युधिष्ठिरः

यदेतद्भगवंश्चित्रं पर्वतेऽस्मिन्महौजसि।
एतन्मे सर्वमाचक्ष्व विस्तरेण महाद्युते ।। ६ ।।

लोमशः

यथाश्रुतमिदं पूर्वमस्माभिररिकर्शन ।
तदेकाग्रमना राजन्निबोध गदतो मम ।। ७ ।।(०१)

अस्मिनृषभकूटे अभूदृषभो नाम तापसः ।
अनेकशतवर्षायुस्तपस्वी कोपनो भृशम्।(०२)
स वै सम्भाष्यमाणोऽन्यैः कोपाद्गिरिमुवाच ह ।। ८ ।।(०३)

य इह व्याहरेत्कश्चिदुपलानुत्सृजेस्तथा।(०४)
वातं चाहूय मा शब्दमित्युवाच स तापसः ।। ९ ।।(०५)

व्याहरंश्चेह पुरुषो मेघशब्देन वार्यते ।। १०।।(०६)

लक्षालङ्कारः- मा शब्दमित्युवाच स तापस इत्यत्र शब्दं मा कुरु ।

एवमेतानि कर्माणि राजंस्तेन महर्षिणा ।

---

वाथ;वास्य (४) युधिष्ठिरः for तद ); स चापीदमुवाच ह ,
(०१) (२)अरिकर्षण; भरतर्षभ (४) वदतो for ग );,
(०२) (१)वृषभ; पर्वत for ऋषभं ); तु (वै)for भूद्) (२) वृषभो for ऋषभो); राक्षसः for तापसः )
(०३) (१)च for वै); वै for न्यैः);,
(०४) (३) यदीह; यदिच्छाद् for य इह); यदि व्याहरते कश्चित् (४) उत्पलान् for उपलान् ); उत्सृजेत् for जेत्); तथा for तदा); उपलांस्त्वं समुत्सृज; उपलैरभिहन्यते; उपलानुत्सृजेत ,
(०५) (१)वाचं for वातं); शब्द for शब्दम्);,
(०६) (३) व्याहरेत्; विहरन् चेह; एव; एषfor चैव); तपसो; पुरुषं for पुरुषो); (४) परि for विनि); मेधैरिह निवा; मेघशब्देन वा; मेघो ह्यपि निवा ,*/

कृतानि कानिचित्क्रोधात्प्रतिषिद्धानि कानिचित् ।। ११ ।।[०१]

लक्षालङ्कारः- कृतानि कानिचित् इत्यत्र स्वतपोविघ्नकृतां निवारणाय कानिचित् अग्निवायुमेधादीनि कृतानि अङ्गीकृतानि । कानिचित् मेघवाय्वादीनां गर्जनादीनि प्रतिषिद्धानीति विवेकः ।

नन्दां त्वभिगता देवाः पुरा राजन्निति श्रुतिः ।
अन्वपद्यन्त सहसा पुरुषा देवदर्शिनः ।। १२ ।।[०२]

लक्षालङ्कारः- निमित्तान्तरं चाह- नन्दाम् इत्यादिना ।

ते दर्शनं त्वनिच्छन्तो देवाः शक्रपुरोगमाः ।
दुर्गं चक्रुरिमं देशं गिरिं प्रत्यूहरूपकम् ।। १३ ।।[०३]

तदाप्रभृति कौन्तेय नरा गिरिमिमं सदा ।
नाशक्नुवन्नभिद्रष्टुं कुत एवाधिरोहितुम् ।। १४ ।।[०४]

नातप्ततपसा शक्यो द्रष्टुमेष महागिरिः ।
आरोढुं वापि कौन्तेय तस्मान्नियतवाग्भव ।। १५ ।।

इह देवास्तदा सर्वे यज्ञानाजह्रुरुत्तमान् ।
तेषामेतानि लिङ्गानि दृश्यन्तेऽद्यापि भारत ।। १६ ।।[०५]

कुशाकारेव दुर्वेयं संस्तीर्णेव च भूरियम् ।

---

(०१) (१)एवमादीनि (२) महात्मना for महर्षिणा); (३) क्रोधात् for कोपात्);,

(०२) (१)चाभि ;त्वभि for अभि ); गता देवाः for गतान्देवान्) (२) इहाश्रमे; इति श्रुतं for इति श्रुतिः);,

(०३) (१)तद् for ते ); त्वनिच्छतो for अनि); ते त्वदर्शय, मिच्छन्तो; ते ()दर्शनमभिप्राप्ताः; तेनादर्शनमिं (२) इन्द्र० for शक्र); (४)गिरिं for गिरि );,

(०४) (१)ततः for तदा०); (३) न शक्नुवन्ति for नाशक्नुवन्); अति; अपि for अभि ); (४) अभि० for अधि ); (२)गिरिरेषोभिवीक्षितुं ,

(०५) (१)सगन्धर्वा; तदा सर्वे; तथा सर्वे; तथा वव्रे for सदा सर्वे); (३)एषाम् for तेषाम्); (४)क०ख०ग०ऽद्यापि भारत, घ० भरतर्षभ for द्यापि भारत);,

**यूपप्रकारा बहवो वृक्षाश्चेमे विशाम्पते ।। १७ ।।(०१)**

**देवाश्च ऋषयश्चैव वसन्त्यद्यापि भारत ।**
**तेषां सायं तथा प्रातर्दृश्यते हव्यवाहनः ।। १८।।(०२)**

**इहाप्लुतानां कौन्तेय सद्यः पाप्माभिहन्यते ।**
**कुरुश्रेष्ठाभिषेकं वै तस्मात्कुरु सहानुजः ।। १९ ।।(०३)**

**ततो नन्दाप्लुताङ्गस्त्वं कौशिकीम् अभियास्यसि ।**
**विश्वामित्रेण यत्रोग्रं तपस्तप्तमनुत्तमम् ।। २० ।।(०४)**

**वैशम्पायनः**

**ततस्तत्र समाप्लुत्य गात्राणि सगणो नृपः ।**
**जगाम कौशिकीं पुण्यां रम्यां शीतजलां शुभाम् ।। २१ ।।(०५)**

**लोमशः**

**एषा देवनदी पुण्या कौशिकी भरतर्षभ ।**
**विश्वामित्राश्रमो रम्य एष चात्र प्रकाशते ।। २२ ।।**

**आश्रमश्चैव पुण्याख्यः काश्यपस्य महात्मनः ।**
**ऋष्यशृङ्गः सुतो यस्य तपस्वी संयतेन्द्रियः ।। २३ ।।(०६)**

---

(०१) (१)कुशाकारेण (आकाशरेणु) दुर्गोयं; दुर्गेयं for दूवेयं); (२) संस्तीर्णा चापि; स्वास्तीर्णेव च मेदिनी for भूरियम्); (३) शाकाराश्च ब ,
(०२) (१)चापि for च ); (३) एवं for तेषां); तेषां चैव प्रभावेण ,
(०३) (२)मनः for सद्यः); पापं for पाप्मा); नि; (अ)भि (अ)प च for वि ); धीयते for हन्यते ); (३) त्वं० for वै); (४) अस्मिन् for तस्मात् );,
(०४) (१)प्रतो गत्वा for प्लुता ङ्गस्त्वं); (२) उपयास्यसि; बभूव अनुया० पुनरेष्यसि for अभिया); (४) महात्मना for अनुत्तमम्);,
(०५) (१)समाप्लाव्य; समाप्याथ; स गात्राणि for प्लुत्य); (२) सम्यगाप्लुत्य भूपतिः (४) शीत for शिव); शुभां for नदीम्);,
(०६) (१)(ए)ष (अ)त्र for (ए)व ); (३) ऋषि०; ऋष्य(त्त्व०);
**ऋष for ऋश्य); (ऋश्येति तालव्यादिः मूर्धन्यादिपाठः प्रामादिकः)**

तपसो यः प्रभावेण वर्षयामास वासवम् ।
**अनावृष्ट्यां भयाद्यस्य ववर्ष बलवृत्रहा ।।२४ ।।[०१]**

मृग्यां जातः स तेजस्वी काश्यपस्य सुतः प्रभुः ।
**विषये रो(लो)मपादस्य यश्चाकाराद्भुतं महत् ।। २५ ।।[०२]**

निर्वर्तितेषु सस्येषु यस्मै शान्तां ददौ नृपः ।
**लोमपादो दुहितरं सावित्रीं सविता यथा ।। २६ ।।[०३]**

युधिष्ठिरः

ऋष्यशृङ्गः कथं मृग्यामुत्पन्नः काश्यपात्मजः ।
**विरुद्धे योनिसंसर्गे कथं च तपसा युतः ।। २७ ।।[०४]**

किमर्थं च भयाच्छक्रस्तस्य बालस्य धीमतः ।
**अनावृष्ट्यां प्रवृत्तायां ववर्ष बलवृत्रहा ।। २८ ।।[०५]**

कथंरूपा च सा शान्ता राजपुत्री यतव्रता ।
**लोभयामास या चेतो मृगभूतस्य तस्य वै ।। २९ ।।[०६]**

लोमपादश्च राजर्षिर्यदाश्रूयत धार्मिकः ।
**कथं वै विषये तस्य नावर्षत्पाकशासनः ।। ३० ।।[०७]**

---

(०१) (१)तपसोष्म; ०सोस्य for सो यः ); प्रभावेण; वस्य (२)क०ख०ग०वासवम् ।, हर्षं for वर्ष०); (३)यत्र for यस्य); (४) वल for बल );,

(०२) (२)मुनेर्नृप; महात्मनः for सुतः प्रभुः ); (३) रोम for लोम);,

(०३) (१)प्रव; निर्व for निव); (२) सुता नृपः; सुतां ददौ for ददौ नृपः); प्रभुः for नृपः); (३) पादं for पादो );,

(०४) (१)ऋषि; ऋष्य रुष्य० ऋष्यः श्रृङ्गः (३) विरुद्ध संसर्गात्; संसर्गः; कथं स भगवान्प्रभुः,

(०५) (३) क०ख०ग०च्छकस्तस्यः, घ०तसक्य शक्रो,शक्रः तस्य यस्य for तस्य );,

(०६) (१)कथं च रूपा (प) for कथरूपाच); सा शान्ता; शाता च for शान्ताभूद्); (२) यश स्विनी; पतिव्रता for यतं); (४) रूपस्य; मृगीभूतस्य वै द्विज; वै तदा for तस्य वै);,

(०७) (२)यथा for यदा); पार्थिवः for धार्मिकः); श्रूयते धार्मिको यदा , (३)न for वै); वृष्टवान् for विषये ); (४) विषये; प्रावर्षत् for नावर्षत्);,

एतन्मे भगवन्सर्वं विस्तरेण यथातथम् ।
वक्तुमर्हसि शुश्रूषोरष्यशृङ्गस्य चेष्टितम् ।। ३१ ।।(०१)(०२)

**लोमशः**

विभाण्डकस्य विप्रर्षेस्तपसा भावितात्मनः ।
अमोघवीर्यस्य सतः प्रजापतिसमद्युतेः ।। ३२ ।।(०३)

शृणु पुत्रो यथा जात ऋष्यशृङ्गः प्रतापवान् ।
महार्हस्य महातेजा बालः स्थविरसम्मतः ।। ३३ ।।(०४)

महाह्रदं समासाद्य काश्यपस्तपसि स्थितः ।
दीर्घकालं परिश्रान्त ऋषिः स देवसम्मितः ।(०५)
तस्य रेतः प्रचस्कन्द दृष्ट्वाप्सरसमुर्वशीम् ।। ३४ ।।

अप्सूपस्पृशतो राजन्मृगी तच्चापिबत्तदा।
सह तोयेन तृषिता गर्भिणी चाभवत्ततः ।। ३५ ।।(०६)

* सा पुरोक्ता भगवता ब्रह्मणा लोककर्तृणा।
देवकन्या मृगी भूत्वा मुनिं सूय विमोक्ष्यसे।।(०७)

---

(०१) श्रृङ्गव्यवस्थितं (०ति); श्रृङ्गविचेष्टितं for त्तवस्य वै);

(०२) (३)विप्रर्षे; शुश्रूषे; (अ)शेषेणि for शुश्रूषोर् ); (४) ऋष्य ( ऋषि ) ( क्यऋश्य );,

(०३) (१)विभवादस्य; विद्ध कस्य राजर्षे; विप्रर्षेः राजेन्द्र (२)विभवाद् महर्षेर् for तपसा);,

(०४) (१)जज्ञे for जात); (२) ऋष्य (ऋषि) for ऋश्य०); (३) महापुत्रो; ०ह्रदा; ब्रह्मपुत्रो; भहाग्रहे (ह); बलो; महार्हः स; ०र्हस्य; व्रतो for ह्रदे);,

(०५) (२)तप आस्थितः for तपसि स्थितः); (३) काल for कालं); (४) मुनिर् for ऋषिर्); संमितः; सत्तमः ऋषिः स ( स ऋषिर्) देवसंमितः; स ऋषिर्देवसत्तम ,

(०६) (२) क०कख०गःघ०जन् मृघी दश्चपिबत्तदा, (३) क०ख०ग०घ० सका गर्भिण्यभवन्नृप ।

अमोघत्वाद्विधेश्चैव भावित्वाद्दैवनिर्मितात्।

/*(१) सा हि for सह); (२) ह्यन्तर्वल्यभवत्; गर्भिणी चा (सा) भवत् for सा गर्भिण्यभवत्); ततः; तदा for नृप),

(०७) (३)ऋषेश्चैव च बीजस्य; च जीवस्य; च ववृधे; हि वीर्यस्य for विधेश्चैव); (४) भवित्वा; भविताद्

**तस्यां मृग्यां समभवत्तस्य पुत्रो महानृषिः ।। ३६ ।।[०१]**
**ऋष्यशृङ्गस्तपोनित्यो वन एवाभ्यवर्तत ।। ३७ ।।[०२]**

**तस्यर्षेः शृङ्गं शिरसि राजन्नासीन्महात्मनः ।**
**तेनर्ष्यशृङ्ग इत्येवं तदा स प्रथितोऽभवत् ।। ३८ ।।[०३]**

**न तेन दृष्टपूर्वोऽन्यः पितुरन्यत्र मानुषः ।**
**तस्मात्तस्य मनो नित्यं ब्रह्मचर्येऽभवन्नृप ।। ३९ ।।[०४]**

**एतस्मिन्नेव काले तु सखा दशरथस्य वै ।**
**लोमपाद इति ख्यातो ह्यङ्गानामीश्वरोऽभवत् ।। ४० ।।[०५]**

**प्रेमोषितापचारेण तस्य राज्ञो युधिष्ठिर ।**

**तेन कामात्कृतं मिथ्या ब्राह्मणस्येति नः श्रुतिः ।**
**स ब्राह्मणैः परित्यक्तस्ततो वै जगतः पतिः ।[०६]**
**दैवोपहतसत्त्वेन धर्मज्ञेनापि भारत ।। ४१ ।।[०७]**

**पुरोहितापचाराच्च तस्य राज्ञो यदृच्छया ।**

---

देव निर्मितं; निर्मितः; निर्मिला,
(०१) (२)तस्य चैव ऋषेः सुतः,
(०२) (३) ऋव्यं; ऋषिं for ऋश्यं ); इति ख्यातो ततो नित्यं (०त्यो) for तपो०); (४) बाल ( क्यवन ); चैव; तस्मिन् for एव); (अ)भ्यवर्धतः (अ)भ्यवर्ततः विवर्धत for व्य); स तदा पाण्डवर्षभ!,*/

(०३) (१)तस्य श्रृङ्गः (गं) स शिरसि; तस्यर्षेः (र्षि) श्रृङ्गं (श्रृङ्गं तु) शिरसि; तस्य श्रृङ्गं शिरसि वै (३) तेनर्ष्य; स ऋश्य इत्युक्त; इत्येव; इत्येतत् for इत्येवं); (४) नाम्रा for तदा); स तदा ( भवत्) पाण्डवर्षभ; तदाभूत्य थितो हि सः; नाम्रा चक्रे पिता ततः,
(०४) (२)विना पित्रा तु for पितुरन्यत्र); मानवः for मानुषः); (४) व्यवस्थितं; व्यवर्धत for ()भवन्नृप);,
(०५) (२)स राजा राजसत्तम० (४) त्वं( वं)गानाम्; ह्यङ्गानाम् for अङ्गानाम्);,
(०६) (१) ख०पुरोहितापचारेण तथा राज्ञौ युधिष्टिर। कामात्; कामा for काम ); कृतं कृता for कृतो ); (२) कृष्णा ब्राह्मणेषु for क); श्रुतं for बुलि ); ब्राह्मत्त्येति श्रुइइद्ध्य(०तं) ,
(०७) (४)तया; ततो for तदा); वै अगतः पतिः; भत्त्यत्त्य,

न ववर्ष सहस्राक्षस्ततोऽपीड्यन्त वै प्रजाः ।। ४२ ।।(०१)

स ब्राह्मणान्पर्यपृच्छत्तपोयुक्तान्मनीषिणः ।
प्रवर्षणे सुरेन्द्रस्य समर्थान्पृथिवीपते ।। ४३ ।।(०२)

रोमपादः

कथं प्रवर्षेत्पर्जन्य उपायः परिदृश्यताम् ।। ४४ ।।(०३)

लोमशः

तमूचुश्चोदितास्ते तु स्वमतानि मनीषिणः ।
तत्र त्वेको मुनिवरस्तं राजानमुवाच ह ।। ४५ ।। (०४)

मुनिवरः

कुपितास्तव राजेन्द्र ब्राह्मणा निष्कृतिं च।।(०५)
ऋष्यशृङ्गं मुनिसुतमानयस्व च पार्थिव ।
वानेयमनभिज्ञं च नारीणामार्जवे रतम् ।। ४६ ।।(०६)

स चेदवतरेद्राजन्विषयं ते महातपाः ।
सद्यः प्रवर्षेत्पर्जन्य इति मे नात्र संशयः ।। ४७ ।।(०७)

लोमशः

---

(०१) (१) चारेणfor चाराच्च); (२) राष्ट्रे for राज्ञो); युधिष्ठिर for यद्द );,
(०२) (१)नृपोपृ० for पर्यपृ०); (४) समर्थः; र्थैfor र्थान्); पते for पतिः );,
(०३) (१)वर्षेत; वर्षेत्तु; हि वर्षेत् for प्रवर्षेत्);,
(०४) (२) ०चिन्त्य०; मृश्य; ०मृग्य०; ०गम्य० for दृश्य); (३) त ऊचुश् नोचुस्तं for तमूचुश्); तत्र; तं च; ते तु; राजन् for तेन); (४) प्रसन्नाश्च; स्वमतेन; ब्राह्मणास्ते; ब्राह्मणाश्च for स्वम० );,
(०५) (१) एकस्तत्राब्रवीद्वाक्यं राजानं मुनिपुङ्गवः (४) णाः समितिञ्जय ,
(०६) (१)ऋष्य० (ऋषि) वरम् for सुतम्); (२) आह्वयस्व for आन); (३)हfor च); (३) वानीय; मानेय; वार्ताया; ऐणेय for वानेय ); वरणीयमभिज्ञं च ,
(०७) (१)स च वै यत्र भवति (२) विषयान्ते for विषयं ते); (४) नास्त्वत्र; मे नास्ति (नास्ति न) for मे नात्र); निश्चितं मनः ( क्यनात्र संशयः );,

**एतच्छ्रुत्वा वचो राजन्कृत्वा निष्कृतिमात्मनः ।**
**स गत्वा पुनरागच्छत्प्रसन्नेषु द्विजातिषु ॥ ४८ ॥**

राजानमागतं श्रुत्वा प्रतिसञ्जहृषुः प्रजाः[०१]
**स वै ताः प्रतिजग्राह पितेव हितकृत्सदा ॥ ४९ ॥**

ततोऽङ्गपतिराहूय सचिवान्मन्त्रकोविदान् ।
**ऋष्यशृङ्गागमे यत्नमकरोन्मन्त्रनिश्चये ॥ ५० ॥[०२]**

सोऽध्यगच्छदुपायं तु तैरमात्यैः सहाच्युतः ।
**शास्त्रज्ञैरलमर्थज्ञैनित्यां(र्नीत्यां) च परिनिष्ठितैः ॥ ५१ ॥[०३]**

ततश्चानाययामास चारमुख्यान् महीपतिः ।
**वेश्याः सर्वत्र निष्णातास्ता उवाच सपार्थिवः ॥ ५२ ॥[०४]**

लक्षालङ्कारः- चारमुख्यान्महीपतिः इत्यत्र चारमुख्यान् चारश्रेष्ठान् ।

## रोमपादः

**ऋष्यशृङ्गमृषेः पुत्रमानयध्वमुपायतः ।**
**लोभयित्वाभिविश्वास्य विषयं मम शोभनाः ॥ ५३ ॥[०५]**

---

(०१) (१)ज्ञात्वा for श्रुत्वा ) वनं for वचो ); राजा for राजन् );तच्छ्रुत्वा वचो वचनं (राजा०) (२) चक ; गत्वा (राजा) for कृत्वा); (३) कृत्वा for गत्वा); आगम्य; आयातः for आगच्छत्); श्रुत्वा; मत्वा; ज्ञात्वा व for जहृषुः तं प्रजा (प्रजास्तं; ते पूजां ) जणस्तदा; प्रजाः सर्वाः प्रजहर्षिर,

(०२) (१)मन्त्रिणश्च समाहूय (२) सञ्चिन्त्य for सचिवान्); मन्त्रकोविदः (३) ऋष्य० ऋष्यश्रृङ्गं समागम्य (४) मन्त्रनिश्चयः (०यं); मन्त्रिणश्च ये चक्रतुर् ( चक्रुस्तन्) मन्त्रनिश्चयं ,

(०३) (१)सोभ्य for सोध्य) उपायान् तं; नु for तु); (२) सहाच्युत(तं); नृपोत्तमः (३) ख० शास्त्रज्ञैस्साजिवैर्नित्यमर्थज्ञैः परि,विमलप्रज्ञैर् सचिवैर्नित्यं; सकलैर्नित्यं for अलमर्थज्ञैर्); (४)हिते च; मन्त्रज्ञैः for नीत्यां च);,

(०४) (१)तत्र for तत); चानायं आज्ञाप for आनाय); आनया( आनायया)मास
पुरुषैः (३) विख्याताम्; निपुणास् for निष्णातास्);,

(०५) (१)ऋष्य ( ऋषि०; रुष्य) for ऋश्य ); (३) (अ)ति च; तु; (अ)पि for (अ)भि ); विश्वस्य; विश्वस्तं for विश्वास्य),

* नियोजयामास च तास्तस्य बालस्य लोभने ।

ता राजभयभीताश्च शापभीताश्च योषितः ।
न(अ)शक्यमूचुस्तत्कार्यं विवर्णा गतचेतसः ।। ५४ ।।(०१)

तत्र त्वेका जरद्योषा राजानमिदमब्रवीत् ।। ५५ ।।

जरद्योषा

प्रयतिष्ये महाराज तमानेतुं तपोधनम्।(०२)
अभिप्रेतांस्तु मे कामांस्त्वमनुज्ञातुमर्हसि ।
ततः शक्ष्याम्यानयितुमृष्यशृङ्गमृषेः सुतम् ।। ५६ ।।(०३)

लोमशः

तस्याः सर्वमभिप्रेतमन्वजानात्स पार्थिवः ।
धनं च प्रददौ भूरि रत्नानि विविधानि च ।। ५७ ।।(०४)

ततो रूपेण सम्पन्ना वयसा च महीपते ।
स्त्रिय आदाय काश्चित्सा जगाम वनमञ्जसा ।। ५८ ।।(०५)

अस्मिन् तीर्थयात्रापर्वणि ८७ अध्याये ५८ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्त्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि

---

(०१) (३)तत्कालं; तत्काले for तत्कार्यं); (४) विषण्णा for विवर्णा ); विचरन्तमचेतसः; विषण्णवदनार्चिषः,
(०२) (१)काचिद् for त्वेका); ब्रवीद्योषा; वरारोहा; जराविष्टा for जरद्योषा); (४)आनेतुं तं मुनेः सुतंfor तपो);,
(०३) (२) त्वमनु for समनु ); (३) शिक्ष्येः शक्ये; शक्याम; शिष्ये; शक्यामि; शक्ष्यसि; शक्ष्यामि; शिष्यम्; शक्यो for शक्ष्ये); (आ)न for लोभ०); (४) ऋष्य ( ऋषिं ) तपोधनं; मुनेः सुतं for ऋषेः सुतम्);,
(०४) (१)प्रेतम् for ०प्रायम् ); तस्याः सवाबुपायार्थान्; स तस्याः समभिप्रायम ( प्रेतम्)) (२) अनुं; अभि० for अन्व ); अभिप्रेत्य महीपतिः,
(०५) (२) क०घ०वयसा च महीपते विशां;, पते for मही );,

सप्ताशीतितमोऽध्यायः ।। ८७ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 088

# ८८. अष्टीतितमोऽध्यायः

विभण्डकस्यासान्निधाने तदाश्रमं प्रविष्टया वेश्यायुवत्या विलासैर्ऋश्यश्रृङ्गं, प्रलोभ्य पुनस्स्वावासगमनम् ।। १ ।। ऋष्यशृङ्गस्य वेश्याकर्तृको मोहः । तत आगतेन विभाण्डकेन वेश्याविलासमुग्धचेतसं सुतं प्रति चिन्ताहेतुकः मोहकारणप्रश्नः प्रतिप्रश्नश्च।। २ ।।

लोमशः

सा तु नाव्याश्रमं चक्रे राजकार्यार्थसिद्धये ।
सन्देशाच्चैव नृपतेः स्वबुद्धया चैव भारत ।। १ ।।

नानापुष्पफलैर्वृक्षैः कृत्रिमैरुपशोभितैः ।
नानागुल्मलतोपेतैः स्वादुकामफलप्रदैः ।। २ ।।(०१)

अतीव रमणीयं तदतीव च मनोहरम् ।
तास्तु नाव्याश्रमं रम्यमद्भुतोपमदर्शनम् ।। ३ ।।(०२)

लक्षालङ्कारः- तास्तु नाव्याश्रमम् इत्यत्र नाव्याश्रमं नावि आश्रमसमीपस्थे नदीप्रवाहे नौकायाम् आश्रमं चक्रुः ।

ततो निबध्य तां नावमदूरे काश्यपाश्रमात् ।
चारयामास पुरुषैर्विहारं तस्य वै मुनेः ।। ४ ।।(०३)

ततो दुहितरं वेश्यां समाधायेतिकार्यताम् ।

---

(०१) (२)नृप शोभितं; उपशोभितैः,

(०२) (१)तम् for तद्); (२) सु for च); रमं for ०हरम् );,

(०३) (१)निबध्याथ ततो मावां (२) साद्रूरे; व्य० for अ); काश्यपाश्रमं काश्यपाथश्रमात्,

दृष्ट्वान्तरं काश्यपस्य प्राहिणोद्बुद्धिसम्मताम्   ।। ५ ।।(०१)

सा तत्र गत्वा कुशला तपोनित्यस्य सन्निधौ ।
आश्रमं तं समासाद्य ददर्श तमृषेः सुतम्   ।। ६ ।।(०२)

### वेश्या

कच्चिन्मुने कुशलं तापसानां
कच्चिच्च वो मूलफलं प्रभूतम् ।
कच्चिद्भवान्रमते चाश्रमेऽस्मिंस्त्वां
वै द्रष्टुं साम्प्रतमागतोऽस्मि  ।। ७ ।।(०३)

* आगतास्मि त्वां सांमतं द्रष्टुमुपागतास्मि

कच्चित्तपो वर्धते तापसानां पिता च ते कच्चिदहीनतेजाः ।
कच्चित्त्वया प्रीयते चैव विप्र कच्चित्स्वाध्यायः क्रियते ऋष्यशृङ्ग ।। ८ ।।(०४)

### ऋष्यशृङ्गः

ऋद्धो भवाञ्ज्योतिरिव प्रकाशते मन्ये चाहं त्वामभिवादनीयम् ।

---

(०१) (१)वेश्यां० (२) साद्य श्वास्व ०दृश्य; ०दिश्य; ०शास्व ०ध्याप्य for धाच;); कार्थतां for कृत्वताम्); समवारे निकृत्यतां (३) (आ) श्रमं;(आ)स्मजंfor (अ)न्तरं),
(०२) (१)पद्भिरेव ततो गत्वा (२) तपोयुक्तस्य ऋष्यश्रृङ्गमुवाच सा; पुरुषान्प्रददर्श ह च; तत् for तं); गम्य for साद्य); ददृशे for ददर्श); घ- रहोपगम्य चकिता काश्यपस्य महात्मनः
(०३) (१) क०ग०घ० रमते, ख०क चाश्रमस्तव किं नाम दैव. व्रतं ब्रह्मंश्चरसि हि देववत्त्वम् ।
वनेषु for मुने); (२) साधो; वने for च वो); फलमूलं for मूलफलं); पिता च ते कच्चिदहीनतेजाः (३) स्वे for स्मिन्); (४) च for वै );,
(०४) (२)कच्चिच्च मूलं च फल प्रभू( सू )तं; कच्चिच्च वो मूलफलं प्रभूतं ( प्रसूतं; समृद्धं) पिता च ते कुशली विप्रमुख्यः (३) चापि for चैव ); (४) ऋष्य (ऋषि; चर्ष्य०; वै यथावत्) चर्श्य० for ऋश्य );,

पाद्यं वै ते सम्प्रदास्यामि कामाद्यथाधर्मं फलमूलानि चैव ।। ९ ।।[०१]

लक्षालङ्कारः- ऋद्धो भवान् इत्यादि पुल्लिङ्गसम्पादनं स्त्रीत्वाज्ञानादिति ज्ञेयम् ।

कौश्यां बृष्यामासस्व(स्स्व) यथोपजोषं कृष्णाजिनेनावृतायां सुखाय ।
क्व चाश्रमस्तव किं नाम चेदं व्रतं ब्रह्मंश्चरसि हि देववत्त्वम् ।। १० ।।[०२]

लक्षालङ्कारः- कौश्यां कुशमय्याम् ।

वेश्या

ममाश्रमः काश्यपपुत्रः रम्यस्त्रियोजनं शैलमिमं परेण।
तत्र स्वधर्मो नाभिवादनं मे न चोदकं पाद्यमुपस्पृशामि।। ११ ।।[०३]
* भवता नाभिवाद्योऽहमभि वाद्यो भवान्मया।
व्रतमेतादृशं ब्रह्मन्परिष्वज्यो भवान्मया।।

ऋष्यशृङ्गः

फलानि पक्वानि ददानि तेऽहं भल्लातकन्यामलकानि चैव ।
करूषकाणीङ्गुदधन्वनानि प्रियालूनां कामकारं कुरुष्व ।। १२ ।।[०४]

लोमशः

गृहाण कामाद्धि ममोपकारात्कुरुष्व कामं यदभीप्सितं मे ।
सा तानि सर्वाणि विवर्जयित्वा भक्ष्याण्यनर्हाणि ददौ ततोऽस्य ।

---

(०१) (१)ऋद्ध्या; वृद्धो; शुद्धो for ऋद्धो); (२) वन्येनाहं त्वमभिवा (३) च ते; for वै ते); (४) यथो चितं; यथा च मेfor धर्मं);मूलफलानि; स्यात्कुशलानि for फल );,

(०२) (१)दृस्याम्; वृष्याम्; वृश्याम् for बृस्याम्); (२) शुभायां; सुखाय for सुखायाम्); (४) हि ह; (इ)ह for हि); वने वद त्वं for हि देववत्त्वम्); कल्पः for वत्त्वम्);,

(०३) (२)न दूरतो दृश्यते योजनानि० (३) ह्यभि०; नाभि for नभि० ); ह्यभिवादयतो for नभिवादनं नो); च; मे; ते for नो ); (४) अपि स्पृशामः; उपस्पृशामि; अभि स्पृशामः,

(०४) (१)ददामि (३) सरूव०; मरूष०; करूष; प्ररूढ; बिल्वानि चैव for परूषकानि); (४) प्रिया लानां; पिप्पलानां; प्रियालकानां (कान्) काक्षितं वै for कामकारं); प्रियालतिन्दूकमधूनि यानि०

तान्यृष्यशृङ्गस्य महारसानि भृशं सुरूपाणि रुचिं ददुर्हि ।। १३ ।।[०१]

ददौ च माल्यानि सुगन्धवन्ति चित्राणि वासांसि च भानुमन्ति।

पेयानि चाग्र्याणि ततो मुमोद चिक्रीड चैव प्रजहास चैव ।। १४ ।।[०२]

सा कन्दुकेनारमतास्य मूले विभज्यमाना फलिता लतेव ।

गात्रैश्च गात्राणि निषेवमाणा समाश्लिषच्चासकृदृष्यशृङ्गम ।। १५ ।।[०३]

सर्जानशोकांस्तिलकांश्च वृक्षान्सुपुष्पितानवनाम्यावभज्य।

विलज्जमानेव मदाभिभूता प्रलोभयामास सुतं महर्षेः ।। १६ ।।[०४]

अथर्ष्यशृङ्गं विकृतं समीक्ष्य पुनः पुनः पीड्य च कायमस्य।

अवेक्ष्यमाणा शनकैर्जगाम कृत्वाग्निहोत्रस्य तदापदेशम् ।। १७ ।।[०५]

तस्यां गतायां मदनेन मत्तो विचेतनश्चाभवदृष्यशृङ्गः ।

तामेव भावेन गतेन शून्ये विनिःश्वसन्नार्तरूपो बभूव ।। १८ ।।[०६]

ततो मुहूर्ताद्धरिपिङ्गलाक्षः प्रवेष्टितो रोमभिरानखाग्रात् ।

---

(०१) (१)विमृष्य वेश्या; विसृज्य वे( वै ) विवर्जयित्वा; विहाय राजन् for विसर्ज०); (२) भक्ष्याण्य नर्हाणि ददौ ( णि प्रददौ ) for भक्षान्महार्हान्मददौ); च तस्मै; ततोस्य for तु तस्य); नृपोस्मै for ततोस्मै); (३)क०ख०ग०च मोदकानि; घ०रूचिं ददूर्हि,ताम्; तान् for तानि); ऋष्य; ०श्रृङ्गाय (०श्रृङ्गाश्च) (४) स्वं स for सुं); रुचिप्रदानि; च मोदकानि for रुचिं ददुर्हि );,

(०२) (३)पापानि; याना पेयां for पानां ); ददौ बहूनि; ततो मुमोह; तदा मुमोद० (४)मुमोद for चिप्र ); चापि; सापि; वापि; for चैवं चैव );,

(०३) (१)(आ)रमती सलीलं for (अ)रमतास्य मूले ); सा (स) कामुकं भारत चास्य मूले०० (२)लंव० ( ०लंव्य०); ०लज; ०नभ्य० नद्य० for ०भज्य०); (३)निषेव्यं ०माना (४) ऋष्य०,

(०४) (१)स्तबकां for तिल्कां०); (२) प्रोत्फुल्लितान्; सुपुष्पितान् अवनम्या०; चैव जिन मद्यानां for अवनाम्यावभज्य); (३) रहोग्ला सा मदाः,

(०५) (१)अथार्ष्य०; अथर्य्यं निरीक्ष्य for समीं); पीड्य विचेतनः, (२)गात्रम् for कायम्); (३) अवेक्ष०; अन्येषं; अन्वेक्ष अवेक्ष्य ,

(०६) विचेतन (२) ऋष्यश्रृगः (३) गतः स; गतेन for गतेन); शून्ये ,

स्वाध्यायवान्वृत्तसमाधियुक्तो विभाण्डकः काश्य पःप्रादुरासीत् ॥ १९ ॥[०१]

सोऽपश्यदासीनमुपेत्य पुत्रं ध्यायन्तमेकं विपरीतचित्तम्।

विनिःश्वसन्तं मुहुरूर्ध्वदृष्टिं विभाण्डकःपुत्रमुवाचदीनम् ॥ २० ॥[०२]

न कल्प्यन्ते समिधः किं नु तात

कच्चिद्धुतं चाग्निहोत्रं त्वयाद्य।

सुनिर्णिक्तं स्रुक्स्रुवं होमधेनुः

कच्चित्सवत्साद्य कृता त्वया च ॥ २१ ॥[०३]

न वै यथापूर्वमिवासि पुत्र चिन्तापरश्चासि विचेतनश्च ।

दीनोऽतिमात्रं त्वमिहाद्य किंतत् पृच्छामित्वां क इहाद्यागतोऽभूत् ॥ २२ ॥[०४]

**अस्मिन् तीर्थयात्रापर्वणि ८८ अध्याये २२ श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि अष्टशीतितमोऽध्यायः ॥ ८८ ॥

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 089

# ८९. एकोननवतितमोऽध्यायः

**ऋश्यश्रृङ्गेन स्वपितरं विभण्डकं प्रति भ्रमाद्वेश्याकुमार्या मुनिकुमारत्वव्यपदेशेन**

---

(०१) (२)लिमभिर् for रोमभिर्); आनस्वादि; आजटाभिः;आनस्वात्रं आनखान्तः (४) विभण्डकः,
(०२) (२)एकां for एकं);बुद्दिम् for चित्तम् ); (४) विभण्डकः तमु वाचाथ for पुत्रमुवाच );,
(०३) (१)विद्यते कल्पिताः for कल्प्यन्ते); (२) ना for चा); (३) स्रुक्श्रुवं (४)सर्वात्मा for सवत्सा); (अ)द्य (अ)थ; नfor च) च for (अ)द्य );,
(०४) (१)इहास्य इहाद्य; एवासि; इवाद्य for इवासि); (२) (अ)पि for (अ)सि ); (३) ()निमित्तं (द्यमात्रं) for तिमात्रं ); त्वमहादि किमिहाद्य; किमिवाद्य किं तु (कच्चित्); खिन्नः; पुत्र for किं ); नु (४) त्वाfor त्वां ); किम् for क ); (अ)भि (अ)पि for (अ)द्य );,

तदागमनोक्तिपूर्वकं तदङ्गचेष्टविलासैस्तस्यामेव वारवनितायां मुनिकुमारत्वबुद्ध्यास्वचित्तासक्त्युक्तिः ।। १ ।। पुनर्विभण्डकासन्निधाने तदाश्रमं गतया गणिकातरुण्या नौकारोपणेन महावृष्टेराविर्भावः ।। २ ।। ऋश्यशृङ्गेण लोमपादप्रार्थनया शान्ताभिधायास्तत्सुतायाः परिणयनम् ।। ३ ।। लोमपादेन क्रुद्धस्य विभण्डकस्य प्रसादनम् ।। ४ ।। ऋश्यशृङ्गेण पितृशासनादङ्गदेशे तलयोदयावधि वासपूर्वकं ततः सभार्यया निजाश्रमाभिगमनम् ।।५।।

ऋष्यशृङ्गः

इहागतो जटिलो ब्रह्मचारी न वै ह्रस्वो नातिदीर्घो मनस्वी।
सुवर्णवर्णः कमलायताक्षः स्वतः सुराणामिव शोभमानः ।। १ ।।(०१)
समृद्धरूपः सवितेव दीप्तः सुश्लक्ष्णकृष्णाक्षिरतीव गौरः ।
नीलाः प्रसन्नाश्च जटाः सुगन्धा हिरण्यरज्जुग्रथिताः सुदीर्घाः ।। २ ।।(०२)
आधार(आश्चर्य)रूपा पुनरस्य कण्ठे विभ्राजते विद्युदिवान्तरिक्षे।
द्वौ चास्य पिण्डावधरेण कण्ठादजातरोमौ सुमनोहरौ च ।। ३ ।।(०३)
विलग्नमध्यश्च स नाभिदेशे कटिश्च तस्यातिकृतप्रमाणा ।
तथास्य चीरान्तरतः प्रभाति हिरण्मयी मेखला मे यथेयम्।। ४ ।।(०४)

---

(०१) (२)न चाति ; नाति for न वै); (३) ०यतेक्षणः for ०यताक्षः); (४)सुरासुराणाम्; स्वतः सुराणाम् लोभ for शोभ );,

(०२) (१)समिद्धरूपः (२)अ०तग०स शुक्लकृष्णाक्षकृतं चकोरै : ।, घ०सशुक्तकृष्णाक्षकृतं चकोरै :। स for सु ); क्षितरशू; क्षिधरशू; क्षरतशू; ०क्षिकृतशू for क्षतरशू ); च गौरः; च गात्रैः; चकोरात् for चकोरैः ); सुशुक्लकृष्णाक्षिरती (ते) व गौरः;०कृष्णाक्षतलश्चकोरात्; सुश्लक्ष्ण (०कक्ष) कृष्णाक्षिरतीव ( तरश्च रतीव) गौरः ( दीप्तः); सुश्लक्ष्णकृष्णाक्ष( क्षि) तरश्चकोरात्; शुभ्रमवाङ्गम्भसार (तरा)श्चकोरात् ( श्च गौरः); (३) प्रसन्नाःसुगन्धाः,

(०३) (१)आश्चर्यरूपा (०रूपः); आधारभूता (तः); अवाल० (आधार); आधाररूपः; आधाररूपं आश्चर्यभूतान्य रिशुष्य कण्ठे; (२) आश्चर्यरूपाणि विमुच्य अन्तरीक्षे (३) (अ)थ वृत्त(रक्त) रूपौ for (अ) धरेण कण्ठम्);कण्ठात्; कक्षात् कर्णःfor कण्ठम्); (४) लोमं; ०लोमौ; रूपौ for ०रोमौ); हरं for ०हरौ ); मे for च);,

(०४) (२)कच्चित्; कश्चित्; कटी for कटिश्); तु for च); कस्य for तस्य );(अ)विकृति; (अ)तिशय

० अन्यच्च तस्याद्भतदर्शनीया विभाति माला कनख्यभासा ।
कण्ठे स्थिता वक्षसि धूर्णमाना यथाक्षमाला भवता निबद्धा ।
अन्यच्च तस्याद्भुतदर्शनीयं विकूजितं पादयोः सम्प्रभाति।
पाण्योश्च तद्वत्स्वनवन्निबद्धौ कलापकावक्षमाला यथेयम्।। ५ ।।(०१)
विचेष्टमानस्य च तस्य तानि कूजन्ति हंसाः सरसीव मत्ताः ।
चीराणि तस्याद्भुतदर्शनानि नेमानि तद्वन्मम रूपवन्ति।। ६ ।।(०२)
वक्त्रं च तस्याद्भुतदर्शनीयं प्रव्याहृतं ह्लादयतीव चेतः ।
पुंस्कोकिलस्येव च तस्य वाणी तां शृण्वतो मे व्यथितोऽन्तरात्मा।। ७ ।।(०३)
यथा वनं माधवमासि मध्ये समीरितं श्वसनेनैव भाति ।
तथा स भात्युत्तमपुण्यगन्धी निषेव्यमाणः पवनेन तात।। ८ ।।(०४)
सुसंयताश्चापि जटा विषक्ता द्वैधीकृता नातिसमा ललाटे।
कर्णौ च चित्रैरिव चक्रवाकैः समावृतौ तस्य सुरूपवद्भिः ।। ९ ।।(०५)

---

for (अ)तिकृल ); प्रणामःfor प्रमाणा); (३) चीरां तरत्; खरता वि for प्र );,
(०१) (२)विक्रुश्चितं for विकूजितं); संवि० for सम्प्र०); (३) पाणौ च; पाण्यौ च for पाप्यो); तद्य दुभतुर्; तौ सस्वनतुर् तद्दुद्धिभृकृन् ; तस्वाश्च तन्; तद्वच्च तन्; तद्वद्वहुसं for तद्वन्त्यनवन्);,
(०२) (१)क०ग० विचेष्टमानसक्य च तस्य तानि,घ०विवैष्टमानानि; ख०इदमर्धं नास्ति, तस्य तात; तानि तस्य (२) हंसाः मत्ताः शरदीवfor सरसीव); (३)द्भुतरूपवन्ति ) (४) तत्तत्सम for तद्वन्मम);,
(०३) (१) घ०वक्त्रं चतस्याद्भुतदर्शनानि नामानि तद्वन्मम रूपवन्ति । वक्त्रं हि चन्द्रप्रतिमं च तस्व (२) ० प्रह्लादयत्; प्रत्याहृतं; सग्वाहतं; संव्या०; सुम्या चित्तं for चेतः); (४) य्यथतें; ()म्बबता for व्यथितो० ); श्रृण्वं ततो मे व्यथितान्तरात्मा ,
(०४) (१)माधवमासमध्ये; माधवे चैव मासि (२) समी रिते (आ)वि० (ए)व; (अ)ति (अ)व (इ)व for (अ)भि ); भक्ति for चाति); (३) भातिः ( ताम् for वाति) तया च साप्युत्तम गन्धवन्ति for ०पुज्यगधी) (४) ०मानः for मम्भ) पुनरेव for पवनेन); निष्पिष्यमाणस्व वनेन तातं,
(०५) (१)असंवतान्नू; सुसंवतान् चास्वfor चापि); ह्यष्ट वृत्तम् विमुक्त; (२)द्विधी; द्विधा for द्वैधी); नाति; साति for भान्ति); लला टदेशे for समा ललाटे); (३) वि ; तु for च); वर for इव); चक्रवाकैः; वक्रचकैः for चक्रवालैः);,

तथा फलं वृत्तमथो विचित्रं समाहरत्पाणिना दक्षिणेन ।

तद्भूमिमासाद्य पुनः पुनश्च समुत्पतत्यद्भुतरूपमुच्चैः ।। १० ।।(०१)

तच्चाभिहत्य परिवर्ततेऽसौ वातेरितो वृक्ष इवावघूर्णन् ।

तं प्रेक्षतः पुत्रमिवामराणां प्रीतिः परा तात रतिश्च जाता।। ११ ।।(०२)

स मे समाश्लिष्य पुनः शरीरं जटासु गृह्याभ्यवनाम्य वक्त्रम्।

वक्त्रेण वक्त्रं प्रणिधाय शब्दं चकार तन्मेऽजनयत्प्रहर्षम्।। १२ ।।(०३)

न चापि पाद्यं बहु मन्यतेऽसौ फलानि चेमानि मयाऽऽहृतानि।

एवंव्रतोऽस्मीति च मामवोचत्फलानि चान्यानि समाददन्मे।। १३ ।।(०४)

मयोपयुक्तानि फलानि यानि नेमानि तुल्यानि रसेन तेषाम्।

न चापि तेषां त्वगियं यथैषां साराणि नैषामिव सन्ति तेषाम्।। १४ ।।(०५)

तोयानि चैवातिरसानि मह्यं प्रादात्स वै पातुमुदाररूपः ।

पीत्वैव यान्यभ्यधिकः प्रहर्षो ममाभवद्भूश्चलितेव चासीत् ।। १५ ।।(०६)

इमानि चित्राणि च गन्धवन्ति माल्यानि तस्योद्ग्रथितानि पट्टैः ।

---

(०१) वृत्तम् (२) हरत्; हतं; हतं for हनत्); वह्निः for मुच्चैः);,

(०२) (१)तथापि; for तच्चाभि );तथा हि; तच्चाव for तच्चापि ); हित्वा; गत्वा for हत्वा ;); स्म; सः for सौ ); (२) हरिद्घनं for वातेरितो ); प्रधूर्णन्; (अ)वधूर्णन् ( चूर्णयन् );(अ)वपूर्णः; (अ)वधूर्णितःfor (अ)वधूर्णः ); (३) सम्प्रेक्ष्य तं ( ते); तं प्रेक्षतः for तं प्रेक्ष्य मे); (४) पुरा; तदा for परा ); पुनश्च for रति );मेभूत्for च जाता );,

(०३) (२)गृह्णाति for गृह्याभि ); ०नम्य for नाम्य ); जटासु नम्याभ्यवरुह्य वक्त्रं (३)वक्त्रे च for वक्त्रेण) (४) च for प्र);,

(०४) (१)परिगृह्यते for बहु मन्यते); सः for सौ ); (२) समा for मया ); (४)समाददन्मे; स चाददन्मे; च मे प्रयच्छत्; विधान्यदान्मे; नवाददान्मे for नवान्य दान्मे ); अदन् for अदान् );,

(०५) (१)भुक्तानि for युक्तानि ); यानि; तात for तानि ); (२) फलानि for रसेन );,

(०६) (३)तानि for यानि ); (अ)भ्यधिकं for कः);,

यानि प्रकीर्येह गतः स्वमेव स आश्रमं तपसा द्योतमानः ।। १६ ।।(०१)

गतेन तेनास्मि कृतो विचेता गात्रं च मे सम्परिदह्यतीव ।

इच्छामि तस्यान्तिकमाशु गन्तुं तं चेह नित्यं परिवर्तमानम्।। १७ ।।(०२)

गच्छामि तस्यान्तिकमेव तात का नाम सा ब्रह्मचर्या च तस्य।

इच्छाम्यहं चरितुं तेन सार्धं यथा तपः स चरत्यार्यधर्मा।। १८ ।।(०३)

चर्तुं तथेच्छा हृदये ममास्ति दुनोति चित्तं यदि तं न पश्ये।

विभाण्डकः

रक्षांसि चैतानि चरन्ति पुत्र रूपेण तेनाद्भुतदर्शनेन ।

अतुल्यवीर्याण्यभिरूपवन्ति विघ्नं सदा तपसश्चिन्तयन्त।। १९ ।।(०४)

सुरूपरूपाणि च तानि तात प्रलोभयन्ते विविधैरूपायैः ।

सुखाच्च लोकाच्च निपातयन्ति तान्युग्ररूपाणि मुनीन्वनेषु।। २० ।।(०५)

न तानि सेवेत मुनिर्यतात्मा सतां लोकान्प्रार्थयानः कथञ्चित्।

---

(०१) (२)ग्रथितानि for (उ)हूथि) चाद्य मे for पट्टैः ); (३) (ए)व for (इ)ह) तपस्वी; तरस्वी for स्वमेव ); (४) स्वम्; तम् for स );,

(०२) (२)दशतीव; तप्यते च; ०तप्यमेव for ०तप्यतीव ); (३) (आ)श्रमम् for (आ)न्तिकम् ); एव for आशु ); (४) तं वेह; ते चेह; तथैव; तं नेह; तं चैव for तं चेह );,

(०३) (१)गच्छाव for गच्छामि ); इच्छामि विज्ञातुमहं हि ( च ) तात (२) सा स्याद् for सा ); ब्रह्मं for व्रत ); हि for च ); (४) सं for स ); आर्यधर्मा; उग्रधर्मा; उग्रधर्म; इत्युग्रधर्मा; आर्यधर्मः for उग्रकर्मा );,

(०४) (२)०द्भुवतदर्शनानि (३) अघोररूपाणि; अतुल्यवीर्याणि; तुल्यप्रचारणि for अतुस्वरूपाणि ); अतिरूप०; अभिरूप for अतिघोरं ); (४)तात; तथा for सदा );,

(०५) (१)स्वरूप for सुरूप ); हि तानि; कृतानि; तु तात; च तातfor च तानि ); तानि नो; कृत्वा (भूत्वा) for तात ); (२) तैलोम्भयित्वा; ते लोभ्य चैतान्; तैर्लोभ्यमानान् ( माना ); विलोभयित्वा; प्रलोभ्य ( विलोभ्य; विमोभ्र ) भूयो ( त्त्योय यन्ते) तैलोम्भ्यमत्वोतिवित्त्येस्म(०पी) (४) रूपणि for कर्माणि ); वने चरन्ति for मुनीन्वनेषु );,

कृत्वा विघ्नं तापसानां रमन्ते पापाचारास्तापसस्तान्न पश्येत्।।२१ ।।(०१)

असज्जनेनाचरितानि पुत्र पापान्यपेयानि मधूनि तानि ।

माल्यानि चैतानि न वै मुनीनां स्मृतानि चित्रोज्ज्वलगन्धवन्ति।। २२ ।।(०२)

**लोमशः**

रक्षांसि तानीति निवार्य पुत्रं विभाण्डकस्तां मृगयाम्बभूव ।

नासादयामास यदा त्र्यहेण तदा स पर्याववृतेऽऽश्रमाय।। २३ ।।(०३)

यदा पुनः काश्यपो वै जगाम फलान्याहर्तुं विधिनाऽऽश्रमात्सः ।

तदा पुनर्लोभयितुं जगाम सा वेशयोषा मुनिमृष्यशृङ्गम्।।२४ ।।(०४)

दृष्ट्वैव तामृष्यशृङ्गः प्रहृष्टः सम्भ्रान्तरूपोऽभ्यपतत्तदानीम्।

प्रोवाच चैनां भवतः श्रमाय गच्छाव यावन्न पिता ममैति।। २५ ।।(०५)

ततो राजन्काश्यपस्यैकपुत्रं प्रवेश्य योगेन विमुच्य नावम्।

प्रमोदयन्त्यो विविधैरूपायैराजग्मुरङ्गाधिपतेः समीपम्।। २६ ।।(०६)

---

(०१) (२)कदा for कथं ); (४) तपसा; ता ( त )पसां;तापसः for तपसः ); चाप्यपाप; तानपास्य;(स्येत्) तान्न पश्येत्; तान्न पास्ये; तापयति; पातयति; प्रापयन्ति for तान्यपाप ); पापाचाराण्यतपस्कान्यपाप ( पापे ) ,

(०२) (१)०ज्जनैराचरि०; ०ज्जनेनावग० for ज्जनेनाचरि ); (२) पानानि for पापानि ); तत्र; तात; पुत्र for तानि ); (४) पूतानि; ऋ; त्र ( वृ ); भृ; धृfor स्मृ) तान्युत्तमगन्ध चित्रोत्तमगन्ध ,

(०३) (२)विभण्डकः तं for तां ); (३) तदा; सदा; यथा for यदा );,

(०४) (२)विविधानि for विधिना ); (अ)श्रावणेनः श्रम; (आ)श्रमाच्च ( मात्सः; मेभ्यः; मेसौ); श्रमकेन; ममेति; काननानि; श्रमेण; चा श्रमेण for श्राम० ); (४) सा बेश्य योषा; सा वेष्य; सा वेश्या योषिन्; विवेश योषा; सावैस्मयोषा; सा वेशयोषिन् ऋषिम् for मुनिम् ); ऋष्य for ऋश्य० );,

(०५) (१)ऋष्य for ऋश्य० ); (२) स श्रान्त for सम्भ्रान्त ); न्यपतत्; ()भ्यगमत्; प्यवदत ह्यभवत्; प्यभवत् येभ्य for पतत् ); (३) चैनं for चैनां ); भवदाश्रमाय; तःश्रमाय (४) (अ)भ्युपैति; समेति for ममैति );,

(०६) (१)लोमशः (आ)त्मजं तं (आ)शु पुत्रं; (ए)व पुत्रं for (ए)कपुत्रं ); (२) प्रालोभ्य; प्रलोभ ; पुण्यप्र ; पुण्येन; प्रलोभ्य for प्रवेश्य ); वेगेन for यो ); विमुच्य मानं; विमु( मो )ह्यमानं (३) क्लीं मोद for

संस्थाप्य तामाश्रमदर्शने तु सन्तारितां नावमथातिशुभ्राम्।

नीरादुपादाय तथैव चक्रे नाव्याश्रमं नाम वनं विचित्रम्।। २७ ।।(०१)

अन्तःपुरे तं तु निवेश्य राजा विभाण्डकस्यात्मजमेकपुत्रम्।

ददर्श देवं सहसा प्रवृष्टमापूर्यमाणं च जगज्जलेन ।। २८ ।।(०२)

स लोमपादः परिपूर्णकामः सुतां ददावृष्यशृङ्गाय शान्ताम्।

क्रोधप्रतीकारकरं च चक्रे गाश्चैव मार्गेषु च कर्षणानि।। २९ ।।(०३)

विभाण्डकस्याव्रजतः स राजा पशून्प्रभूतान्पशुपांश्च वीरान्।

समादिशत्पुत्रगृद्धि महर्षिर्विभाण्डकः परिपृच्छेद्यदा वः ।। ३० ।।(०४)

स वक्तव्यः प्राञ्जलिभिर्भवद्भिः पुत्रस्य ते पशवः कर्षणं च ।

किं ते प्रियं वै क्रियतां महर्षे दासाः स्म सर्वे तव वाचि बद्धाः ।। ३१ ।।(०५)

* ० तत्कोपशान्तेः ग्रतिकारमेवं कृत्वा सुखी संवभूवाथ गञ्जा ।

अथोपायात्स मुनिश्चण्डकोपः स्वमाश्रमं मूलफलं गृहीत्वा।

---

लोभ );,

(०१) (१)दर्शनाय; दर्शनेषु for दर्शने तु ); (२) इहाति; अथाति for अतीव ); (३)नीराद् for तीराद् ); (४) नाव्या for राजा );,

(०२) (१)तत्र; तात ते तु for तं तु ); (२) विभण्डक० यज्ञरूपं for एकपुत्रम् ); (३)ववर्ष for ददर्श ); देवः; चैवं; चैनं; मेघैः for देवं ); प्रहृष्टम्; प्रवि० for प्रवृ०); (४) ऋषेः सुतन्तं सहसाभिपूज्य,

(०३) (१)०चेताः for ०कामः ); (२) अदात् for ददौ ); ऋष्य for ऋश्यं ); (३)तस्य for चक्रे ); ०करामदात्सः for करं च चक्रे ); (४) गाश्चैव (गावश्च) for गोभिश्च ); च कर्मणा हि; च कर्षणानि for (अ)भिकर्षणं च );,

(०४) (१)विभण्डक (२) पशु पान्प्रवीरान्; ०पाश्च धीमान्; पालांश्च ( ०पाल कांश्च) धीरान्; पालांश्च वीरान्; पांश्च धीरान् (३) पुत्रगृघ्र; यत्र चासौ; पुत्रगृद्धिर (४) विभण्डकः,

(०५) (१)तत एवं for प्राञ्जलिभिर् ); (२)ख० पुत्रस्य ते पशवः कर्षणानि । किं क्रियतां महर्षे वयं स्म सर्वे तव वाचिबद्धः ।। घ० पुत्रश्च ते पशवः कर्षणं च, कर्षणानि for णं च ); (३) किं for वै ); वै क्रियतां० किं कर्म ते करवामो महर्षे (४) प्रब्रूहि for दासाः स्म ); बालवृद्धाः; चापि बद्धाः for वाचि बद्धाः ); दासाः सर्वे तव वाचि प्रवि( ०व)द्धाः,

अन्वेषमाणश्च न तत्र पुत्रं ददर्श चुक्रोध ततो भृशं सः ।। ३२ ।।(०१)

ततः स कोपेन विदीर्यमाण आशङ्कमानो नृपतेर्विधानम्।

जगाम चम्पां प्रति धक्ष्यमाणस्तमङ्गराजं सपुरं सराष्ट्रम्।। ३३ ।।(०२)

स वै श्रान्तः क्षुधितः काश्यपस्तान्घोषान्समासादितवान्समृद्धान्।

गोपैश्च तैर्विधिवत्पूज्यमानो राजेव तां रात्रिमुवास तत्र।।३४ ।।(०३)

अवाप्य सत्कारमतीव तेभ्यः प्रोवाच कस्य प्रथिताः स्थ गोपाः ।

ऊचुस्ततस्तेऽभ्युपगम्य सर्वे धनं तवेदं विहितं सुतस्य   ।। ३५ ।।(०४)

० गचस्तथैतेत्त्र्यङ्त्यैते

देशेषु देशेषु स पूज्यमानस्तांश्चैव शृण्वन्मधुरान्प्रलापान्।

प्रशान्तभूयिष्ठरजाः प्रहृष्टः समाससादाङ्गपतिं पुरस्थम्    ।। ३६।।(०५)

स पूजितस्तेन नरर्षभेण ददर्श पुत्रं दिवि देवं यथेन्द्रम् ।

---

(०१) (१)अथापयात् तीव्रं; बद्धं for चण्डं ); (२) मूलफलानि ( दि ) for फलमूलानि ); मूलफलं (फलमूलं) गृहीत्वा (विहाय);फलमूले गृहीत्वा; मूलफलं प्रगृह्य(४) चुकोप; चुक्रोश for चुक्रोध ); भृशं ततःस्म ( सः;(अ)सौ ); भृशं महात्मा; तदा भृशं सः,

(०२) (१)विदार्यमाण (२) क०करिष्यमाणो; आशंस; ० तं ( तत् ) शङ्क for आशङ्क ); नृपतिः क०ग०तं शङ्कमानाऽङ्गपतेर्विधानम् ;, घ०आशङ्कमानो, ङ्गापतेर् for नृपते ); विनाशं for विधानम् ); (३) यया वरण्यात् for जगाम चम्पां ); वेश्यां; पम्पां for चम्पां); प्रतिधक्ष्ण माणसू; प्रतिदिक्ष०;प्रतिधक्ष०; प्रतिवक्ष्य०; प्रतिवीक्ष्य; प्रदिदृक्षं; प्रतियक्ष्य० ()०राजं सपुरं सराष्ट्रं; ०राजं प्रति जातकोपः,

(०३) (३)धोवैः for गोपैः ); तु for च ); विविधैः for बिषिवत् ); (४) हृष्टः; वीरःfor तत्र );,

(०४) (१)तं प्राप्य; स प्राप्य; अवाप्य० for सम्प्राप्य );ह्यष्ट for तेभ्यः) (२)घ० तस्व for कस्य );प्रहिताः; प्रकृताः; स्थतान्; प्रकृतीन् for प्रयिताः ); स्म स; च for ख ); गोपाः; सर्वान् for सौम्याः ); श्येवत्प व्यथि सस्यसङ्घाः,

(०५) (१)देशोषु देशोषु; एवं स देशोषु देशोथ देशोथ सं अभि for स ); सज्ज for पूज्य ); (२) तथैव तांस्तान् for तांश्रैव ); मधुरप्र मधुरान्प्रवदान; मधुरां च वाचं० (३) तरं for रजाः ); प्रविष्टः सुह for प्रह ); सदद् for ससाद ); अङ्गपतेः; राष्ट्रपति पुरं तत्; प्रहृष्टं; पुनस्तं for पुरस्थम् );,

शान्तां स्नुषां चैव ददर्श तत्र सौदामनीमुच्चरन्तीं यथैव ।। ३७ ।।(०१)

ग्रामांश्च घोषांश्च सुतस्य दृष्ट्वा शान्तां च शान्तोऽस्य स कोपः ।

चकार तस्यैव परं प्रसादं विभाण्डको भूमिपतेर्नरेन्द्र ।। ३८ ।।(०२)

स तत्र निक्षिप्य सुतं महर्षि रुवाच सूर्याग्निसमप्रभावः ।

जाते च पुत्रे वनमेवाव्रजेथा राज्ञः प्रियाण्यस्य सर्वाणि कृत्वा।। ३९ ।।(०३)

* इत्युक्त्वासावृश्यष्कं महात्मा विभण्डको रोमपादेन राजा ।
सम्पूजितो हृष्टचेता महर्षिर्ययौ वनं मुनिवर्यैः प्रजुष्टम् ।।

लोमशः

स तद्वचः कृतवानृष्यशृङ्गो ययौ च यत्रास्य पिता बभूव ।

शान्ता चैनं पर्यचरन्नरेन्द्र खे रोहिणी सोममिवानुकूला।। ४० ।।(०४)

अरुन्धती वा सुभगा वसिष्ठं लोपामुद्रा वा यथा ह्यगस्त्यम्।

नलस्य वै दमयन्ती यथाभूद्यथा शची व्रजधरस्य चैव ।। ४१ ।।(०५)

नारायणी चेन्द्रसेना बभूव वश्या नित्यं मुद्गलस्याजमीढ्।

---

(०१) (१)स for सं ); (२) त्रिदिवेfor दिवि देवं ); (३) ततःfor शान्तां ); शान्तां for तत्र ); (४) सौदामनीम्; असौ मुनिर for सौदा मिनीम् ); प्रचरन्ती द्युच्च; आच०; व्युच्च० for उच्चं ); विद्युदिवा चरन्तीं for उच्चरन्तीं यथैव ); तथैव; यथावत्; यथा वै for यथैव );,

(०२) (१)घ०ददर्श पुत्रंदिवि देवं यथैव, (एक पादोऽधिकः),सुतांश्च; सुतस्य; सुतां च for सुतं च ); (२) प्र for च ); अपि पुनः; कस्य पुनः; स परं; परमो for अस्य परः); स्म; च; अस्य for स ); (३) तस्याथ परं; तस्यैव परं; तस्योपसरं; तस्मै च परं for तस्मै परमं ); (४) विभडको भूपतये for भूमिपतेर् );,

(०३) (२)सूर्याग्निसमप्रभावः; ०स्त्रैसमानतेजाः; तिशयप्रभावं (३) पत्ये तु पुत्रे; च पुत्रे for पुत्रे ); वनमेव त्रेःस वनं व्र ;वनमेव गच्छेः; त्वमिहात्र for वनमेवात्र ); (४) कार्याणि; कर्मां० for प्रिया );,

(०४) (१)ऋष्यश्रृङ्गो (२) जगाम for ययौ च ); स्व for अस्य ); (३) यथा वै; नरेद्र; तथावत्; वे तथावै for यथावत् ); (४) एका यथैव; एकन्तथास्य; यथानुकूला; एकं तथैव; इवानुरक्ता for इवाचुकूला ); यथा खे वै ( वै खे; च वै) रोहिणी सोममेका ( चद्रकान्तं; सोममेक) ,

(०५) (१)शुभगा वा; चापि यथा for वा सुभगा ); हूव for वा ); वसिष्ठं शोभयन् (२) वेह; चेह; वा; चापि for वापि ); (३) वै for वा ); यथावद्; यथैव; यथा वा for यथास्य );,

तथा शान्ता ऋष्यशृङ्गं वनस्थं प्रीत्या युक्ता पर्यचरन्नरेन्द्र्।। ४२ ।।(०१)

* यथा सीता दाशरथेर्महात्मनो यथा तव द्रौपदी पाण्डुपुत्र(०२)

तस्याश्रमः पुण्य एषोऽवभाति महाह्रदं शोभयन्पुण्यकीर्तिः ।

अत्र स्नातः कृतकृत्यो विशुद्धस्तीर्थान्यन्यान्यनुसंयाहि राजन्।। ४३ ।।(०३)

**अस्मिन् तीर्थयात्रापर्वणि ८९अध्याये ४३श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि एकोननवतितमोऽध्यायः ।। ८९ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 090

# ९०. नवतितमोऽध्यायः

**युधिष्ठिरेण गङ्गासागरसङ्गमादितीर्थगमनम् ।। १ ।। लोमशेन युधिष्ठिरं प्रति तत्तीर्थाश्रममहिमानुवर्णनम् ।। २ ।। कौशिकीगङ्गासागरवैतरण्यादिषु विचरतो युधिष्ठिरस्य महेन्द्राचले गमनम्**

**वैशम्पायनः**

**ततः प्रयातः कौशिक्याः पाण्डवो जनमेजय।**
**आनुपूर्व्येण सर्वाणि जगामायतनान्यथ ।। १ ।।(०४)**

**स सागरं समासाद्य गङ्गायाः सङ्गमे नृप ।**

---

(०१) (१)नारायणी; नाळायणी for नाडायनी ); चन्द्रसेना;चन्द्रसेनं; चेन्द्रसेना बभूव for यथैव );,
(०२) (३)शान्ता; पि हि ऋष्यं ,
(०३) (१) अव आमि for वि ); (२) ०तीर्थः कीर्तेः ०तीर्थः for कीर्तेः ); (४) उप for अनु ); यातासि; यातः स for संयाहि ); राजा for राजन् );,
(०४) (१)प्रयाताः कौशिक्यां (२) पाण्डवा (३) ०पूर्वेण for पून्येण ); तीर्थानि for सर्वाणि ); (४) जग्मुर for जगाम ); च; (अ)थ for (उ)त );,

नदीशतानां पञ्चानां मध्ये चक्रे समाप्लवम् ।। २ ।।(०१)

ततः समुद्रतीरेण जगाम वसुधाधिपः ।
भ्रातृभिः सहितो वीरः कलिङ्गान्प्रति भारत ।। ३ ।।(०२)

लोमशः

एते कलिङ्गाः कौन्तेय यत्र वैतरणी नदी।
यत्रायजत धर्मोऽपि देवाञ्छरणमेत्य वै ।। ४ ।।(०३)

युधिष्टिरः

ऋषिभिः समुपायुक्तं यज्ञियं गिरिशोभितम् ।
उत्तरं तीरमेतद्धि सततं द्विजसेवितम् ।। ५ ।।(०४)

समानं देवयानेन पथा स्वर्गमुपेयुषः ।
अत्र वै ऋषयोऽन्येऽपि पुरा क्रतुभिरीजिरे ।। ६ ।।(०५)

अत्रैव रुद्रो राजेन्द्र पशुमादत्तवान्मखे ।
पशुमादाय राजेन्द्र भागोऽयमिति चाब्रवीत् ।। ७ ।।(०६)

हृते पशौ तदा देवास्तमूचुर्भरतर्षभ।

देवाः

---

(०१) (१)सागर स; सागरं स सागरं च सागरं for समुपासाग्र ); (२) नृपः,

(०२) (१)समुद्रतीराणि ०र्सट्यमे तीर्थेन (२)०धाधिप ,

(०३) (२)तत्र for यत्र ); (३) तत्रा; अज्जं for वत्रा ); वै for पि ); (४)देवस्यत्पि ,

(०४) (१)सत्रिभिः भ्रतुमिःच्छनुक्ति सशक्तं; ; स्तदा युक्तं सोमपतुकं (२) याज्ञि( ज्ञी ) यं for यज्ञियं ); गिरि शोभनम्; मुत्तमम् (३) तीर्थम् for तीरम् ); आसाद्य for एतद्धि ); (४) देवं for द्विज );,

(०५) (१)समानं; ; अनेन; समेत शुभेन; संमितं; सोमेन for समेन ); (२) यथा for पथा ); (३) यत्र देवर्षयो; चैवर्षयो; एवर्षयो for वै ऋ );,

(०६) (३)आसु; हत्वा; अदात्; आर्द्रं; अश्वं; रौद्रं for रुद्रः ); पशुर् for पशुं ); पशुमादाय राजेन्द्र (४) ममेति for यमिति );,

मापरस्वमभिद्रोग्धा मा धर्मान्सकलान्वशीः ।। ८ ।।[०१]

लोमशः

ततः कल्याणरूपाभिर्वाग्भिस्ते रुद्रमस्तुवन्।
इष्ट्या चैनं तर्पयित्वा मानयाञ्चक्रिरे तदा ।। ९ ।।[०२]

* एष ते रुद्र भागो वै मा नो यज्ञमिमं जहि ।
अयं ते पशुरित्येवस्तर्देवाः समागताः ।

ततः स पशुमुत्सृज्य देवयानेन जग्मिवान् ।
तत्रानुवंशो रुद्रस्य तं निबोध युधिष्ठि ।। १० ।।[०३]

अयातयामं सर्वेभ्यो भागेभ्यो भागमुत्तमम् ।
देवाः सङ्कल्पयामासुर्भयाद्रुद्रस्य शाश्वतम् ।। ११ ।।

इमां गाथामत्र गायन्नपः स्पृशति यो नरः ।
देवयानोऽस्य पन्थाश्च चक्षुषाभिप्रकाशते ।। १२ ।।[०४]

वैशम्पायनः

ततो वैतरणीं सर्वे पाण्डवा द्रौपदी तथा ।
अवतीर्य महाभागास्तर्पयाञ्चक्रिरे पितन् ।। १३ ।।

युधिष्ठिरः

---

(०१) (१)कृते; हते for हृते ); पुत्र ततो for तदा ); (४) वदीः; न सः; वशीः ( धीः); मा धर्म्यान्नी ( ०द्धि ) निशः पथः,

(०२) (२)अस्तुवन् for यानेन );(३) इष्ड्वा; दृष्टा; दृष्ड्वा for इष्ट्या ); (४) मानयित्वा तर्पयाचक्रिरे सुराः for तदा )

(०३) (१)यानेन सम्भ वान् for जग्मिवान् ); (३) तत्र for अत्र ); एश अवशं,

(०४) (१)अनु for अत्र ); उप for अपः ); स्पर्शति इमां सुश्रुत्य सुस्तुत्य; ; संस्तुत्य; ( गायन्त्य) यो ( वै) गाथां तत्रो ( अनो; यत्रो) पस्पृशते नरः; इमां गायति यो गाथामपः संस्पृशते तु यः (३) सिद्धश् for पन्थाश् ); देवयानस्य पन्थाः स्यात् देवयाने पथं स्यात् देवयानोस्य पथाश्च (४)चक्षुवाभि ; श्चाति; षो वै० for श्चैव ); प्रवर्तते; प्रवर्धते; प्रजायते ,

उपस्पृश्येह विधिवदस्यां नद्यां तपोबलात् ।
मानुषादस्मि विषयादपेतः पश्य लोमश ॥ १४ ॥[०१]

सर्वाँल्लोकान्प्रपश्यामि प्रसादात्तव सुव्रत ।
वैखानसानां जपतामेष शब्दो महात्मनाम् ॥ १५ ॥[०२]

## लोमशः

त्रिशतं वै सहस्राणि योजनानां युधिष्ठिर।
यत्र ध्वनिं शृणोष्येनं तूष्णीमास्स्व विशाम्पते ॥ १६ ॥[०३]

एतत्स्वयम्भुवो राजन्वनं दिव्यं प्रकाशते ।
यत्रायजत राजेन्द्र विश्वकर्मा प्रतापवान् ॥ १७ ॥[०४]

यस्मिन्यज्ञे हि भूर्दत्ता कश्यपाय महात्मने ।
सपर्वतवनोद्देशा दक्षिणार्थे स्वयम्भुवा ॥ १८ ॥[०५]

अवासीदच्च कौन्तेय दत्तामात्र मही तदा ।
उवाच चापि कुपिता लोकेश्वरमिदं प्रभुम् ॥ १९ ॥[०६]

## मही

न मां मर्त्याय भगवन्कस्मैचिद्दातुमर्हसि ।

---

(०१) (१)(इ)ह for (ए)व ); विधिवद् (सलिलं) for भगवन् ); (२) नद्यामस्यां तस्यां नद्यां बलात् for धन ); (३) अद्य for अस्मि ); विषयादस्मात्  for अस्मि विषयाद् ); (४) अपेताःअपेतं for अपेतः );,

(०२) (१)प्रपश्यामः (२) भगवंस्तव for तव सुव्रत );,

(०३) (१)त्रिशंद्धूभेः ( मि ); त्रिशंतिं वै (३) श्रृणोमि एतं; एवं; एष; एतत् for एनं); (४) यस्व; यास्व; ग्रो आस्य;आसीद् for आस्वव ); तूष्णीं स्थास्यति सम्प्रति,

(०४) (२)दिबयं; सवं for रम्यं ); (३) राजेन्द्र; धर्मात्मा for कौन्तेय );,

(०५) (१)अस्मिन्; तस्मिन् for यस्मि ); तदा for हि भूद् ); भद्रात्मा for भूर्दत्ता ); (२) काश्यपाय (४) दक्षिणा भू; ०णार्थे; ०णाण्ठ; ०णाथं for णा वै );,

(०६) (१)अथा०; अत्रा० for अजां ); (२) वसुन्धरा; स्वयम्भुवा for मही तदा ); (३)कुपिता राजन् for चापि कुपिता ); (४) वाचा for चापि ); मही तदा नु कुपिता वचः for प्रभुम् ); वाचोवाच स्वयम्भुवं ,

प्रदानं मोघमेतत्ते यास्याम्येषा रसातलम् ।। २० ।।[०१]

* इत्येवमुक्त्वा पृथिवी जगाम च रसातलम् ।
निममज्ज कुरुश्रेष्ठ याच्यमानापि भारत ।

लोमशः

विषीदन्तीं तु तां दृष्ट्वा कश्यपो भगवानृषिः ।
प्रसादयाम्बभूवाथ ततो भूमिं विशाम्पते ।। २१ ।।[०२]

ततः प्रसन्ना पृथिवी तपसा तस्य पाण्डव ।
पुनरुन्नह्य सलिलाद्वेदीरूपा स्थिता बभौ ।। २२ ।।[०३]

सैषा प्रकाशते राजन्वेदी संस्थानलक्षणा।
आरुह्यात्र महाराज वीर्यवान्वै भविष्यसि ।। २३ ।।[०४]

* सैषा सागरमासाद्य राजन्वेदी समाश्रिता।
एतामारुह्य भद्रं ते त्वमेकस्तर सागरम्।

अहं च ते स्वस्त्ययनं प्रयोक्ष्ये यथा त्वमेनामधिरोहसेऽद्य।
स्पृष्टा हि मर्त्येन ततः समुद्रमेषा वेदी प्रविशत्याजमीढ्।। २४ ।।[०५]

नमो विश्वगुप्ताय नमो विश्वपरायते।

---

(०१) (१)मा for मां ); न च मामद्य भगवन्,
(०२) (१)अवमीदं तु तां दृष्ट्वा; तां दृष्ट्वा चावसीदन्तीं; सीदन्तीं तां तु गां दृष्ट्वा० (२)काश्यपो,
(०३) (२)तप्यमानस्य for तपसा तस्य ); पार्थिव for पाण्डव ); (३) उन्नश for उन्मज्य ); उत्सृष्टसलिला for उन्मज्य सलिलाद् ); यतिता for द्वैपसलिलाद् ); (४) ०भूता for ०रूपा ); तदा for स्थिता );भवत् for बभौ ); ( सैषातीव सैषा राजन्) प्रकाशने,
(०४) हेर् ते राजन् बभूव सा र सूत स्त )आरोहेमां; प्र प्रारोहस्व; ( वृऽ झः ।। आरोहात्र ऽ आख्यात्र) त्वं वै) प्रकाशते; समास्थिता for ०मिता ); (३) आरोह; आरुहः आहर for आरुह्य ); (४) त्वं for वै),
(०५) (२)यदा for यथा ); एताम् for एनाम् ); ०रोष्यसि; ०रोइस्त्रे for रोक्ष्यसे ); न; त्र for क्ष ); (३) सर्वेण for मर्त्येन ); पुनः for ततः ); (४) देवी; वेदिःfor वेदी );,

सान्निध्यं कुरु देवेश सागरे लवणाम्भसि ।। २५ ।।(०१)

अग्निर्मित्रो योनिरापोऽथ देव्यो विष्णो रेतस्त्वममृतस्य नाभिः ।
एवं ब्रुवन्पाण्डव सत्यवाक्यं वेदीमिमां त्वं तरसाधिरोह ।। २५ ।।(०२)

* अग्निश्च ते योनिरिडा च देहो रेतोधा विष्णोरमृतस्य नाभिः ।
एवं जपन्पाण्डव सत्यवाक्यं ततोऽवगाहेत पतिं नदीनाम्।।

* अन्यथा हि कुरुश्रेष्ठ देवयोनिरपां पतिः ।
कुशाग्रेणापि कौन्तेय न स्प्रष्टव्यो महोदधिः ।(०३)

* घृतबर्हिर्घृतयोनिसवगर्हो स तेषां वै पयसां संनिधानम् ।(०४)

* आ जन्मशतसाहस्राद्यत्पापं कुरुते नरः ।
मुच्यते सर्वपापेभ्यः स्नात्वा तु लवणाम्भसि ।।(०५)

वैशम्पायनः

ततः कृतस्वस्त्ययनो महात्मा युधिष्ठिरः सागरमभ्यागच्छत्।
कृत्वा च तच्छासनमस्य सर्वं महेन्द्रमासाद्य निशामुवास।। २६ ।।(०६)

**अस्मिन् तीर्थयात्रापर्वणि ९०अध्याये २६श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि नवतितमोऽध्यायः ।। ९० ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

---

(०१) ( सर्व for नभो );
(०२) (२)रेतस्य for रेतद्ध ); अल्कत्स; अस्य भूमिश्च ( मिं च); क्यतस्थैव; स्वममृतस्यम्भ for त्वममृतस्व ); (३) सत्यवाक्यं पाकवेत्येव वक्तन् for पात्ततवज्ज० ); (४) ततो वेदीं for वेदीत्येमां );,
(०३) (१)दहा ;अग्निश्च तेजस्तव देव देहे० विष्णुर् for विष्णोर );,
(०४) (१) एतद्बुवन् for एवं जपन् ); एवं ब्रुवन्त त्यवाक्यं च राजन् गाहस्व for ०गाहेत );,
(०५) (१)कौरव्य for कौन्तेय ); ),
(०६) (२)प्रीतमनान्वगच्छत्; सागरमाजगाम; ०मम्यगच्छत्; ०मध्यगच्छत्; मागमत्तं for गामगच्छत् ); (३) तु for च );,

# 03- 04 - 091

## ९१. एकनवतितमोऽध्यायः

अकृतव्रणेन मुनिना युधिष्टिरं प्रति परशुरामचरित्रकीर्तनम् ।। १ ।। ऋचीकेन भृगुसुतेन दिव्याश्वशुल्कदानेन गाधिकन्यापरिणयनम् ।। २ ।। गाधिसुतया सत्यवत्या भृगु-प्रसादाज्जमदग्निनामकतनयोत्पादनम् ।। ३ ।।

वैशम्पायनः

स तत्र तामुषित्वैकां रजनीं पृथिवीपतिः ।
तापसानां परं चक्रे सत्कारं भ्रातृभिः सह ।। १ ।।(०१)

लोमशस्तस्य तान्सर्वानाचख्यौ तत्र तापसान् ।
भृगूनङ्गिरसश्चैव वसिष्ठानथ काश्यपान् ।। २ ।।(०२)

तान्समेत्य स राजर्षिरभिवाद्य कृताञ्जलिः ।
रामस्यानुचरं वीरमपृच्छदकृतव्रणम् ।। ३ ।।(०३)

युधिष्टिरः

कदा तु रामो भगवांस्तापसान्दर्शयिष्यति ।
तेनैवाहं प्रसङ्गेन द्रष्टुमिच्छामि भार्गवम् ।। ४ ।।(०४)

अकृतव्रणः

आयानेवासि विदितो रामस्य विदितात्मनः ।

---

(०१) (१) (ए)वम् ((ए)कम्)for ताम् ); क०ख०ग०घ० स उषित्वा च तत्रैकां रजनीं, घ०तत्र ता; स च तत्रोषितो वीरो,

(०२) (१)चापि; स्वस्य; तस्य for चास्य ); (४) वसिष्ठान् वासिष्ठान्काश्यपास्तथा ,

(०३) (३)तत्र; धरिम्; विप्रम् for वीरम् ); (४) स पप्रच्छ for अपृच्छद् );,

(०४) (१)तु for नु ); तापसानां कदा (यदा) रामो (२) भगवन्;भगवान्for तापसान् ); (३) तमहं तपसा युक्तं ,

प्रीतिस्त्वयि च रामस्य क्षिप्रं त्वां दर्शयिष्यति ।। ५ ।।[०१]

चतुर्दशीमष्टमीं च रामं पश्यन्ति तापसाः ।
अस्यां रात्र्यां व्यतीतायां भवित्री स्वश्चतुर्दशी ।। ६ ।।[०२]
* तत्र द्रक्ष्यसि रामं त्वं कृष्णाजिनजटाधरम् ।

युधिष्ठिरः

भवाननुगतो रामं जामदग्न्यं महाबलम् ।
प्रत्यक्षदर्शी सर्वस्य पूर्ववृत्तस्य कर्मणः ।। ७ ।।[०३]

स भवान्कथयत्वद्य यथा रामेण निर्जिताः ।
आहवे क्षत्रियाः सर्वे कथं केन च हेतुना ।। ८ ।।[०४]

अकृतव्रणः

कम्याकुब्वजे महानासीत् पार्थिवस्सुमहाबलः।
गाधीति विश्रुतो लोके वनवासं जगाम सः ।। ९ ।। [०५]
* कुशिकस्यात्मजो राजञ्जज्ञे वंशसमुद्भवः ।[०६]
हन्त ते कथयिष्यामि महदाख्यानमुत्तमम् ।
* भृगूणां राजशार्दूल वंशे जातस्य भारत ।। १० ।।
रामस्य जामदग्न्यस्य चरितं देवसम्मितम् ।
* हैहयाधिपतेश्चैव कार्तवीर्यस्य भारत।। ११ ।।

---

(०१) (१)आयानेवापि; अयानेवासि; अयन्निवास; आ ( अ ) यन्नेवासि (३) च त्वयि त्वयि हि (४) त्वा for त्वां );,

(०२) (१)चतुर्दश्यामष्टम्यां वा ( श्यां तथाष्टम्यां ) (३) इतो रजन्यां पश्चम्यां (४)श्वश् for च );,

(०३) (१)नित्यं; रामं for वीरं );,

(०४) (१)भगवान् for स भवान् ); (अ)द्य for (ए)तद् ); घातिताः for निर्जिताः ); (३) शूराः for सर्वे );,

(०५) (१)कान्यकुब्जे; कन्या ,

(०६) (४)ह for सः );,

रामेण चार्जुनो नाम हैहयाधिपतिर्हतः ।
✻ तस्य बाहुशतान्यासंस्त्रीणि सप्त च पाण्डव ।। १२ ।।
✻ दत्तात्रेयप्रसादेन विमानं काञ्चनं तथा ।
ऐश्वर्यं सर्वभूतेषु पृथिव्यां पृथिवीपते।। १३ ।।
✻ अव्याहतगतिश्चैव रथस्तस्य महात्मनः ।
रथेन तेन तु सदा वरदानेन वीर्यवान्।। १४ ।।
✻ ममर्द देवान्यक्षांश्च ऋषींश्चैव समन्ततः ।
भूतांश्चैव स सर्वांस्तु पीडयामास सर्वतः ।। १५ ।।
✻ ततो देवाः समेत्याहुरृषयश्च महाव्रताः ।
देवदेवं सुरारिघ्नं विष्णुं सत्यपराक्रमम्।। १६ ।।
✻ भगवन्भूतरक्षार्थमर्जुनं जहि वै प्रभो ।
विमानेन च दिव्येन हैहयाधिपतिः प्रभुः ।। १७ ।।
✻ शचीसहायं क्रीडन्तं धर्षयामास वासवम्।
✻ ततस्तु भगवान्देवः शक्रेण सहितस्तदा ।
कार्तवीर्यविनाशार्थं मन्त्रयामास भारत।। १८ ।।
✻ यत्तद्भूतहितं कार्यं सुरेन्द्रेण निवेदितम् ।
स प्र(सम्प्र)तिश्रुत्य तत्सर्वं भगवाँल्लोकपूजितः ।। १९ ।।
✻ जगाम बदरीं रम्यां स्वमेवाश्रममण्डलम् ।
एतस्मिन्नेव काले तु पृथिव्यां पृथिवीपतिः ।। २० ।।
कान्यकुब्जे महानासीत्पार्थिवः सुमहाबलः ।

वने तु तस्य वसतः कन्या जज्ञेऽप्सरःसमा ।
ऋचीको भार्गवस्तां च वरयामास भारत ।।(०१)

---

(०१) (१)तस्य वसतः कन्या for तस्य ); वने च वसतो जज्ञे; वने निवसतस्तस्य (२) जज्ञे कन्या ( कन्या तस्य); जज्ञे तस्य; कन्यासीद्; कन्याज्ज (अ)प्सरोपमा for (अ)प्सरःसमा ) (३)तु; वै for च); (४)

* बभूव शतपत्राक्षी रूपेणासदृशी भुवि ।
तमुवाच ततो गाधिर्ब्राह्मणं संशितव्रतम् ।। १० ।।

गााधिः

उचितं नः कुले किञ्चित्पूर्वैर्यत्सम्प्रवर्तितम् ।। ११ ।।(०१)

एकतः श्यामकर्णानां पाण्डुराणां तरस्विनाम् ।
सहस्रं वाजिनां शुल्कमिति विद्धि द्विजोत्तम ।। १२ ।।(०२)

न चापि भगवान्वाच्यो दीयतामिति भार्गव ।
देया मे दुहिता चैव त्वद्विधाय महात्मने ।। १३ ।।(०३)

ऋचीकः

एकतः श्यामकर्णानां पाण्डुराणां तरस्विनाम् ।
दास्याम्यश्वसहस्रं ते मम भार्या सुतास्तु ते ।।(०४)

अकृतव्रणः

स तथेति प्रतिज्ञाय राजन्वरुणमब्रवीत् ।। १४ ।।

ऋचिकः

एकतः श्यामकर्णानां पाण्डुराणां तरस्विनाम् ।
सहस्रं वाजिनामेकं शुल्कार्थं मे प्रदीयताम् ।। १५ ।।(०५)

---

पार्थिव for भारत );,

(०१) (१)स ( च) राजर्षिर्; ततो गाधिः ततो राजन् for ततो राजा); (२) ब्रह्माणं for ब्राह्मणं ); तपसि स्थितं for संशित ०); गाधिर्ब्राह्मणसत्तमं (३)विदितं for उचितं ); (४) पूर्ववत् for पूर्वैर्यत् ); यत्पूर्वैः सम्प्रकीर्तितं,

(०२) (२)पाण्डराणां for पाण्डु ) शुभ्राणां (शुभानां; हयानां) चन्द्रवर्चसां सहस्रं शुल्कमित्येतद्विद्धि त्वं हि द्विजोत्तम ,

(०३) (१)ततश्च; तच्चापि for न चापि ); (३) (अ)द्येयं चैव for चेयं );,

(०४) (२)पाडराणां (४) (अ)स्तु ( हि ) ते सुता for सुतास्तु ते );,

(०५) (१)तं तथा; तत्तथा for तथेति ); (४) पाण्डराणां प्रतिदी० सम्प्रदी०; दयितां मम for मे प्रदी० );,

### अकृतव्रणः

**तस्मै प्रादात्सहस्रं वै वाजिनां वरुणस्तदा ।**
**तदश्वतीर्थं विख्यातमुत्थिता यत्र ते हयाः ।। १६ ।।**(०१)

गङ्गायां कान्यकुब्जे वै ददौ सत्यवतीं तदा
**ततो गाधिः सुतां चास्मै जन्याश्चासन्सुरास्तदा ।। १७ ।।**(०२)

लब्ध्वा हयसहस्रं तु तांश्च दृष्ट्वा दिवौकसः ।(०३)
**विस्मयं परमं जग्मुस्तमेव दिवि संस्तुवन् ।। १८ ।।**

धर्मेण लब्ध्वा तां भार्यामृचीको द्विजसत्तमः ।
**यथाकामं यथाजोषं तया रेमे सुमध्यया ।। १९ ।।**

तं विवाहे कृते राजन्सभार्यमवलोककः ।
**आजगाम भृगुः श्रेष्ठं पुत्रं दृष्ट्वा ननन्द ह ।। २० ।।**(०४)

भार्यापती तमासीनं गुरुं सुरगणार्चितम् ।
**अर्चित्वा पर्युपासीनौ प्राञ्जली तस्थतुस्तदा ।। २१ ।।**(०५)

ततः स्नुषां स भगवान्प्रहृष्टो भृगुरब्रवीत्।

### भृगुः

**वरं वृणीष्व सुभगे दाता ह्यस्मि तवेप्सितम् ।। २२ ।।**(०६)

---

(०१) (१)सहस्राणि; सहस्रं ते for सहस्रं वै );,
(०२) (१) अ०-ततः कन्यानृपोत्तमम् ;, ख०विस्मिताश्वभवन् सुरा :, घ०ऋचिकाय महात्वने,कान्य; कन्या० for कन्य० );,
(०३) (३) गाधिसुतां चास्मै for तस्मै ); (४)कन्यां; प्रीता कन्याम् for जन्याः ); चासन् सहस्रं तु सुरर्षयः; सुता स्तदा for सुरास्तदा ); कन्यां तां च ( प्रादात् ) सुरर्षये; तदा कन्यां नृपोत्तम दत्वा; दत्ता; लब्धं for लब्ध्वा ); तत्; च for तु ); तां for तान् ); अभ्यर्च्य (दृष्ट्वा) मुदं ययौ for दिवौ );,
(०४) (२)सभार्यो मुनिपुङ्गवः (३) मुनि for भृगु ); (४) ह for च );,
(०५) (१)समासीनं (२) भृगुं for गुरु ); सुरासुर (३) अर्चयित्वा ह्युपा० ( भ्युपा ),
(०६) (१)विप्रर्षिः for भगवान् ); (२) प्रहृष्टं; दृष्ट्वा वै for प्रहृष्टो ); वाक्यम्; गुरुः मुनिर् for भृगुः );,

अकृतव्रणः

सा वै प्रसादयामास तं गुरुं पुत्रकारणात् ।
आत्मनश्चैव मातुश्च प्रसादं च चकार सः ।। २३ ।।(०१)

भृगुः

ऋतौ त्वं चैव माता च स्नाते पुंसवनाय वै ।
आलिङ्गेतां पृथग्वृक्षौ साश्वत्थं त्वमुदुम्बरम् ।। २४ ।।(०२)

* चरुद्वयमिदं भद्रे(द्रं) जनन्याश्च तवैव च ।
विश्वमावर्तयित्वा तु मया यत्नेन साधितम् । (०३)
प्राशितव्यं प्रयत्नेन चेत्युक्त्वादर्शनं गतः ।। (०४)

अकृतव्रणः

आलिङ्गने चरौ चैव चक्रतुस्ते विपर्ययम् ।
कदाचिद्भृगुरागच्छत्तत्र वेद विपर्ययम् ।। २५ ।।(०५)

* ततः पुनः स भगवान्काले बहुतिथे गते ।
* दिव्यज्ञानाद्विदित्वा तु भगवानागतः पुनः ।।

अथोवाच महातेजा भृगुः सत्यवतीं स्नुषाम् ।

भृगुः

ब्राह्मणः क्षत्रवृत्तिर्वै तव पुत्रो भविष्यति ।। २६ ।।

* उपयुक्तश्चरुर्भद्रे वृक्षे चालिङ्गनं कृतम् ।

---

(०१) (१)तु; च for वै ); प्रचोद for प्रसादं ); सा वरं वरयामास (२) भृगुं तं; गुरुं तं (४) वै for च ); ददौ तच्च स तच्चास्य; तं च स;( तच्चापि) भारत ,

(०२) (३)आलिङ्ग्यतां; ०तथा; गर्धो गतां; गता (४) उडुबरं,

(०३) (२)तथैव for तवैव );(४) त्वया for मया );,

(०४) (२) च इत्यु for तेत्यु );,

(०५) (१)आलिगन तु तं राजन्; चरौ चैव (राजन्); तु राजेन्द्र for तु ते राजन् ); (२) ते; तु; सं for स्म ); तं स्म; तत्वं;तच्च for तं च );,

विपरीतेन ते सुभ्रूर्मात्रा चैवासि वञ्चिता ।।(०१)

क्षत्रियो ब्राह्मणाचारो मातुस्तव सुतो महान् ।
भविष्यति महावीर्यः साधूनां मार्गमास्थितः ।। २७ ।।

ततः प्रसादयामास श्वशुरं सा पुनः पुनः ।
न मे पुत्रो भवेदीदृक कामं पौत्रो भवेदिति ।। २८ ।।(०२)

एवमस्त्विति सा तेन पाण्डव प्रतिनन्दिता।
कालं प्रतीक्षती गर्भं धारयामास यत्नतः ।। २९ ।।

जमदग्निं ततः पुत्रं जज्ञे सा काल आगते।
तेजसा वर्चसा चैव युक्तं भार्गवनन्दनम् ।। ३० ।।(०३)

स वर्धमानस्तेजस्वी वेदस्याध्ययनेन च ।
बहूनृषीन्महातेजाः पाण्डवेयात्यवर्तत ।। ३१ ।।(०४)

तं तु कृत्स्नो धनुर्वेदः प्रत्यभाद्भरतर्षभ ।
चतुर्विधानि चास्त्राणि भास्करोपमवर्चसम् ।। ३२ ।।(०५)

**अस्मिन् तीर्थयात्रापर्वणि ९१अध्याये ३२श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि
एकनवतितमोऽध्यायः ।। ९१ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 092

---

(०१) (१)( मात्रा for भद्रे ); सुभ्रु; भद्रे for बभूत ); ) (३) क्षत्रवृत्तो वै(सौ)क्षात्रवृत्तिर्वै; क्षत्रियमतिसू ,
(०२) (२)तु; वा for सा ); (३) तादृक् for ईदृक् ); (४) मम for कामं ); पुत्रो for पौत्रो ); भविष्यति for भवेदिति );,
(०३) (४)जज्ञे सा यशसा; तप० for वर्च );,
(०४) (२)ध्ययने रतः for ध्ययनेन वै ); च for वै ); (४) अभ्यव० for अत्यव ); तोषयामास पाण्डव ,
(०५) (१)तस्य; तं च for तं तु ); (२) प्रत्य गाद् (३) शास्त्राणि for चा० ); (४)वर्चसः; दर्शनं; ०तेजसः,

# ९२. द्विनवतितमोऽध्यायः

रामेण रेणुकायां मानसिकव्यभिचारदर्शिनः पितुर्जमदग्नेर्नियोगात् कठारेण तस्याः कण्ठच्छेदनम् ।। १ ।। जमदग्निना पुत्रप्रार्थनया रेणुकायाः पुनरुज्जीवनम् ।। २ ।। रामासन्निधाने जमदग्न्याश्रममुपागतेन कार्तवीर्यार्जुनेन तदीयहोमधेनुवत्साहरणपूर्वकं तदाश्रमपीडनम् ।। ३ ।। तत आगतेन रामेण कार्तवीर्ये युधि निहते तदीयै रामासन्निधाने जमदग्नेर्वधः ।। ४ ।।

अकृतव्रणः

स वेदाध्ययने युक्तो जमदग्निर्महातपाः ।
तपस्तेपे ततो देवान्नियमाद्वशमानयत् ।। १ ।।(०१)

* तं तप्यमानं ब्रह्मर्षिस्तृर्देवाः सवासवाः ।
किमर्थं तप्यसे ब्रह्मन्यः कामः प्रार्थितस्तव ।।

* एवमुक्तः प्रत्युवाच देवान्ब्रह्मर्षिसत्तमः ।
स्वर्गहेतोस्तपस्तप्ये लोकाश्च स्युर्ममाक्षयाः ।

* तच्छुत्वा वचनं तस्य तदा देवास्तमूचिरे ।
नासन्ततेर्भवेल्लोकः कृत्वा धर्मशतान्यपि ।।

* स श्रुत्वा वचनं तेषां त्रिदशानां कुरूद्वह ।
ब्रह्मर्षिणैवमुक्ते तु पुनरूचुर्दिवौकसः ।

* ब्रह्मर्षे नानपत्यस्य लोकाः सन्त हि चाक्षयाः

स प्रसेनजितं राजन्नधिगम्य नराधिपम् ।
रेणुकां वरयामास स च तस्मै ददौ नृपः ।। २ ।।(०२)

रेणुकां त्वथ सम्प्राप्य भार्यां भार्गवनन्दनः ।

---

(०१) (१)ततो वेदान्; महा तेजा for ततो देवान्),
(०२) (२)अभि for अधि); (४) नृप for नृपः );,

आश्रमस्थस्तया सार्धं तपस्तेपेऽनुकूलया ।। ३ ।।(०१)

तस्याः कुमाराश्चत्वारो जज्ञिरे रामपञ्चमाः ।
सर्वेषामजघन्यस्तु राम आसीज्जघन्यजः ।। ४ ।।(०२)

फलाहारेषु सर्वेषु गतेष्वथ सुतेषु वै।
रेणुका स्नातुमगमत्कदाचिन्नियतव्रता ।। ५ ।।

सा तु चित्ररथं नाम मार्तिकावतकं नृपम्।
ददर्श रेणुका राजन्नागच्छन्ती यदृच्छया ।। ६ ।।

क्रीडन्तं सलिले दृष्ट्वा सभार्यं पद्ममालिनम्।।
ऋद्धिमन्तं ततस्तस्य स्पृहयामास रेणुका ।। ७ ।।(०३)

व्यभिचाराच्च तस्मात्सा क्लिन्नाम्भसि विचेतना।
क्यअन्तरिक्षान्निपतिता नर्मदायां महाह्रदे ।। ८ ।।

उत्तीर्य चापि सा यत्नाज्जगाम भरतर्षभ।
प्रविवेशाश्रमं त्रस्ता तां वै भर्तान्वबुध्यत ।। ९ ।।(०४)

* अन्तरिक्षान्निपतिता नर्मदायां महाह्रदे ।
उत्तीर्य चापि सा यत्नाज्जगाम भरतर्षभ ।।(०५)

स तां दृष्ट्वा च्युतां धैर्याद्ब्राह्म्या लक्ष्म्या विवर्जिताम् ।
धिक्छब्देन महातेजा गर्हयामास वीर्यवान् ।। १० ।।(०६)

---

(०१) (१)अथ; चापि for त्वथ ); रेणुकां तु समासाद्य (३) आश्रमे स for मस्थस् );,

(०२) (१) तस्यां for तस्याः ); (३)च for तु );,

(०३) (२) हेमं for पद्मं ); (३)ऋद्धिमत्तां,

(०४) (१)च for तु ); वै तस्मित्; सा तस्मिन् तस्मात्सा; ष्यभि चारेण सा चैव (२) क्लिन्नाङ्गा वै; क्लिन्नाङ्गी वै ; सङ्क्लिन्नाङ्गी for क्लिन्नाम्भसि )(३) ख०घ०ऽऽश्रमं,

(०५) (३) ( अ ) थ सन्त्रस्ता for ( आ ) श्रमं त्रस्ता ); (४)तस्यै for तां वै ), त्वबु ( अ) नुबु); for (अ)न्वबु),

(०६) (१) दृष्ट्वा तां च्युतां धैर्याद् (२) ब्रह्म for ब्राह्मया );(३)वीर्योfor तेजा ); (४)जगाद स तु वीर्य,

ततो ज्येष्ठो जामदग्न्यो रुमण्वान्नाम नामतः ।
आजगाम सुषेणश्च वसुर्विश्वावसुस्तथा ।। ११ ।।(०१)

तानानुपूर्व्याद्भगवान्वधे मातुरचोदयत् ।
न च ते जातसंस्नेहाः किञ्चिदूचुर्विचेतसः ।। १२ ।।(०२)

ततः शशाप तान्क्रोधात्ते शप्ताश्चेतनां जहुः ।
मृगपक्षिसधर्माणः क्षिप्रमासञ्जडोपमाः ।। १३ ।।(०३)

ततो रामोऽभ्ययात्पश्चादाश्रमं परवीरहा ।
तमुवाच महाबाहुर्जमदग्निर्महातपाः ।(०४)

जमदग्निः

जहीमां मातरं पापां मा च पुत्र व्यथां कृथाः ।। १४ ।।

तत आदाय परशं रामो मातुः शिरोऽहरत् ।। १५ ।।

* इत्युक्तो गुरुणा राजन्क्रोधात्तु जमदग्निना ।

ततस्तस्य महाराज जमदग्नेर्महात्मनः ।।

कोपोऽभ्यगच्छत्सहसा प्रसन्नश्चाब्रवीदिदम् ।। १६ ।।(०५)

जमदग्निः

ममेदं वचनात्तात कृतं ते कर्म दुष्करम् ।
वृणीष्व कामान्धर्मज्ञ यावतो वाञ्छसे हृदा ।। १७ ।।(०६)

---

(०१) (२)मरुता; समन्वा; सुतपो; जमण्डो for रुमण्वान् ); भारत for नामतः ); (४)तदा for तथा );,
(०२) (१)पूर्व्या for पूर्व्याद् ); (३)जातसन्दोहाः; संमोहात्; सं(स) स्नेहाः (४)अचे for विचे );,
(०३) (१)क्रोधात् for कोपात् ); (२) सर्वै for शप्ताशू );,
(०४) (१)भ्ययात् (२) मं स्वं युधिष्ठिर (३) बाहुर for मन्युर् ); (४तापवान्; महायशाः for तपाः );,
(०५) (१)बाहोर् for राज ); (३)व्यगच्छत्; ()प्यग; ()भ्यग ; ()भ्यगाद्वै; ह्यगच्छत् for अगच्छत्);
(४)सुतं for इदम् ); स प्रसन्नोब्रवीत्सुतं ,
(०६) (१)राम for तात ); (२)कृतं कर्म सुदुष्करं (३) कामं for कामान् ); धर्मात्मन् for धर्मज्ञ ); (४)
यावन्तो; यांश्च त्वं; यावत्त्वं for यावतो ); मत्त इच्छसि; मन्यसे हृदा for वाञ्छसे हृदा);,

## अकृतव्रणः

**स वव्रे मातुरुत्थानमस्मृतिं च वधस्य वै ।**
**पापेन तेन चास्पर्शं भ्रातणां प्रकृतिं तथा ।। १८ ।।(०१)**

**अप्रतिद्वन्द्वतां युद्धे दीर्घमायुश्च भारत ।**
**ददौ च सर्वान्कामांस्ताञ्जमदग्निर्महातपाः ।(०२)**

**कदाचित्तु तथैवास्य विनिष्क्रान्ताः सुताः प्रभो ।। १९ ।।**

**अथ अनूपपतिः वीरः कार्तवीर्योऽभ्यवर्तत ।। २० ।।(०३)**
**तमाश्रमपदं प्राप्तमृषेर्भार्या समार्चयत्।।**
**स युद्धमदसम्मत्तो नाभ्यनन्दत्तथार्चनम् ।। २१ ।।(०४)**

**प्रमथ्य चाश्रमात्तस्माद्धोमधेनोस्तथा बलात् ।**
**जहार वत्सं क्रोशन्त्या बभञ्ज च महाद्रुमान् ।। २२ ।।(०५)**

**आगताय च रामाय तदाचष्ट पिता स्वयम् ।**
**गां च रोरुदतीं दृष्ट्वा कोपो रामं समाविशत्।(०६)**
**स मृत्युवशमापन्नं कार्तवीर्यमुपाद्रवत् ।। २३ ।।(07)**

---

(०१) (२)वधं प्रति for वधस्य वै );,
(०२) (३)सर्वकामांस्तान् सकलान्कामान्; कामान्सर्वास्तान् for सर्वान्कामांस्तान् ); तान्कामान् स for तान् ); ददौ तस्मै स कामांस्तान्,
(०३) (२)सु for वि ); (३)ततो; तदा; अथो for अथा );,
(०४) (२)मुनिभार्या; ऋषिरर्घ्यात् for ऋषेर्भार्या ); समार्च for समर्च );ऋषिः स्या सहार्चयत् ऋषिभार्या तमर्च (समार्प) यत् सभार्ये मुनिरर्चयत् ऋषिर्भावात्समार्च (३) बाहुमद युद्मानसो मत्तो (४) अथ; तद् for तथा ); अर्चनात् अर्चनां for अर्चनम् ); नाभ्यनन्दत भारत,
(०५) (१)प्रगृह्यः प्रमत्तशू for प्रमथ्य ); आश्रमात्; चार्चनां for चाश्रमात्); तां पूजां कार्त वीर्योथ (२)कामधेन्वास् होमधेनुर्; होमधेनोस्; होमधेनुं महा; तथा; ततो; यथा for तदा ); (४)द्रुमम् for द्रुमान् );,
(०६) (२)तमा for तदा ); (३)रोरुदतीं for रोरू ); तथाविधं तु तं दृष्ट्वा,
(०७) (१)मृत्युं for मन्यु ); आपन्नं for आपन्नः );,

तस्याथ युधि विक्रम्य भार्गवः परवीरहा।[०१]
चिच्छेद निशितैर्भल्लैर्बाहून्परिघसन्निभान् ।। २४ ।।

सहस्रसम्मितान्राजन्प्रगृह्य रुचिरं धनुः ।। २५ ।।

* अभिभूतः स रामेण संयुक्तः कालधर्मणा ।
आगत्य कर्म तत्पित्रे निवेद्य गतवान्वनम् ।

अर्जुनस्याथ दायादा रामेण कृतमन्यवः ।
आश्रमस्थं विना रामं जमदग्निमुपाद्रवन् ।। २६ ।। [०२]

ते तं जघ्नुर्महावीर्यमयुध्यन्तं तपस्विनम् ।
असकृद्रामरामेति विक्रोशन्तमनाथवत् ।। २७ ।।[०३]

कार्तवीर्यस्य पुत्रास्तु जमदग्नि युधिष्ठिर।
पीडयित्वा शरैर्जग्मुर्यथागतमरिन्दमाः ।। २८ ।।[०४]

अपक्रान्तेषु वै तेषु जमदग्नौ तथा गते।
समित्पाणिरुपागच्छदाश्रमं भृगुनन्दनः ।। २९ ।।[०५]

स दृष्ट्वा पितरं वीरस्तथा मृत्युवशं गतम् ।
अनर्हन्तं तथाभूतं विललाप सुदुःखितः ।। ३० ।।[०६]

**अस्मिन् तीर्थयात्रापर्वणि ९२अध्याये ३०श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि
द्विनवतितमोऽध्यायः ।। ९२ ।।

---

(०१) (३)सङ्गम्य; सङ्क्रम्य for वि ); स्वयं च कार्तवीर्यस्य (४) भार्गवः for महात्मा );,

(०२) (१)च for (अ)थ ); (३) तदा राजन् for विना रामं );,

(०३) (१)तं ते जग्मुर्महावीर्या,

(०४) (३)पात पीड; साद for घातं ); क्षुद्रा for जग्मुर् ); (४)दम for दमाः ); जग्मुर्ये नागता नृप ( पाः) ;,

(०५) (१)वै तेषु for चैतेषु ); (२)मृते for गते );,

(०६) (२)तदा for तथा ); (३)अनागसं; अतदर्हं for अन ); महात्मानं for तथा );,

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 093

## ९३. त्रिनवतितमोऽध्यायः

परशुरामस्य पितृहेतोर्विलापः । अकृतर्वणेन युधिष्ठिरं प्रति पितृवधामर्षात् त्रिस्सप्तकृत्वः पृथिव्या निःक्षत्रियीकरणादिरामचरित्रकथनम् ॥ १ ॥ युधिष्ठिरेण परेद्युश्चतुर्दश्यां सान्निहितपरशुरामपूजनादिपूर्वकं महेन्द्रशैलात् पुनः प्रस्थानम् ॥ २ ॥

परशुरामः

ममापराधत्तैः क्षुद्रैर्हतस्त्वं तात बालिशैः ।
कार्तवीर्यस्य दायादैर्वने मृग इवेषुभिः ॥ १ ॥

धर्मज्ञस्य कथं तात वर्तमानस्य सत्पथे ।
मृत्युरेवंविधो युक्तः सर्वभूतेष्वनागसः ॥ २ ॥

किं नु तैर्न कृतं पापं यैर्भवांस्तपसि स्थितः ।
अयुध्यमानो वृद्धः सन्हतः शरशतैः शितैः ॥ ३ ॥

किं नु ते तत्र वक्ष्यन्ति सचिवेषु सुहृत्सु च ।
अयुध्यमानं धर्मज्ञमेकं हत्वानपत्रपाः ॥ ४ ॥(०१)

अकृतव्रणः

ला(वि)लप्यैवं सकरुणं बहु नानाविधं नृप ।
प्रेतकार्याणि सर्वाणि पितुश्चक्रे महातपाः ॥ ५ ॥(०२)

ददाह पितरं चाग्नौ रामः परपुरञ्जयः ।

---

(०१) (२)महत्सु च; मुमूर्षवः for सुहृत्सु च ); वा for च ); (४)तातं for एकं ); गतत्रपाः; नराधमाः for (अ) नपत्रपाः );,
(०२) (१)विलाप्यैवं; लाल सु; तु for स ); (२) बहुना विधिवन्नृप (४)परन्तपः (तप ); for महातपाः );,

प्रतिजज्ञे वधं चापि सर्वक्षत्रस्य भारत ।। ६ ।।[०१]

सङ्क्रुद्धोऽतिबलः सङ्ख्ये शस्त्रमादाय वीर्यवान्।।
जघ्निवान्कार्तवीर्यस्य सुतानेकोऽन्तकोपमः ।। ७ ।।[०२]

तेषां चानुगता ये च क्षत्रियाः क्षत्रियर्षभ ।
तांश्च सर्वानवामृद्नाद्रामः प्रहरता वरः ।। ८ ।।[०३]

त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः ।
समन्तपञ्चके पञ्च चकार रौधिरान्ह्रदान्(रुधिरह्रदान्) ।। ९ ।।[०४]

स तेषु तर्पयामास भृगून्भृगुकुलोद्वहः ।।
साक्षाद्ददर्श चर्चीकं स च रामं न्यवेद(वार)यत् ।। १० ।।[०५]

ततो यज्ञेन महता जामदग्न्यः प्रतापवान् ।
तर्पयामास देवेन्द्रमृत्विग्भ्यः प्रददौ महीम् ।। ११ ।।[०६]

वेदीं चाप्यददद्धैमीं कश्यपाय महात्मने ।
दशव्यामायतां कृत्वा नवोत्सेधां विशाम्पते ।। १२ ।।[०७]

तां कश्यपस्यानुमते ब्राह्मणाः खण्डशस्तदा ।

---

(०१) (१)घ०सकंवृतो ब्रह्मणैश्शूरः आर्तशस्त्रोऽन्तकोपमः । (३)तेषां for चापि ); (४) चासकृत् for भारत );,

(०२) (१)स क्रुद्धो; क्रुद्दोति for सङ्क्रुद्धो ); भार्गवः; बलवाञ् for तिबलः ); सङ्ख्ये; यातः for शूरः ); (४)एवान्तको; एको महाबलः; एकान्तको,

(०३) (१)तांश्चैवां for तेषा चा ); तेषां ये चानुगाः (येनुगताः); केचित् (३)अपामृद्नन्; उपामृद्नाद्; अथामृ; अपामृ; अगृह्णीत for अवामृ ); (४)रामः परपुरञ्जयः रामः शस्त्रभृतां वरः,

(०४) (२)ततः; विभुः; प्रभो पुनः for प्रभुः ); (४)रुधिरैर् रौधिरान् for रुधिर );,

(०५) (२)भृगून् for पितृन् ); भृगुकुलोद्वह; कुरुकुलोद्वह (३)चार्चीकं; चाशङ्कं चार्वाकं for चर्चीकं ); (४) न्यवेद for न्यवार ); स च तं प्रत्य (पर्य ) वारं; स रामं संन्यवेद,

(०६) (४)ऋत्विजे for ऋत्वि ग्भ्यस् ); (अ) थ for च ); ददौ महीं,

(०७) (१)व्यामा चाप्यददात्; च प्रददौ (२) काश्यपाय (३) व्यामां तु तां; व्यामयुतां; व्यायतनं व्यायामेति मादपाठः (४)नरो for नवो) हिरण्मयीं for विशां पते );,

व्यभजंस्ते तदा राजन्प्रख्याताः खाण्डवायनाः ॥ १३ ॥(०१)

स प्रदाय महीं तस्मै कश्यपाय महात्मने।
तपस्सु मन आस्थाय महाबलपराक्रमः ।
अस्मिन्महेन्द्रे शैलेन्द्रे वसत्यमितविक्रमः ॥ १४ ॥ (०२)

* तपः सुमहदास्थाय महाबलपराक्रमः ॥(०३)

एवं वैरमभूत्तस्य क्षत्रियैर्लोकवासिभिः ।
पृथिवी चापि विजिता रामेणामिततेजसा ॥ १५ ॥(०४)

वैशम्पायनः

ततश्चतुर्दशीं रामः समयेन महामनाः ।
दर्शयामास तान्विप्रान्धर्मराजं च सानुजम् ॥ १६ ॥(०५)

स तमानर्च राजेन्द्र भ्रातृभिः सहितः प्रभुः ।
द्विजानां च परां पूजां चक्रे नृपतिसत्तमः ॥ १७ ॥(०६)

अर्चित्वा जामदग्न्यं स पूजितस्तेन चोदितः ।
महेन्द्र उष्य तां रात्रिं प्रययौ दक्षिणामुखः ॥ १८ ॥(०७)

---

(०१) (१)काश्यपस्य (२)तु ये (ते ); तथा for तदा ); (३) तेन वै; ते तदा for तेन ते );व्यभञ्जन्त ततो राजन् (४) र००.नाः,स्वां (खां ); डवाहनाः,

(०२) (१)सं for स ); महीं च तस्मै प्रादाय (२)काश्यपाय जामदग्न्यो महातपाः(३) ख०इदमर्धं नास्ति,

(०३) (३)महेन्द्र महेन्द्रे वसति,

(०४) अकृतव्रण उ (२) भरतर्षभ; लोकविश्रुतैः (३) पृथुना for पृथिवी ); च ( वि ); जिता कृत्स्ना for चापि विजिता );,*

(०५) (१)चतुर्दश्यां for र्दशीं) चतुर्दश्यां ततो रामः (३)त्मना; तपा for मनाः ); (४)नुगं for नुजम् );पाण्डवं च ( वांश्च ); सहानुगं (महाभुजं; युधिष्ठिरं; सहानुजं );,

(०६) (१)अभ्यर्च्य for आनर्च ); राजेन्द्र (२) प्रभुं for प्रभुः ); (३) स च ( हि ) तस्मै; ब्राह्मणानां for द्विजानां च );,

(०७) (१)अर्चित्वा जामदग्न्यं स महेन्द्रे पर्वतोत्तमे । राममामन्त्य धर्मात्मा -ख

(२) चापि for तेन ); च प्रभो; वाभिभुः; चोदितः; तेन सः; वै विभुः for चाभिभूः ); (३) उषित्वा;

अस्मिन् तीर्थयात्रापर्वणि ९३अध्याये १८३लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि त्रिनवतितमोऽध्यायः ।। ९३ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 094

## ९४. चतुर्वनतितमोऽध्यायः

**यात्राक्रमेण विविधतीर्थेषु विचरतो युधिष्ठिरस्य प्रभासक्षेत्रे गत्वा तपश्चरणम् ।। १ ।। तत्र तद्दिदक्षया कृष्णबलभद्रादीनामागमनम् । यादवानां पाण्डवैः सह समागमश्च ।। २ ।।**

### वैशम्पायनः

गच्छन्स तीर्थानि महानुभावः पुण्यानि रम्याणि ददर्श राजा।
सर्वाणि विप्रैरुपशोभितानि क्वचित्क्वचिद्भारत सागरस्य ।। १।।(०१)
स वृत्तवांस्तेषु कृताभिषेकः सहानुजः पार्थिवपुत्रपौत्रः ।
समुद्रगां पुण्यतमां प्रशस्तां जगाम पारिक्षित पाण्डुपुत्रः ।। २।।(०२)
तत्रापि चाप्लुत्य महानुभावः सन्तर्पयामास पितन्सुरांश्च ।
द्विजातिमुख्येषु धनं विसृज्य गोदावरीं सागरगामगच्छत् ।। ३ ।।(०३)
ततो विपाप्मा द्रविडेषु राजन्समुद्रमासाद्य च लोकपुण्यम्।

---

उषितां for उष्य तां ); तामेव च निशामुष्य ,
(०१) (२) (अ) रण्यानि for रम्याणि ); (३)समानि for सर्वाणि );,
(०२) (१)स धर्मराजः सु राजाभि; राजश्च कु; समुद्रतीर्थेषु कृ (२) पौत्रैः; पौत्रवान् for पौत्रः ); (३) समुद्रगाः तमाः स्ताः (४)पारिक्षित पुत्रपौत्रः for पाण्डु );,
(०३) (१) भावान् for भावः) (२)सुरान्पितृंश्च ; पितृंश्च देवान्,

अगस्त्यतीर्थं च महापवित्रं नारीतीर्थान्यथ वीरो ददर्श ।। ४ ।।(०१)

तत्रार्जुनस्याग्र्यधनुर्धरस्य निशम्य तत्कर्म नरैरशक्यम् ।

सम्पूज्यमानः परमर्षिसङ्घैः परां मुदं पाण्डुसुतः स लेभे ।। ५ ।।(०२)

स तेषु तीर्थेष्वभिषिक्तगात्रः कृष्णासहायः सहितोऽनुजैश्च ।

सम्पूजयन्विक्रममर्जुनस्य रेमे महीपाल पतिः पृथिव्याः ।। ६ ।।(०३)

ततः सहस्राणि गवां प्रदाय तीर्थेषु तेष्वम्बुधरोत्तमस्य ।

हृष्टः सह भ्रातृभिरर्जुनस्य सङ्कीर्तयामास गवां प्रदानम् ।। ७ ।।(०४)

लक्षालङ्कारः- तीर्थेषु तेष्वम्बुधरोत्तमस्य इत्यत्र अम्बुधरोत्तमस्य समुद्राम्बुधारिषु उत्तमस्य सकलसमुद्राम्बुपानकर्तुरित्यर्थः ।

* ततस्तु कावेरिमनन्ततोयां दिव्याश्रमैर्नित्यमुपात्ततोयाम् ।

सहानुजः संविगाह्य पुण्यां ननन्द नष्टक्लमशोकपापः ।

स तानि तीर्थानि च सागरस्य पुण्यानि चान्यानि बहूनि राजन्।

क्रमेण गच्छन्परिपूर्णकामः शूर्पारकं पुण्यतमं ददश ।। ८ ।।(०५)

तत्रोदधेः कश्चिदतीत्य देशं ख्यातं पृथिव्यां वनमाससाद्।

---

(०१) (१)द्रमिडेषु; विडमेषु; द्रमिळाषु राजा for राजन् ); ततो वितीर्थानि ददर्श पश्च (३)परमं पवित्रं; च महापवित्रं च अतीव पुण्यं; च जगाम पुण्यं for च पवित्रं ); (४)अन्यानि for नारी ); अथ वाप्यभ्यपश्यत्; अथ समेत्य पश्यन् अथ चैवाभ्यगच्छत्; अथ सोभ्यगच्छत् अत्र ( तत्र ); चैवाभ्यगच्छत् for अथ वीरो ददर्श ); नाराचतीर्थानि ददर्श पश्च,

(०२) (१)ततो; तथा; तेषु; तस्य for तत्र ); अग्र; अथ for अग्र्य ); (२)निशाम्य नरैर् (करैर् ); for परैर् ); अशक्यं for असह्यम् ); सम्पूजयामास महर्षिसङ्घान् (४) क०ख०ग०पाण्डुसुतस्स;,। तनु सदा तत्र तदा for पाण्डुसुतः ); च; (उ)प for स ) ; अन्वागतश्चापि महर्षिसङ्घैः; मुदं परां तत्र स चैव लेभे,

(०३) (४)पृथिव्याः for व्याम् );,

(०४) (१)द्विजातिमुख्येषु महीपतिः स (२)त्तरस्य for त्तमस्य );,

(०५) (२)धन्यानि for चा ); निषेव्य for बहूनि ); राजा; गच्छन् for राजन् ); बहूनि चान्यानि निषेव्य राजन् (३)राजन् for गच्छन् ); (४) शूर्पाक ( का ) रं for रकं );,

तप्तं सुरैस्तत्र तपः पुरस्तादिष्टं तथा पुण्यपरैर्नरेन्द्रैः ।। ९ ।।(०१)

स तत्र तामग्र्यधनुर्धरस्य वेदीं ददर्शायतपीनबाहुः ।

ऋचीकपुत्रस्य तपस्विसङ्घैः समावृतां पुण्यकृदर्चनीयाम् ।। १० ।।(०२)

ततो वसूनां वसुधाधिपः स मरुद्गणानां च तथाश्विनोश्च ।

वैवस्वतादित्यधनेश्वराणामिन्द्रस्य विष्णोः सवितुर्विभोश्च ।। ११ ।।

भवस्य चन्द्रस्य दिवाकरस्य पतेरपां साध्यगणस्य चैव ।

धातुः पितणां च तथा महात्मा रुद्रस्य राजन्सगणस्य चैव ।। १२ ।।(०३)

सरस्वत्याः सिद्धगणस्य चैव पुण्याश्च ये चाप्यमरास्तथान्ये।

पुण्यानि चाप्यायतनानि तेषां ददर्श राजा सुमनोहराणि ।। १३ ।।(०४)

तेषूपवासान विबुधानुपोष्य दत्त्वा च रत्नानि महान्ति राजा।

तीर्थेषु सर्वेषु परिप्लुताङ्गः पुनः स शूर्पारकमाजगाम ।। १४ ।।(०५)

स तेन तीर्थेन तु सागरस्य पुनः प्रयातः सह सोदरीयैः ।

द्विजैः पृथिव्यां प्रथितं महद्भिस्तीर्थं प्रभासं समुपाजगाम ।। १५ ।।(०६)

तत्राभिषिक्तः पृथुलोहिताक्षः सहानुजैर्देवगणान्पितृंश्च ।

---

(०१) (१)ततोदधिं; ततोदधेः किं for कं ); (३) क०ख०ग०घृ०दिष्टं तथा,ततः for तप्तं ); सुरैः तपः अत्र for यत्र ); (४)तमं; परैर् for तमैर् );,

(०२) (१)ताम्रग्र्यतपोधनस्य (२) बाहुरग्र्यां for पीनबाहुः ); (३)आर्चीक for ऋचीक ); (४)चितां; श्रितां for वृतां );,

(०३) (१)भव for भगं ); (२)पत्युस्त्वपां for पतेरपां ); (३)पार्थः for धातुः ); (४)चापि for चैव ); सगणाधिपस्य for सगणस्य चैव );,

(०४) (२)पुण्याश्च; पूज्या for पूष्ण ); ( अ ) परास् for अ मरास् ); (३)तीर्था for चाप्या );,

(०५) (२)दानानि for रत्नानि ); महानुभावः; महान्ति राजा; तथा द्विजेभ्यः for महा ); (३)पुण्ये; रम्ये for सर्वे ); (४)च for स) शूर्पाकरम् शूर्पाकरमाससाद for आजं );,

(०६) (१)तीरेण for तीर्थेन ); च for तु ); (३)कथितं for प्र) बुवद्भिस् for महद्भिस् ); (४)च ततो ज for समुपाज );,

सन्तर्पयामास तथैव कृष्णा ते चापि विप्राः सह लोमशेन ।। १६ ।।(०१)

स द्वादशाहं जलवायुभक्षः कुर्वन्क्षपाहःसु तदाभिषेकम् ।

समन्ततोऽग्नीनुपदीपयित्वा तेपे तपो धर्मभृतां वरिष्ठः ।। १७ ।।(०२)

तमुग्रमास्थाय तपश्चरन्तं शुश्राव रामश्च जनार्दनश्च ।

तौ सर्ववृष्णिप्रवरौ ससैन्यौ युधिष्ठिरं जग्मतुराजमीढम्।। १८ ।।(०३)

ते वृष्णयः पाण्डुसुतान्समीक्ष्य भूमौ शयानान्मलदिग्धगात्रान् ।

अनर्हतीं द्रौपदीं चापि दृष्ट्वा सुदुःखिताश्चुक्रुशुरार्तनादम्।। १९ ।।(०४)

ततः स रामं च जनार्दनं च कार्ष्णिं च साम्बं च शिनेश्च पौत्रम्।

अन्यांश्च वृष्णीनुपगम्य पूजां चक्रे यथाधर्ममहीनसत्त्वः ।। २० ।।(०५)

ते चापि सर्वान्प्रतिपूज्य पार्थांस्तैः सत्कृताः पाण्डुसुतैस्तथैव ।

युधिष्ठिरं सम्परिवार्य राजन्नुपाविशन्देवगणा यथेन्द्रम् ।। २१ ।।(०६)

तेषां स सर्वं चरितं परेषां वने च वासं परमप्रतीतः ।

अस्त्रार्थमिन्द्रस्य गतं च पार्थं निवेशनं हृष्टमनाः शशंस।। २२ ।।(०७)

---

(०१) (२)ऋषींश्च for पितॄं ); (४) तैश्चापि for ते चापि );,

(०२) (२)सदाहःसु; क्षपाहः स; क्षपाहं स for क्षपाहःसु ); तथा; ततो for तदा ); (३) दंस; जीव for दीप );,

(०३) (१)स (त ); मागतं तत्र for तमुग्रं ); तपो वसन्तं for तप ); तमुग्ररूपे तपसि प्रपन्नं (३) वृष्णिलोक; वृष्णिवीर for सर्ववृष्णि ); प्रवीरौ for ससैन्यौ);,

(०४) (१)सुतीक्ष्णान्; निरीक्ष्य for समीक्ष्य ); (२)पकन्दिग्धान् for दिग्धगात्रान् );(३)सुदुःखितां for अनर्हतीं ); (४)सुदुःखितान् चक्रुरतीव नादान् ( नादं ); for चुक्रु ); आर्तनादान्; नादाः for नादम् );,

(०५) (१)राजा ह for ततः स ); (२)वृष्णींश्च for कार्ष्णिं च ); शांवं च; सर्वाश्च for साम्बं च) पुत्रं for पौत्रम् ); (३)राजाfor पूजां ); (४) अधीन; अहीन for अदीन ); चक्रे यथासंविदं धर्मसूनुः,

(०६) (१)सर्वे for सर्वान् ); सर्वास् for पार्थान् ); तैश्चपि सर्वैः प्रतिपूजि ( पादि ) तश्च ( तः सः ); (२)ते; सु for तैः ); सुतास् for सुतैस् );,

(०७) (१)तु; च for स ); (३)इद्रं च for इन्द्रस्य );(४)कृष्णः for कृष्णे ); निवेशनं हृष्टमनाः शशंस,

श्रुत्वा तु ते तस्य वचः प्रतीतास्तांश्चापि दृष्ट्वा सुकृशानतीव ।
नेत्रोद्भवं सम्मुमुचुर्महार्हा दुःखार्तिजं वारि महानुभावाः ।। २३ ।।(०१)

**अस्मिन् तीर्थयात्रापर्वणि ९४अध्याये २३श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि चतुर्नवतितमोऽध्यायः ।। ९४ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 095

# ९५. पञ्चनवतितमोऽध्यायः

**प्रभासे बलभद्रेण वृष्णिपाण्डवसभायां भीष्मधृतराष्ट्रादिगर्हणपूर्वकं पाण्डवान् प्रति सहानुभूतिसूचको दुःखपूर्णोद्गारः ।।**

**जनमेजयः**

**प्रभासतीर्थमासाद्य पाण्डवा वृष्णयस्तथा ।**
**किमकुर्वन्कथाश्चैषां कास्तत्रासंस्तपोधन ।। १ ।।(०२)**

**ते हि सर्वे महात्मानः सर्वशास्त्रविशारदाः ।**
**वृष्णयः पाण्डवाश्चैव सुहृदश्च परस्परम् ।। २ ।।(०३)**

**वैशम्पायनः**

**प्रभासतीर्थं सम्प्राप्य पुण्यं तीर्थं महोदधेः ।**

---

(०१) (१)च for तु ); पुनः for वचः ); (२)सुकृतीन्; (अ) तिकृशान् for सुकृ ); (३)द्भवाश्रुं; द्भवासुं for द्भवं सं ); महार्हा for दशार्हाः); (४)सर्वे तदा for दुःखा ) ; दुःस्वकरा ( करं; तरं ); रिपूणां for वारि महा );,
(०२) (१)आसाद्य for सम्प्राप्य ); (२) पाण्डवा वृष्णयस् तदा for तथा ); (३)चैव; तेषां for चैषां ); (४)के; ते for कास् ); तथा for तत्र ); वने for धन );,
(०३) (१) (ऽ ) पि; च for हि ); (२)सर्वे शस्त्र for सर्वशास्त्र );,

वृष्णयः पाण्डवान्वीराः परिवार्योपतस्थिरे ।। ३ ।।(०१)

ततो गोक्षीरकुन्देन्दुमृणालरजतप्रभः ।
वनमाली हली रामो बभाषे पुष्करेक्षणम् ।। ४ ।।

बलदेवः

न कृष्ण धर्मश्चरितो भवाय जन्तोरधर्मश्च पराभवाय ।
युधिष्ठिरो यत्र जटी महात्मा वनाश्रयः क्लिश्यति चीरवासाः ।। ५ ।।
दुर्योधनश्चापि महीं प्रशास्ति न चास्य भूमिर्विवर ददाति ।
धर्मादधर्मश्चरितो वरीयानितीव मन्येत नरोऽल्पबुद्धिः ।। ६ ।।(०२)
दुर्योधने चापि विवर्धमाने युधिष्ठिरे चासुखमात्तराज्ये।
हृतस्वरन्यायतनार्थभार्ये दुर्योधनेनाल्पधने च पार्थे।(०३)
किं त्वत्र कर्तव्यमिति प्रजाभिः शङ्का मिथः सञ्जनिता नराणाम्।। ७ ।।(04)
अयं स धर्मप्रभवो नरेन्द्रो धर्मे धृतः सत्यधृतिः प्रदाता ।
चलेद्धि राज्याच्च सुखाच्च पार्थो धर्मादपेतस्तु कथं विवर्धेत्।। ८ ।।(०५)
कथं नु भीष्मश्च कृपश्च विप्रो द्रोणश्च राजा च कुलस्य वृद्धः ।

---

(०१) (१)आसाद्य for सम्प्राप्य ); प्रभासं ते समासाद्य (२) पुण्यं तीरे; पुण्ये तीरे; पुण्यतीरे; पुण्यतीर्थ; पुण्यतीर्थे; पुण्ये तीर्थे; पुण्यं तीरं (३)वीराः for वीरान् );,

(०२) (३)वरीयान् for गरी ); (४) (ए)व for ( इ ) व ); धर्म च विन्दामि महानुभाव,

(०३) (१)धनं वीक्ष्य धनं चापि for धने चापि ); मानं for मान्रे ); (२)क०ग०चासुख आत्तराज्ये; ख०त्यक्तसुखे महात्मनि;, घ०चासुखमात्तराज्ये, युधिष्ठिरं चा ( वा ); सुखम् (३) आत्तराज्यं; अन्तरोष्णं; आप्तवन्तं; आत्तसारेआर्ता( र्ति ); राज्ये वा वनवासक्लिष्टं for चासुख आत्त );,

(०४) (१)किं त्वद्य; किं त्वत्र; किञ्चिन्न; किं न्वत्र वर्तव्यम्; कर्ताहम्; वक्तव्यम् for कर्तव्यम् ); इह; ऊचुः for इति );, (२) सशङ्कता for शङ्का मिथः );,

(०५) (१)स for हि ); (२)वृतः; स्थितः; धृतः; रतिः धृतिः for रतः );महात्मा for यदाता ); चलेच्च; त for द्धि ); राज्यार्थसुखाच्च चलेत राज्यादिति संशयो मे (४)अपेतं तु for च ); नु कुर्यात् for विवर्धेत् ); धर्मादधर्मश्चरितो गरीयान् ,

प्रव्राज्य पार्थान्सुखमाप्नुवन्ति धिक्पापबुद्धीन्भरतप्रधानान्।। ९ ।।(०१)

किं नाम वक्ष्यत्यवनिप्रधानः पितन्समागम्य परत्र पापः ।

पुत्रेषु सम्यक्चरितं मयेति पुत्रानपापान्व्यपरोप्य राज्यात्।। १० ।।(०२)

नासौ धिया सम्प्रति पश्यति स्म किं नाम कृत्वाहमचक्षुरेवम्।

जातः पृथिव्यामिति पार्थिवेषु प्रव्राज्य कौन्तेयमिति स्म राज्यात्।। ११ ।।(०३)

नूनं समृद्धान्पितृलोकभूमौ चामीकराभान्क्षितिजान्प्रफुल्लान्।

विचित्रवीर्यस्य सुतः सपुत्रः कृत्वा नृशंसं बत पश्यति स्म।। १२ ।।(०४)

व्यूढोत्तरांसान्पृथुलोहिताक्षान्नेमान्स्म पृच्छन्स शृणोति नूनम्।

प्रास्थापयद्यत्सवनं सशङ्को युधिष्ठिरं सानुजमात्तशस्त्रम् ।। १३ ।।(०५)

योऽयं परेषां पृतनां समृद्धां निरायुधो दीर्घभुजो निहन्यात्।

श्रुत्वैव शब्दं हि वृकोदरस्य मुञ्चन्ति सैन्यानि शकृत्समूत्रम्।। १४ ।।(०६)

स क्षुत्पिपासाध्वकृशस्तरस्वी समेत्य नानायुधबाणपाणिः ।

---

(०१) (१) च तु for नु) (२)कुलस्य वृद्धाः कुलप्रवृद्धः कुले च वृद्धाः,

(०२) (३)सत्यं for सम्यक्) (ए)ष for (इ)ति) (४) व्यप for अव) राज्यम् for राज्यात्),

(०३) (१)पश्यते; पृच्छति for पश्यति ) (३)इह; अपि for इति); (४)इतः; इति for अथ ); ( अ ) धि स्व; स्म for (अ)पि) राज्यं for राज्यात् );,

(०४) (४)सम्पश्यतीदं हि ( नि ); कृतं नृशंसं,

(०५) (१)सिंहोन्नतांसान्; व्यूढोत्तरांशान्; व्यूढोरसस्तान् व्यूढान्तरांसान् व्यढान्तरांस्तान् मूढान्तरात्मानिकृति स्वभावो (२)न न; च for स्म ); न; च for स );

**शृणाति भ्रातुःसुतानां स नृशंसकर्ता श्रृणाति हिनस्ति ।**
**न श्रृणोतीति गौडपाठे तु श्रृणोतीति लेखकप्रमादः । (बोरि)**

(३)प्रास्था for स्था ); प्रस्थापयामास for यद्यत्स ); यत्र for यत्स ); निशङ्को; स; भृशं यो; विशङ्को; सशोको for द्य ); (४)राज्यं for शस्त्रम् );,

(०६) (१)सोयं पृतनाः समृद्धाः (२) बाहुर् for भुजो ); वि; ()भि for नि ); (३) ( अ ) पि हि for ( ए ) व ); च; तु for हि );,

वने स्मरन्वासमिमं सुघोरं शेषं न कुर्यादिति निश्चितं मे।। १५ ।।[०१]

न ह्यस्य वीर्येण बलेन कश्चित्समः पृथिव्यामपि विद्यतेऽन्यः ।

स शीतवातातपकर्शिताङ्गो न शेषमाजावसुहृत्सु कुर्यात्।। १६ ।।[०२]

प्राच्यां नृपानेकरथेन जित्वा वृकोदरः सानुचरान्रणेषु ।

स्वस्त्यागमद्योऽतिरथस्तरस्वी सोऽयं वने क्लिश्यति चीरवासाः ।। १७ ।।[०३]

यः सिन्धुकूले व्यजयन्नृदेवान्समागतान्दाक्षिणात्यान्महीपान्।

तं पश्यतेमं सहदेवमद्य तरस्विनं तापसवेषरूपम् ।। १८ ।।[०४]

**लक्षालङ्कारः- यो दन्तकूप इत्यत्र दन्तकूपे दन्ताभ्यां वराहदंष्ट्राभ्यां कूपः तुङ्गभद्रोत्पत्तिस्थानरूपः यत्र तस्मिन् दक्षिणदेशे ।**

यः पार्थिवानेकरथेन जिग्ये दिशं प्रतीचीं प्रति युद्धशौण्डः ।

जिग्ये रणे तं नकुलं वनेऽस्मिन्सम्पश्यतैनं मलदिग्धगात्रम्।। १९ ।।

**⁕ सोऽयं वने मूलफलेन जीवञ्जटी चरत्यद्य मलाचिताङ्गः ।[०५]**

**⁕ जिग्ये रणे तं नकुलं वनेषु सम्पश्यते मेऽद्य मनः सुदीनम्**

सत्रे समृद्धेऽतिरथस्य राज्ञो वेदीतलादुत्पतिता सुता या ।

---

(०१) (१)सार्ति; साद्धि for साध्व ); तपस्वी for तर ); (३)क्लेशा निमान्यंस्मरन्घोरतापो (४)हन्यात्स वीर्याद् for शेषं न कुर्याद् ); निश्चयो for निश्चितं );,

(०२) (१)वीर्ये च बले च न चास्य कश्चिद्धि बलेन तुल्यो (२) समः पृथिव्यामपि विद्यतेन्यः; भवेत्पृथि० यामथ वामरेषु (३) स शीत for शीतोष्ण ); कर्षिताङ्गो (४)निः for न ); (अ)सुहृत्स, for (अ)सुहृत्सु),

(०३) (१)प्राच्यान् for प्राच्यां );,

(०४) (१) ख-ग-कूटेत्वजय;, घ०वक्त्रेऽप्यजयत्, सिन्धुकूले; दन्त ()नन्त वक्रान् शूरवर्यो; दत्तक्रूरे दण्डकूटे; दन्तिकूटे;दन्तकूटे for दन्तकूरे ); अजयत्; त्वज; ()त्यज; ह्यज for व्यज ); समस्तान्; समे तान् for नृदेवान् ); (३)पश्य चैनं; तैनं for तेमं ); उद्यतं;वनस्थं for अथ ); (४)तरस्विनं वेशरूपं रूपवेषं,

(०५) (१)वीरान्; जिग्याद्; जिग्ये for वीरो ); (२)बद्धतूणः for युद्द ); (३)माद्रीसुतो for सोऽयं वने ); फलम् मूलेन for मूलफलेन ); जिग्ये रणे तं नकुलं वनेस्मिन् ( नकुलं तं वनेषु ); (४) चलत्यद्य; चरत्यङ्क for चरत्यद्य ); सम्पश्यतेमं मलदिग्धगात्रं ,

सेयं वने वासमिमं सुदुःखं कथं सहत्यद्य सती सुखार्हा।। २० ।।(०१)

त्रिवर्गमुख्यस्य समीरणस्य देवेश्वरस्याप्यथवाश्विनोश्च ।

एषां सुराणां तनयाः कथं नु वनेऽचरन्ह्यस्तसुखाः सुखार्हाः ।। २१ ।।(०२)

जिते हि धर्मस्य सुते सभार्ये सभ्रातृके सानुचरे निरस्ते ।

दुर्योधने चापि विवर्धमाने कथं न सीदत्यवनिः सशैला।। २२ ।।

अस्मिन् तीर्थयात्रापर्वणि ९५अध्याये २२श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि पञ्चनवतितमोऽध्यायः ।। ९५ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 096

## ९६. षण्णवतितमोऽध्यायः

सात्यकिना पाण्डवानपेक्षणेन स्वैरेव धार्तराष्ट्रादिहननपूर्वकं पाण्डवानामावनवास-समापनमभिमन्यो राज्ये अभिषेचनोक्तिः ।। १ ।। सात्यकेः शौर्यपूर्णोद्गारः । कृष्णेन सात्यकिं प्रति पाण्डवानां परबाहुबलैकानुपजीवित्वादिगुणकथनपूर्वकं तन्निषेधनम् ।। २ ।। युधिष्ठिरकर्तृकं श्रीकृष्णवाक्यानुमोदनं पाण्डवानां पयोष्णीतटे निवासश्च ।। ३।।

सात्यकिः

न राम कालः परिदेवनाय यदुत्तरं त्वत्र तदेव सर्वे ।

समाचरामो ह्यनतीतकालं युधिष्ठिरो यद्यपि नाह किञ्चित्।। १ ।।(०३)

---

(०१) (२)सुतेयं सुमध्यमाः for सुता या ); (३)सुघोरं for सुदुःखं ); (४)वसत्यद्य for सह ); कथं सती,

(०२) (१)तथैव वायोद् for समी ); (२)तथा (( अ ) थ वा ); (३)तेषां for एषां ); वने for नु );एषां सुता दीर्घभुजा वनेस्मिन् (४)कथं for वने ); चरन्त्यमी for वने चरन्ति ); ()चरन् for चरन्ति ); अस्त; ह्यस्त for अल्प );,

(०३) (१)परिदेवितस्य (२)त्वत्र for तत्र );,

* कुर्वीमहे यच्च हितं भवेत्तु राज्ञे ह्यस्मायाजमीढाय नित्यम् ।। (०१)

ये नाथवन्तोऽद्य भवन्ति लोके ते नात्मना कर्म समारभन्ते ।
तेषां तु कार्येषु भवन्ति नाथाः शिब्यादयो राम यथा ययातेः ।।(०२)

येषां तथा राम समारभन्ते कार्याणि नाथाः स्वमतेन लोके ।
ते नाथवन्तः पुरुषप्रवीरा नानाथवत्कृच्छ्रमवाप्नुवन्ति ।। ३ ।।(०३)

कस्मादिमौ रामजनार्दनौ च प्रद्युम्नसाम्बौ च मया समेतौ।
वसन्त्यरण्ये सहसोदरीयैस्त्रैलोक्यनाथानभिगम्य पार्थाः ।। ४ ।।(०४)

निर्यातु साध्वद्य दशार्हसेना प्रभूतनानायुधचित्रवर्मा ।
यमक्षयं गच्छतु धार्तराष्ट्रः सबान्धवो वृष्णिबलाभिभूतः ।। ५ ।।(०५)

त्वं ह्येव कोपात्पृथिवीमपीमां संवेष्टयेस्तिष्ठतु शार्ङ्गधन्वा।
स धार्तराष्ट्रं जहि सानुबन्धं वृत्रं यथा देवपतिर्महेन्द्रः ।। ६ ।।(०६)

भ्राता च मे यः स सखा गुरुश्च जनार्दनस्यात्मसमश्च पार्थः ।
यदर्थमैच्छन्मनुजाः सुपुत्रं शिष्यं गुरुश्चाप्रतिकूलवादम्।। ७ ।।(०७)

---

(०१) (३)सम; त्वन for ह्यन ); भया च रामाद्य वृतः स कालो,
(०२) (१)ते for थे ); ()द्य ()त्र नु for हि ); (२)न ते स्वयं ( ते नात्मना ); ये for ते );चरन्ति for रभन्ते ); (३) तेषां for येषां ); समर्था वि ( हि ); चरन्ति नाथाः (४)शिव्या; शव्या for शैव्यां ); शिव्यादय इत्येव पाठः शैव्यादय इति पाठे तु स्वार्थे ष्यञ् ।,
(०३) (१)तेषां for येषां ); चरन्ति; चरन्ते for रभन्ते ); (२)समतेन; सुमतेन; स्वयमेव;स्वबलेन for स्वम ); समयेन लोकाः for स्वमतेन लोके );,
(०४) (१)तस्माद् for कस्माद् ); असौ; अमी; इमौ; इमे for अयं ); (२)शांवौ (३)वसत्यरण्ये दीनोथ राजा; वसन्त्यरण्ये (४)अभि for अधि ); पार्थाः (र्य) पार्थान् for नाथान् );,
(०५) (१)सा ह्यद्य; सात्वद्य for साध्वद्य ); (२) नागायुध; पादा युधि; नागा युधि for नानायुध ); चित्रकर्मा; चित्रवर्मिणी for चित्रवर्मा );,
(०६) (१)त्वमेव; त्वं देव for त्वं ह्येव ); (२)वासुदेवः (forशार्ङ्ग ); (४)सुरेन्द्रः; नरेन्द्र for महेन्द्रः )
(०७) (१) (अ)पि for च) (२) (अ)द्य (आ) त्म सखः स; सखश्च for समश्च ); कृष्णस्य चात्मा मम चैव पार्थः,

* यदर्थमैच्छन्मनुजाः सुपुत्रं शिष्यं गुरुश्चाप्रतिकूलवादम् ।।[०१]
यदर्थमभ्युद्यतमुत्तमं तत्करोति कर्माग्र्यमपारणीयम् ।। ७ ।।

तस्यास्त्रवर्षाण्यहमुत्तमास्त्रैर्विहत्य सर्वाणि रणेऽभिभूय।
कोपाच्छिरः सर्पविषाग्निकल्पैः शरोत्तमैरुन्मथितास्मि राम।[०२]
खड्गेन चाहं निशितेन सङ्ख्ये कायाच्छिरस्तस्य बलात्प्रमथ्य ।। ८ ।।
ततोऽस्य सर्वाननुगान्हनिष्ये दुर्योधनं चापि कुरूँश्च सर्वान् ९ ।।[०३]

आत्तायुधं मामिह रौहिणेय पश्यन्तु भैमा युधि जातहर्षाः ।
निघ्नन्तमेकं कुरुयोधमुख्यानग्निं महाकक्षमिवान्तकाले।। १० ।।[०४]

प्रद्युम्नमुक्तान्निशितान्न शक्ताः सोढुं कृपद्रोणविकर्णकर्णाः ।
जानामि वीर्यं च जयात्मजस्य कार्ष्णिर्भवत्येष यथा रणस्थः ।।[०५]

साम्बः ससूतं सरथं भुजाभ्यां दुःशासनं शास्तु बलात्प्रमथ्य।
न विद्यते जाम्बवतीसुतस्य रणे विषह्यं हि रणोत्कटस्य।। १२ ।।[०६]

एतेन बालेन हि शम्बरस्य दैत्यस्य सैन्यं सहसा प्रणुन्नम्

---

(०१) (२) गुरुं for गुरुश्)(३) तदर्थम् तदर्थ यदर्थ; for यदर्थम् ); अभ्युद्यमम् च for तत् ); एको हि यदद्य मन्ये; एको हि () (थ ) य उद्यमन्वै ( एकोभिसमुद्धहन्वै ) for अभ्युद्यतमुत्तमं तत्); (४)करोतु कर्णस्तम्; कर्णेस्त्रम्; कर्णोस्त्रम् for कर्माग्र्यम् ); अवारणीयं,
(०२) (१)प्राप्या for तस्या ); शस्त्राणि for वर्षाणि ); (२) नि for वि); शस्त्राणि शत्रंन्धश्च for सर्वाणि ); विधूय for भिभूय ); (३)तस्य for सर्प );,
(०३) (१)सङ्खे; सङ्घे for सङ्ख्ये ); (३)निहंस्ये; वधिष्ये for हनि );,
(०४) (१)युधि for इह ); (२)भोजा भूजा; भूपा; चेमे; भैमा; सर्वे for भौमा );(३)निहन्मि ह्येकः for निघ्नन्तमेकं ); वीर यौध for योधं ); (४)अग्निर्; अग्नि for काले ); महान्कक्षम्; महत्कक्षम् अनलं ( लो ); वै; अन्तराग्निं; अन्तकाले; अतकाग्निं,
(०५) (१)विशिखान् for निशितान् ); (२)द्रौणि for द्रोण ); (३)जानाति; सि for मि ); तु; हि for च ); जयात्म; यदात्म; तवानु; तदात्म; सदात्म for तवात्म ); (४) (ए) व for (ए)ष ); यथा ( दा ); रथस्थः; रथान्तरस्थः for यथा रणस्थः );,
(०६) (१)साश्व; शाम्बः for साम्बः ); रथस्थं; रणस्थं for भुजाभ्यां ); (२)शस्त्र;सास्त्र for शास्तु ); बलं for बलात् ); निहन्यात् for प्रमथ्य ); (४)हि मदो ( हो ); त्कटस्य; हरिणोत्क,

पतस्सपापो युधि ते बलेन युद्धेऽद्वितीयोऽतुलबालवीर्यः ।। १३ ।।

वृत्तोरुरत्यायतपीनबाहुरेतेन सङ्ख्ये निहतोऽश्वचक्रः।
को नाम साम्बस्य महारथस्य रणे समक्षं रथमभ्युदीयात् ।
गत्वाऽऽभिमुख्यं सहसा प्रमुच्येत्यथैव यत्तस्य पुरन्दरस्य ।।१४।।(०१)
हतः स पापो युधि केवलेन युद्धेऽद्वितीयो हरितुल्यरूपः ।।(०२)

यथैव यत्तस्य पुरन्दरस्य हरिध्वजं स्यन्दनमास्थितस्य

यथा प्रविश्यान्तरमन्तकस्य काले मनुष्यो न विनिष्क्रमेत ।
तथा प्रविश्यान्तरमस्य सङ्ख्ये को नाम जीवन्पुनराव्रजेत्।। १५ ।।(०३)

द्रोणं च भीष्मं च महारथौ तौ सुतैर्वृतं चाप्यथ सोमदत्तम्।
सर्वाणि सैन्यानि च वासुदेवः प्रधक्ष्यते सायकवह्निजालैः।। १६ ।।(०४)

किं नाम लोकेष्वविषह्यमस्ति कृष्णस्य सर्वेषु सदेवकेषु ।
आत्तायुधस्योत्तमबाणपाणेश्चक्रायुधस्याप्रतिमस्य युद्धे ।। १७ ।।(०५)

ततोऽनिरुद्धोऽप्यसिचर्मपाणिर्महीमिमां धार्तराष्ट्रैर्विसञ्ज्ञैः ।
ह(हृ)तोत्तमाङ्गैर्निहतैः करोतु कीर्णां कुशैर्वेदिमिवाध्वरेषु।। १८ ।।(०६)

गदोल्मुकौ बाहुकभानुनीथाः शूरश्च सङ्ख्ये निशठः कुमारः ।

---

(०१) (१)एकेन येनाहवशोभिना तदा (२) शाल्वस्य for दैत्यस्य );तरसा for सहसा ); प्रशन्नं; प्रपन्नं; प्रभग्नं for प्रणुन्नम् );(४)हरिध्वजं स्यन्दनमास्थितस्य ।।,

(०२) (३)वृत्तोरुरप्यायत; वृत्तो०भयव्यायत; रुवक्तूयत०; ०रुरम्यायत० (४)एकेन for एतेन) सङ्के सङ्के for सङ्ख्ये) (अ)ध्वचक्रः (अ) श्वक्तू च वक्र for (अ)श्वचक्रः) एकेन भग्नस्तरसा नृवीरः (३) शाम्बस्य महारथस्य for रणे मनुष्यो) for धरेत) रणे (थे) समक्षं रथमभ्युदीयात् ,

**घ- कार्ष्णिं समासाद्य हि को विमुच्येद् ध्रियेत भृयेत प्रमुच्येत्**

(०३) (२)कालो मनुष्येण for काले मनुष्यो न ); नु विनिष्कमोस्य; नु विक्रमेत for विनि० );,

(०४) (१)भीष्मं च द्रोणं च कृपं च द्रौणिं for महारथौ तौ ); (२)वा० for चा ); हि;स for अ ) थ); द्रौणिं च वीरं सहसोमदत्तं, (४)वह्निनाजौ for वह्निज्रालैः );,

(०५) (१)लोकेषु विषह्यम्; लोके ज्ञविष ह्यम्, (२)सदेवकेषु for सदै );, (४)सङ्ख्ये for युद्धे );,

(०६) (१)तथा for तता०); (३)कृत्तो; कृन्तो for हृतो );, (४)तीर्णां तीक्ष्णां for कीर्णां );,

रणोत्कटौ सारणचारुदेष्णौ कुलोचितं विप्रथयन्तु कर्म।। १९ ।।(०१)

सवृष्णिभोजान्धकयोधमुख्या समागता सात्वतशूरसेना ।
हत्वा रमे तान्धृतराष्ट्रपुत्राँल्लोके यशः स्फीतमुपाकरोतु।। २० ।।(०२)

* यशोभृतां धर्मभ्रृतां वरिष्ठः युधिष्ठिरः पालयतां महात्मा ।।(०३)

ततोऽभिमन्युः पृथिवीं प्रशास्तु यावद्व्रतं धर्मभृतां वरिष्ठः ।
युधिष्ठिरः पारयते महात्मा द्यूते यथोक्तं कुरुसत्तमेन ।। १९ ।।(०४)

अस्मत्प्रमुक्तैर्विशिखैर्जितारिस्ततो महीं भोक्ष्यति धर्मराजः ।
निर्धार्तराष्ट्रां हतसूतपुत्रामेतद्धि नः कृत्यतमं यशस्यम्।। २२ ।।(०५)

श्रीभगवान्

असंशयं माधव सत्यमेतद्गृह्णीम ते वाक्यमदीनसत्त्व ।

स्वाभ्यां भुजाभ्यामजितां तु भूमिं नेच्छेत्कुरूणामृषभः कथञ्चित्।। २३ ।।(०६)

न ह्येष कामान्नभयान्न लोभाद्युधिष्ठिरो जातु जह्यात्स्वधर्मम् ।

भीमार्जुनौ चातिरथौ यमौ च तथैव कृष्णा द्रुपदात्मजेयम्।। २४ ।।(०७)

उभौ हि युद्धेऽप्रतिमौ पृथिव्यां वृकोदरश्चैव धनञ्जयश्च ।

---

(०१) (१)हत्वा रणे तान्धृतराष्ट्रपुत्रान् लोके यशः स्फीतमुपाकरेतु ।
गदोल्मुकाः; ल्मुकं गाबहु; गाहव; गावह; गाविह; शावह for बाहुक ); भानुनाशाः, नाथाः; ०नीपाः,, गदोल्मुकौ माननीयो च सङ्ख्ये, (२)शूराश्च;, कुरूंश्च०, सङ्खे; सङ्घे, निहठः for निशठः ); (४) ख०प्रशास्तु गां धर्मभृतां वरिष्टः; ग०गदोल्ककाशावहभानुशीथाः, वै for वि );, लोके for कर्म );,
(०२) (१)सा वृष्णिभोजान्धक; सद्ध८ष्णिभोज्यन्धक; सवृष्णियौधान्धक,योध० मुख्य; योधमुख्याः,
(०३) (२)समागताः; सहान्धकैः ,क्षत्रियाः; सात्वत for क्षत्रिय );, शूरसेना (३)धृतराष्ट्रस्य पुत्रान्, (४) अपाकरोतु, लोके यशस्वी पुरुषप्रवीरः, वासुदेवः,
(०४) (३)पालयते; पारयतां; पालयतां for पारयते );, (४)द्यूते यथोक्तप्र द्यूतं यदुक्तं,
(०५) (१)प्रयुक्तैः; विमुक्तैः for प्रमुक्तैः ); (४)लोके यशः स्फीतमुपाकरोतु, सात्यकिवाक्यं वासुदेवः,
(०६) (१)श्रीभगवान्; श्रीकृष्णः for वासु); (३)द्वाभ्यां; आ for स्वा० );(४)अधिपः for ऋषभः );,
(०७) (३)च for वा );,

कस्मान्न कृत्स्नां पृथिवीं प्रशासेन्माद्रीसुताभ्यां च पुरस्कृतोऽयम्।। २५ ।।(०१)

यदा तु पञ्चालपतिर्महात्मा सकेकयश्चेदिपतिर्वयं च ।

युध्येम विक्रम्य रणे समेतास्तदैव सर्वे रिपवो हि न स्युः ।

योत्स्याम विक्रम्य परांस्तदा वै सुयोधनस्त्यक्ष्यति जीवलोकम् ।।२६।।(०२)

युधिष्ठिरः

नेदं चित्रं माधव यद्ब्रवीषि सत्यं तु मे रक्ष्यतमं न राज्यम्।

कृष्णस्तु मां वेद यथावदेकः कृष्णं च वेदाहमथो यथावत्।। २७ ।।(०३)

यदैव कालं पुरुषप्रवीरो वेत्स्यत्ययं माधव विक्रमस्य ।

तदा रणे त्वं च शिनिप्रवीर सुयोधनं जेष्यसि केशवश्च ।। २८ ।।(०४)

प्रतिप्रयान्त्वद्य दशार्हवीरा दृष्टोऽस्मि नाथैर्नरलोकनाथैः ।

धर्मेऽप्रमादं कुरुताप्रमेया द्रष्टास्मि भूयः सुखिनः समेतान्।। २९।।(०५)

तेऽन्योन्यमामन्त्र्य तथाभिवाद्य वृद्धान्परिष्वज्य शिशूंश्च सर्वान्।

यदुप्रवीराः स्वगृहाणि जग्मुराजापि तीर्थान्यनुसंविचेरुः ।। ३० ।।(०६)

---

(०१) (१)पृथिव्यां विश्रुतौ विश्रुतौ पृथिव्यां; प्रथितौ पृथिव्यां, (३)विशि ष्यान्; प्रशिष्यान् ( प्रशास्यान् ); नु शासेन् for प्रप्रशासेन् ); (४) ()सै for यम् );,

(०२) (१)पञ्चालपति, (२)सकेकयैशू; सकैकयशू, (३)युध्येम; योत्स्यामि for योत्स्याम ); आक्रम्य for विक्रम्य ); रणे समेताः (तान् ) for परांस्तदा वै ); (४)तदैव सर्वे रिपवो हि न स्युः,

(०३) (१)नेदं for नैतच् ); चिरान् for चित्रं ); सात्यके for माधव );(२)०मिदं for तमं ); (३) एव for एकः );,

(०४) (१)यदेव; थैव for दैव ); पुरुषोत्तमोसौ for षुरुष,); (४)जेष्यति for ०सि );,

(०५) (२)दृष्टोस्मि for दृढोऽस्मि ); नववीर०; नरवीरं; नरदेवं for नरलोकं ); (३)प्रसादं; प्रमाणं for प्रादं) (अ)प्रमेयान् (४) द्रक्ष्यामि धक्ष्यामि for द्रष्टास्मि) सुखितान् स्वजनैः for सुखिनः) समस्तान् for समेतान् );,

(०६) (१)ततो for तथा ); (४)ते चापि; स चापि for राजापि ); विचेरूः ( विवेश ) for चचार ); राजापि सर्वैरभिवादितश्च,

विसृज्य कृष्णं त्वथ धर्मराजो विदर्भराजोपचितां सुतीर्थाम्।
जगाम पुण्यां सरितं पयोष्णीं सभ्रातृभृत्यः सह लोमशेन।।३१।।
सुतेन सोमेन विमिश्रतोयां पयः पयोष्णीं प्रति सोऽध्युवास।(०१)
जगाम पुण्यां सरितं पयोष्णीं सभ्रातृभृत्यः सह लोमशेन । *(०२)
द्विजातिमुख्यैर्मुदितैर्महात्मा संस्तूयमानः स्तुतिभिर्वराभिः ।।(०३)

**अस्मिन् तीर्थयात्रापर्वणि ९६ अध्याये ३२श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि षण्णवतितमोऽध्यायः ।। ९६ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 097

# ९७. सप्तनवतितमोऽध्यायः

**लोमशेन युधिष्ठिरं प्रति पयोष्णीतटे गयकृतयागवर्णनम् ।। १ ।। तथा च्यवनेन शर्यातियाजनादिकथनम् ।। २ ।। युधिष्ठिरेण लोमशं प्रति सविस्तरं च्यवनचरित्रकीर्तनप्रार्थना ।। ३ ।।**

**लोमशः**

गयेन(नृगेण) यजमानेन सोमेनेह पुरन्दरः ।

---

(०१) (१)कृष्णं च स; वृष्णीनथ ( ननु ) for कृष्णं त्वथ );, (२) ०पचितान्, स तीर्थान्; सुतीर्थे; महात्मा; स तीर्था for सुती०);,
(०२) (१) सरितां, कः सह वा; मिश्च सह् भि सह् वै for भृत्यः सह्) (४) विमिश्रितोयं विमिश्रतोयां सभूमितोदां महानदीं पुण्यतमां सुतोयां (४) पयः for ततः) अभितः ससार for प्रति)स व्युवास सोध्यु सो व्यु पद्यु मद्यु सोभ्यु for स इ्यु );,
(०३) (१)मुनिभिर्; विदितो; मुदितो for मुदितैर्) पुष्कलाभिः for वराभिः );,

तर्पितः श्रूयते राजन्स तृप्तो मुदमभ्यगात् ॥ १ ॥[०१]

इह देवैः सहेन्द्रैश्च प्रजापतिभिरेव च ।
इष्टं बहुविधैर्यज्ञैर्महद्भिर्भूरिदक्षिणैः ॥ २ ॥[०२]

आमूर्तरयसश्चेह राजा वज्रधरं प्रभुम् ।
तर्पयामास सोमेन हयमेधेषु सप्तसु ॥ ३ ॥[०३]

तस्य सप्तसु यज्ञेषु सर्वमासीद्धिरण्मयम् ।
वानस्पत्यं च भौमं च यद्द्रव्यं नियतं मखे ॥ ४ ॥[०४]

* चषालयूपचमसाः स्थाल्यः पात्र्यः स्रुचः स्रुवाः ।[०५]

तेष्वेव चास्य यज्ञेषु प्रयोगाः सप्त विश्रुताः ।
सप्तैकैकस्य यूपस्य चषालाश्चोपरि स्थिताः ॥ ५ ॥ [०६]

तस्य स्म यूपान्यज्ञेषु भ्राजमानान्हिरण्मयान् ।
स्वयमुत्थापयामासुर्देवाः सेन्द्रा युधिष्ठिर ॥ ६ ॥[०७]

लक्षालङ्कारः- चषालाश्च प्रतिष्ठिता इत्यत्र 'चषालो यूपकटक' इत्यभिधानात् चषालाः यूपालङ्कारभूतसौवर्णकटकाः 'यज्ञस्य' इति पाठे यज्ञसाधनयूपस्य ।

तेषु तस्य मखाग्र्येषु गयस्य पृथिवीपतेः ।

---

(०१) (१)नृगेन; गयेन for नृगेण ); (४)मुदम् for मदम् );,
(०२) (१)च; तु for हि );, (४) बहुभिर् for महद्भिर्),
(०३) (१)अमूर्तरयसश्चेह आपूर्तरयमश्वेह for अमूर्तिरयसः पुत्रः ); अमूर्तरयसं चेह; अमूर्तरयसा वेह; अमूर्तरयसश्वैव; आधूर्तरजसश्चैह (२) (श्चैव ); असूर्तरजसश्चेह, (२)प्रभुः;स्वयं for प्रभुम् );,
(०४) (१)सवेषु for यज्ञे ); (४) दीयते; देयते for नियतं );,
(०५) (१)चषालयूपचमसाः स्थाल्यः पात्र्यः स्रचः स्रवाः (पात्रं; पात्रीः for पात्र्यः );,सुचः सुवाः),
(०६) (२)मुनयः; प्रयोगात् for प्रयोगाः ); (३) यज्ञस्य for यूपस्य ); (४)चषाला हि; चषालेषु for चषालाश्च );, प्रतिष्ठिताः for ( उ ) परि स्थिताः );,
(०७) (१)यस्य स्म; गामस्य; ते तस्य for तस्य स्म ); (४)सर्वे for सेन्द्रा );,

अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः ।। ७ ।।(०१)

* प्रसङ्ख्यानानसङ्ख्ययोन्प्रत्यगृह्णन्द्विजातयः ।(०२)

सिकता वा यथा लोके यथा वा दिवि तारकाः ।
यथा वा वर्षतो धारा असङ्ख्येयाः स्म केनचित् ।। ८ ।।(०३)

तथैव तदसङ्ख्येयं धनं यत्प्रददौ गयः ।
सदस्येभ्यो महाराज तेषु यज्ञेषु सप्तसु ।। ९ ।।

भवेत्सङ्ख्येयमेतद्धि यदेतत्परिकीर्तितम् ।
न तस्य शक्याः सङ्ख्यातुं दक्षिणा दक्षिणावतः ।। १० ।।(०४)

हिरण्मयीभिर्गोभिश्च कृताभिर्विश्वकर्मणा ।
ब्राह्मणांस्तर्पयामास नानादिग्भ्यः समागतान् ।। ११ ।।(०५)

अल्पावशेषा पृथिवी चैत्यैरासीन्महात्मनः ।
गयस्य यजमानस्य तत्र तत्र विशाम्पते ।। १२ ।।(०६)

स लोकान्प्राप्तवानैन्द्रान्कर्मणा तेन भारत ।
सलोकतां तस्य गच्छेत्पयोष्ण्यां य उपस्पृशेत् ।। १३ ।।

तस्मात्त्वमत्र राजेन्द्र भ्रातृभिः सहितोऽच्युत ।
उपस्पृश्य महीपाल धूतपाप्मा भविष्यसि ।। १४ ।।(०७)

---

(०१) (१)प्रसन्नेषु; महाश्रेष्ठ for मखा );, तस्य सर्वमखाभ्येषु; तस्य सर्वेषु यज्ञेषु, (२)धरणीपतेः (ते),
(०२) (१)( प्रसङ्ख्यकालेसङ्ख्येयान्; असङ्ख्यातान; असंख्ये कान; प्रसङ्ख्याकालसङ्ख्येयं,),
(०३) (१)च, वै for वा ); गाङ्ग्यो for लोके ); (३);यथा वर्षांबुधाराश्च, (४)स्म for च );,
(०४) (१)हि for वै ); (३)न तु शक्यास्तु ( क्या हि ); न तस्य शक्याः for न सा शक्या तु );,च यज्ञेषु for तु सङ्ख्यातुं ); (४) दक्षिणां; सङ्ख्यातुं for दक्षिणा );,
(०५) (१)तु; हि for च ); (२)स यज्ञेषु ( यज्ञेषु स ); विशां पते,
(०६) (१)अल्पावकाशा पृ०; अल्पया शेषया पृथ्वी, (२)चित्यैर्; विप्रैर् for चैत्यैर्);चासीत् for आसीन् ); समागतैः; समा चिता; समावृतः for महा );,
(०७) (१)अपि; अस्यां for अत्र ); (२) ()च्युतः नृप; ()प्युत for नघ ); (४)धुतपाप्मा; पूतः,

वैशम्पायनः

स पयोष्ण्यां नरश्रेष्ठः स्नात्वा वै भ्रातृभिः सह ।
वैदूर्यपर्वतं चैव नर्मदां च महानदीम् ।। १५ ।।(०१)

उद्दिश्य पाण्डवश्रेष्ठः स प्रतस्थे महीपतिः ।
समागमत तेजस्वी भ्रातृभिः सहितोऽनघ ।। १६ ।।(०२)

* उद्दिश्य पाण्डवश्रेष्ठः स प्रतस्थे महीपतिः ।

तत्रास्य सर्वाण्याचख्यौ लोमशो भगवानृषिः ।
तीर्थानि रमणीयानि पुण्यान्यायतनानि च ।। (०३)
यथायोगं यथाप्रीति प्रययौ भ्रातृभिः सह ।। १७ ।।

तत्र तत्राददाद्वित्तं ब्राह्मणेभ्यः सहस्रशः ।। १८ ।।(०४)

लोमशः

देवानामेति कौन्तेय तथा राज्ञां सलोकताम् ।
वैदूर्यपर्वतं दृष्ट्वा नर्मदामवतीर्य च ।। १९ ।।(०५)

सन्धिरेष नरश्रेष्ठ त्रेताया द्वापरस्य च ।
एनमासाद्य कौन्तेय सर्वपापैः प्रमुच्यते ।। २० ।।(०६)

एष शर्यातियज्ञस्य देशस्तात प्रकाशते ।

---

(०१) (१)नरश्रेष्ठ, (३)वैदूर्य वैडूर्य,
(०२) (३) अवगाहतः समागमत; स जगाम स; विभ्राजमानसू; समानवेषैम्; समानवर्षैसू for जगाम );,
()नघः ययौ for नघः );,
(०३) (१)तत्रास्य for ततो ); (४)यानि for तत्र ); पुण्यान्यायतनानि च,
(०४) (३)तत्र तत्र; ददानो हि ( ददौ सो हि ) for ददमानो ); (अ)ददद् for सकृद् );,
(०५) (३)वैडूर्यं वैडूर्य for वैडूर्य );,
(०६) (१)सन्धिरेष सलिलेषु for सन्धिरेष) (२)त्रेतायां for ०या ); (३)एताम्; एनम्; एवम्; एतद् for
एतम् );,

साक्षाद्यत्रापिबत्सोममश्विभ्यां सह कौशिकः ।। २१ ।।[०१]

चुकोप भार्गवश्चापि महेन्द्रस्य महातपाः ।
संस्तम्भयामास च तं वासवं च्यवनः प्रभुः ।। २२ ।।

सुकन्यां चापि भार्यां च(स) राजपुत्रीमवाप्तवान्।[०२]
नासत्यौ च महाभाग कृतवान्सोमपीथिनौ ।। २३ ।।

युधिष्ठिरः

कथं विष्टम्भितस्तेन भगवान्पाकशासनः ।
किमर्थं भार्गवश्चापि कोपं चक्रे महातपाः ।। २४ ।।

नासत्यौ च कथं ब्रह्मन्कृतवान्सोमपीथिनौ।
एतत्सर्वं यथावृत्तमाख्यातु भगवान्मम् ।। २५ ।।[०३]

अस्मिन् तीर्थयात्रापर्वणि ९७अध्याये २५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि सप्तनवतितमोऽध्यायः ।। ९७ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 098

# ९८. अष्टनवतितमोऽध्यायः

लोमशेन युधिष्ठिरं प्रति सुकन्योपाख्यानकथनम् ।। १ ।। कदाचन शर्य्यातिना नृपेण सैन्यादिभिस्सह च्यवनाश्रमाभिगमनम् ।। २ ।। तत्र शर्य्यातिकन्यया सुकन्यया चिरतरतपश्चर्यानिरतस्य च्यवनस्य शरीरं पर्यावृत्य विवर्धमानमहावल्मीका-वलोकनम् ।।

---

(०१) (१)शर्यातिवीर्यस्य; सर्यातियज्ञस्य; शनयाति; शंयाति, (२)देशोयं सम्प्रका (४)वासवः for कौशिकः.
(०२) (१)चुक्रोध,चैव; तस्य for चापि ); (२)महेन्द्राय, (३)नाम; अपि for चापि ); च for स.
(०३) (१)महाभाग for कथं ब्रह्मन् ); (२)सोमपीयिनौः ०पायिनौ; पीतिनौ ,

३ ।। तया कुतूहलाद्वल्मीकोपरि दृश्यमानच्यवननयनयुगलस्याज्ञानात् कण्टकेन विभेदनम् ।। ४ ।। ततः क्रुद्धस्य च्यवनस्य प्रसादनाय शर्यातिना भार्यात्वाय तस्मै सुकन्यायाः प्रदानम् ।। ५ ।। महर्षेश्च्यवनस्य सुकन्यायाः प्राप्तिः ।।

लोमशः

भृगोः महर्षेः पुत्रोऽभूत्च्यवनो नाम भारत ।
समीपे सरसस्तस्य तपस्तेपे महाद्युतिः ।। १ ।।(०१)

स्थाणुभूतो महातेजा वीरस्थानेन पाण्डव ।
अतिष्ठत चिरं कालमेकदेशे विशाम्पते ।। २ ।।(०२)

स वल्मीकोऽभवदृषिर्लताभिरिव संवृतः ।
कालेन महता राजन्समाकीर्णः पिपीलिकैः ।। ३ ।।(०३)

तथा स संवृतो धीमान्मृत्पिण्ड इव सर्वशः ।
तप्यते स्म तपो घोरं वल्मीकेन समावृतः ।। ४ ।।(०४)

अथ दीर्घस्य कालस्य शर्यातिः नाम पार्थिवः ।
आजगाम सरो रम्यं विहर्तुमिदमुत्तमम् ।। ५ ।।(०५)

तस्य स्त्रीणां सहस्राणि चत्वार्यासन्परिग्रहे ।
एकैव च सुता सुभ्रूः सुकन्या नाम भारत ।। ६ ।।(०६)

---

(०१) (१) वै तु for (अ)भूच्) (२) नाम वीर नामतः भारत (भर्गवः) (३) सौम्य तस्य (सो स्य) (४) महामुनिः for द्युतिः),

(०२) (१)वीर (२) तस्थिवान् for पाण्डव ); (३)स बहून्कालान्; सुचिरं कालम् अतिष्ठत चिरं कालम् (४) मही for विशां ); एकपादेन भारत,

(०३) (२)वल्लीभिर् for लताभिर् ); इव; बहु; चाभि for अभि ); (४)०लकैः for ०लिकैः);,

(०४) (१)सु; (अ ) पि च for स ); (२)सर्वतः ( संवृतः) for सर्वशः); (३) घ०तप्यति,तप्यते ततो for तपो ); घोरंfor राजन् ); ,

(०५) (२) सर्यातिर् शव्यातिर् (३) राजन् for रम्यं),*

(०६) (३)तु; हि for च ); शुभा for सुता ); सुभ्रूः सुभ्रुः; तासां सिद्धा for शुभ्रा ); (४) नामतः; पार्थिव for भारत );,

सा सखीभिः परिवृता दिव्याभरणभूषिता ।
चङ्क्रम्यमाणा वल्मीकं भार्गवस्य समासदत् ।। ७ ।।(०१)

सा वै वसुमतीं तत्र पश्यन्ती सुमनोरमाम् ।
वनस्पतीन्विचिन्वन्ती विजहार सखीवृता ।। ८ ।।(०२)

रूपेण वयसा चैव मदनेन मदेन च ।
बभञ्ज वनवृक्षाणां शाखाः परमपुष्पिताः ।। ९ ।।(०३)

तां सखीरहितामेकामेकवस्त्रामलङ्कृताम् ।
ददर्श भार्गवो धीमांश्चरन्तीमिव विद्युतम् ।। १० ।।(०४)

तां पश्यमानो विजने स रेमे परमद्युतिः ।
क्षामकण्ठश्च विप्रर्षिस्तपोबलसमन्वितः ।
तामाबभाषे कल्याणीं सा चास्य न शृणोति वै ।। ११ ।।(०५)

ततः सुकन्या वल्मीके दृष्ट्वा भार्गवचक्षुषी।
कौतूहलात्कण्टकेन बुद्धिमोहबलात्कृता ।। १२ ।।

किं नु खल्विदमित्युक्त्वा निर्बिभेदास्य लोचने ।। १३ ।। (०६)

अक्रुध्यत्स तया विद्धे नेत्रे परममन्युमान्।

---

(०१) (२)दिव्या (४)भार्गवं सा; भार्गवं च for वस्य ); ददर्श ह for समासदत्);,

(०२) (१)सुमतीं मती for दती ); सा वै वसुमतीं तत्र; सा च कृच्छ्रमतीत्येवं (२) क०ग०पश्यन्ती सुमनोहराम्, वीक्ष्यमाना,पश्यन्ती सु; वनोद्देशे मनोरमां०; ०हतं; ०रमं; रमा (३)वनस्पतिं प्रचिन्वन्ती; प्रचिन्वाना ,

(०३) (१)सुकन्या for रूपेण ); (२) घ०सुरापान; सुरूपेण; संमोहेन; मधुपान for मदनेन ); दमेन ( मदेन ); मदनेन च,

(०४) (४) क०ख०ग० चलन्तीमिव,चलन्तीम् for चरन्तीम् );,

(०५) (३) ख०ग०घ०क्षामकण्ठश्च ब्रह्मर्षिर्,विप्रर्षिस् (forब्रह्मर्षिस् ); ब्रह्मर्षिः कामसन्तप्तस् आभाषत; बभाषे च for आबभाषे ); तस्य for चास्य );,

(०६) ख०घ०स तया,

ततः शर्यातिसैन्यस्य शकृन्मूत्रे समावृणोत् ।। १४ ।।(०१)

ततो रुद्धे शकृन्मूत्रे सैन्यमासीत्(नाह) दुःखितम् ।
तथागतमभिप्रेक्ष्य पर्यपृच्छत्स पार्थिवः ।। १५ ।।(०२)

शर्य्यातिः

तपोनित्यस्य वृद्धस्य रोषणस्य विशेषतः ।
केनापकृतमद्येह भार्गवस्य महात्मनः ।
ज्ञातं वा यदि वाज्ञातं तद्रुतं ब्रूत मा चिरम् ।। १६ ।।(०३)

लोमशः

तमूचुः सैनिकाः सर्वे न विद्मोऽपकृतं वयम् ।
सर्वोपायैर्यथाकामं भवांस्तदधिगच्छतु ।। १७ ।।(०४)

ततः स पृथिवीपा(प)लः साम्ना चोग्रेण च स्वयम् ।
पर्यपृच्छत्सुहृद्वर्गं पर्यजानन्न चैव ते ।। १८ ।।(०५)

आनाहार्तं ततो दृष्ट्वा तत्सैन्यमसुखार्दितम् ।
पितरं दुःखितं दृष्ट्वा सुकन्येदमथाब्रवीत् ।। १९ ।।(०६)

सुकन्या

---

(०१) (३)सहसा for स तया ); नेत्रे; विद्धोः विप्रो for विद्धे );(४)विद्धे for नेत्रे ); तथा नेत्रेतिमन्युमान् सर्याति शय्याति शैय्याति न्मूत्रे,

(०२) (१)शकृन्मूत्रे ततो रुद्धे (२) सैन्यमेत्याह दुःस्वितं; सैन्यमानाह दुष्कृतं; सैन्यमासीस्तुदुःखितं (४) पर्यतप्यत; ० पृच्छंश्च,

(०३) ज्ञानाद्वाप्यथ वाज्ञानात् तदिदं; तत्कृतं; तद् द्रुतं for तदृतं );नानृतं ( तद् द्रुतं;द्रुतं वै ); वदतानघाः

(०४) (२)विद्मा for विद्मो ); नानृतं करवामहे (३)सर्वेषां वै for सर्वोपायैर् ); (४)भवान् तद् समधि; तदभि for तदधि ); ,

(०५) (१)ततस्तु स महीपालः (३)यं यं for पर्य ); सुहृद्वर्गान् (४) पर्य for प्रत्य० );,

(०६) (१)अनाहार्थां; परमार्तं; आनाय्यार्तं; सा तदार्तं for आनाहार्त ); ततः सैन्यं for ततो दृष्ट्वा ) (२) ततो दृष्ट्वा for तत्सै न्यम् ); (३)दृष्ट्वा for चापि ); (४) सुकन्या इद्रमब्रवीत्,

मयाटन्त्येह वल्मीके दृष्टं सत्त्वमभिज्वलत् ।
खद्योतवदभिज्ञातं तन्मया विद्धिमन्तिकात् ।। २० ।।[०१]

एतच्छ्रुत्वा तु वल्मीकं शर्यातिस्तूर्णमभ्ययात्।
तत्रापश्यत्तपोवृद्धं वयोवृद्धं च भार्गवम् ।। २१ ।।[०२]

* चन्द्रादित्यसमप्रभम् ज्ञानवृद्धं वयोवृद्धं [०३]

अयाचदथ सैन्यार्थं प्राञ्जलिः पृथिवीपतिः ।। २२ ।।

शर्य्यातिः

अज्ञानाद्बालया यत्ते कृतं तत्क्षन्तुमर्हसि।[०४]

* इमामेव च ते कन्यां ददामि सुदृढव्रत ।
भार्यार्थी त्वं गृहाणेमां प्रसीदस्व च भार्गव ।।

ततोऽब्रवीन्महीपालं च्यवनो भार्गवस्तदा ।। २३ ।।

च्यवनः

* अपमानादहं विद्धो ह्यनया दर्पपूर्णया।
रूपौदार्यसमायुक्तां लोभमोहबलात्कृताम्।[०५]
तामेव प्रतिगृह्याहं राजन्दुहितरं तव ।। २४ ।।

क्षंस्यामीति महीपाल सत्यमेतद्ब्रवीमि ते ।। २५ ।।[०६]

लोमशः

ऋषेर्वचनमाज्ञाय शर्यातिरविचारयन् ।

---

(०१) (१)मया किलेह; मयाटव्ये हिं; मया भ्रमन्त्या; मयागत्येह; मयाटन्त्या च (२)दृष्ट्वा for दृष्टं ); (३)स्वद्योतवनविज्ञा नात्; ०वदवज्ञानात्; ०वदभि( वि ); ज्ञाय,

(०२) शर्यातिः वल्मीकं सर्यातिर्; शय्यातिर् for शर्यातिर् );अभ्यगात्; अभ्ययात् for आद्रवत् );,

(०३) (१)( शील for वयो );,) ,

(०४) (१)अयाचत स; चताथ for ०चदथ ); (२)स महीपतिः for पृथिवी );,

(०५) लोभमोहसमावृतां; समावृतः; बुद्धि मोहवलात्कृतां,*/

(०६) (३)क्षंस्यामीति for क्षमि );,

दद‍ौ दुहितरं तस्मै च्यवनाय महात्मने ॥ २६ ॥

लोमशः

प्रतिगृह्य च तां कन्यां भगवान्प्रससाद ह ।
प्राप्तप्रसादो राजा वै ससैन्यः पुरमाव्रजत् ॥ २७ ॥(०१)

सुकन्यापि पतिं लब्ध्वा तपस्विनमनिन्दिता ।
नित्यं पर्यचरत्प्रीत्या तपसा नियमेन च ॥ २८ ॥

अग्नीनामतिथीनां च शुश्रूषुरनसूयिका ।
समाराधयत क्षिप्रं च्यवनं सा शुभानना ॥ २९ ॥(०२)

अस्मिन् तीर्थयात्रापर्वणि ९८अध्याये २९श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि अष्टनवतितमोऽध्यायः ॥ ९८ ॥

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 099

# ९९.एकोनशततमोऽध्यायः

कदाचन च्यवनाश्रममुपागताभ्यामश्विभ्यां भार्यात्वाय सुकन्यां प्रति प्रार्थनम् ॥ १ ॥ तदकामयमानां तां प्रत्यश्विभ्यां स्वप्रसादाच्च्यवने रूपयौवनसंपन्ने सति तुल्यरूपेषु त्रिषु कस्यचिद्वरणचोदना ॥ २ ॥ भर्त्राज्ञया तया तदङ्गीकारे च्यवनेन सहाश्विभ्यां सरसो अन्तर्जले निमज्जनम् ॥ ३ ॥ सुकन्यया निमज्ज्योत्थितेषु त्रिषु तेषु स्वपातिव्रत्यमहिम्ना च्यवनस्यैव वरणम् ॥ ४ ॥ ततस्तुष्टेन च्यवनेनाश्विनोः सोमरसदापनप्रतिज्ञानम् ॥५॥ नासत्ययोः प्रसादेन महर्षेश्च्यवनस्य सुरूपयुवावस्थयोः प्राप्तिः ॥

---

(०१) (१)तु (forच ); (३)प्राप्ते प्रसादे राजन्स; राजा वै; राजासौ; राजा च; राजर्षिः for राजा स ); (४)पुरम् for पुनद् ); सैन्यः पुरमथाव्रजत्;,
(०२) (२)अनसूयया अनसूयका; अनसूयता ;,

लोमशः

कस्यचित्त्वथ कालस्य त्रिदशावश्विनौ नृप ।
कृताभिषेकां विवृतां सुकन्यां तामपश्यताम् ॥ १ ॥(०१)

तां दृष्ट्वा दर्शनीयाङ्गीं देवराजसुतामिव ।
ऊचतुः समभिद्रुत्य नासत्यावश्विनाविदम् ॥ २ ॥(०२)

कस्य त्वमसि वामोरु वनेऽस्मिन्किं करोषि च ।
इच्छाव भद्रे ज्ञातुं त्वां तत्त्वमाख्याहि शोभने ॥ ३ ॥(०३)

लोमशः

ततः सुकन्या सव्रीडा तावुवाच सुरोत्तमौ ॥ ३ ॥

सुकन्या

शर्यातितनयां वित्तं भार्यां मां च्यवनस्य च ॥ ४ ॥(०४)

नाम्ना चाहं सुकन्यास्मि नृलोकेऽस्मिन्प्रतिष्ठिता।
साहं सर्वात्मना नित्यं पतिं प्रति सुनिष्ठिता ॥ ५ ॥(०५)

लोमशः

अथाश्विनौ प्रहस्यैतामब्रूतां पुनरेव तु ॥ ५ ॥

अश्विनौ

---

(०१) (२)नासत्यान्; त्रिदश्याम्; पुराणाम्; सीराणाम् for सुराणाम् ); उभौ; तदा for नृप );,

(०२) (४)नृप for ( इ ) दम् );,

(०३) (१)अथ for असि ); (२)किं वनेस्मिन् ( वनेस्मिन्किं ); चिकीर्षसि;वनेस्मिन्किं करोषि च ( वा ); किं चात्र क्रियते त्वया (३)इच्छामः ( व );स्त्वां वयं ज्ञातुं; ज्ञातुं त्वामिच्छतो भद्रे ,

(०४) (१)सव्रीडा for संवीता ); (२) उवाच च for तावुवाच ); उवाच सुरसत्तमौ (३)सर्याति; शवयाति; शय्यातेस् (४)च माम् तु for च );,

(०५) (१)( चापि for चाहं ); अयं पादोऽनन्तरश्च न स्तः, सुकन्येति नृलोकेऽस्मिन् च विश्रुता for प्रति ); भर्तारं प्रति वि ( नि ); ष्ठिता; पति प्रति सुनि,) ;,

कथं त्वमसि कल्याणि पित्रा दत्ता गताध्वने ।। ६ ।।(०१)

भ्राजसेऽस्मिन्वने भीरु विद्युत्सौदामनी यथा ।। ६ ।।

न देवेष्वपि तुल्यां हि त्वया पश्याव भाविनि ।। ७ ।।(०२)

अनाभरणसम्पन्ना परमाम्बरवर्जिता ।

शोभयस्यधिकं भद्रे वनमप्यनलङ्कृता ।। ८ ।।

* अनाभरणसम्पन्ना परमाम्बरवर्जिता ।

शोभयस्यधिकं भद्रे वनमप्यनलङ्कृता ।(०३)

सर्वाभरणसम्पन्ना परमाम्बरधारिणी।।

शोभसे त्वनवद्याङ्गि न त्वेवं मलपङ्किनी ।। ९ ।।(०४)

कस्मादेवंविधा भूत्वा जराजर्जरितं पतिम् ।

त्वमुपास्से ह कल्याणि कामभोगबहिष्कृतम् ।। १० ।।(०५)

असमर्थं परित्राणे पोषणे तु शुचिस्मिते।

सा त्वं च्यवनमुत्सृज्य वरयस्वैकमावयोः ।

पत्यर्थं देवगर्भाभे मा वृथा यौवनं कृथाः ।। ११ ।।(०६)

लोमशः

एवमुक्ता सुकन्यापि सुरौ ताविदमब्रवीत्।

---

(०१) (१)ततो for अथा ); (ए)नां; (इ)मां for (ए) तां ); (४) गताध्वरे; त्मने; ०धमे; बुधे; गता वने ( वरानने );,

(०२) (१)यं for त्वं ); भ्राजस्य ( से ); स्मिन्वनोद्देशे; भ्राजसेस्मिन्वने भीरु; भ्राजसे तनुमध्या त्वं (२)सौदामनी (३)तुल्याङ्गीं for तुल्यां हि ); (४)तव for त्वया ); पश्यामि भाविनि for भामिनि );,

(०३) (१)( शोभसेभ्य (ह्य) धिकं एवम् for वनम् ); पुनरलङ्कृता for अप्यनलं );,),

(०४) (३)शोभेस्त्वम्; शोभसे तु ( हि ); शुभे त्वं for शोभे थास्तु ); अहीनाङ्गी for अनव ); (४) त्वेव for त्वेवं );,

(०५) (३)त्वमुपाससि; त्वमुपास्यसिः त्वमुपासे हि for त्वमुपास्से ह ); (४)विवर्जितं;,

(०६) (२)वा; तु for च ); (३)साद्य; सा त्वं for साधु ); व्यसनम् for च्यवनम् ); (४)वरयैकं त्वम् for वरयस्यैकम् );,

## सुकन्या

रताहं च्यवने पत्यौ मैवं मां पर्यशङ्किता(ङ्कतम्) ।। १२ ।।(०१)

## लोमशः

तावब्रूतां पुनस्त्वेनामावां देवभिषग्वरौ ।
युवानं रूपसम्पन्नं करिष्यावः पतिं तव ।। १३ ।।(०२)

ततस्तस्यावयोश्चैव वृणीष्वान्यतमं पतिम् ।
एतेन समयेनैनमामन्त्रय पतिं शुभे ।। १४ ।।(०३)

सा तयोर्वचनाद्राजन्नुपसङ्गम्य भार्गवम्।
उवाच वाक्यं यत्ताभ्यामुक्तं भृगुसुतं प्रति ।। १५ ।।

तच्छ्रुत्वा च्यवनो भार्यामुवाच क्रियतामिति ।
सा भर्त्रा समनुज्ञाता क्रियतामिति चाब्रवीत् ।। १६ ।।(०४)

श्रुत्वा तदश्विनौ वाक्यं तस्यास्तत्क्रियतामिति।
ऊचतू राजपुत्रीं तां पतिस्तव विशत्वपः ।। १७ ।।(०५)

ततोऽम्भश्च्यवनः शीघ्रं रूपार्थी प्रविवेश ह ।
अश्विनावपि तद्राजन्सरः प्राविशतां तदा ।। १८ ।।(०६)

---

(०१) (१) ( अ ) पि for तु ); सुकन्या चैवमुक्ता च; एवमुक्ता तु सा कन्या (३) प्रीत्या for पत्यौ ); पत्यौ रताहं च्यवने (४) अ०एवं; ख०एवं मावोचतंपुनः;, ग०मैवं मा वोजतंपुनः, नैवं for मैवं ); मां for मा ); पहशं कतां; पर्यशङ्कतां ( तं ); ०शङ्कितं; परिशङ्किथाः; परिशङ्कितं,

(०२) (२)एवं for आवां ); देवभिषक्तमौ; देवौ भिषग्वरौ;,

(०३) (१)त्वम् for तस्य ); (२)एकतरं वृणीष्वान्यतमं पतिं (३) आवाम्; एवम्; एव; एतम्; इमम् for एनम् ); (४) सुभध्यमे; पतिं शुभे; शुचिस्मिते for वरा );,

(०४) (३)भर्त्रा सा,

(०५) (१)ततो for तद ); तच्छुत्वा चाश्विनौ वाfor नोर्वा ); क्यं (२)तस्यास्तौ; तस्यास्तत्;,

(०६) (२)तत्; तां for ह ); (४)ख०ग०प्राविशतां प्रभो, प्राविशतां; प्राविशतौ; प्राविशतान् उभौ; तदा for प्रभो );,

ततो मुहूर्तादुत्तीर्णाः सर्वे ते सरसस्तदा
दिव्यरूपधराः सर्वे युवानो मृष्टकुण्डलाः ।। १९ ।।(०१)

तुल्यवेषधराश्चैव मनसः प्रीतिवर्धनाः ।। २० ।।

तेऽब्रुवन्सहिताः सर्वे वृणीष्वान्यतमं शुभे ।
अस्माकमीप्सितं भद्रे पतित्वे वरवर्णिनि ।। २१ ।।

त्वमश्विनोरन्यतमं च्यवनं वा यशस्विनि।

यत्र वाप्यभिकामासि तं वृणीष्व सुशोभने ।। २२ ।।

* तमश्विनोरन्यतमं च्यवनं वा मनस्विनि। (०२)

सा समीक्ष्य तु तान्सर्वांस्तुल्यरूपधरान्स्थितान् ।

निश्चित्य मनसा बुद्धवा देवी वव्रे स्वकं पतिम् ।। २३ ।।(०३)

* यद्यहं मनसा नान्यं पतिमिच्छे स्वकं विना ।
तेन सत्येन मे देवौ प्रयच्छेतां पतिं भम ।(०४)

* एवमुक्ते तथा साध्व्या नासत्यै सुरसत्तमौ० ।
दर्शयामासतुस्तस्याः सुकन्याया भृगोः सुतम् ।

* ततो देवाः सुतुष्टाश्च च्यवनं तं पतिं ददुः ।

लब्ध्वा तु च्यवनो भार्यां वयो रूपं च वाञ्छितम् ।
हृष्टोऽब्रवीन्महातेजास्तौ नासत्याविदं वचः ।। २४ ।।

### च्यवनः

---

(०१) (२)तदा; त्रयः for ततः); (३)चैव for सर्वे ); वेष for रूपं ); सर्वै for चैव );,

(०२) (१)(यशस्विनि,) यं तु for यत्र ); चा for वा) यमेवमाभ०; यमेव त्वं हि कामासि; यं स्वमेवाभिं; यमेव त्वभि० शुभाः ( वरा ); नने for सुशो );,

(०३) (१)च for तु ); (३)साध्वी; हित्वा for बुद्ध्या ); (४)ततो; देवौ for देवी ); स्वकं पतिम् देवौ ताविदम ब्रवीत्,

(०४) (१)(यथाहमङ्गना नान्यं स्वकं for मम );,) ,

यथाहं रूपसम्पन्नो वयसा च समन्वितः ।
कृतोभवद्भ्यां वृद्धः सन्भार्यां च प्राप्तवानिमाम् ।। २५ ।।(०१)
तस्माद्युवां करिष्यामि प्रीत्याहं सोमपीथिनौ।।
मिषतो देवराजस्य सत्यमेतद्ब्रवीमि वाम् ।। २६ ।।(०२)

लोमशः

तच्छ्रुत्वा हृष्टमनसौ दिवं तौ प्रतिजग्मतुः ।
च्यवनश्च सुकन्या च सुराविव विजह्रतुः ।। २७।।(०३)
* तस्मिन्नेव सरस्तीरे बिभ्रतौ रूपमुत्तमम्।
अस्मिन् तीर्थयात्रापर्वणि ९९अध्याये २७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि एकोनशततमोऽध्यायः ।। ९९ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 100

# १००. शततमोऽध्यायः

च्यवनस्य यौवनलाभश्रवणहृष्टेन शर्य्यातिना तदाश्रमाभिगमनम् ।। १ ।। च्यवनेन शर्य्यातेर्याजनम् ।। २ ।। तत्र च्यवनेनाश्विभ्यां स्वप्रतिश्रुतसोमरसदानोद्यमे इन्द्रेण तस्य हननाय बाहुना वज्रोद्यमनम् ।। ३ ।। इन्द्रबाहुसंस्तम्भनपूर्वकं च्यवनसृष्टया कृत्यया शक्रं प्रत्यभिसरणम् ।। ४ ।। इन्द्राभिष्टुतेन च्यवनेन तस्मिन् स्वप्रयुक्तकृत्यायास्ततो निवर्त्य स्त्र्यादिषु विभजनम् ।। ५ ।। लोमशेन सुकन्यापोख्यानसमापनपूर्वकं युधिष्ठिराय नानातीर्थ महिमानुवर्णनम् ।। ६।।

---

(०१) (१)यदर्थं; यदहं for यथाहं );,
(०२) (२)सोमपाः ( पी ); यिनौ,
(०३) (२)जग्मतुस्ततः for प्रति ); (३)च for ( अ ) पि );,

### लोमशः

ततः शुश्राव शर्यातिर्वयःथं च्यवनं कृतम् ।
सं(सु)हृष्टः सेनया सार्धमुपायाद्भार्गवाश्रमम् ।। १ ।।[०१]

च्यवनं च सुकन्यां च दृष्ट्वा देवसुताविव ।
रेमे सभार्यः शर्यातिः कृत्स्नां प्राप्य महीमिव ।। २ ।।[०२]

ऋषिणा सत्कृतस्तेन सभार्यः पृथिवीपतिः ।
उपोपविष्टः कल्याणीः कथाश्चक्रे मनोरमाः ।। ३ ।।[०३]

अथैनं भार्गवो राजन्नुवाच परिसान्त्वयन् ।
याजयिष्यामि राजंस्त्वां सम्भारानवकल्पय ।। ४ ।।[०४]

ततः परमसंहृष्टः शर्यातिरवनीपतिः ।
च्यवनस्य महाराज तद्वाक्यं प्रत्यपूजयत् ।। ५ ।।[०५]

प्रशस्तेऽहनि यज्ञीये सर्वकामसमृद्धिमत् ।
कारयामास शर्यातिर्यज्ञायतनमुत्तमम् ।। ६ ।।[०६]

तत्रैनं च्यवनो राजन्याजयामास भार्गवः ।
अद्भुतानि च तत्रासन्यानि तानि निबोध मे ।। ७ ।।[०७]

अगृह्णाच्च्यवनः सोममश्विनोर्देवयोस्तदा ।

---

(०१) (१)शुश्राव; संश्रुत्य for श्रुत्वा तु ); सर्यातिर्; शय्यातिर् (२)युवानं for वयःस्थं ); (३)प्रहृष्टः; सुं for सं );,
(०२) (३)सभार्यः for महीपः); शय्यातिः शंयाति ; कृत्स्नां लब्ध्वे मेदिनीं,
(०३) (३)कल्याणीं (४) कथां for कथाश् ); मनोरमाः ( महीपतिः); for महां );,
(०४) च्यवनश्च महाराजं प्रोवाच परि (४)अव for उप );,*/

(०५) (२) ख०राजा वाक्यमपूजयत् ; मध्ये अर्धनास्ति,अवनी for पृथिवी );,
(०६) (१)याज्ञीये; (२)द्धिमान्,
(०७) (३)अत्य ( यान्य ); द्भुतानि for अद्भु०तानि च ); (४)तानि मे गदतः श्रृणु,

तमिन्द्रो वारयामास गृह्णानं स तयोर्ग्रहम् ।। ८ ।।(०१)

इन्द्रः

उभावेतौ न सोमार्हौ नासत्याविति मे मतिः ।
भिषजौ दिवि देवानं कर्मणा तेन नार्हतः ।। ९ ।।(०२)

च्यवनः

महोत्साहौ महात्मानौ रूपद्रविणवि(व)स्तरौ ।
यौ चक्रतुर्मां मघवन्वृन्दारकमिवाजरम् ।। १० ।।(०३)

ऋतेत्वां विबुधांश्चान्यान्कथं वै नार्हतः सवम् ।
अश्विनावपि देवेन्द्र देवौ विद्धि पुरन्द ।। ११ ।।(०४)

इन्द्रः

चिकित्सकौ कर्मकरौ कामरूपसमन्वितौ ।
लोके चरन्तौ मर्त्यानां कथं सोममिहार्हतः ।। १२ ।।

लोमशः

एतदेव यदा वाक्यमाम्रेडयति देवराट् ।
अनादृत्य ततः शक्रं ग्रहं जग्राह भार्गवः ।। १३ ।।(०५)

---

(०१) (४)मा गृहाणे; मा गृहाण; गृहानं तु; गृह्णानं स for गृह्य० ); प्रतिग्रहं; तयोर्हविः; तयोः सवं मा गृहाणैतयोर्ग्रहं,

(०२) (२)नासत्यौ देवतास्विह ( ०स्विनौ ); (३) देवतानां हि; दिवि देवानां; देवलोकस्य for पुत्राणां ); (४) क०कर्मणा तेन नार्हतः;,घ०ख०ग०कर्मणा नैवमर्हतः,कर्मणां for णा ); तेन गर्हितौ तेन नार्हतः for नैव );,

(०३) (१)महोत्साहौ; नावमंस्था (२) ०वर्चसौ; संमतौ; वत्तमौ; ०वित्तमौ;,

(०४) (१)ऋते for त्वां ); तौ तस्याद्धियुधश्रेष्ठ (२) नैवा for वै ना० ); स्वरं; स्वयं for सवम् ); नेदृग्वक्तुं त्वमर्हसि (४) परन्तप; परन्तपौ; सुरोत्तमौ for पुरं );,

(०५) (१)यथा; तदा for यदा ); (२) वासवे; देवराट् for वासवः); (३)तु तद्वाक्यं; तु तं शक्रं; च तं शक्रं for ततः शक्रं );,

ग्रहीष्यन्तं तु तं सोममश्विनोरुत्तमं तदा।।
समीक्ष्य बलभिद्देव इदं वचनमब्रवीत् ।। १४ ।।(०१)

इन्द्रः

आभ्यामर्थाय सोमं त्वं ग्रहीष्यसि यदि स्वयम् ।
वज्रं ते प्रहरिष्यामि घोररूपमनुत्तमम् ।। १५ ।।(०२)

लोमशः

एवमुक्तः स्मयन्निन्द्रमभिवीक्ष्य स भार्गवः ।
जग्राह विधिवत्सोममश्विभ्यामुत्तमं ग्रहम् ।। १६ ।।(०३)

ततोऽस्मै प्राहरद्वज्रं घोररूपं शचीपतिः ।
तस्य प्रहरतो बाहुं स्तम्भयामास भार्गवः ।। १७ ।।(०४)

तं स्तम्भयित्वा च्यवनो जुहुवे मन्त्रतोऽनलम् ।
कृत्यार्थी सुमहातेजा देवं हिंसितुमुद्यतः ।। १८ ।।(०५)

ततः कृत्याथ सञ्जज्ञे मुनेस्तस्य तपोबलात्।
मदो नाम महावीर्यो बृहत्कायो महासुरः ।। १९ ।। (०६)

शरीरं यस्य निर्देष्टुमशक्यं तु सुरासुरैः ।
* तस्य प्रमाणं वपुषा न तुल्यमिह विद्यते ।

---

(०१) (१)ततः; सुतं for तु तं ); (३) वल for बलं );,
(०२) (३)प्रेषयिष्यामि for प्रहरि०); (४)दुरासदं for अनुत्तमम् );,
(०३) (२) ( अ ) थ for स );,*/
(०४) (१) घ०करेणास्मै प्रजग्राह घोरं वक्त्रं शचीपतिः । ख०तदाऽस्मै,कोपाद्वज्रमिन्द्रः for वज्रं घोररूपं );,
(०५) (१)तं for सं ); तं बाहुं for च्यवनो ); च्यवनः स्तम्भयामास (२)जुहाव ()
नले (३) कृत्यार्थं स for सु ); (४)देवान् for देवं ); देवेशं हन्तुमुद्यतः,
(०६) (१)तत्र for ततः); तत्र कृत्योद्भवो जज्ञे; ततः कृत्याथ सञ्जज्ञे (२)मुनेस् for ऋषेस् );(३) कायो for ०वीर्यो ); (४)महारवः for ०सुरः); महाबीर्यो महाबलः तस्य for यस्य ); वै नृ; स for तु );,

तस्यास्यमभवद्घोरं तीक्ष्णाग्रदशनं महत् ।। २० ।। [०१]

हनुरेका स्थिता त्वस्य भूमावेका दिवं गता।
चतस्रश्चायतां दंष्ट्रा योजनानां शतं शतम् ।। २१ ।।[०२]

इतरे तस्य दशना बभूवुर्दशयोजनाः ।
प्रासादशिखराकाराः शूलाग्रसमदर्शनाः ।। २२ ।।[०३]

बाहू पर्वतसङ्काशावायतावयुतं समौ ।
नेत्रे रविशशिप्रख्ये वक्त्रं कालाग्निसन्निभम् ।। २३ ।।[०४]

लेलिहञ्जिह्वया वक्त्रं विद्युच्चपललोलया ।
व्यात्ताननो घोरदृष्टिर्ग्रसन्निव जगद्बलात् ।। २४ ।।[०५]

स भक्षयिष्यन्सङ्क्रुद्धः शतक्रतुमुपाद्रवत् ।
महता घोररूपेण लोकाञ्छब्देन नादयत् ।। २५ ।।[०६]

तं दृष्ट्वा घोरवदनं मदं देवः शतक्रतुः ।
आयान्तं भक्षयिष्यन्तं व्यात्ताननमिवान्तकम् ।। २६।।

भयात्संस्तम्भितभुजः सृक्किणी लेलिहन्मुहुः ।
ततोऽब्रवीद्देवराजश्च्यवनं भयपीडितः ।। २७ ।।[०७]

लक्षालङ्कारः- सृक्किणी लेलिहन्मुहुः इत्यत्र 'प्रान्तावोष्ठस्य सृक्किणी' इत्यभिधानात् सृक्किणी

---

(०१) (२)तीक्ष्णोग्रदशनं; तीक्ष्णं तद्दर्शनं; तीक्ष्णाग्रं दशनं;,
(०२) (३)हनुरेकः स्थितस् त्वस्य for तस्य) (४) भूमावेको दिवं गतः,*/
(०३) (१)चा ( त्वा ); यता for आ ); आयताश्चतुरो दंष्ट्रा(२) अ०श्शत, (३) तस्य for त्वस्य ); प्राकारदशना; शिखर; प्रासा दशिखरा; प्राकारपरिखा; प्रासादसदृशां ;,
(०४) (१)परिघसङ्काशौ (२) व्यायतौ for आयतौ ); चायुतं; अयुतौ; भीषणौ for अयुतं ); समं; शमं; शतं for समौ ); (३)शशिरवि (४) वक्तुं कालाग्निसंनिभं,
(०५) (२)विद्युच्चलित०; विद्युच्चापल; विद्युश्चश्चलं (४) जगद्बली,
(०६) (१)सं for स ); (३)घोरनादेन (४) पूर for नाद );,
(०७) (१)स तथा for भयात्सं ); (२) स्रक्किणीपरिलेलिहन् for लेलिहन्मुहुः); (३)पाण्डवेय for देवराजशू

उत्तराधरोष्ठयोः प्रान्तौ । सौद्युम्निः युवानाश्वः ।

इन्द्रः

सोमार्हावश्विनावेतावद्यप्रभृति भार्गव ।
भविष्यतः सत्यमेतद्वचो विप्रः प्रसीद मे ।। २८ ।।(०१)

न ते मिथ्या समारम्भो भवत्वेष परो विधिः ।
जानामि चाहं विप्रर्षे न मिथ्या त्वं करिष्यसि ।। २९ ।।(०२)

सोमार्हावश्विनावेतौ यथा वाद्य कृतौ त्वया।
क्यतथैव मामपि ब्रह्मन्श्रेयसा योक्तुमर्हसि ।। ३० ।।

भूय एव तु ते वीर्यं प्रकाशेदिति भार्गव ।(०३)
* तथैव मामपि ब्रह्मकञ्श्रेयसा योक्तुमर्हसि ।
सुकन्यायाः पितुश्चास्य लोके कीर्तिः प्रथेदिति ।। ३१ ।।

अतो मयैतद्विहितं तव वीर्यप्रकाशनम् ।
तस्मात्प्रसादं कुरु मे भवत्वेवं यथेच्छसि ।। ३२ ।।(०४)
* इह रिरंसया देवाः पितरश्च महर्षयः ।
अर्चयन्ति महाप्राज्ञ क्रतुं तव महाबलाः ।(०५)

लोमशः

एवमुक्तस्य शक्रेण भार्गवस्य महात्मनः ।

---

); प्रणतोब्रवीत्पाण्डवेय,
(०१) (३)भविष्येते वचः सत्यं (४) सत्यं for ब्रह्मन् ); वचो विप्र ( सर्वमेतत् ); प्रसीद मे,
(०२) (१)मा for न ); (२)भवति for भवतु ); एषोपरो for एष परो ); तपोधन for परो विधिः); (३) त्वाहं for चाहं ); देवर्षे; ब्रह्मं for विप्रं );,
(०३) (१)सोमपौ for सोमार्हौ ); (२)यथा वाद्य; तथै for यथै० ); कृतौ त्वया ;,
(०४) (२)लोके कीर्तिः भवेदिति; भविष्यति for प्रथे०); (३) एवं; ततो for अतो ); (ए)व for (ए) तद ); प्रथितं for विहितं );,
(०५) (१)एवं for एतद्) यदि for यथे),

स मन्युर्व्यगमच्छीघ्रं मुमोच च पुरन्दरम् ।। ३३ ।।(०१)

मदं च व्यभजद्राजन्पाने स्त्रीषु च वीर्यवान् ।
अक्षेषु मृगयायां च पूर्वसृष्टं पुनः पुनः ।। ३४ ।।(०२)

तदा मदं विनिक्षिप्य शक्रं सन्तर्प्य चेन्दुना ।
अश्विभ्यां सहितान्देवान्याजयित्वा च तं नृपम् ।। ३५ ।।(०३)

विख्याप्य वीर्यं लोकेषु सर्वेषु वदतां वरः ।
सुकन्यया सहारण्ये विजहारानुकूलया ।। ३६ ।।(०४)

* अद्यापीह प्रगायन्ति गाथां तस्यैव धीमतः ।
तां श्रुत्वा चक्षुषोर्हानिं नाप्नुवन्तीह मानवाः ।।
* शर्यातिं च सुकन्यां च च्यवनं च तथाश्विनौ ।
ये भुक्त्वा संस्मरिष्यन्ति तेषां चक्षुर्न हीयते ।

तस्यैतद्द्विजसङ्घुष्टं सरो राजन्प्रकाशते ।

अत्र त्वं सह सोदर्यैः पितन्देवांश्च तर्पय ।। ३७ ।।(०५)

* तर्पयाद्य पितृन्देवान्पयसा पावनेन च ।

एतद्दृष्ट्वा महीपाल सिकताक्षं च भारत।

सैन्धवारण्यमासाद्य कुल्यानां कुरु दर्शनम् ।।
पुष्करेषु महाराज सर्वेषु च जलं स्पृश ।। ३८ ।।(०६)

---

(०१) (२)भार्गवस्य for च्यव० ); (३) मन्युर्व्यपागम०; मन्युर्युपाशम०; मन्युर्ष्यपारम स मन्युरगम; स मन्युरशम०; स मन्युर्ब्यशम०; शमं मन्युरगां,

(०२) (४)पूर्वं for पूर्व ); महात्मना for पुनः पुनः );,

(०३) (१)तदा मदं; ततो मदं; मदमेवं च for वि ); (३)भ्यां सह देवाभ्यां ,

(०४) सर्वें लोके ददतां for वं ); वर (३)तदारण्ये for सहा ); (४) (अ)नुकूलया (अ)क्तवान्

(०५) (२)दिव्यं for राजन् ); विशां पते for प्रका );(४)समर्चय for च तर्पय );,(२) अ०-
तर्पयाद्य पितृन् देवान् पयसा पावनेन च । अधिकः

(०६) (१)एतं; एवं for एतद् ); एतस्यश्य च राजेन्द्र (२) क०ग०घ०सिकताढ्यं च, सिकताख्यं; शितिकाक्षं;

* स्थाणोर्मन्त्राणि च जपन्सिद्धिं प्राप्स्यसि भारत।
सन्धिर्द्वयोर्नरश्रेष्ठ त्रेताया द्वापरस्य च ।।
* अयं हि दृश्यते पार्थ सर्वपापप्रणाशनः ।
अत्रोपस्पृश्य चैव त्वं सर्वपापप्रणाशने।

आर्चीकपर्वतश्चैव निवासो वै मनीषिणाम्।
**सदाफलः सदास्रोता(तो) मरुतां स्थानमुत्तमम् ।। ३९ ।।**

चैत्याश्चैते बहुविधास्त्रिदशानां युधिष्ठिर।(०१)
**एतच्चन्द्रमसस्तीर्थमृषयः पर्युपासते ।। ४० ।।(०२)**

वैखानसा बालखिल्याः पावका वायुभोजनाः ।। ४१ ।।(०३)

शृङ्गाणि त्रीणि पुण्यानि त्रीणि प्रस्रवणानि च ।
**सर्वाण्यनुपरिक्रम्य यथाकाममुपस्पृश ।। ४२ ।।**
* आदिसिद्धानि कौन्तेय न विघ्नस्तत्र कारणम् ।
**शान्तनुः चात्र राजेन्द्र शुनकः च नराधिपः ।।**
**नरनारायणौ चोभौ स्थानं प्राप्ताः सनातनम् ।। ४३ ।।(०४)**

इह नित्यशया देवाः पितरश्च महर्षिभिः ।

---

शितिकण्ठशू; सिकताढ्यश् ( सिकतस्य ); सितिकण्ठस्य च प्रभो (४)कुरुनन्दन; दर्शनं कुरु महाभागः महीपाल ( च सर्वेषु ); for महाराज );महाराज for सर्वेषु च ); ( ए ) व; (ए) षु (च); ( उ ) दकं for जलं ); स्पृशन् ,

(०१) (१)अर्चीक; आर्चिकः; आवीकः नित्याशू; याज्याशू ; चिन्त्याशू; चित्याशू; चित्यशू; चिन्त्यशू for चैत्याशू ); चैव; चैता; for चैते ); बहुमतास् विधास्; शिवास्,

(०२) (१)चन्द्रसरो; चन्द्रमसं राजन्; नित्यं for तीर्थं ); (२) अर्चयन्त्य ( आजहुः ऋ; आजहनृ ); षयः सदा,

(०३) (३) बाल ( ०लि ); खिल्याः; पुरा केचिद्; पुराणाश्च for च ऋषयो );वैखानसप्रभृतयो (४) पाव( परा पारा ); का वायुभोजनाः,

(०४) (१)शान्तनुः राजेन्द्र for कौन्तेय ); (२) नराधिपः (४) प्राप्यः प्राप्तौ for प्राप्ताः);,

आर्चीकपर्वते तेपुस्तान्यजस्व युधिष्ठिर ॥ ४४ ॥[०१]

इह ते वै चरून्प्राश्नन्नृषयश्च विशाम्पते ।
यमुना चाक्षयस्रोता कृष्णश्चेह तपोरतः ॥ ४५ ॥[०२]

यमौ च भीमसेनश्च कृष्णा चामित्रकर्शन ।
सर्वे चात्र गमिष्यामस्त्वयैव सह पाण्डव ।[०३]
एतत्प्रस्रवणं पुण्यमिन्द्रस्य मनुजेश्व ॥ ४६ ॥[०४]

अत्र धाता च वरुणो मित्रश्च स्वर्गमागताः
यत्र धाता विधाता च वरुणश्चोर्ध्वमागताः ॥ ४७ ॥

* इह तेऽप्यवसन्राजन्क्षान्ताः परमधर्मिणः ।

मैत्राणामृजुबुद्धिनामयं गिरिवरः शुभः ॥ ४८ ॥[०५]

एषा सा यमुना राजन्महर्षिगणसेविता ।
नानायज्ञचिता राजन्पुण्या पापभयापहा ॥ ४९ ॥[०६]

अत्र राजा महेष्वासो मान्धातायजत स्वयम् ।

---

(०१) ( (१)नित्याश्रया (२) सहर्षिभिः for म ); (३)अर्चीकपर्वतौ तेषु; अर्चीकपर्वतश्रेष्ठ; आर्चीकपर्वते पुण्ये; आ for अ ); र्चीकपर्वते रम्ये; आर्ची ( अर्ची; आर्चि ); के पर्वतवरे (४) तान्नमस्य; मान्नमस्य; तान्नमस्व; स्थानमस्ति; ते यजन्ते ते युज्यन्ते for तान्यजस्व );,
(०२) (१)इह कृत्स्नं; इतरे वै for इह ते वै ); चरवः कार्याः; न वचः कार्याः; तरवः कार्याः; वै चरुः कार्यः; च तपः प्राशन्; वै चरव्याशाः; वै चरून्प्राशः for वै चरून्प्रा श्नन् ); (२) अ ( आ ); तिथेयाः ( आतिथ्यं च );आतिथेयः; तिथयश्च; त्रिदशाश्च ( स्थिताश्चैव ); for ऋषयश्चै ); (३)स्रोता for ०स्रोताः); (४) कृष्णा त्विह; चैव for चेह ); तपोरताः;तपोधनः ( ०नाः;०रः );,
(०३) (२)कर्षेण (४) त्वयैव सह पाण्डव,
(०४) (१)प्रश्रवणं मनुजेश्वर ( पुरुषर्षभ ) for मनुजा ); अत्र for यत्र );,
(०५) (१)निवसन्; ()प्यवसन् for न्यवसन् ); (२) क्षतः; ध्रुतौ for क्षान्ताः); काङ्क्षन्तः सिद्धिमुत्तमां काङ्क्षितः सिद्धिमुत्तमं; काङ्क्षन्तः सर्वा ( ०ह ); धर्मिणः (३) ऋद्धबुद्धीनाम्; मृद्दबुद्धीनाम् for ऋजु ); (४) शिवः for शुभः);,
(०६) (२)महर्षि for राजर्षि ); (२) नानायूप पुण्या for राजन् ); (४) सर्व for पुण्या );,

साहदेविश्च कौन्तेय सोमको ददतां वरः ।। ५० ।।[०१]

अस्मिन् तीर्थयात्रापर्वणि १००अध्याये ५०श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि शततमोऽध्यायः ।। १०० ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 101

# १०१. एकशततमोऽध्यायः

लोमशेन युधिष्ठिरं प्रति मान्धातृपदप्रवृत्तिनिमित्तकथनपूर्वकं मान्धातृचरित्रकीर्तनम् ।। १ ।। राज्ञो मान्धातुरुत्पत्तिः सङ्क्षेपतश्चरितवर्णनं च ।। २ ।।

युधिष्ठिरः

मान्धाता राजशार्दूलस्त्रिषु लोकेषु विश्रुतः ।
कथं जातो महाब्रह्मन्यौवनाश्वो नृपोत्तमः ।। १ ।। [02]

कथं चैनां परा काष्ठां प्राप्तवानमितद्युतिः ।[03]
यस्य लोकास्त्रयो वश्या विष्णोरिव महात्मनः ।। २ ।।

एतदिच्छाम्यहं श्रोतुं चरितं तस्य धीमतः ।
सत्यकीर्तेर्हि मान्धातुः कथ्यमानं त्वयानघ ।। ३ ।।

* सत्यकीर्तेर्हि मान्धातुः कथ्यमानं त्वयानघ ।

यथा मान्धातृशब्दश्च तस्य शक्रसमद्युतेः ।

---

(०१) (१)अत्रारामे महातेजाः (३) साहदेवि०; सह देवै ( इह देवि ); साहदैबिं विक्रान्तः राजेन्द्र for कौन्तेय ); (४) वदतां for द ); वरः,

(०२) (१)राजशार्दूल (३)महे ष्वासो; महान्ब्रह्मन्,

(०३) (४) युवनाश्व ( श्व ); न्; यु ( य ); वनाश्वो महीपतिः for नृपो ); चैनां; चैव; च तां for चैतां ); पदं for परां ); कष्टां; कीर्तिं; ख्यातिं for काष्ठां );,

**जन्म चाप्रतिवीर्यस्य कुशलो ह्यसि भाषितुम् ।। ४ ।।**[०१]

**लोमशः**

**शृणुष्वावहितो राजन्राज्ञस्तस्य महात्मनः ।**
**यथा मान्धातृशब्दो वै लोकेषु परिगीयते ।। ५ ।।**[०२]

**⁕ यथा चासौ समभवच्चरितं तस्य धीमतः ।**

इक्ष्वाकुवंशप्रभवो युवनाश्वो महीपतिः ।
**सोऽयजत्पृथिवीपालः क्रतुभिर्भूरिदक्षिणैः ।। ६ ।।**

अश्वमेधसहस्रं च प्राप्य धर्मभृतां वरः ।
**अन्यैश्च क्रतुभिर्मुख्यैरयजत्स्वाप्तदक्षिणैः ।। ७ ।।**[०३]

अनपत्यस्तु राजर्षिः स महात्मा महाव्रतः ।
**मन्त्रिष्वाधाय तद्राज्यं वननित्यो बभूव ह ।। ८ ।।**[०४]

शास्त्रदृष्टेन विधिना संयोज्यात्मानमात्मवान्।[०५]

**⁕ स कदाचिन्नृपो राजन्नुपवासेन दुःखितः ।**

**पिपासाशुष्कहृदयः प्रविवेशाश्रमं भृगोः ।। ९ ।।**[०६]

तामेव रात्रिं राजेन्द्र महात्मा भृगुनन्दनः ।
**इष्टिं चकार सौद्युम्नेः महर्षिः पुत्रकारणात् ।। १० ।।** [०७]

---

(०१) (१)पादं for शब्द ); स; वै for च ); (२) तुल्यः for तस्य ); क्रतुभिर्भूरिदक्षिणैः; लोकेषु परिगीयते,

(०२) (३)स for वै ); (४)लोकेस्मिन् परिकीर्त्यते तस्य शक्रसमद्युतेः,

(०३) (२)प्राप वर (३)अन्यैश्च विविधैर्यज्ञैर् (४) अजयत्साप्त०; मुख्यैश्चैवाप्त०; अवाप्तवर,

(०४) (१)स ( सु ); च for तु ); (२) अ०महीपतिः,सु for स ); महाव्रतः; धृतं for दृढ ); (४) वने for वन् );,

(०५) (२)आत्मवान् for आत्मना );,

(०६) (३)शुष्ककण्ठः सन्; पिपासुः शुष्कं ( खिन्न );,

(०७) (२)भृगुरप्यथ (३) सौद्युम्नो; ०भ्रीं; म्नैर्; म्नं (४) महर्षेः ,

सम्भृतो मन्त्रपूतेन वारिणा कलशो महान्
तत्रातिष्ठत राजेन्द्र पूर्वमेव समाहितः ।। ११ ।।

यत्प्राश्य प्रसवेत्तस्य पत्नी शक्रसमं सुतम्।(०१)
तद्वारि विधिवद्राजन्यस्मिन्नासीत्सुसंस्कृतम्।(02)
तं न्यस्य वेद्यां कलशं सुषुपुस्ते महर्षयः ।। १२ ।।

रात्रिजागरणाच्छ्रान्तान्सौद्युम्निः समतीत्य तान्।(०३)
शुष्ककण्ठः पिपासार्तः पानीयार्थी भृशं नृपः ।। १३ ।।(०४)

तं प्रविश्याश्रमं शान्तः पानीयं सोऽभ्ययाचत ।। १४ ।।(०५)

तस्य श्रान्तस्य शुष्केण कण्ठेन क्रोशतस्तदा ।
नाश्रौषीत्कश्चन तदा शकुनेरिव वाशतः ।। १५ ।।(०६)

ततस्तं कलशं दृष्ट्वा जलपूर्णं स पार्थिवः ।
अभ्यद्रवत वेगेन पीत्वा चाम्भो व्यवासृजत् ।। १६ ।।(०७)

स पीत्वा शीतलं तोयं पिपासार्तो महीपतिः ।
निर्वाणमगमद्धीमान्सुसुखी चाभवत्तदा ।। १७ ।।(०८)

---

(०१) (१)शक्रसमद्युतिं,
(०२) (१) रात्रौ पिहितं; वारि विहितं for वारि विधिवद् );,
(०३) (३)रात्रि(त्रि); जागरणं श्रान्तः रात्रिजागरणश्रान्तान्;०श्रान्तः; ०णाच्छ्रान्तान्;रात्रौ जावारणश्रान्ताः; रात्रौराजन्सुविश्रान्ताः; रात्रिजावारणाच्छ्रान्ताः (४)समतीतवान्; स तु पार्थिव; स च पार्थिव; समुपेत्य तान् for समतीत्य तान् ); युवनाश्वोभ्यतीत्य तान् सुषुपुः सा ( सं ) ; हिता नृप,
(०४) (१)ततो राजन् for पिपा ); (२) पानीयार्थं,
(०५) (३) सं; स for तं ); शान्तः for श्रान्तः );(४)पानीयं समः ( यमन्व ); याचत; वार्ययाचत पार्थिव,
(०६) (१) शुष्केण कण्ठेन (३) गिरं; ततः for तदा ); नाश्रौषन्मुनयो राजन्, (४)वासितं; वासतः; भाषतः; वाशतः; भाषितं for वाशितम् );,
(०७) (२)वारिपूर्णं; तोयं (४)जलं for पीत्वा ); परित्वा; चैनं; चाङ्गो; चापो for चाम्भो ); व्यपासृजत्; ()प्यवासं; ह्यवासृ०; ()भ्यवासृ,
(०८) (१)पीत्वा तु for स पीत्वा ); वशि for तोयं ); (३) परं निर्वाणमगमत् , (४)स सुखी; स सखी

ततस्ते प्रत्यबुध्यन्त मुनयः सतपोधनाः ।
**निस्तोयं तं च कलशं ददृशुः सर्व एव ते** ।। १८ ।।(०१)

कस्य कर्मेदमिति ते पर्यपृच्छन्समागताः ।
**युवनाश्वो ममेत्येवं सेत्यं समभिपद्यत** ।। १९ ।।(०२)

न युक्तमिति तं प्राह भगवान्भार्गवस्तदा ।
**सुतार्थं स्थापिता ह्यापस्तपसा चैव सम्भृताः** ।। २० ।।(०३)

मया ह्यत्राहितं ब्रह्म तप आस्थाय दारुणम् ।
**पुत्रार्थं तव राजर्षे महाबलपराक्रम** ।। २१ ।।(०४)

महाबलो महावीर्यस्तपोबलसमेधि(मन्वि)तः ।
**यः शक्रमपि वीर्येण गमयेद्यमसादनम्** ।। २२ ।।(०५)

अनेन विधिना राजन्मयैतदुपपादितम् ।
**अब्भक्षणं त्वया राजन्न युक्तं कृतमद्य वै** ।। २३ ।।(०६)

न त्वद्य शक्यमस्माभिरेतत्कर्तुमतोऽन्यथा ।
**नूनं दैवकृतं ह्येतद्यदेवं कृतवानसि** ।। २४ ।।(०७)

---

for सुसुखी ); सुखी चैवाभवत्तदा,

(०१) (२) अ०स्तु नराघिप, स नराधिपः; धिपं; ते ते नराधिप मुनयः सतपोधनाः (३) तत्र (च)कलशं; तत्र ददृशुः; कलशं तत्र for तं च कलशं ); (४) सर्व एव महामते,

(०२) (१)ते for च ); (२) समाहिताः (३) मम; (अ)हम् for मया );(ए)वं for (ए)व ); (४) सवं for सत्यं );,

(०३) (२)वै ( स ); भृगुम् for भार्गवस् ); (३) सुतार्थे; सुतीर्थं for सुतार्थं ); सम्भृता for स्थापिता ); च for हि ); (४) संयुताः for भृताः );,

(०४) (१)यत्रा for ह्यत्रा० ); (२) युक्ताय for आस्थाय ); केवलं for दारुणम् ); (३)अस्य for तव ); (४)क्रमः; क्रमं,

(०५) (१)महाबाहुर् कायो ( वीर्यो ); बाहो for महाबलो ); महायोगस्; कायस्; तपोवीर्यस् for महावीर्यस् ); (२) सुतो बल; तपोयोगं (३)अति for अपि );,

(०६) (३)अब्भक्षणात् आपः पीतास्त्वया राजन् (४) अन्यथैवोपपादितं ,

(०७) (१)शक्यं कर्तुं एवं for एतत् ); कर्म ततो for कर्तुमतो );(३)किं तु; किं नु for नूनं );चैव कृतं;

पिपासितेन याः पीता विधिमन्त्रपुरस्कृताः ।
आपस्त्वया महाराज मत्तपोवीर्यसम्भृताः ।। २५ ।।

ताभ्यस्त्वमात्मना पुत्रमीदृशं जनयिष्यसि।[०१]
विधास्यामो वयं तत्र तवेष्टि परमाद्भुताम् ।। २६ ।।

यथा शक्रसमं पुत्रं जनयिष्यसि वीर्यवान्।[०२]
* गर्भधारणजं वापि न खेदं समवाप्स्यसि।
गर्भधारणजं वापि न खेदं समवाप्स्यसि ।
* इति श्रुत्वा वचस्तस्य राजा त्विति तथाब्रवीत् ।
न च प्राणैर्महाराज वियोगस्ते भविष्यति ।। २७ ।।[०३]

ततो वर्षशते पूर्णे तस्य राज्ञो महात्मनः ।
वामं पार्श्वं विनिर्भिद्य सुतः सूर्य इव स्थितः ।। २८ ।।[०४]
निश्चक्राम महातेजा न च तं मृत्युराविशत् ।
युवनाश्वं नरपतिं तदद्भुतमिवाभवत् ।। २९ ।।
ततः शक्रो महातेजास्तं दिदृक्षुरुपागमत्।।
* ततो देवा महेन्द्रं तमपृच्छन्धास्यतीति किम्।
प्रदेशिनीं ततोऽस्यास्ये शक्रः समभिसन्दधे ।। ३० ।।[०५]
मामयं धास्यतीत्येवं भाषिते चैव वज्रिणा ।

---

कर्म; देव for दैवं );मन्ये for ह्येतद् ); (४) एव; एतत् for एवं );,
(०१) (१)यत् for याः); (३) महावीर्यः (४)मत्तपोवीर्यसंमताः; न युक्तं कृतमद्य वै ताभिस्; तेभ्यसूः तस्मात् for ताभ्यम् ); अति for एवं ); ईदृशं जनयिष्यसि,
(०२) (१)चात्र; तात for तत्र ); (३) ततः; यस्य; यस्त्वं; यदा for यथा );,
(०३) (१) ( तदा; तथा for न च ),
(०४) (३)वामपाश्च; वामं कुक्षिं (४) स्थितः for सुतः); सद्य for सूर्यं ); स्थितः for अ परः);,
(०५) (१)तस्य for ततः );,( कं; के for किम् );, ) कृतोस्यां; च तस्यां for ततोस्य० ); (४)शिशोः for शक्रः ); स्वामभिसन्दधात्; समभिसन्दधात्,

मान्धातेति च नामास्य चक्रुः सेन्द्रा दिवौकसः ।। ३१ ।।(०१)

प्रदेशिनीं शक्रदत्तामास्वाद्य स शिशुस्तदा ।
अवर्धत महातेजाः किष्कून्राजंस्त्रयोदश ।। ३२ ।।(०२)

वेदास्तं सधनुर्वेदा दिव्यान्यस्त्राणि चेश्वरम् ।
उपतस्थुर्महाराज ध्यातमात्रस्य सर्वशः ।। ३३ ।।(०३)

आजगवं नाम धनुः शराः शृङ्गोद्भवाश्च ये ।
अभेद्यं कवचं चैव सद्यस्तमुपशिश्रियुः ।। ३४ ।।(०४)

सोऽभिषिक्तो मघवता स्वयं शक्रेण भारत ।
धर्मेण व्यजयल्लोकांस्त्रीन्विष्णुरिव विक्रमैः ।। ३५ ।।(०५)

तस्याप्रतिहतं चक्रं प्रावर्तत महात्मनः ।
रत्नानि चैव राजर्षिं स्वयमेवोपतस्थिरे ।। ३६ ।।(०६)

तस्यैवं वसुसम्पूर्णा वसुधा वसुधाधिप ।
तेनेष्टं विविधैर्यज्ञैर्बहुभिः स्वाप्तदक्षिणैः ।। ३७ ।।(०७)

चितचैत्यो महातेजा धर्मान्प्राप्य च पुष्कलान् ।

---

(०१) (१) (ए)व (ए)वं (२)परिभाष्य स; भाषिते चैव; भाषितं चैव; परिष्वज्य च for परिभाष्टः स ); वज्रभृत् for वज्रिणा ); परितुष्ट इवाभवत्,

(०२) (२)आसाद्यस; प्रस्थाप्यस ( समासाद्य ); आस्वाद्यास्य for आस्वाद्य स ); (३)महातेजाः; महीपालः (४) किष्कूत्राजन्; णां स्म; शिशुनाशु; किष्कूणां तु for णां च ); किष्कूनथ चतुर्दश,

(०३) (१)सधनुर्वेदं; तु धनुर्वेदः (२)सर्वाण्य for दिव्यान्य ); (३)महात्मानं; महाराजं (४)ध्यातं मात्राणि; ध्यातमात्रस्य; ध्यानमात्रस्य; जातमात्रे च,

(०४) (१)चाजगवं for आज० ); आजगवं नाम धनुः (३) अभेद्य चैवं for चैव ); (४) उपशिश्रियुः; उपसंश्रयात्; समुपाश्रयन् for उपसंश्रयन् ); उपतस्थे नराधिप,

(०५) (१)भग० for मध० ); (३) अ०ण वाऽज; घ०ण वाऽऽर्ज, कर्मणा for धर्मेण ); (ए)वाजय ( अ ) पालय ); for व्यजय ); (४) च क्रमैः for वि );,

(०६) (२)प्रवर्तत (३) राज्यं चः सर्वाणि for राजर्षि );,

(०७) (१) (ए)षा; (ए)व for ( इ ) यं ); (३) बहुभिर् for विविधैर् );

शक्रस्यार्धासनं राजँल्लब्धवानमितद्युतिः ॥ ३८ ॥[०१]

एकाहात्पृथिवी तेन धर्मनित्येन धीमता ।

विजिता शासनादेव सरत्नाकरपत्तना ॥ ३९ ॥[०२]

तस्य चैत्यैर्महाराज क्रतूनां दक्षिणावताम् ।

चतुरन्ता मही व्याप्ता नासीत्किञ्चिदनावृतम् ॥ ४० ॥[०३]

तेन पद्मसहस्राणि गवां दश महात्मना ।

ब्राह्मणानां महाराज दत्तानीति प्रचक्षते ॥ ४१ ॥[०४]

तेन द्वादशवार्षिक्यामनावृष्ट्यां महात्मना ।

वृष्टं सस्यविवृद्ध्यर्थं मिषतो वज्रपाणिनः ॥ ४२ ॥[०५]

तेन सोमकुलोत्पन्नो गान्धाराधिपतिर्महान् ।

गर्जन्निव महामेघः प्रमथ्य निहतः शरैः ॥ ४३ ॥[०६]

प्रजाश्चतुर्विधास्तेन त्राता राजन्कृतात्मना ।

तेनात्मतपसा लोकास्तापिताश्चातितेजसा ॥ ४४ ॥[०७]

---

(०१) (१)चितचित्यो; कृतकृत्यो ( चिताश्चित्यो ); चैतनित्यो; चित्रचित्यो; विनिवृत्तो for चित ); (२) सु; (ए)वः स for च० ); धर्मान्प्राप्य च पुष्कलान् (३)शक्रस्य शासनं; शक्रस्या राधनं चैव; राजा for राजन् ); (४)प्राप्त for लब्ध );,

(०२) (१)एकाहात् for हा ); एकाहेन मही तेन (२) वै तदा for धीमता ); वीर्येणामितबुद्धिना (३) विजिता for निर्जिता ); राजन्; तेन; तस्य for एव ); (४) पट्टना; सवनाकरपत्तना; स्थिताः सर्वे महीक्षितः,

(०३) (१)चैत्यैर्; चित्रैर् for चित्यैर् ); ब्राह्मणेभ्यो महाराज (३)व्याप्ता मही महाराज (४) काचिद् for किञ्चिद् ); अनामयं; असंवृता ( तं ); अनावृता for अनावृतम् );,

(०४) (१)ततः for तेन ); (अ)र्बुद for पद्म); (३) ब्राह्मणानां,

(०५) (२)अनावृष्टौ नराधिप for महा० ); (३) वृष्टथं ०ष्टि for ष्टं ); वृष्टि सत्य समृध्यर्थं; वृष्टि समाधिवृ वृष्टिसख्याभिवृ०; इष्टं च सस्यवृ; वृष्टं सस्य ( सर्व ); समृ० (४) वृत्रवैरिणः for वज्रं );,

(०६) (१)तेनासौ ( न वै ); तुमुले युद्धे (२) गां ( गं ); धर्वाधि० (४)निशितैः for निहतः );,

(०७) (१)चापि for तेन ); (२) कृताः; त्राताः for जिताः); तेन for राजन् ); कृतात्मना for महां

तस्यैतद्देवयजनं स्थानमादित्यवर्चसः ।
पश्य पुण्यतमे देशे कुरुक्षेत्रस्य मध्यतः ।। ४५ ।।(०१)

तथा त्वमपि राजेन्द्र मान्धातेव महीपतिः ।
धर्मं कृत्वा महीं रक्षन्स्वर्गलोकमवाप्स्यसि ।। ४६ ।।

✻ तथा त्वमपि राजेन्द्र मान्धातेव महीपतिः ।
धर्मं कृत्वा महीं रक्षच्छर्गलोकमवाप्स्यसि ।।

एतत्ते सर्वमाख्यातं मान्धातुश्चरितं महत् ।
जन्म चाग्र्यं महीपाल यन्मां त्वं परिपृच्छसि ।। ४७ ।।

वैशम्पायनः

एवमुक्तः स कौन्तेयो लोमशेन महर्षिणा ।
पप्रच्छानन्तरं भूयः सोमकं प्रति भारत ।। ४८ ।।

✻ वैशम्पायन उवाच ।
✻ एवमुक्तः स कौन्तेयो लोमशेन महर्षिणा ।
✻ पप्रच्छानन्तरं भूयः सोमकं प्रति भारत ।

अस्मिन् तीर्थयात्रापर्वणि १०१अध्याये ४८श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि एकशततमोऽध्यायः ।। १०१ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 102

---

); पालिता सुमहात्मना (३)तेन स्म तपसा; स्वेनापि तपसा; तेनार्थ; स्वेनाति०; तेनार्ध; तेनात्य (४) तापि ताश्_for स्थापिताश्_); च महौजसा; चामितौजसा; चातितेजसा; चात्मतेजसा,

(०१) (२)आदित्यतेजसः ( सं ); (३)यस्य; तस्य; पुण्यं for पश्य० );पुण्यतमा देशाः (४)मध्यगाः; धीमतः,

# १०२. व्यधिकशततमोऽध्यायः

सोमकनामकेन राज्ञा भार्याशतोद्वाहे अपि ज्येष्ठायामेव जन्तुनामकैकापत्यजननम् ।। १ ।। पिपीलिकादष्टसुतदुःखदर्शननिर्विण्णेन तेन राज्ञा ऋत्विजं प्रति बहुपुत्रोत्पादनोपायप्रश्नः ।। २ ।। ऋत्विजा राजानं प्रति जन्तोः पशूकरणेन होमे तद्वपाघ्राणनेन भार्याशते पुत्रशतजननोक्तिः ।। ३ ।। ऋत्विक्चोदनया सोमकेन राज्ञा जन्तुनामकपुत्रवपाया होमे तद्गन्धाघ्राणनेन तद्भर्याशते पुत्रशतोत्पत्तिः ।। ४ ।। लोकान्तरं गतेन सोमकेन ऋत्विजा सह तद्भोग्यस्वपुत्र हननजनारकीयदुःखानुभवपूर्वकं तेन सहैव स्वीयसुकृत-फलोपभोगः ।। ५ ।।

युधिष्ठिरः

कथवीर्यः स राजाभूत्सोमको वदतां वर ।
कर्माण्यस्य प्रभावं च श्रोतुमिच्छामि तत्त्वतः ।। १ ।।(०१)

लोमशः

युधिष्ठिरासीन्नृपतिः सोमको नाम धार्मिकः ।
तस्य भार्याशतं राजन्सदृशीनामभूत्तदा ।। २ ।।

स वै यत्नेन महता तासु पुत्रं महीपतिः ।
कश्चिन्नासादयामास कालेन महता ह्यपि ।। ३ ।।(०२)

कदाचित्तस्य वृद्धस्य घटमानस्य यत्नतः ।
जन्तुः नाम सुतस्तस्मिन्स्त्रीशते समजायत ।। ४ ।।(०३)

तं जातं मातरः सर्वाः परिवार्य समासते ।
सततं पृष्टतः कृत्वा कामभोगान्विशाम्पते ।। ५ ।।(०४)

* ममायमिति मन्वाना मनोभिः पुत्रमौरसम् ।

---

(०१) (२)ददतां for व ); वरः for वर );,

(०२) (१)किश्चिन् कष्टान् for कश्चिन् ); (४)तयोः; तथा; त्वपि (अ)पि च; ह्यपि for अपि );,

(०३) (३) अ०सकुतोराजन्; घ०सुतस्तस्मिन् स्त्रीशते समजायत, (४)ज्येष्ठायां for स्त्रीशते );,

(०४) (२) (उ)वपतस्थिरे समासत; समाधिरे; समासिरे (३) सापत्नं; सापत्न्यं for सततं ),

ततः पिपीलिका जन्तुं कदाचिददशत्स्फिचि ।
**स दष्टो व्यनदन्नादं तेन दुःखेन बालकः ।। ६ ।।**(०१)

ततस्ता मातरः सर्वाः प्राक्रोशन्भृशदुःखिताः ।
**प्रवार्य जन्तुं सहसा स शब्दस्तुमुलोऽभवत् ।। ७ ।।**(०२)

तमार्तनादं सहसा शुश्राव स महीपतिः ।
**अमात्यपर्षदो मध्ये उपविष्टः सहर्त्विजा ।। ८ ।।**(०३)

ततः प्रस्थापयामास किमेतदिति पार्थिवः ।
**तस्मै क्षत्ता यथावृत्तमाचचक्षे सुतं प्रति ।। ९ ।।**(०४)

त्वरमाणः स चोत्थाय सोमकः सह मन्त्रिभिः ।
**प्रविश्यान्तःपुरं पुत्रमाश्वासयदरिन्दमः ।। १० ।।**(०५)

सान्त्वयित्वा तु तं पुत्रं निष्क्रम्यान्तः पुरान्नृपः ।
**ऋत्विजा सहितो राजन्सहामात्य उपाविशत् ।। ११ ।।**(०६)

**सोमकः**

**धिगस्त्विहैकपुत्रत्वमपुत्रत्वं वरं भवेत् ।**

---

(०१) (१)पिपीलि ( ल ); को (२) स्फिजे; चिं; चि जौ for जि ); कदाचिद्दंशत त्वचि (३)व्यानदद्; ह्यरुदद्; ह्यनदद्; ()भ्यनदत् नादं for राजन् );,

(०२) (१)मातरस्तास्ततः सर्वाः (३)प्रवार्य; परीतो for परिवार्य ); बालं तं;सहसा for सहिताः ); परिवार्य तु ( च ); तं बालं; परिवार्य तं सहिताः (४) तुमलः,

(०३) (१)शब्दं for नादं ); तुमुलं for सहसा ); (३) अमात्यपर्षदो; आगत्य परिषन्मध्य for मध्ये ); (४)ह्युपविष्टः सहर्द्दिवजः; जाः; सऋत्विजः,

(०४) (३) क०ख०ग०यथावृत्तमाचचक्षे,(४)च तं सुतं for सुतं प्रति );,

(०५) (१)स सम्भ्रमात् for त्वर० ); सहोत्थाय for स चो० ); (३) तत्र for पुत्रम् ); (४)अरिन्दमः अरिन्दमाः,

(०६) (२)नृप; ततः for नृपः ); (३) ऋत्विजः; ऋत्विजा ( ऋषिभिः ); ऋत्विग्भिः for जैः); राजा; ततः for राजन् ); ऋत्विजैः (४) सभायां ( सामात्यः ); समुपाविशत,

नित्यातुरत्वाद्भूतानां शोक एवैकपुत्रता ।। १२ ।।(०१)

इदं भार्याशतं ब्रह्मन्परीक्ष्य सदृशं प्रभो ।
पुत्रार्थिना मया वोढं न तासां विद्यते प्रजा ।। १३ ।।(०२)

एकः कथञ्चिदुत्पन्नः पुत्रो जन्तुरयं मम ।
यतमानासु सर्वासु किं तु दुःखमतः परम् ।। १४ ।।(०३)

वयश्च समतीतं मे सभार्यस्य द्विजोत्तम ।
आसां प्राणाः समायत्ता मम चात्रैकपुत्रके ।। १५ ।।(०४)

स्यात्तु कर्म तथा युक्तं येन पुत्रशतं भवेत् ।
महता लघुना वापि कर्मणा दुष्करेण वा ।। १६ ।।(०५)

ऋत्विक्

अस्ति चैतादृशं कर्म येन पुत्रशतं भवेत् ।
यदि शक्नोषि तत्कर्तुमथ वक्ष्यामि सोमक ।। १७ ।।(०६)

* ०क्रियतामविचारेण ततः प्राप्स्यसि पुत्रकान् ।

सोमकः

कार्यं वा यदि वाकार्यं येन पुत्रशतं भवेत् ।
कृतमेवेति तद्विद्धि भगवान्प्रब्रवीतु मे ।। १८ ।।(०७)

---

(०१) लोमश उ; राजा (१) धिग्धिगस्तु; धिगस्तु हि for धिगस्त्विह ); (ए) कपुत्र त्वाद् (२) अपुत्रं वै for अपुत्रत्वं ); (३) क०ख०ग०नित्यातुरत्वान्मर्त्यनां;, घनित्यत्वाच्च मर्त्यानां,नित्यान्तरत्वाद्; अनित्यत्वाच्च मर्त्यानां for भूता ); (४) खयं पादोऽनन्तरश्च नस्तः,

(०२) (२)सदृशं; (उ)परचिति मया for प्रभो ); सदृशीनां यतव्रत ( तः; तं ); अनपत्योचितं मया (३) होढुं; होहं; चाथ; चोढं; वोढा for वोढं ); (४)तासां for चा );,

(०३) (३)यतमानासु for नस्य ); (४) दुःखतरं नृप; ०तरं ( करं ); ततः,

(०४) (२)द्विजोत्तमाः; द्विजर्षभ; नरोत्तम (४)चैव; अ स्मिन् for चात्र ),

(०५) (१)स्यातु; तस्मात् for स्यात्तु ); समा; कथं; क्रिया for तथा );,

(०६) (१) क०ग०कृतमेवेतितद्विद्धि भगवान्प्रभ्रवीतु मे ।,चैतादृशं; चेत्ता० for वै ता );,

(०७) (३) (इ)ह (इ)ति for हि ); कृतमेतद्धि भगवन् (४) तद्भवान्; भगवन् for भगवान् );प्रब्रवीहि

ऋत्विक्

यजस्व जन्तुना राजंस्त्वं मया वितते क्रतौ ।
ततः पुत्रशतं श्रीमद्भविष्यत्यचिरेण ते ।। १९ ।।[०१]

वपायां हूयमानायां धूममाघ्राय मातरः ।
ततस्ताः सुमहावीर्याञ्जनयिष्यन्ति ते सुतान् ।। २० ।।[०२]

तस्यामेव तु ते जन्तुर्भविता पुनरात्मजः ।
उत्तरे चास्य सौवर्णं लक्ष्म पार्श्वे भविष्यति ।। २१ ।।[०३]

सोमकः

ब्रह्मन्यद्यद्यथा कार्यं तत्कुरुष्व तथा तथा ।
पुत्रकामतया सर्वं करिष्यामि वचस्तव ।। २२ ।।[०४]

लोमशः

ततः स याजयामास सोमकं तेन जन्तुना ।
मातरस्तु बलात्पुत्रमपाकर्षुः कृपान्विताः ।। २३ ।।

हा हताः स्मेति वाशन्त्यस्तीव्रशोकसमाहताः ।
* स सोमकवचः श्रुत्वा ब्राह्मणो वेदपारगः ।।[०५]

---

तदि दानीं ब्रवीहि मे,
(०१) (२)विहिते; च चिते for वितते ); (३) राजन्; धीमन् for श्रीमद् ); (४) उत्तिष्ठेद for भविष्यत्य ); वै for ते );,
(०२) (१)वसायां (२) आघ्रन्तु; आघ्रान्तु for आघ्राय ); (३) तान् for ताः); सुमहावीरान्; सुमहावीर्या (४)तान् for ते ); भविष्यन्ति सुताः प्रभो,
(०३) (२)जीविता स नरात्मजः (३) लक्षणं for उत्तरे ); (४)सव्ये; वामे; मध्ये; वाम for लक्ष्य );,
(०४) (१)अद्य यथा; यच्च यथाः यथा यथा for यद्यद्यथा ); कामं; कर्म for कार्यं ); (२) तत्कुरुष्व for तत्तकरु ); यथा for तथा ); तत्कर्तव्यं यथाक्रमं (३) कामनया (४) चिकीर्षामि for करि );,
(०५) (१)स याजयामास तदा ( ततः); (३) तदा for बलात् ); (४)समाकर्षन्; अपाकर्षन्;०कार्षुः for कर्षुः); हतास्मि for हताः स्म ); (इ)ति वाचन्त्यः; इ ति वासन्त्यः; अ भिभाषन्त्यः (इ) ति वाश्यन्त for इति वाशन्त्यः); तीव्रकोप समाहताः; समाहिताः तीव्रशोकाः सुविह्वलाः,

रुदन्त्यः करुणं वापि गृहीत्वा दक्षिणे करे ।
सव्ये पाणौ गृहीत्वा तु याजकोऽपि स्म कर्षति ।।२४ ।।(०१)

कुररीणामिवार्तानां समाकृष्य तु तं सुतम् ।
विशस्य चैनं विधिवद्वपामस्य जुहाव सः ।। २५ ।।(०२)

वपायां हूयमानायां गन्धमाघ्राय मातरः
आर्ता निपेतुः सहसा पृथिव्यां कुरुनन्दन ।। २६ ।।(०३)

सर्वाश्च गर्भानलभंस्ततस्ताः परमाङ्गनाः ।। २७ ।।

ततो दशसु मासेषु सोमकस्य विशाम्पते ।
जज्ञे पुत्रशतं पूर्णं तासु सर्वासु भारत ।। २८ ।।(०४)

जन्तुर्ज्येष्ठः समभवज्जनित्र्यामेव पार्थिव ।
स तासामिष्ट एवासीन्न तथा ते निजाः सुताः ।। २९ ।।(०५)

तच्च लक्षणमस्यासीत्सौवर्णं पार्श्र्व उत्तरे ।
तस्मिन्पुत्रशते चाग्र्यः स बभूव गुणैरपि ।। ३० ।।(०६)

⁕ राजा पृथिव्यां विख्यातः सदा धर्मपरायणः ।

ततः स कालं अगमत्सोमकस्य गुरुः परम् ।

---

(०१) (१)प्रकर्षति पर्यकर्षन्; पर्यपृच्छत् कर्षयन्ति स्म for प्रत्यकर्षन् ); रुदन्त्यः करुणं वा ( चा ); पि पि (४) ()प्रकर्षति; व्यपकर्षत; ()पि व्यकर्षत; ()पि व्यकर्षयत् for पि स्म कर्षति );,
(०२) (२)अपाकर्षत्; समाकृष्य for अपाकृष्य ); सुतं तदा; ततः सुतं for तु तं सुतम् ); (३)याजकशू; याजकैशू for विशस्य ); चैव; चैतं for चैनं ); विधिवद् for ०ना );,
(०३) (१)वसां for वपा० ); जन्तोर्वपायां हूयन्त्यां (२) धूमम् for गन्धम् ); आदाय for आघ्राय ); परमाङ्गनाः for पार्थि० );(३) ख०इदवर्धनास्ति, घ०घर्धपश्चकं नास्ति,
(०४) (१) क०ख०ग०त् कुरु.,
(०५) (१)ज्येष्ठः समभवत् (२) जनन्यां चैव for जनिं ); पार्थिव for भारत ); (४) ते मे for ( अ ) न्ये );,
(०६) (१)तस्य for तच्च ); एव; अपि for अस्य ); तदेव चास्य सौवर्णं (२)लक्षणं for सौवर्णं ); (४) इति; अपि; वृतः for युतः);,

अन्वक्षमेव पश्चात्तु सोमकोप्यगमत्परम् ।। ३१ ।।(०१)

लक्षालङ्कारः-ततः स कालमगमत् इत्यत्र कालं मृत्युम् ।

अथ तं नरके घोरे पच्यमानं ददर्श सः ।

तमपृच्छत्किमर्थं त्वं नरके पच्यसे द्विज ।(०२)
तमब्रवीद्गुरुः सोऽथ पच्यमानोऽग्निना भृशम् ।। ३२ ।।

गुरुः

त्वं मया याजितो राजंस्तस्येदं कर्मणः फलम्।

लोमशः

एतच्छ्रुत्वा स राजर्षिर्धर्मराजमथाब्रवीत् ।। ३३ ।।

सोमकः

अहमत्र प्रवेक्ष्यामि मुच्यतां मम याजकः ।
मत्कृते हि महाभागः पच्यते नरकाग्निना ।। ३४ ।।(०३)

सोऽहमात्मानमाधास्ये नरकान्मुच्यतां गुरुः ।। ३५ ।।
* सोऽहमात्मानमाधास्ये नरके मुच्यतां गुरुः ।

धर्मः

नान्यः कर्तुः फलं राजन्नुपभुङ्क्ते कदाचन ।
इमानि तव दृश्यन्ते फलानि वदतां वर ।। ३६ ।।(०४)

---

(०१) (१)कालम् for लोकम् ); अकरोत् for अगमत् ); (२) भृगुः; गुरून् for गुरुः ); नृप for परम् ); (३) अनुक्रमेण पश्चात्तु; अन्वक्षमेव पश्चातु,
(०२) (१)नरके पच्यमानं तं ( तु ); अथापश्यत तं राजा (३) पश्य for पच्य ); स ददर्श पुरोहितं; पच्यन्तं नरके गुरुं; ददर्श स तु सोमकः ( स्वपुरोहितं ); (३) कथं तु; कथं नु for किमर्थं ); सोमकस्तमुवाचेदं; अपृच्छच्च कथं त्वं वै (४) किमर्थं पच्यसे; पच्यसे नरके पच्यसे द्विज ,
(०३)(२)धर्मराजमथाब्रवीत् (३) पाच ( ०त ); यस्वेह मां देव,
(०४) यमः for धर्मः );

* यदि तेऽस्य फलं राजचुपभोज्यं कथञ्चन ।।[०१]

दुष्कृतं चास्य विन्देथा मुच्यते त्वद्गुरुर्यथा ।

सोमकः

पुण्यान्न कामये लोकानृतेऽहं ब्रह्मवादिनम् ।
इच्छाम्यहमनेनैव सह वस्तुं सुरालये ।। ३७ ।।[०२]

नरके वा धर्मराज कर्मणास्य समो ह्यहम् ।
पुण्यापुण्यफलं देव सममस्त्वावयोरिदम् ।। ३८ ।।

धर्मराजः

यद्येवमीप्सितं राजन्भुङ्ष्वास्य सहितः फलम् ।
तुल्यकालं सहानेन पश्चात्प्राप्स्यसि सङ्गतम्(सद्गतिम्)।[०३]

लोमशः

स चकार तथा सर्वं राजा राजीवलोचनः ।। ३९ ।।

* क्षीणपापश्च तस्मात्स विमुक्तो गुरुणा सह ।

लेभे कामाञ्शुभान्राजन्कर्मणा निर्जितान्स्वयम् ।
सह तेनैव विप्रेण गुरुणा स गुरुप्रियः ।। ४० ।।[०४]

* क्षीणपापश्च तस्मात्स विमुक्तो गुरुणा सह ।[०५]

---

(०१)(३)दिव्यानि for इमा ); (४)रुदतां वर; वदतां वर; सुबहूनि च वसम स्त्वावयोरिदं,

(०२) (१)कामयेल् (२) तमृते; ऋते तं; ये विना for ऋतेऽहं ); (३) (इ) ह for (ए)व ); वस्तुं विप्रेण वै सह,

(०३) (१)यमः for धर्मः ); (२)भुक्त्वास्य ( भुक्तस्य ); भुङ्ष्वाद्य; भुङ्ष्वार्य for भुङ्ष्वास्य ); (३) अनेनेह for सहा नेन ); (४)यास्यसि for प्राप्स्यसि ); तद्गतिं for सद्गतिम् );,

(०४)(२)राजा धर्मेण भाषितं, (३)यान् for स्वान् ); लेभे लोकाञ्शुभा ( कांस्तु ता ); न्राजन्; लेभे कामाञ्छुभात्राजन् (४) निर्जितान्त्ययं; स्वेन निर्जितान् तेन एव गुरुणा गुरुवत्सलः; गुरुणा सोमको नृपः

(०५) ( पश्चत्स for तस्मा );,)

एष तस्याश्रमः पुण्यो य एषोऽग्रे विराजते ।
क्षान्त उष्यात्र षड्रात्रं प्राप्नोति सुगतिं नरः ॥ ४१ ॥(०१)

एतस्मिन्नपि राजेन्द्र वत्स्यामो विगतज्वराः ।
षड्रात्रं नियतात्मानः सज्जीभव कुरूद्वह ॥ ४२ ॥(०२)

अस्मिन् तीर्थयात्रापर्वणि१०२अध्याये ४२श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि ० द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 103

# १०३. त्र्यधिकशततमोऽध्यायः

**लोमशेन युधिष्ठिरं प्रति नानातीर्थमहिमानुवर्णनम् ॥ कुरुक्षेत्रद्वारभूतस्य प्लक्षावतरणनाम्नो यमुनातीर्थस्य सरस्वतीतीर्थस्य च माहात्म्यम् ॥**

लोमशः

अस्मिन्किल स्वयं राजन्निष्टवान्वै प्रजापतिः ।
सत्रमिष्टा(ष्टी)कृतं नाम पुरा वर्षसहस्रिकम् ॥ १ ॥(०३)

अम्बरीषश्च नाभाग इष्टवान्यमुनामनु॥
यज्ञैश्च तपसा चैव परां सिद्धिमवाप सः ॥ २ ॥(०४)

---

(०१)(१) अ०तस्यायमाश्रमः पुण्यः पुण्यकृद्भिर्निषेवितः, (२)धर्मस्याग्र्यो; य एषोत्र for य एषोऽग्रे ); प्रकाशते for विरा० ); य एष दिवि रोचते (३)उषित्वा तत्र; क्षान्तश्चेष्याथ; ०श्चेष्य च; ०श्चोष्यात्र for क्षान्त उष्यात्र );(४)प्राप्नोति परमां गतिं; आप्नुयात्स्वर्गतिं नरः; प्राप्नोति सुकृतिर्नरः,

(०२) (३)नियताहारः; संयतात्मानः षड्रात्रनियताहाराः

(०३) (३) इष्ट ( ०ष्टि ष्टि); कृतं (४) वर्षसहस्रकं,

(०४) (२)इष्टवन्तौ महाबलौ (४)ह for सः );,

* तेषामिष्टानि लिङ्गानि दृश्यन्तेऽद्यापि भारत ।
येषां लिङ्गैर्महाराज संस्तीर्णैव च भूरियम् ।
* स्वयं प्रकाशबहवो वृक्षाश्चैते विशां पते ।
देवाश्च ऋषयश्चैव समागच्छन्ति नित्यशः ।
* तप्तं सायं तथा प्रातर्दृश्यन्ते ते हुताशनाः ।
इहाप्लुतानां कौन्तेय सद्यः पाप्मा विहन्यते ।
* कुरुश्रेष्ठाभिधेकं वै तस्मात्कुरु सहानुजः ।
ततो नत्वासुताङ्गस्त्वं कौशिकीमनुयास्यसि ।
* विश्वमित्रेण वै तत्र तपस्तप्तमनुत्तमम् ।
ततस्तत्र समाप्लुत्य गात्राणि सगणो नृपः ।
* जगाम कौशिकीं पुण्यां रम्यां स्फीतजलां नदीम् ।

लोमशः

* एषैव च नदी पुण्या कौशिकी नाम भारत ।
विश्वामित्राश्रमो रम्य एष तत्र प्रकाशते ।
आश्रमश्चैव पुण्याख्यः कश्यपस्य महात्मनः ।(०१)

देशश्च नाहुषस्यायं यज्वनः पुण्यकर्मणः ।
यत्रेष्ट्वा दश पद्मानि सदस्येभ्योविमृ(ऽभिसृ)ष्टवान्।। २ ।। (०२)

सार्वभौमस्य कौन्तेय ययातेरमितौजसः ।
स्पर्धमानस्य शक्रेण तस्येदं यज्ञवास्त्विह ।। ४ ।।(०३)

---

(०१) भारत for नित्यश) एष तात for एव तत्र),

(०२) (१)देवश्च नहुषश्चास्यां; देशश्च ना ( न ); हुषस्यायं, (२)यज्वनः पुण्यकर्मणः (३) अत्रेष्टा दश;अत्रेष्ट्वा दश; अत्र द्वादश (४) ब्राह्मणेभ्यो for सद ); ()भि for नि );,

(०३) (२)अमितद्युतेः for अमितौ० ); (४) यस्येदं; तस्येदं for पत्स्ये ); यज्ञियं बहु for यज्ञवा० ); पश्येमां यज्ञसंस्थितिं,

पश्य नानाविधाकारैरग्निभिर्निचितां महीम् ।
मज्जन्तीमिव चाक्रान्तां ययातेर्यज्ञकर्मभिः ॥ ५ ॥(०१)

एषा शम्येकपत्रा या सरकं चैतदुत्तमम् ।
पश्य रामह्रदानेतान्पश्य नारायणाश्रमम् ॥ ६ ॥(०२)

एतच्चर्चीकपुत्रस्य योगैर्विचरतो महीम् ।
प्रसर्पणं महीपाल रौप्यायाममितौजसः ॥ ७ ॥(०३)

अत्रानुवंश्या पठतः शृणु मे कुरुनन्दन ।
उलूखलैराभरणैः पिशाची यदभाषत ॥ ८ ॥(०४)

लक्षालङ्कारः- अत्रानुवंश्या इत्यत्र आनुवंश्याः वंशोचिताः कथाः । उलूखलैराभरणै इत्यत्र पिशाचीत्वात् कण्ठलग्नैरुलूखलाख्यैराभखरणैः ।

* अत्र स्थास्यन्ति ये नितं तेषं विन्घो भवेदिति (05)

युगन्धरे दधि प्राश्य उषित्वा चाच्युतस्थले ।
तद्वत्भूतलये स्नात्वा सपुत्रा वस्तुमर्हसि ॥ ९ ॥(०६)

एकरात्रमुषित्वेह द्वितीयं यदि वत्स्यसि ।
एतद्वै ते दिवावृत्तं रात्रौ वृत्तमतोऽन्यथा ॥ १० ॥(०७)

लक्षालङ्कारः- एतद्धि मे दिवावृत्तम् इत्यत्र मे दिवावृत्तम् एतन् क्षमारूपम् । रात्रौ चेद्वत्स्यसि

(०१) (२)विचितां for नि ); (३)निमज्जन्तीमिवाक्रान्ता (४)पुण्य; नृप; तूप for यज्ञ );,
(०२) (१)शम्येकपत्रा या; समीषणा यक्षी; सा चैकपत्रा सा; शम्येकपन्नाढ्या;०पत्रास्याः (२) शरदं; सरकं ( शरणं ); दारवं; शकटं ( शरकं ); चेदम्; वनम् for चैतद् ); (३) यत्र देवाः सगन्धर्वाः,
(०३) (१)अर्चीक०; चर्चीक; चाचर्कि० (२) सुयज्ञैरर्चितां मही (३) प्र for अप ); महाराज for मही ); अपसर्पणमुर्वीश (४)सै ( रो ); च्यायम्; रौप्यायम्; व्या ख्यातम्; विख्यातम् प्रख्यातम् for रौप्यायाम् );
(०४) (१)अनुवंशान् गदतः; पठती; नृपते for पठतः);,
(०५) (१) भविष्यति for भवेदिति );,
(०६) (१)च विश्रुत्यां; पयः प्राश्य; पयः पीत्वा for दधि प्राश्य ); (३) एतद् for तद्वद् ); भूत; भूति० (४) अर्हसि for इच्छसि ); पुत्रानाप्स्यसि सुव्रतान् ,
(०७) (१)च द्रक्ष्यसि for अतोन्यथा ); (२)द्वितीयां वत्स्यसे द्वितीयं दिवसं यदि (३) तु for वै );तद्;

तर्हि वृत्तम् अतः क्षमातः अन्यथा क्रोधरूपं इति राज्ञो वचनम् ।

* एवमेतद्विदित्वा त्वं रात्रिं वस महामते ।

अद्य चात्र निवत्स्यामः क्षपां भरतसत्तम ।
द्वारमेतत्तु कौन्तेय कुरुक्षेत्रस्य भारत ।। ११ ।।(०१)

अत्रैव नाहुषो राजा राजन्क्रतुभिरिष्टवान् ।
ययातिर्बहुरत्नौघैर्यत्रेन्द्रो मुदमभ्यगात् ।। १२ ।।(०२)

एतत्प्लक्षावतरणं यमुनातीर्थमुत्तमम् ।
एतद्वै नाकपृष्ठस्य द्वारमाहुर्मनीषिणः ।। १३ ।।(०३)

अत्र सारस्वतैर्यज्ञैरीजानाः परमर्षयः ।
यूपोलूखलिनस्तात गच्छन्त्यवभृथप्लवम् ।। १४ ।।(०४)

लक्षालङ्कारः-यूपोलूखलिनस्तत्र इत्यत्र यज्ञसाधनयूपेन यज्ञसाधनसौवर्णोलूखलेन च सहिताः युपोलूखलिनः ।

अत्र वै भरतो राजा राजन्क्रतुभिरिष्टवान् ।
* हयमेधेन यज्ञेन मेध्यमश्वमवासृजत् ।
असकृत्कृष्णसारङ्गं धर्मेणाप्य च मेदिनीम् ।(०५)

---

मे० for ते ); नृत्तं for वृत्तं ); (४)रात्रि for रात्रौ ); नृत्तम् for वृत्तम् );,

(०१) (१) क०ग०घ०अत्रद्याहो निवत्स्यामः, अत्राद्येह; अद्य चात्र; अद्यात्र च; अन्यत्रैव; अत्र ह्येकां; अन्यत्राहो;अत्राष्यहो for अत्राद्याहो ); (२) च भरतर्षभ for भरत ); भयाच्चात्र नृपोत्तम (३)तु for हि ); (४) विश्रुतं for भारत );,

(०२) (१)अत्रापि; अत्रैवं नहुषो; नाघुषो (२) भूरि; बहु for राजन् ); (३)रत्नाद्यैद्; रत्नाश्वैर् ०रत्नौघैर् (४) पदम्; मदम् for मुदम् );,

(०३) (२)यमुनातीरम् उत्तमं for उच्यते );,

(०४) (१)यत्र for अत्र ); यज्ञे राजानः for यज्ञैरी ); (३)०स्वलिकासू; स्वलितम् for ०स्वलिनस् ); स्नातुं; तत्र for तात ); (४)अ वभृथप्लवं,

(०५) (१)तत्रैव for अ ); वै० for (ए)व );राजन्क्रतुभिरिष्टवान् । (३)क्लृप्तभाराङ्गां; कृष्णसारङ्गाद्; सारङ्गान् (४) कर्मणाप्य स; कर्मणापि स; कर्मण्मवाप्यः धर्मेण प्राप्य; धर्मेणाप्य च,

अत्रैव पुरुषव्याघ्र मरुत्तः सत्रमुत्तमम् ।। १५ ।।[०१]

प्राप चैवर्षिमुख्येन संवर्तेनाभिपालितः ।। १६ ।।[०२]

अत्रोपस्पृश्य राजेन्द्र सर्वाल्लोकान्प्रपश्यति ।

पूयते दुष्कृताच्चैव अत्रापि समुपस्पृश ।। १७ ।।[०३]

वैशम्पायनः

तत्र सभ्रातृकः स्नात्वा स्तूयमानो महर्षिभिः ।

लोमशं पाण्डवश्रेष्ठ इदं वचनमब्रवीत् ।। १८ ।।[०४]

युधिष्ठिरः

सर्वाल्लोकान्प्रपश्यामि तपसा सत्यविक्रम ।

इहस्थः पाण्डवश्रेष्ठं पश्यामि श्वेतवाहनम् ।। १९ ।।[05]

लोमशः

एवमेतन्महाबाहो पश्यन्ति परमर्षयः

इह स्नात्वा तपोयुक्तांस्त्रीन्लोकान्सचराचरान् ।। २० ।।

सरस्वतीमिमां पुण्यां पुण्यैकशरणावृताम्।

यत्र स्नात्वा नरश्रेष्ठ धूतपाप्मा भविष्यसि ।। २१ ।।[०६]

* इह स्नात्वा तपोयुक्तास्त्रीॅल्लोकतकान्सचराचरान् ।।[०७]

---

(०१) (१)यत्रैव for अ० ); वै for (ए) व );,

(०२) (३)आस्त; अस्ति; प्राप; आस for आस्ते );प्राप चैवर्षिमुख्येन (४) अ नुपालितः; अ पि पालितः,

(०३) (२)सर्वलोकान् प्रपश्यसि; अवाप्स्यसि (३) मुच्यते दुष्कृतैश्चैव (४)अत्रापि समुपस्पृश ( स्पृशन् ); अत्रापः समुपस्पृशन्,

(०४) (२)पूज्य for स्तूय );,

(०५) (१) स तान् for सर्वान् ); (२) सत्यसङ्गरः अ हं तपोधन (३) स्थः पाण्डवं चैव,

(०६) (१) रोमशः महाभाग; महाराज for महाबाहो );,

(०७) (१)महा for इमां); (४)पश्यैकशरणान्वि for ०श्रि );तान्; पुण्यैकशरणावृ ( ०न्वि ); तां; पश्यामोत्र महामते; पश्यैकां शरणावृतां तत्र; अं for यं ); स्नातो धुतपाष्मा; पूतं भविष्यति ,

इह सारस्वतैर्यज्ञैरिष्टवन्तः सुरर्षयः ।।
ऋषयश्चैव कौन्तेय तथा राजर्षयोऽपि च ।। २२ ।।[०१]

वेदी प्रजापतेरेषा समन्तात्पञ्चयोजना ।
कुरोर्वै यज्ञशीलस्य क्षेत्रमेतन्महात्मनः ।। २३ ।।[०२]

अस्मिन् तीर्थयात्रापर्वणि १०३ अध्याये २३ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि त्र्यधिकशततमोऽध्यायः ।। १०३।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 104

# १०४. चतुरधिकशततमोऽध्यायः

लोमशेन युधिष्ठिरं प्रति सरस्वत्यादिमाहात्म्यकथनम् ।। १ ।। तथा श्येनकपोतोपाख्यानकथनारम्भः ।। २ ।। विभिन्नतीर्थानां माहात्म्यं राज्ञ उशीनरस्य कथोपक्रमश्च ।।

लोमशः

इह मर्त्यास्तनूस्त्यक्त्वा स्वर्गं गच्छन्ति भारत ।
मर्तुकामा नरा राजन्निहायान्ति सहस्रशः ।। १ ।।[०३]

एवमाशीः प्रयुक्ता हि दक्षेण यजता पुरा ।
इह ये वै मरिष्यन्ति ते वै स्वर्गजितो नराः ।। २ ।।[०४]

---

(०१) (१)सत्रैर् for यज्ञैर् ); (२)अयजंश्चैव for इष्ट ); महर्षयः; सुरर्षभाः (३)ब्राह्मणा ऋषयश्चैव; ऋषयश्च महाभागास,

(०२) (१)वेदिः for वेदी ); (२) दश for पञ्च ); (३)कुरोश्च; ययातेर् for कुरोर्वै ); (४)प्रकाशते for महा );,

(०३) (१)महर्षयस् for इह मर्त्यास् ); तपःसिद्धा; तनूस्त्यक्त्वा; तनुं त्यक्त्वा तपस्त्वकवा for तपस्तस्त्वा ); मर्तुकामा इहायान्ति पृथिव्याः ( स्यां ); स्वर्गकाक्षिणः,

(०४) (२)दक्षेण परमर्षिणा त्यजेयुर्य इह प्राणांस्ते गच्छेयुर्नरा दिवं,

एषा सरस्वती रम्या दिव्या चौघवती नदी ।
**एतद्विनशनं नाम सरस्वत्या विशाम्पते ।। ३ ।।**(०१)

द्वारं निषादराष्ट्रस्य येषां दोषात्सरस्वती ।
**प्रविष्टा पृथिवीं वीर मा निषादा हि मां विदुः ।। ४ ।।**(०२)

*** क्षीणपापा शुभाँल्लोकान्प्राप्नुते नात्र संशयः ।।** (०३)

एष वै चमसोद्भेदो यत्र दृश्या सरस्वती।।
**यत्रैनामभ्यवर्तन्त सर्वाः पुण्याः समुद्रगाः ।। ५ ।।**(०४)

एतत्सिन्धोर्महत्तीर्थं यत्रागस्त्यमरिन्दम।।
**लोपामुद्रा समागम्य भर्तारमवृणीत वै ।। ६ ।।**(०५)

एतत्प्रकाशते तीर्थं प्रभासं भास्करद्युते ।
**इन्द्रस्य दयितं पुण्यं पवित्रं पापनाशनम् ।। ७ ।।**(०६)

एतद्विष्णुपदं नाम दृश्यते तीर्थमुत्तमम् ।
**एषा रम्या विपाशा च नदी परमपावनी ।। ८ ।।**(०७)

*** यत्र गयाशरो नाम पितृणां तुष्टिकारकम् ।**
**यत्र तीर्थान्यनेकानि देवतायतनानि च ।**

---

(०१) (१)रम्या for पुण्या ); (२)रम्या for दिव्या ); चौघवती; घोषवती; चोर्ध्ववरती सरस्वत्यां महीपते; for प्रकाशते विशां पते );,
(०२) (१)निषधराजस्य; निषादराजस्य (२) एषा दोषात्; प्राची for द्वेषात् );,
(०३) (४)स्म for हि ); सा निषादभयान्नदी,
(०४) (३)यत्रैताम् for नाम् ); अभ्यधावन्त; नात्यवर्तत; अन्ववर्तन्त यत्र नष्टा महाभागाः (४) सर्वाः for दिव्याः );,
(०५) (१)महातीर्थं तस्मिन्स्नात्वा महातीर्थे (२) महामुनिं for अरिन्दम ); (३)महाभागा for समा ); (४)भर्तारभवृणोत्तदा,
(०६) (१)प्रकाशते (२) पुष्करद्युते; भास्करद्युतेः हाटकं क्षेत्रमुत्तमं (३)चन्द्रस्य; शक्र for इन्द्र० ); तीर्थं; नित्यं for पुण्यं );,
(०७) (३)पुण्या for रम्या ); (४)परमपावना,

* मुनीनामाश्रमाश्चैव सर्वाः स्वर्गमयाः शुभाः।
यत्र गयाशिरो नाम तीर्थं पापभयापहम् ।
* क्षेत्रमेतन्महीपाल प्रणमस्व यथाविधि ।
सर्वतीर्थसमावासो दृश्यते विबुधाचलः ।।

अत्र वै पुत्रशोकेन वसिष्ठो भगवानृषिः ।
बद्ध्वाऽऽत्मानं निपतितो विपाशः पुनरुत्थितः ।। ९ ।।(०१)
* वितस्तां पश्य राजेन्द्र सर्वपापप्रमोचनीम् ।
महर्षिभिश्चाध्युषिता शीततोयां सुनिर्मलाम् ।।(०२)

सर्वतीर्थसमातासो दृश्यतेऽत्रार्बुदाचलः ।
काश्मीरमण्डलं चैतत्सर्वपुण्यमरिन्दम ।
महर्षिभिश्चाध्युषितं पश्येदं भ्रातृभिः सह ।। १० ।।(०३)

यत्रोत्तराणां सर्वेषामृषीणां नाहुषस्य च ।
अग्नेश्चैवात्र संवादः काश्यपस्य च भारत ।। ११ ।।(०४)

एतद्वारं महाराज मानसस्य प्रकाशते ।
वर्षमस्य गिरेर्मध्ये रामेण श्रीमता कृतम् ।। १२ ।।(०५)

एष वातिकख(ष)ण्डो वै प्रख्यातः सत्यविक्रमः ।
नात्यवर्तत यद्वारं विदेहादुत्तरं च यः ।। १३ ।।(०६)

---

(०१) (१)अत्र वै for अत्रैव ); (४)विपाशश्चोत्थितः पुनः

(०२) (४)(इ)मं for (इ) दं );,

(०३) (१)कश्मीर चैव; पुण्यं for चैतत् ); (२)सर्वं तीर्थम्; सर्वतीर्थम्; सर्वं पुण्यम्; महत्पुण्यम् for सर्वपुण्यम् ); अयं परं for अरिन्दम ); पश्य पार्थिवसत्तम,

(०४) (१)यत्र; तत्र for अत्र ); (उ)त्तरेण for (उ)त्तराणां ); (२) नहुषस्य; उत्तरस्य; वासवस्य;बाहुकस्य (३)अत्र एव आसीद्धि for चात्रैव ); (४)कश्यपस्य कश्यपस्याभवत्पुरा,

(०५) (३)वर्ष कस्य श्रृङ्गे for मध्ये );,

(०६) (१)वाभिकषण्डो; वातिकखण्डो; वार्तिकखण्डो; चातिकषण्डो; चानीकषोढो; वातकषण्डो;

* इदमाश्चर्यमपरं देशेऽस्मिन्पुरुषर्षभ।
* क्षीणे युगे तु कौन्तेय शर्वस्य सह पार्षदैः ।।
* सहोमया च भवति दर्शनं कामरूपिणः ।
* अस्मिन्सरसि सत्रैर्वै चैत्रे मासि पिनाकिनम्।।
* यजन्ते याजकाः सम्यक्परिवारं शुभार्थिनः ।
* अत्रोपस्पृश्य सरसि श्रद्दधानो जितेन्द्रियः ।।
* क्षीणपापः शुभाँल्लोकान्प्राप्नुते नात्र संशयः ।
* इदमाश्चर्यमपरं देशेऽस्मिन्युरुषर्षभ ।।
* क्षीणे युगेऽपि कौन्तेय शर्वस्य सह पार्षदैः ।
* सहोमया च भवति दर्शनं कामरूपिणः ।।
* अस्मिन्सरसि रम्ये वै चैत्रे मासि पिनाकिनम् ।
यजन्ति याजकाः सम्यक्यरिवारं शुभार्थिनः ।।
* अत्रोपस्पृश्य सरसि श्रद्दधानो जितेन्द्रियः ।
क्षीणपापः शुभाल्लोकान्प्राप्नुते नात्र संशयः ।

(1)च ( तु for पि ); कुशलं for दर्शनं ); काष्टरूपिणः सत्ये; सत्रे; सर्वे; सत्रैर्; पुण्ये for रम्ये ); तु for वै ); चैत्रमासे पिना किंन यजन्ते परिवार परिचार; परिचारं प्राप्नोति, ),

एष उज्जानको नाम पावकिर्यत्र शान्तवान् ।
अरुन्धतीसहायश्च वसिष्ठो भगवानृषिः ।। १४ ।।(०१)

लक्षालङ्कारः- यमकीर्यत्र शान्तवान् इत्यत्र यमं प्रति कीरीवत् शुकीवत् आर्तस्वरं कुर्वन् वसिष्ठः यमकीः इत्युच्यते ।

---

पातिक एष रामसमो वीरः; एषा याति क्रमायर्स्थः (२) विख्यातः for प्र ); सत्यविक्रम (३)नान्यां ( त्य ); ( न्ध ); वर्तयत द्वारं; नात्य ( न्य ); वर्तत तद् द्वारं (४) विदेहाद्; विदेहस्य; वैदेहाद् for विदेहान् ); उत्तरान् for उत्तरं ); जयः; जयत्; जयान् for च यः );,

(०१) (१) ख०ग०उज्ज्ञातको नाम यवक्रीर्यत्र, उज्जलकोः उज्जनको उज्जतको; उज्जानुको (२)शक्रो वै;पावकिर् for यवक्रीर् ); सत्य for शान्तं ); (४) वशिष्ठो,

ह्रदश्च कुशवानेष यत्र पद्मं कुशेशयम् ।
**आश्रमश्चैव रुक्मिण्या यत्राशाम्यदकोपना ।। १५ ।।**(०१)

समाधीनां समासस्तु पाण्डवेय श्रुतस्त्वया ।
**तं द्रक्ष्यसि महाराज भृगुतुङ्गं महागिरिम् ।। १६ ।।**(०२)

*** मण्डवां च तथा सन्ध्यां द्रक्ष्यस्यमितविक्रम ।**(०३)

*** वितस्तां पश्य राजेन्द्र सर्वपापप्रमोचनीम्।**
**महर्षिभिश्चाध्युषितां शीततोयां सुनिर्मलाम्।**

जलां चोपजलां चैव यमुनामभितो नदीम् ।
**औशीनरो वै यत्रेष्ट्वा वासवादत्यरिच्यत ।। १७ ।।**(०४)

लक्षालङ्कारः-औशीनरो वै यत्र इत्यत्र औशीनरः शिबिः ।

तां देवसमितिं तस्य वासवश्च विशाम्पते ।
**अभ्यागच्छन्नृपवरं ज्ञातुमग्निश्च भारत ।। १८ ।।**(०५)

जिज्ञासमानौ वरदौ महात्मानमुशीनरम् ।
**इन्द्रः श्येनः कपोतोऽग्निर्भूत्वा यज्ञेऽभिजग्मतुः ।। १९ ।।**

ऊरू राज्ञः समासाद्य कपोतः श्येनजाद्भयात् ।
**शरणार्थी तदा राजन्निलिल्ये भयपीडितः ।। २० ।।**(०६)

---

(०१) (३) (ए)ष for (ए)व) (अ)रुन्धत्या for रुक्मिण्या ); (४) (अ)श्रम्यद्; (अ)शम्यद् तपोबलात् for अकोपना );,

(०२)(१)समाधिना; ०सीनां for ०धीनां ); समापन्नं; श्वानं ०धिस्तु; धिं तु for सस्तु ); (२) पाण्डवानां श्रुतं for श्रुतस् ); (२)मया for त्वया ); (३)त्वं for तं ); महीपाल; महाभाग (४)भृगुं तुङ्गं; भृगुतुन्दं ,

(०३)(१) मडुवां; वडवा; मण्डकं; माण्डवाः; मण्डलं for मण्डवां );,

(०४) (३)औशीनरो (४) वासवं च for वास वाद् ); अतिरिच्यत; अतिरिच्यते,

(०५) (१)तं for तां ); देवौ for देव ); (३)अभ्यागच्छन्त अभ्या (भ्य) गच्छन्नृपवरं (४) जमदग्नि for ज्ञातुमग्निश्),

(०६) (१)ऊरुं कुरु for ऊरुं) समाविश्य (३) ततो; तथा for तदा );,

अस्मिन् तीर्थयात्रापर्वणि १०४ अध्याये २०श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 105

# १०५. पञ्चाधिकशततमोऽध्यायः

शिबिपरीक्षणार्थं श्येनीभूतेनेन्द्रेणानुद्रुतस्य कपोतरूपधारिणो अग्नेः शिबिं प्रति शरणागतिः ॥ १ ॥ कपोतरिरक्षिषया राज्ञा श्येनानुमत्या स्वशरीरोत्कृत्तमांसस्य कपोतेन सह तुलारोपणम् ॥ २ ॥ मासापेक्षया कपोतस्य गौरवातिरेके राज्ञा स्वयमेव तुलारोहणम् ॥ ३ ॥ ततस्तुष्टाभ्यामिन्द्राग्निभ्यां तत्प्रशंसनपूर्वकं स्वलोकगमनम् ॥ ४ ॥

श्येनः

धर्मात्मानं त्वाहुरेकं सर्वे राजन्महीक्षितः ।
सर्वधर्मविरुद्धं त्वं कस्मात्कर्म चिकीर्षसि ॥ १ ॥

✲ श्रृणु त्वं तत्र वै राजञ्श्येनो यदभिभाषत[०१]

विहितं भक्षणं राजन्पीड्यमानस्य मे क्षुधा।
मा रक्षीर्धर्मलोभेन धर्ममुत्सृष्टवानसि ॥ २ ॥[०२]

राजा

सन्त्रस्तरूपस्त्राणार्थी त्वत्तो भीतो महाद्विज ।
मत्सकाशमनुप्राप्तः प्राणगृध्नुरयं द्विजः ॥ ३ ॥[०३]

---

(०१) (१)त्वामिहैकं; त्वामिहवै; चाहुरेकं; प्राहुरेकं (२) राजन्प्राहुर्मनीषिणः (३)सर्व for स वै );,
(०२)(१)विधिना विहितं भक्ष्यं (३) मा रक्षे; मा रक्षीर् ( मां रक्ष );मा हिंसीर् for मा भाङ्क्षीर् ); धर्मलोपेन (४) धर्ममुत्सृज्य मा नशीः ,
(०३) शिबिरुवाच(१)प्राणार्थी (र्थे) (उ)द्विग्नो for भीतो ); ()यमातुरः for महा ); (४)प्राणगृद्धीर्;

एवमभ्यागतस्येह कपोतस्याभयार्थिनः ।
अप्रदाने परं धर्मं कथं श्येन न पश्यसि ।। ४ ।।(०१)

प्रस्पन्दमानः सम्भ्रान्तः कपोतः श्येन लक्ष्यते।
मत्सकाशं जीवितार्थी तस्य त्यागो विगर्हितः ।। ५ ।।(०२)

* यो हि कश्चिद् द्विजान्हन्याद्गां वा लोकस्य मातरम्।
* शरणागतं च त्यजते तुल्यं तेषां हि पातकम्।
* यो हि कश्चद् द्विजान्हन्याद्गां वा लोकस्य मातरम् ।
* शरणागतं च त्यजते तुल्यं तेषां हि पातकम् ।
* एकतः क्रतवः सर्वे समाप्तवरदक्षिणाः ।
* एकतो भयभीतस्य प्राणिनः प्राणधारणम् ।

श्येनः

आहारात्सर्वभूतानि सम्भवन्ति महीपते।
आहारेण विवर्धन्ते तेन जीवन्ति जन्तवः ।। ६ ।।(०३)

शक्यते दुस्त्यजेऽप्यर्थे चिररात्राय जीवितुम्।
न तु भोजनमुत्सृज्य शक्यं वर्तयितुं चिरम् ।। ७ ।।(०४)

भक्ष्याद्वियोजितस्याद्य मम प्राणा विशाम्पते।
विसृज्य कायमेष्यन्ति पन्थानमकुतोभयम् ।। ८ ।।(०५)

---

प्राणान्गृध्नुर् द्विजोत्तमः for अयं द्विजः );,
(०१)(१)अ स्य अ द्य; अ हं for (इ)ह ); (२)ममान्तिकं for अ भयार्थिनः); (३) ()पराधं मे ( कथं धर्मं );परं धर्मं; न चैवास्य for परोधर्मः); (४) कं त्वं; कथं for किं त्वं );कर्म for श्येन ); न पश्यसिः चिकीर्षसि; इ ह पश्यसि for प्रपश्यसि );,
(०२) (२)आगतः for लक्ष्यते ); (३) मत्सकाशे ( ०शी ); (४) विवर्जितः; न शक्यते for विग );,
(०३)(२)महीतले (३) (ए)व for वि ); (४)सर्वशः for जन्तवः ); सम्भवन्ति च सर्वशः,
(०४) (१)दुस्त्वजेत्यर्थे; दुःकृतेप्यर्थे; षुष्कलस्वार्थे (४) वै जीवितुं for वर्तं );,
(०५)(१)भक्षाद् वियो जितस्याद्य; विलोभि (३)यास्यन्ति for एष्यन्ति ); (४)अकुतोभयं for अपुनर्भवम्

प्रमृते मयि धर्मात्मन्पुत्रदारादि नङ्क्ष्यति।।
रक्षमाणः कपोतं त्वं बहून्प्राणान्न रक्षसि ।। ९ ।।[01]

धर्मं यो बाधते धर्मो न स धर्मः कुधर्म तत्।
अविरोधात्तु यो धर्मः स धर्मः सत्यविक्रम ।। १० ।।[०२]

विरोधिषु महीपाल निश्चित्य गुरुलाघवम्।
न बाधा विद्यते यत्र तं धर्मं समुपाचरेत् ।। ११ ।।[०३]

गुरुलाघवमादाय धर्माधर्मविनिश्चये।
यतो भूयांस्ततो राजन्कुरुष्व धर्मनिश्चयम् ।। १२ ।।[०४]

राजा

बहुकल्याणसंयुक्तं भाषसे विहगोत्तम।
सुपर्णः पक्षिराट्ंक त्वं धर्मज्ञश्चास्यसंशयम् ।। १३ ।। [०५]

तथा हि धर्मसंयुक्तं बहु चित्रं च भाषसे।[06]
न तेऽस्त्यविदितं किञ्चिदिति त्वां लक्षयाम्यहम्।
शरणैषिपरित्यागं कथं साध्विति मन्यसे ।। १४ ।।[०७]

---

)
(०१) (१)प्रसृते; मन्मते; मन्मते; प्रमीते; मृते तु for प्रसृते ); (२)मरिष्यति; विनङ्क्ष्यति; भविष्यतिfor नशि ); पुत्रदारादि नङ्क्ष्यति (३)राजन्नक्षन्; रक्ष्य for रक्षं ); (४)न रक्षसि for नशि );,
(०२)(१)बहून् for धर्म ); (२) कुवर्त्म तत्; कुधर्मवि ( व ) त्; कथञ्चन for कुधर्म तत् );(३) अविरोधात्; अविरोधे हि ()पि च for तु ); (४)सद्भिरुच्यते; सत्यविक्रमः,
(०३)(१)विरोधेषु (२) नित्यं जन्तुषु सर्वशः (४) समुपाचरेत् पाचर;०दाचर; चाहृतं धर्म तं विबुधा विदुः,
(०४) (१)आदाय; अज्ञाय; आस्थाय for आज्ञाय ); (४) कुरुष्व धर्मनिश्चय,
(०५) (३) त्वं हि for किं त्वं) सुवर्ण पक्षकस्त्वं हि,,
(०६) (४) (अ)पि for (अ) सि ); धर्मज्ञ बहु भाषसे; धर्म ( ०मीञ् );ज्ञात्वा वि( भि; प्र ); भावसे अपि for हि ); सर्वं संयुक्तं; त्वं समां for धर्मसं० );तथा धर्मविचि त्राथां किञ्चित् for चित्रं ); च; वि for प्र ); भाषसे गिरमुत्तमां,,
(०७) (१)त्वां for त्वा) (३)शरणैषिणां शरणागत सन्त्यागं; शरणैषिपरित्यागं (४) कस्मात्; कश्च for कथं ); त्वं साधु for साध्विति ); मन्यते कस्मात्त्वमभिमन्यसे,,

* ह्रियमाणं तथाहारमुत्पन्नं क्षुधितस्य वै ।

आहारार्थं समारम्भस्तव चायं विहङ्गम।
शक्यश्चाप्यन्यथा कर्तुमाहारोऽप्यधिकस्त्वया ।। १५ ।।(०१)

गोवृषो वा वराहो वा मृगो वा महिषोऽपि वा।
त्वदर्थमद्य क्रियतां यच्चान्यदिह काङ्क्षसि ।। १६ ।।(०२)

श्येनः

न वराहं न चोक्षाणं न मृगान्विविधांस्तथा।
भक्षयामि महाराज किं ममान्येन केनचित् ।। १७ ।।(०३)

यस्तु मे देवविहितो भक्षः क्षत्रियपुङ्गव ।
तमुत्सृज महीपाल कपोतमिममेव मे ।। १८ ।।(०४)

श्येनः कपोतानत्तीति स्थितिरेषां सनातनी।
मा राजन्सारमज्ञात्वा कदलीस्कन्धमारुह(श्रय) ।। १९ ।।(०५)

राजा

राष्ट्रं शिबीनामृद्धं वै ददानि तव खेच।

---

(०१) (१)आहारार्थे (३)अ धिकं ( ०कः ); for (अ) न्यथा ); कर्म for कर्तुम् ); (४) ()भि;()ति for पि ); आहारः पक्षिणां वर ,

(०२) (२)मृगो महिषो माहिषो (३)अत्र for अद्य ); एतत्ते क्रियतामद्य (४)यद्वान्यम्; यच्चान्यद्; यदर्थम्; यदन्यद् for यद्वान्यद् ); अभिकाङ्क्षसि for अपि काङ्क्षसि ); इह काङ्क्षसे; इह काङ्क्षसि,,

(०३) (२)न मृगांश्च पृथग्विधान् (४) तेनघ; ते मम for तेन मे ); नान्यं भक्षमहं वृणे; किं ममान्येन केनचित्,,

(०४) (१)विहितो भक्ष्यो देवविहितो (२) भक्ष्यः विधात्रा क्षत्रियर्षभ (३)उत्सृज्य महाराज for मही ); (४) नान्यं भक्ष्यमिहास्ति मे; नान्यं भक्ष्यमहं वृणे,,

(०५) (१)श्येनः कपोतानत्तीति (२)श्रुतिर् for स्थितिर् ); पुरातनी for सना० );सारम् (३) ख०मार्गमास्थाय कदर्यस्तम्भमारुह ; अ०सारतनंज्ञात्वा, घ०मार्गमज्ञाय ० स्कन्धमासजः।, for मार्गम् ); अ ( आ ); ज्ञात्वा for आज्ञाय ); (४)कदलीस्तम्भम्,आरुज; आव्रज; आसज; आश्रय for आरुह ); कदलीकन्दभक्षनः,

**कृत्स्नम्तन्मया दत्तं राजवद्विहगोत्तम ॥ २० ॥**

**यं वा कामयसे कामं श्येन सर्वं ददानि ते।**

**विनेमं पक्षिणं श्येन शरणार्थिनमागतम् ॥ २१ ॥**[०१]

✻ कृत्स्नमेतन्मया दत्तं राजवद्विहगोत्तम ॥[०२]

**येनेमं वर्जयेथास्त्वं कर्मणा पक्षिसत्तम।**
**तदाचक्ष्व करिष्यामि न हि दास्ये कपोतकम् ॥ २२ ॥**[०३]

**श्येनः**

**उशीनर कपोते ते यदि स्नेहो नराधिप।**
**आत्मनो मांसमुत्कृत्य कपोततुलया धृतम् ॥ २३ ॥**[०४]

**यदा समं कपोतेन तव मांसं नृपोत्तम।**
**तदा देयं तु तन्मह्यं सा मे तुष्टिर्भविष्यति ॥ २४ ॥**[०५]

**राजा**

**अनुग्रहमिमं मन्ये श्येन यन्माभियाचसे।**
**तस्मात्तेऽद्य प्रदास्यामि स्वमांसं तुलया धृतम् ॥ २५ ॥**[०६]

---

(०१) (१)राष्ट्रं for राज्यं ); च हि for वै ); राज्यं च शिबीनामृद्धं (२)पक्षिगणार्चितः; गणान्वितः; भिरर्कितः वैशाधी पक्षिभिश्चितं; ददानि तव खेचरः,

(०२) (३)यं च; यं वा for यद्वा ); कामं for किञ्चित् ); (४)ददामि for नि ); तत् for ते ); (ए) नं for (इ)मं),

(०३) (१)स्थाप० for वर्जं ); (२) द्विजं दानेन मे द्विज (४) न दास्ये ( मुञ्चैनं; मुञ्चेमं ); शरणागतं; मुचेनं शरणार्थिनं,,

(०४) (१)औशीनर (३)क०ख०घ०आत्ममांसकं समुद्धृत्य, आत्ममांसं समुद्दृ ( ०त्कृ ); त्य (४)कपोतं for कपोत );,

(०५) (२)नृपोत्तम; नराधिप for भवे ); (३) त्वया for तदा ); देयं तु for प्रदेयं ); देयं तव तदा मह्यं; देयं तत्तुलया मह्यं (४)मांसे for सा मे ),

(०६) (२)भाषसे for याचसे ); अनुग्रहं श्येन मन्य यन्मे मांसं हि याचसे (३)तदद्य for तस्मात्ते ), ते स्म ()हं for द्य),

✻ यदि प्राण्युपकाराय देहोऽयं नोपयुज्यते ।

✻ ततः किमुपचारोऽस्य प्रत्यहे क्रियते वृथा ।

**लोमशः**

**उत्कृत्य स स्वयं मांसं राजा परमधर्मवित्।**
**तोलयामास कौन्तेय कपोतेन समं विभो ।। २६ ।।**[०१]

**ध्रियमाणः कपोतस्तु मांसेनात्यतिरिच्यते।**
**पुनश्चोत्कृत्य मांसानि राजा प्रादादुशीनरः ।। २७ ।।**[०२]

**न विद्यते यदा मांसं कपोतेन सम धृतम्।**
**तत उत्कृत्तमांसोऽसावारुरोह स्वयं तुलाम् ।। २८ ।।**[०३]

**श्येनः**

**इन्द्रोऽहमस्मि धर्मज्ञ कपोतो हव्यवाडयम्।**
**जिज्ञासमानौ धर्मं त्वां यज्ञवाटमुपागतौ ।। २९ ।।**[०४]

**यत्ते मांसानि गात्रेभ्य उत्कृत्तानि विशाम्पते।**
**एषा ते भास्वती कीर्तिर्लोकानभिभविष्यति ।। ३० ।।**[०५]

**यावल्लोके मनुष्यास्त्वां कथयिष्यन्ति पार्थिव ।।**

---

(०१) (१)उत्कृत्य च स्वमांसानि ( तत उत्कृत्य मांसानि ); उत्कृत्य स स्वयं मांसं; एवमुक्त्वा स्वमांसानि (२) समुत्कृत्य स धर्मवित् (३)तोलयामास राजेन्द्र for कौन्तेय ); (४) सहाविभो; सहाभिभोः; समं विभो; समं यथा; सह प्रभो; समप्रभो; सहाभिभूः,

(०२) (१)कपोतस्तु for तु तुलया ); (२) व्यतिरिच्यत मांसेनात्यतिरिच्यते (३) भूय for पुन ),

(०३) (१)स्वं for (अ)त्पौ) तत उत्कृत्य ( ०त्त ); मांसं स; आरुरोह तदा राजन् (४) स्वयं तुलां स्वयमेव तुलां नृप,

(०४) (१)राजेन्द्र; भद्रं ते for धर्मज्ञ ); (२)हव्यवाहनः (३) धर्मेण; धर्मं त्वां for धर्मे त्वां ); (४)यज्ञे ते समुपागतौ,

(०५) (२) क०ख०ग०घ० उत्कृत्तना विशां पते,समुत्कृत्तानि पार्थिव (३) भास्वरा; भास्वती; शाश्वती (४) अतिचरिष्यति; अभि ( धि ); गमिष्यति लोके स्थास्यति शाश्वती,

तावत्कीर्तिश्च लोकाश्च स्थास्यन्ति तव शाश्वताः ।। ३१ ।।(०१)

* इत्येवमुक्त्वा राजानमारुरोह दिवं पुनः ।
* उशीनरोऽपि धर्मात्मा धर्मेणावृत्य रोदसी।
* विभ्राजमानो वपुषाप्यारुरोह त्रिविष्टपम्।
* इत्येवमुक्त्वा तं दानमारुरोह दिवं पुनः ।
* उशीनरोऽपि धर्मात्मा धर्मेणावृत्य रोदसी ।
* विभ्राजमानो वपुषाप्यारुरोह त्रिविष्टपम् ।(०२)

तदेतत्सदनं राजन्राज्ञस्तस्य महात्मनः ।
पश्यस्वैतन्मया सार्धं पुण्यं पापप्रमोचनम् ।। ३२ ।।

* इत्युक्त्वा तं दानपतिमिन्द्राग्नी तौ तदा नृप ।
* पूर्णदेहं स्वकं कृत्वा जग्मतुस्त्रिदशालयम् ।।(०३)

तत्र वै सततं देवा मुनयश्च सनातनाः ।
दृश्यन्ते ब्राह्मणै राजन्पुण्यवद्भिर्महात्मभिः ।। ३३ ।।(०४)

अस्मिन् पर्वणि १०५ अध्याये ३३ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि पञ्चाधिकशततमोऽध्यायः ।। १०५ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 106

---

(०१) (१)त्वा; च for त्वां ); (३) तावत्ते शाश्वतो लोकः (४)तपसा शुभाः for तव शाश्वताः ); भविष्यति न संशयः,

(०२) (१) प्रारुरोहः आरुरोह for (अ) प्यारुरोह ); त्रिपिष्टपं ),

(०३) (१)यत् for तत् ); क०ख०ग०घ०सदनं, तदेतत्स ( एतत्ते स ); दनं राजन् (३)पश्य च for पश्यस्व ); (ए)नं for (ए)तन् ); (४)पापप्रणाशनं,

(०४) (१)तत्र for अत्र ); व for वै ); (२)तपोधनाः for सना ); (३)ब्राह्मणा सार्धं for राजन् ); (४)पुण्यकृद्भिरर् महात्मनः; ०व्रतैः for ०त्मभिः ); तपोबलसमन्विताः ( ०तैः ),

# १०६. षडधिकशततमोऽध्यायः

लोमशेन श्वेतकेतोराश्रमं गतं युधिष्ठिरं प्रति अष्टावक्रोपाख्यानकथनारम्भः ।। १ ।।
धनार्जनाय जनकपुरं गतस्य कहोलस्य वन्दिना वादे विजित्य जले निन्मज्जनम् ।। २ ।।
तद्विदितवता तत्पुत्रेणाष्टावक्रेण श्वेतकेतुना सह जनकनगरं प्रति गमनम् ।। ३ ।।

लोमशः

यः कथ्यते मन्त्रविदग्धबुद्धिः औद्दालकिः श्वेतकेतुः पृथिव्याम् ।
तस्याश्रमं पश्य नरेन्द्र पुण्यं सदाफलैरुपपन्नं महीजैः ।। १ ।।(०१)
साक्षादत्र श्वेतकेतुर्ददर्श सरस्वतीं मानुषदेहरूपाम् ।
वेत्स्यामि वाणीमिति सम्प्रवृत्तां सरस्वतीं श्वेतकेतुर्बभाषे ।। २ ।।(०२)
तस्मिन्युगे ब्रह्मकृतां वरिष्ठावास्तां मुनी मातुलभागिनेयौ ।
अष्टावक्रश्चैव कहोडसूनुरौद्दालकिः श्वेतकेतुः पृथिव्याम्।। ३ ।।(०३)
विदेहराजस्य महीपतेस्तौ विप्रावुभौ मातुलभागिनेयौ।
प्रविश्य यज्ञायतनं विवादे बन्दिं निजग्राहतुरप्रमेयौ ।। ४ ।। (०४)
अष्टावक्रं यस्य दौहित्रमाहुर्योऽसौ बन्दिं जनकस्याथ यज्ञे ।
वादी विप्राग्र्यो बाल एवाभिगम्य वादे भङ्त्वा मज्जयामास नद्याम्।। ५ ।।
✻ उपास्त्व कौन्तेय सहानुजस्त्वं तस्याश्रमं पुण्यतमं प्रविश्य ।

---

(०१) (१)यत् for यः); विदध; विदग्ध; ०विदग्र for ०विदग्र्य ); (३)तस्याश्रमं पाण्डव पश्य चेमं मं पश्यत पाण्डवाग्र्याः; मं पश्यत पाण्डवेयाः,
(०२) (१)साक्षात् अत्र (२) मानुषदेव; मानुषतुल्य,
(०३) (१)अस्मिन् उग्रौ; युगे for काले ); धर्मभृतां; ब्रह्मकृतां; पुण्यकृतां for ब्रह्मं ); (२)मुनी; तथा; उभौ for तदा ); (३) एव कहोडपुत्र; कहोळासूनुर् (४)पृथिठयां for च राजन् ),
(०४) (१)समीपतम् for महीपतेस् ); (२)वीरा; धीरा for विप्रा ); (३) हि for वि );(४)वन्दिं निजग्राह तम् for ग्राहतुर् ); अप्रमेयौ ,

✻ अष्टावक्रं यस्य दौहित्रमाहु र्योऽसौ बन्दिं जनकस्याथ यज्ञे ।

✻ वादी विप्राग्र्यो बाल एवाभिगम्य वादे भङ्त्वा मज्जयामास नद्याम् ।[०१]

## युधिष्ठिरः

**कथम्प्रभावः स बभूव विप्रस्तथाभूतं यो निजग्राह बन्दिम्।**

**अष्टावक्रः केन चासौ बभूव तत्सर्वं मे लोमश शंस तत्त्वम्।।** [०२]

**किञ्चाधिकृत्याथ तयोर्विवादो विदेहराजस्य समीप आसीत्।। ५ ।।**

✻ किं चाधिकृत्याथ तयोर्विवादो विदेहराजस्य समीप आसीत् ।।[०३]

## लोमशः

**उद्दालकस्य नियतः शिष्य एको नाम्ना कहोड इति विश्रुतोऽभूत्।**

**शुश्रूषुराचार्यवशानुवर्ती दीर्घं कालं सोऽध्ययनं चकार ।। ६ ।।**[०४]

**तं वै विप्रः पर्यचरत्सशिष्यस्तां च ज्ञात्वा परिचर्यां गुरुः सः ।**

**तस्मै प्रादात्सद्य एव श्रुतं च भार्यां च वै दुहितरं स्वां सुजाताम्।। ७ ।।**[०५]

✻ तस्मै प्रादात्सद्य एव श्रुतं च भार्यां च वै दुहितरं स्वां सुजाताम् ।।

✻ तस्यैव सिष्यस्य परां च शिष्यतां ज्ञात्वा विकारान्त्सुतायास्तदानिम्[०६]

---

(०१) (१) लोमश उ अथात्र for उपास्त्व ); च for त्वं ); प्रपश्य यः स; यथा च for यो सौ ); जशे यज्ञं; राशः for यज्ञे ); वादे for वादी ); विप्राग्र्यं; ग्रो; ग्र्ये तमेव यज्ञे निज घान वन्दिं,),

(०२) (१)विप्र (२) तथायुक्तो; तथाभूतं; तथाभूतिं; तथाभियुक्ति वन्दि,

(०३) (३)को नु for केन ); वासौ; वासो for चासौ ); मुनिश्च for बभूव ); (४)सर्वं ह्येतत्; तन्मे सर्वः सर्वं त्वं मे; तत्सर्व नो; सर्वं तन्नो for तत्सर्व मे ); आचक्ष्व for शंस ); विप्र; विद्वन्; सर्वं for तत्त्वम् ),

(०४) (१)उद्दालकस्यैकशिष्यो विनीतो (२)कहोढेति ( कहोढ इति ); कहोड इति; कपोढोह; कहोलेति; कहोळेति विश्रुतोभूत् for बभूव राजन्); (४)सः हि for सः),

(०५)(१)पर्यवदन्; हसन्; ०चरन् स; तु for च ); सुशिष्यं; महात्मा for च शिष्यास् ); तं वै विप्रः पर्यचरत्स शिष्यः (२) तां०; तत् for तं ); चाजानात् for च ज्ञात्वा ); परिचर्या for विप्रकारं ); ज्ञात्वा विकारं तस्य सर्वं तदानीं,

(०६) (३)सर्वम्; सत्य for सद्य ); द्रुतं for श्रुतं ); (४)भार्या चैव; भार्या वै; भार्यार्थं वै; भार्यां चैवं

तस्या गर्भः समभवदग्निकल्पः सोऽधीयानं पितरं चाप्युवाच ।

सर्वां रात्रिमध्ययनं करोषि नेदं पितः सम्यगिवोपवर्तते ।। ८ ।।(०१)

* वेदान्साङ्गान्सर्वशास्त्रैः उपेतानधीतवानस्मि तव प्रसादात्।
* इहैव गर्भे तेन पितः ब्रवीमि नेदं त्वत्तः सम्यगिवोपवर्तते।
* वेदारसाङ्गान्सर्वशास्त्रैरुपेता नधीतवानस्मि तव प्रसादात् ।
* इहैव गर्भे तेन पितर्ब्रवीमि नेदं त्वत्तः सम्यगिवोपवर्तते ।

उपालब्धः शिष्यमध्ये महर्षिः स तं कोपादुदरस्थं शशाप।

यस्मात्कुक्षौ वर्तमानो ब्रवीषि तस्माद्वक्रो भवितास्यष्टकृत्वः ।। ९ ।।(०२)

स वै तथा वक्र एवाभ्यजायदष्टावक्रः प्रथितो वै महर्षिः ।

अस्यासीद्वै मातुलः श्वेतकेतुः स तेन तुल्यो वयसा बभूव ।। १० ।।(०३)

सम्पीड्यमाना तु तदा सुजाता सा वर्धमानेन सुतेन कुक्षौ।

उवाच भर्तारमिदं रहोगता प्रसाद्य हीनं वसुना धनार्थिनी।। ११ ।।(०४)

## सुजाता

---

for भायां च वै ),

(०१) (१)तस्यां (२)अथ चाप्युवाच; सोभ्युवाच for अथाभ्यु० ); (४)इह for इव ); अ भवत्ते for (उ) जपवर्तते ),

(०२) (२)क्रोधाद् for कोपाद् ); (३) वक्रं वर्ध० ( क्रुद्धो वर्तं ); for कुक्षौ वर्तं ); (४) क०घ ०ग० घ० ह्यष्टकृत्वः, अष्टधैव for अष्टकृत्वः ),

(०३) (१)क०ख०ग०एवाभ्यजायत् अष्टवक्रः,घ० स वै यथा पितृशापोऽभ्यजायात् अष्टावक्रः पितृशापाद् for वक्र एव ); अ भिजज्ञे अ जायद् for अ भ्यजायद् ); (२) त्वष्टा० for अष्टा ); कथितो for प्रथितो ); ब्राह्मणेषु; मानवेषु for वै महर्षिः); (३) अस्य; तथा; यथा for तस्य ); अ प्या ह्यस्या ; अ स्या सीन् for आ सीद्वै ); (४)सम्बभूव; वै बं for बं ),

(०४) (१)सा for सं ); अ थ for तु ); ततः; तथा for तदा ); त्म माता for सुजाता ); (२)सा; प्र for वि ); (३)वचो रहः for रहोगता ); (४) हीना for हीनं ); वसु नाम चार्थिनी ,

कथं करिष्याम्यधुना महर्षे मासश्चायं दशमो वर्तते मे।
नैवास्ति ते वसु किञ्चित्प्रजाता येनाहमेतामापदं निस्तरेयम्।। १२ ।।[०१]

लोमशः

उक्तस्त्वेवं भार्यया वै कहोलो(डो) वित्तस्यार्थे जनकमथाभ्यगच्छत्।
स वै तदा वादविदा निगृह्य निमज्जितो बन्दिनेहाप्सु विप्रः ।। १३ ।।[०२]
उद्दालकस्तं तु तदा निशम्य सूतेन वादेऽप्सु निमज्जितं तथा।
उवाच तां तत्र ततः सुजातामष्टावक्रे गूहितव्योऽयमर्थः ।। १४ ।।[०३]
ररक्ष सा चापि तमस्य मन्त्रं जातोऽप्यसौ नैव शुश्राव विप्रः ।
उद्दालकं पितृवच्चापि मेने तथाष्टावक्रो भ्रातृवच्छ्वेतकेतुम्।। १५ ।।[०४]
ततो वर्षे द्वादशे श्वेतकेतुरष्टावक्रं पितुरङ्के निषण्णम्।
अपाकर्षद्गृह्य पाणौ रुदन्तं नायं तवाङ्कः पितुरित्युक्तवांश्च ।। १६ ।।[०५]
यत्तेनोक्तं दुरुक्तं तत्तदानीं हृदि स्थितं तस्य सुदुःखमासीत्।

---

(०१) (१)अधुना for अधना ); (३) (ए)व for च० ); मे for ते ); तव; वस्तु for वसु ); प्रदातुं; सुजाता; प्रजातं प्रसूता; प्रदाता न चास्ति किञ्चिद्वसु ते for मे ); प्रजाता (४) एनाम् for एताम् ),

(०२) (१)चैवं; स्वयं त्वेकं; त्वयं for त्वेवं ); जायया for भार्यया ); कहोळो (२) वित्तार्थी सत्र् for वित्तस्यार्थे ); (३)तथा; जल्पन् for तदा ); वेदविदा; वाग्विदा वै (४)वन्दिना चाप्सु; इ हात्यः ह्यप्सु ((ए) वाप्सु ); for हाप्सु ); पुत्र for विप्रः),

(०३) (१)तथा for तदा ); (२) क०ख०ग०घ०तदा न्मज्जितम्, वादेन for वादेऽप्सु ); तथा निमज्जितं ततो; तदा for तथा ); निमज्जितं तदा ( ०तं च; तं वै ); निमज्जती तं for तथा नि ); आष्टावक्रे नायमर्थो निवेद्य,

(०४) (१) क०सका चापतितं सुमन्त्रं घ०सा चापि ततस्स्म तत्र, ख०ग०ररक्ष सा चाप्यथ तं सुमन्त्रं, तथा ततः; अनिशं; उदितं; अथ तं; अधिकं for अति तं ); स्म for सु ); तमस्य for अ ति तं सु ); (२) हि for पि ); असौ; एनं; उदन्तं for एवं ); नैव; तन्न; ० न च for न स ); (३)वै पितरं स; पितरं सोभि for पितृवच्चापि ); (४)तथाष्टा for अष्टा ); भ्रातरं for भ्रातृवत् ),

(०५) (२)त्वष्टा for अष्टा ); (३)अपा कृष्यद्; उपाकर्षद् गृह्यमाणो for गृह्य पाणौ ); (४)इत्युवाच; ( इति ); उक्तवांश्च; आवर्तमानः ,

गृहं गत्वा मातरं सोऽभिगम्य पप्रच्छेदं क्व नु तातो ममेति।। १७ ।।[०१]

ततः सुजाता परमार्तरूपा शापाद्भीता सर्वमेवाचचक्षे।

तद्वै तत्त्वं सर्वमाज्ञाय रात्रावित्यब्रवीच्छ्वेतकेतुं स विप्रः ।। १८ ।।[०२]

विप्रः

गच्छाव यज्ञं जनकस्य राज्ञो बह्वाश्चर्यः श्रूयते तस्य यज्ञः ।

श्रोष्यावोऽत्र ब्राह्मणानां विवादमर्थं चाग्र्यं तत्र भोक्ष्यावहे च ।। १९ ।।

विचक्षणत्वं च भविष्यते नौ शिवश्च सौम्यश्च हि ब्रह्मघोषः [०३]

तौ जग्मतुर्मातुलभागिनेयौ यज्ञं समृद्धं जनकस्य राज्ञः ।। २० ।।

अष्टावक्रः पथि राज्ञा समेत्य प्रोत्सार्यमाणो वाक्यमिदं जगाद।। २१ ।।[०४]

✻ अस्मिन् पर्वणि १०६अध्याये २१श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि षडधिकशततमोऽध्यायः ।। १०६ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 107Adhyaya

(०१) (१)तत् for यत् ); द्वारतस्तत्; दुरितं तत्; दुश्चरितं for दुरुक्तं तत् ); (२) क०ख०ग०दुश्चरितं तदानिं ० तस्य सुदुःखमासीत् गृहं गत्वा मातरं सोऽथ विप्रः । पप्रच्छेदं, तु; तद् for सु ); हृदि स्थितं शल्यमिवा तिविद्धं ( दुःखं ); (३) पृच्छमानः; सोभिगम्य; सोथ राजन्; सोभिवाद्य; सोथ विप्रः for रोदमानः ); गत्वा गृहं रोदमानो जनित्रीं,

(०२) (२)तत्त्वमस्या for सर्वमेवा ); (३) तत्त्वं सर्वं आदाय; आख्याय for आज्ञाय ); रात्रौ; मात्रा for मातुर् ),

(०३) (२)ह्याश्चर्यवा for बह्वाश्चर्यः ); चास्य; ह्यस्य for तस्य ); राज्ञः for यज्ञः ); (३) प्रेक्षावस्तत्र; श्रोष्यावहे for श्रोष्यावोत्र ); विवादान् ; for दम् ); (४)अथं; ज्ञानं for अन्नं ); भोक्ष्याव वप्र ( तात ); श्रोष्यावहे च,

(०४) (४)ग०घ०बभाषे,प्रोत्सा for उत्सा० ); बभाषे for जगाद ),

# १०७. सप्ताधिकशततमोऽध्यायः

श्वेतकेतुना सह जनकयज्ञशालां विविक्षोरष्टावक्रस्य द्वारपोलेन निरोधनम् ।। १ ।। अष्टावक्रद्वारपालयोस्संवादः अष्टावक्रस्य द्वारपालेन राज्ञा जनकेन च सह वार्तालापः ।। २ ।। स्वप्रश्नस्योत्तरदानतुष्टेन राज्ञा सभाप्रवेशानुमतिः ।। ३ ।।

अष्टावक्रः

अन्धस्य पन्था बधिरस्य पन्थाः स्त्रियः पन्था भारवाहस्य पन्थाः ।
राज्ञः पन्था ब्राह्मणेनासमेत्य समेत्य तु ब्राह्मणस्यैव पन्थाः ।। १ ।।(०१)

राजा

पन्था अयं तेऽद्य मयातिदिष्टो येनेच्छसि तेन कामं व्रजस्व ।
न पावको विद्यते वै लघीयानिन्द्रोऽपि नित्यं नमते ब्राह्मणानाम्।। २ ।।(०२)

लोमशः

स एवमुक्तो मातुलेनैव सार्धं यथेष्टमार्गो यज्ञनिवेशनं तत्।
सम्प्राप्य धर्मेण निवारितस्सन्द्वारि द्वाःस्वं वाक्यमिदं बभाषे।। ३ ।।

अष्टावक्रः

प्राप्तौ स्व यज्ञं नृप सन्दिदृक्षू कौतूहलं नौ बलवन्नरेन्द्र।
प्राप्ताविहावामतिथी प्रवेशं काङ्क्षावहे द्वारपतेस्तवाज्ञाम्।। ४ ।।(०३)

---

(०१) (१)स्थविरस्य for बधि० ); (२) क०ख०ग०घ०वै पथिकसक्य, स्त्रियश्च; स्त्रियाश्च; स्त्रियाः for स्त्रियः ); विकलस्य; भारवाहस्य ( ष्वेत्रधिकस्य ); वधिकस्य; वै पथिकस्य for वैव ); (३)ब्राह्मणानां समेत्य; ब्राह्मणानां च पन्थाः,

(०२)(१)अध्वा for पन्था ); अ तिसृष्टो; अ तिदिष्टो विसृष्टो for निसृष्टो ); पन्था मया तेयमथावसृष्टो ( पन्था विप्रो वदति तथैव तद् ध्रुवं ); (२) (इ)च्छसि (३) ब्राह्मणेभ्यो for पावको ); बलीयान्; गरी० for लघी० ); (४)अपि सं for नित्यं ),

(०३) (१)स्म राजन्; स्म तात for स्व तात ); प्राप्तौ स्व ( सु ); यज्ञं तव सन्दिदृक्षू ( प्राप्तावावां तव यज्ञं दिदृक्षू ); प्राप्तौ स्व यज्ञं नृप सं ( नृपतिर् ); दिदृक्षू (२) नौ नौ बलवत् वै बलवत् वै नरेन्द्र for विवृद्धम् );

ऐन्द्रद्युम्ने यज्ञदृशाविहावां विवक्षू वै जनकेन्द्रं दिदृक्षू।

तौ वै क्रोधव्याधिना दह्यमानावयं च नौ द्वारपालो रुणद्धि।। ५ ।।(०१)

मा च त्वमावां व्याधिना तप्यमाना वभिभू त्वं बालकौ बालिशौ च ।

समायातौ मातुलभागिनेयौ संमोक्तव्यौ द्वारपाल क्षणेऽस्मिन् ।।(०२)

द्वारपालः

बन्देः समादेशकरा वयं स्म निबोध वाक्यं च मयेर्यमाणम्।

न वै बालाः प्रविशन्त्यत्र विप्रा वृद्धा विदग्धाः प्रविशन्त्यत्र विप्राः ।। ६ ।।

अष्टावक्रः

यद्यत्र वृद्धेषु कृतः प्रवेशो युक्तं प्रवेष्टुं मम द्वारपाल।

वयं हि वृद्धाश्चरितव्रताश्च देवप्रभावेण समन्विताश्च ।। ७ ।।(०३)

शुश्रूषवश्चापि जितेन्द्रियाश्च ज्ञानागमे चापि गताः स्म निष्ठाम्।

न बाल इत्यवमन्तव्यमाहुर्बालोऽप्यग्निर्दहति स्पृश्यमानः ।। ८ ।।(०४)

---

(३) क०ख०ग०घ०सम्प्रवेष्टुं, आवां प्राप्तौ हि आवां सम्प्रवेशे; त्वत्सकाशं; सम्प्रवेष्टुं प्राप्ताविहावामतिथी प्रवेशं (४)द्वारपतेस्; द्वारपाले

(०१)(१)ऐन्द्रद्युम्ने (२)जनकं वै; जनकं तं for जनकेन्द्रं ); विवक्षू वै जनकं सम्प्रयातौ (३) ख०क ६द्वोऽब्रवीव्याधिनेवोत्तमेन संयोजयन् द्वारपालः क्षणेन । घ०क्रोधो,मा for न ); क्रद्धो; कुद्धौ for क्रोधाद् ); व्यधनेन; वाधनेन for व्याधिनैव ); तौ वै ( तव; स च; आवां ); क्रोधव्याधिना दह्यमानौ (४)संयोजये आ वां याजय द्वारपाले क्षणे त्वा for क्षणेन ); वयं ( अयं; स्वयं; आवां ); च नौ द्वारपालो रुणद्धि

(०२)(१)वन्देः; वन्दे स्मः; हि; भो for स्म ); (२)तं वाक्यं for वाक्यं च ); मयेरितं त्वं for मयेर्यं ); निबोध तद्वा ( तं वा ); क्यमितोधिगम्य (३)विप्र; वृद्धा for विप्रा ); ममैव वाक्यं च ततोधि गम्य (४) न वै; विप्रा for वृद्धा ); वि द्वांसश्च०; विदग्धाः; बालाः; ये स्युः ह्यत्र for विद्वांसः );अ त्र विप्राः for द्विजाग्र्याः ),

(०३) (२)मया for मम ); युक्तं प्रवेष्टुं मम द्वारपाल (४)वै वा द प्रवादेन; वेदा देव प्रतापेन तपःप्रभावे ( वेशे ); न समन्विताश्च; निवेशनार्हाः,

(०४) (२)ज्ञानागमैशू चैव for चापि ); गताश्च for गताः स्म ); परे निविष्टाः for गताः स्म निष्ठाम् ); (३)इत्येव for इत्यव ); (४)हि for पि ); दहते,

### द्वारपालः

सरस्वतीमीरय वेदजुष्टामेकाक्षरां बहुरूपां विराजम्।
अङ्गात्मानं समवेक्षस्व बालं किं श्लाघसे दुर्लभा वादसिद्धिः ।। ९ ।।(०१)

लक्षालङ्कारः-सरस्वतीमीरय इत्यत्र सरस्वतीमोङ्काकाररूपामिति भावः ।

### अष्टावक्रः

न ज्ञायते कायवृद्ध्या विवृद्धिर्यथाष्ठीला शाल्मलेः सम्प्रवृद्धा ।
ह्रस्वोऽल्पकायः फलितो विवृद्धो यश्चाफलस्तस्य न वृद्धभावः ।।१० ।।(०२)

लक्षालङ्कारः- शाल्मली सम्प्रवृद्धा इत्यत्र शाल्मलि इति कण्टकितः स्थूलो वृक्षविशेषः ।

### द्वारपालः

वृद्धेभ्य एवेह मतिं स्म बाला गृह्णन्ति कालेन भवन्ति वृद्धाः ।
न हि ज्ञानमल्पकालेन शक्यं कस्माद्बालः स्थविर इव प्रभाषसे ।। ११ ।।(०३)

### अष्टावक्रः

न तेन स्थविरो भवति येनास्य पलितं शिरः ।
बालोऽपि यः प्रजानाति तं देवाः स्थविरं विदुः ।। १२ ।।(०४)

स(न) हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ।

---

(०१)(१)ईरयन्; ईरयेर्; ईरयद् for ईरय ); देव for वेद ); (२)हि विप्र; विजानन्; विजानात्; विराजन् for विराजम् ); (४)दुर्लभो (र्बलो)वै मनीषी,

(०२)(१)न सा वृद्धिर्या च कायस्य वृद्धिः (२)शल्मले यथा वने शल्मलिः सम्प्रवृद्धः; यथाष्ठीलाः शाल्मलेः सम्प्रवृद्धाः (३)यश्च for ह्रस्वो ); ()ल्पको यः for ल्पकायः ); सुप्रवृद्धो; सम्प्रवृद्धो; स वृक्षो; स वृद्धो for विवृद्धो ); (४)यच्चा; यथा; यस्यां for यश्च ); नो for न ),

(०३)(१)एवेत्य for एवेह ); मतीस्; मतिस् सु; च; तु for स्म ); (३) ज्ञातुम् for ज्ञानम् ); अल्पजातेन; वीर्येण (४)प्रज्ञ; प्राज्ञ; स्थविर for वृद्ध ) आ वभाषे अभिभाषसेः प्रभाषसे for अ वभाषसे )

(०४) (१)वृद्धो for स्थविरो ); स स्याद् for भवति ); (३)यौ वै युवाप्यधीयानः,

**ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ।। १३ ।।**[०१]

**दिदृक्षुरस्मि सम्प्राप्तो बन्दिनं राजसंसदि।**
**निवेदयस्व मां द्वाःस्थ राज्ञे पुष्करमालिने ।। १४ ।।**[०२]

**श्वेतकेतुः**

**द्रष्टास्यद्य वदतोऽस्मान्द्वारपाल मनीषिभिः ।**

*** सह वादे विवृद्धे तु बन्दिनं चापि निर्जितम्।**

**पश्यन्तु विप्राः परिपूर्णविद्याः सहैव राज्ञा सपुरोधमुख्याः ।**
**उताहो वाप्युच्चतां नीचतां वा तूष्णीम्भूतेष्वेव सर्वेष्वथाद्य ।। १५ ।।**[०३]

✻ द्रष्टास्यद्य वदतोऽस्मान्द्वारपाल मनीषिभिः ।

✻ सह वादे विवृद्धे तु बन्दिनं चापि निर्जितम् ।

✻ द्रष्टव्योत्र महाप्राज्ञः उच्च ताष्यथ नीचता

✻ पश्यन्तु विप्राः परिपूर्णविद्याः सहैव राज्ञा सपुरोधमुख्याः ।[०४]

**द्वारपालः**

**कथं यज्ञं दशवर्षो विशेस्त्वं विनीतानां विदुषां सम्प्रवेशम्।**

**उपायतः प्रयतिष्ये तवाहं प्रवेशने कुरु यत्नं यथावत् ।। १६ ।।**[०५]

**एष राजा संश्रवणे स्थितस्ते स्तुह्येनं त्वं वचसा संस्कृतेन।**

---

(०१)(२)वित्तैर्न च for वित्तेन न ),

(०२) (२)वन्दिनं (३)विद्वन्; द्वास्य for द्वाःस्थ ),

(०३) (१) ख०द्दष्ड्वाऽऽवयोर्वदतोद्वर्गद्वारपाल मनिषिभिस्सब वादे विवृद्धे । क०ग०हृष्टसि ग्यावयोर्वाऽपि पादान्मनाषिभिस्सह वादे विवृद्धे । घ०द्रष्टाद्यास्मादावयोर्द्वारपाल मनिषिभिस्सह वा वेदवृद्धैः । दृश्यस्रेद्य for द्रष्टा ); ह्यद्य for अ द्य ); ब्रुवतो; आ वयोर् for वदतो ); अस्मान् वदतो; द्रष्टास्यत्येभ्यक्ष्यते द्वारपाल,

(०४) ( सपुरोहितेन for सपुरोध );,) (३)स्विद् for वापि ); (४) (ए)षु; (ए)व for (अ)थ ); चास्य; (अ) थाद्य; चाथ; अ थो वै for चाद्य ),

(०५) (२)सम्प्रविश्यं; सम्प्रवेशं; सम्प्रवेशः विनीतानां स्थविराणां प्रविश्यं,

स चानुज्ञां दास्यति प्रीतियुक्तः प्रवेशने यच्च किञ्चित्तवेष्टम् ।। १७ ।।[०१]

* एष राजा संश्रवणे स्थितस्ते स्तुह्येनं त्वं वचसा संस्कृतेन ।

* स चानुज्ञां दास्यति प्रीतियुक्तः प्रवेशने यच्च किञ्चित्तवेष्टम् ।।

**अष्टावक्रः**

भो भो राजञ्जनकानां वरिष्ठ त्वं वै सम्राट् त्वयि सर्वं समृद्धम् ।

त्वं वा कर्ता कर्मणां यज्ञियानां ययातिरेको नृपतिर्वा पुरस्तात्।। १८ ।।[०२]

विद्वान् बन्दी वादविदो निगृह्य वादे भग्नानप्रतिशङ्कमानः ।

त्वयाभिसृष्टैः पुरुषैराप्तकृद्भिर्जले सर्वान्मज्जयतीति नः श्रुतम्।। १९ ।।[०३]

सोऽहं श्रुत्वा ब्राह्मणानां सकाशाद्ब्राह्माद्वैतं कथयितुमागतोऽस्मि।

क्वासौ बन्दी यावदेनं समेत्य नक्षत्राणीव सविता नाशयामि।। २० ।।[०४]

**राजा**

नाशंससे बन्दिनं वै विजेतुमविज्ञाय त्वं वाक्यबलं परस्य।

विज्ञातवीर्यैः शक्यमेवं प्रवक्तुं दृष्टश्चासौ ब्राह्मणैर्वेदशीलैः ।। २१ ।।[०५]

---

(०१) (१) क०ख०स्तैः स्तुह्येनं त्वं , ग०स्ते , घ०स्स स्तुह्येवैनं,(२) घ०स ते द्वारं दास्यति प्रीतियुक्तः प्रयच्छते यच्च ।,

(०२) (२)सभार्यस्त्वं; सभाग्यस्त्वं; त्वं वै सम्राट्; सम्राट् त्वं वै; सुसाम्राज्यं; साम्राज्यं यत्; साम्राज्यं वै; सम्राट् त्वं; साम्राज्यं त्वं for सभाज्यस्त्वं ); (३)वै for वा ); याज्ञियानां,

(०३) (१)बन्दी विद्वान्; वृद्धान्बन्दी वन्दी वाद for वेद ); विगृह्य (२)रुग्णान् for भग्नान् ); वादे न for तु ); भग्नान्प्रति (३)सृष्टैः; अभिसृषैः; वि; अ नु for नि ),

(०४) (१)स तं ( सुतं ); एतत्; सोहं; तदहं; तद्वै for स तत् ); ततोहं वै for स तच्छुत्वा ); समीपे; सकाशे; समीपाद् for सकाशाद् ); (२)ब्रह्माद्य वै; ब्रह्मादिभिः; ब्रह्माद्वैतं; ब्रह्मद्वैतं; ब्रह्माद्यं वै; ब्रह्मघ्नं वै शंसितुम् for कथयितुम् ); (३)वन्दी.

(०५) जनक उ (१)वै for त्वं ); (२)सोविज्ञात्वा; अविज्ञाय त्वं; अविज्ञाता; अवि ज्ञाय; विज्ञाय वा for अविज्ञात्वा ); वाक्यवरं वादबलं त्वमस्य; त्वमस्मि for परस्य ); अविज्ञाय वाक्यं च बलं परस्य; अज्ञाय वाक्यं च वलं त्वमस्य (३)अज्ञात for विज्ञात ); वाक्यं for शक्य ); (४)वेदं for वाद ),

आशंससे त्वं बन्दिनं वै विजेतुमविज्ञात्वा(य) तु बलं बन्दिनोऽस्य।

समागता ब्राह्मणास्तेन पूर्वं न शोभन्ते भास्करेणेव ताराः ।। २२ ।।(०१)

आशंसन्तो बन्दिनं जेतुकामास्तस्यान्तिकं प्राप्य विलुप्तशोभाः ।

विज्ञानमत्ता निःसृताश्चैव तात कथं सदस्यैर्वचनं विस्तरेयुः ।।२३ ।।(०२)

## अष्टावक्रः

विवादितोऽसौ न हि मादृशैर्हि सिंहीकृतस्तेन वदत्यभीतः ।

समेत्य मां निहतः शेष्यतेऽद्य मार्गे भग्नं शकटमिवाचलाक्षम्।। २४ ।।(०३)

लक्षालङ्कारः- शेष्यतेऽद्य मया इयत्र शेष्यते शयनं करिष्यति ।

## राजा

त्रिशंकद्वादशांशस्य चतुर्विंशतिपर्वणः ।

यस्त्रिषष्टिशतारस्य वेदार्थं स परः कविः ।। २५ ।।(०४)

(वा)षण्णाभेर्द्वादशा(क्ष) रस्य इति श्लोकस्यायमर्थः षण्णाभेः षडुत्वाख्यनाभेः,द्वादशा(क्ष)रस्य द्वादशमाराख्या (क्ष)रसाहितस्य, द्वादशामावास्याः द्वादश पौर्णमास्यश्चेति चतुर्विंशतिपर्वणः, त्रिषष्टिशतारस्य षष्टिसहितात्रिशतदिवसाख्यारसहितस्य कालचक्रस्येत्यर्थः ।

## अष्टावक्रः

चतुर्विंशतिपर्व त्वां षण्नाभि द्वादशप्रधि।

---

(०१) (१) स वन्दिमाताद्य तथा विनश्यति ( द्य सदोधिगच्छेत्; द्य सदोथ गच्छेत्; द्य तवाद्य नश्यति);(३) विज्ञानवन्तो निभृताश्च तात; विज्ञानतो निकृतास्तु ( ता यत्र ); तात कथं सदसि त्वमिमं कथं सदस्तर्तुमिदं समर्थः,),

(०२)(१) आशंसमानो; माना for से त्वं ); कुमारः for विजेतुम् ); अविज्ञाय ते वलं; वाग्वलं हि for स्य ); अविशाना वन्दिना हन्त जेतुं;(२) अविज्ञानात्ते ह्य ( त्तम ); शक्ता विजेतुं सघशस्ते for तेन पूर्व ); आशानुबन्धो हि तवात्र यत्नः ( यत्तत् );

(०३) (१)न नु; न तु मादृशेन; मादृशैरिह (२)सोहं कृतद्ध; नाङ्गी डम्भी० तैश्च for तेन ); (४)इवाचलाक्षं for इवाव० ); मार्गे भग्नः शकट इवाबलाक्षः,

(०४) (१)त्रिशंकद्वादशाङ्ग ( शात्; शांश ); स्थः षण्णाभेर्द्वादशारस्य (४)वरः for परः ),

तत् त्रिषष्टिशतारं वै चक्रं पातु सदागति ।। २६ ।।(०१)

लक्षालङ्कारः- सदागति सदा परिभ्रमणवत् ।

राजा

बडबे इव सम्पुक्ते श्येन्ये पाते दिवौकसाम् ।
कस्तयोर्गर्भमाधत्ते गर्भं सुषुवतुश्च कम् ।। २७ ।।(०२)

लक्षालङ्कारः- बडवे इव सम्पृक्त इत्यत्र शेन्ये उत्तरायणदिक्षिणायनाख्ये दिवौकसा पाते सन्निपते स्तः ।

अष्टावक्रः

मा स्म ते ते गृहे राजञ्छात्रवाणामपि ध्रुवम् ।
वातसारथिरागन्ता गर्भं सुषुवतुश्च तम् ।। २८ ।।

लक्षालङ्कारः- मा स्म भूः स्वगृह इत्यत्र हे राजन् स्वगृह एव मा स्म भूः । किन्तु शात्रवाणामपि संहर्ताऽभूः इति राज्ञः स्तुतिः । उत्तरमाह-वातसारथिः निदाघकालीनोऽग्निः आहर्ता गर्भमाहर्ता । उत्तरायणनिदाधकाले सूर्यकिरणैः जलानां निदाघान्तर्रिवेशनादिति भावः उभे मिलित्वा कं वर्षधारारूपं जलं सुषुवतुः ।

राजा

किंस्वित्सुप्तं न निमिषति किंस्विज्जातं न चोपति।
कस्य स्विद्धृदयं नास्ति किं स्विद्वेगेन वर्धते ।। २९ ।।(०३)

लक्षालङ्कारः- किंस्वित्सुप्तम् इत्यत्र अण्डजातं पक्षिकुलीनम् उत्पति ऊर्ध्वं पतनवत् ।

---

(०१) (१)०पर्वार्ध ०पर्व त्वा; ०पर्व तु; पर्वाद्यं; पर्व त्वं; पर्वत्वात् (२)द्वादशाप्रति; द्वादशः पथि; द्वादशः प्रथिः; द्वादशप्रथि (३) च; मे; वतं; त्वं for वै ); (४)गतिः गतिं,

(०२) (१)बडबे बडबे सम्पृक्ते; संवृत्ते (२)श्येनं पाते"

/*(१)मास्तु for मा स्म ); भूत् ( भूस् ); ( ते ); त्वद्; स्व ते स्यातां for राजञ् ); (२) इह; वेद् for अपि ); ध्रुवे (३)सारथिम् आगन्तु; आगन्ता ( आधत्ता ); आधाता; आधत्त; आहर्ता for आधत्ते ); (४)ते यं for तम् ); नृप for च तम् ),

(०३) (१)स्वप्नङ्; सुप्तो; सुप्तान् for सुप्तं ); न निमिषेत्; अ ति सति for निमिषति ); स्वप्नङिति

**अष्टावक्रः**

मत्स्यः सुप्तो न निमिषत्यण्डं जातं न चोपति।
अश्मनो हृदयं नास्ति नदी वेगेन वर्धते ।। ३० ।।(०१)

लक्षालङ्कारः- मस्यः सुप्त इत्यत्र अण्डजातम् अण्डाकारेण विद्यमानम् ।

**राजा**

न त्वां मन्ये मानुषं देवसत्त्वं न त्वं बालः स्थविरः सम्मतो मे।
न ते तुल्यो विद्यते वाक्प्रलापे तस्माद्द्वारं वितराम्येष बन्दी।। ३१ ।।(०२)

अस्मिन् पर्वणि १०७ अध्याये ३१श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि सप्ताधिकशततमोऽध्यायः ।। १०७ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 108 Adhyaya

# १०८. अष्टाधिकशततमोऽध्यायः

**अष्टावक्रस्य बन्दिना सह शास्त्रार्थः। वादे बन्दिनः पराजयः। समङ्गायां स्नानेनाष्टावक्रस्याङ्गानां समीभवनम्।**

**अष्टावक्रः**

अत्रोग्रसेन समितेषु राजन्समागतेष्वप्रतिमेषु राजसु।

---

स्वपितृषोर्नजिङिति जकारान्तस्य स्वप्नजशब्दस्य स्वप्नावस्थावद्वाचित्वम् सुषुप्त्यवस्थां प्राप्तं किं न निमिषति लुप्त दृङ् न भवतीति प्रश्नचर्थः (२)जानन् for जातं ); चोपते; चेङ्गते,

(०१) (१)न निमिषेद् (२) अण्डे जातं; अण्डाज्जातं चोपते; चेङ्गते,

(०२) (१)त्वां for त्वा) देवसत्त्व (२)सं ( त्वं ); (३)वाक्यलापैसू (४)विद्वन्; वादिन् for बन्दी ),

**नावैमि बन्दिं वरमत्र वादिनां महाजले हंसमिवाददामि।। १ ।।[०१]**

**न मेऽद्य वक्ष्यस्यतिवादिमानिन्ग्लहं प्रस(प)न्नः सरितामिवागमः ।**

**हुताशनस्येव समिद्धतेजसः स्थिरो भवस्वेह ममाद्य वन्दिन्।। २ ।।[०२]**

**वन्दी**

**व्याघ्रं शयानं प्रति मा प्रबोधय आशीविषं सृक्किणी लेलिहानम्।**

**पदाहतस्येह शिरोऽभिहत्य नादष्टो वै मोक्ष्यसे तन्निबोध।। ३ ।।[०३]**

**यो वै दर्पात्संहननोपपन्नः सुदुर्बलः पर्वतमाविहन्ति।**

**तस्यैव पाणिः सनखो विदीर्यते न चैव शैलस्य हि दृश्यते व्रणः ।। ४ ।।[०४]**

**अष्टावक्रः**

**सर्वे राज्ञो मैथिलस्य मैनाकस्येव पर्वताः ।**

**निकृष्टभूता राजानो वत्सा अनडुहो यथा ।। ५ ।।[०५]**

---

(०१) (१)सेन प्रमुखेषु; स्वमितेषु; समितौ तु for समितेषु ); राजसु; सत्रे for राजन् ); (२)स सागरेषु for समां ); राजन् ; सत्सु for राजसु ); (३)मे for वै ); विवक्षान्तरम्; विवत्सान्तरम् न वै तितिक्षाम्यहमत्र वादिनः; न वै विवक्षान्तरमत्र वादिनां; नावैमि बन्दिं वरमत्र वादिनां; न वै तिति क्षाम्यहमद्य वादिनां (४)महाजने हंसविवादिनां; ०विनादितां; विनादिनां; हंस च वादिनां महाहंसः शरसि निनादिनामिव महाहंसाः सरसि निरादिनामिव; महाजले हंसमिवाददामि; महाहंस शरदि विनादिनाभिव,

(०२) (१) (अ)तिवादमानि; ०वादमब्धिर्; ०वादमानिन् ( मानी ); न वन्दिनं ( मेद्य ); वै मोक्ष्यति वादिमानी; न मोक्ष्यसे वै वदमानो निम ज्जन्; न मोक्ष्यसे वदमानो हि मेद्य; न मेद्य मोक्ष्यस्यति वादवादिन् (२)ग्रहं; गृह अहं; जलं for ग्लहं ); प्रसन्नः; प्रसन्नं इवागतः; अवगाहः; इवाध्वगः (३)समृद्ध for समिद्ध ); (४) स्थितो for स्थिरो) वन्दिन्,

(०३) (१)मा बोधयस्व; प्रबोध; विबोध; निबोध; बोधयित्वा; बुबोधीर् for प्रबो ); (२)सृग्विनी सृक्किणी सृक्रिणि सृक्कणी सृङ्कणी संलिहानं (३)पदा स तस्य; पदाग्रतस्य; पदाहितस्य; पादाहतस्य (ए)वः; (इ) ह for इ व ); ()भि हन्व; निहत्य; ()भिहन्यान् (४)न दृश्यसे; तेनादत्ते; तेनादष्टो for नादष्टो वै ); मे; ()यं for वै ); मोक्ष्यते,

(०४) (१) (उ) पपन्नं (२)आविखाति; अभिहन्यात्; अभिधाति; आशु हन्ति; अभिहन्ति (३) ()वशीर्यतेः विदीर्यते (४)चापि for चैव ); च for हि ),

(०५) अष्टावक्रः (३)नीचैर्भूताश्च; नकर्षभूता; नीचीभूताश्च for निकृष्ट० ); अनुद्गहो; ह्यनडुहो,

* आसनं तु समास्यैवं संवादं बन्दिना सह ।
अष्टावक्रः सञ्चिकीर्षन्प्रजगर्ह हसन्मुहुः ।।
* यथा महेन्द्रः प्रवरः सुराणां नदीषु गङ्गा प्रवरा यथैव ।
तथा नृपाणां प्रवरस्त्वमेको बन्दिं समभ्यानय मत्सकाशम्।(०१)

लोमशः

एवमष्टावक्रः समितौ हि गर्जञ्जातक्रोधो बन्दिनमाह राजन्।
उक्ते वाक्ये चोत्तरं मे ब्रवीहि वाक्यस्य चाप्युत्तरं ते ब्रवीमि।। ६ ।।(०२)

वन्दी

एक एवाग्निर्बहुधा समिष्य(ध्य)ते एकः सूर्यः सर्वमिदं विभाति।
एको वीरो देवराजोऽरिहन्ता यमः पितणामीश्वरश्चैक एव ।। ७ ।।(०३)

अष्टावक्रः

द्वाविन्द्राग्नी चरतो वै सखायौ द्वौ देवर्षी नारदपर्वतौ च ।
द्वावश्विनौ द्वे रथस्यापि चक्रे भार्यापती द्वौ विहितौ विधात्रा।। ८ ।।(०४)

लक्षालङ्कारः- अग्न्यादिकं सर्वमेकमेवेति वन्दिना उक्ते सति ऐक्यवादिनं प्रति भेदवादिवत् द्वावेवेत्युत्तरमाह- द्वौ इत्यादिना ।

बन्दी

त्रिः सूयते कर्मणा वै प्रजेयं त्रयो युक्ता वाजपेयं वहन्ति।

---

(०१) ( समाह्यानय; समेत्यानय; समाभ्या; ममाभ्या वै सकाशं; मे समीपं, ),
(०२) (१)एवं अष्टावक्रः हि गर्जन्; हि राजन् for गर्ज ); (२)वन्दिनम्आजुहाव for आह राजन् ); (३) ()थ तु for च ); प्र for मे ); (४) (ए) व वा for च ); अ हम् for चापि ),
(०३) (२)विभाति for प्रभासते ); (३) ()रिहन्ता; हिनस्ति; नियन्ता; विहन्ता for निहन्ता ); (४) चैव एकः; चैवमेकः for चैक एव ),
(०४) (१)सहायौ for सखायौ ); (२)नारदपर्वतौ for नारदः पर्वतश्च ); (३)रथस्यैव; च रथे च; रथस्यापि for च रथस्य ),

अध्वर्यवस्त्रिसवनानि तन्वते त्रयो लोकास्त्रीणि ज्योतींषि चाहुः ।। ९ ।।(०१)

लक्षालङ्कारः- त्रिः सूयत इत्यत्र धान्यादौ पितरि मातरि चेति त्रिः इत्यर्थः । त्रयो वेदाः अध्वर्यवः सूर्यचन्द्रग्न्याख्याः, त्रिसवनानि अहोरात्रे शन्ध्याकालं चेति ।

**अष्टावक्रः**

चतुष्टयं ब्राह्मणानां निकेतं चत्वारो वेदाः यज्ञमिमं वहन्ति।

दिशश्चतस्रो वर्णचतुष्टयं च चतुष्पदा गौरपि शश्वदुक्ता।। १० ।।(०२)

लक्षालङ्कारः- चतुष्टयम् इत्यत्र चतुष्टयं वेदचतुष्टयम् । चत्वारो वेदाः । तस्मात् त्रिरित्यादिकं 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति श्रुतेन सम्पूर्णं तत्त्वमिति भावः ।

**वन्दी**

पञ्चाग्नयः पञ्चपदा च पङ्क्तिर्यज्ञाः पञ्चैवाप्यथ पञ्चेन्द्रियाणि।

दृष्ट्वा वेदे पञ्चचूडाप्सराश्च लोके ख्यातं पञ्चनदं च पुण्यम्।। ११ ।।(०३)

**अष्टावक्रः**

षडाधाने दक्षिणामाहुरेके षट्चैवेमे ऋतवः कालचक्रम्।

षडिन्द्रियाण्युत षट्कृत्तिकाश्च षट्साद्यस्काः सर्ववेदेषु दृष्टाः ।। १२ ।।(०४)

**वन्दी**

सप्त ग्राम्याः पशवः सप्त वन्याः सप्तच्छन्दांसि क्रतुमेकं वहन्ति।

---

(०१) (१)सूयते कर्मणा प्रसूयति; प्रसूयते; प्रसूते for सूयते ); त्रिः सूयन्ते कर्मणा प्राणिनस्ते (२)चरन्ति for वहन्ति ); (३)त्रिः सवनानि; त्रिसव for त्रिवस ); नानि तत्वतः; चैव; कुर्वते for तन्वते ),

(०२) (१)निकेतुशू; तश् ०तनं for तं ); (२)वर्णा for युक्ता ); (३) अ०क०घ०वर्णा, वेदाशू for वर्णाशू );दिशश्चतस्रो वर्णचतुष्टयं च (४)चतुष्पादा,

(०३) (१)पञ्च पादा (२)एव यज्ञाः पञ्चोक्ताः ( क्तः ); पञ्च चैर्वेद्रि याणि; यज्ञाः पञ्च पञ्च चैवेन्द्रिं पञ्चैव यज्ञास्त्वथ पञ्चेन्द्रिं (३) देवेfor वेदे ); पञ्चचूडाप्सराश्च; ०चूडाश्च लोके (४)पञ्च for लोके ); विख्यातं for ख्यातं ); तीर्थं for पुण्यम् ),

(०४) (१)दक्षिणा चाहर् (२)षड् वै च; षट् चैव for षडेव ); चेमे; वै for (इ) मे );

सप्तर्षयः सप्त चाप्यर्हणानि सप्ततन्त्री प्रथिता चैव वीणा।। १३ ।।[०१]

### अष्टावक्रः

अष्टौ शाणाः शतमानं वहन्ति तथाष्टपादः शरभः सिंहघाती।

अष्टौ वसूञ्शुश्रुम देवतासु यूपश्चाष्टास्रिर्विहितः सर्वयज्ञे।। १४ ।।[०२]

### वन्दी

नवैवोक्ताः सामिधेन्यः पितणां तथा प्राहुर्नवयोगं विसर्गम्।

नवाक्षरा बृहती सम्प्रदिष्टा नवैव योगो गणनामेति शश्वत्।। १५ ।।[०३]

लक्षालङ्कारः- नवैवोक्ताः सामिधेन्य इत्यत्र सामिधेन्यः सन्निधानस्थानानि ।

### अष्टावक्रः

दिशो दशोक्ताः पुरुषस्य लोके सहस्रमाहुर्दशपूर्णं शतानि।

दशैव मासान्बिभ्रति भर्गवत्यो दशैरेका दशदाशा दशार्हाः ।। १६ ।।[०४]

(वा) दशाः अवस्थाः दश ।

### वन्दी

एकादशैकादशिनः पशूनामेकादशैवात्र भवन्ति यूपाः ।

एकादश प्राणभृतां विकारा एकादशोक्ता दिवि देवेषु रुद्राः ।। १७ ।।[०५]

---

(०१) (१)सप्तारण्याः; सप्त वान्याः; सप्त धान्याः for सप्त वन्याः ); (३)वाराश्च यत्र for चाप्यर्हणानि ); (४)सप्तस्वरा; सप्तशूरा for सप्ततन्त्री ); चापि for चैव ); सप्तस्वरा ( राः ); प्रथिता चापि वीणा,

(०२)(१)वदन्ति for वहन्ति ); अष्टौ दिगीशान्यतमानान्वदन्ति ( अष्टौ दिगीशाः प्रतिमानं वहन्ति ); (३) शुश्रुमो (४) अष्टाश्रीर् सार्वयज्ञः; सर्वयज्ञे यूपा अष्टौ विहिताः सर्वयज्ञाः; यूपश्चष्टाश्रिः सर्व यज्ञेषु दृष्टः,

(०३) (१)नव वेदोक्ताः for नवैवोक्ताः); (४)नवैव योगो; नवायोगो; नवधा योगो; नावायोगो विश्वि for शश्वत् ),

(०४) (१)दिशा; दिशो; देशो for दशा ); पुरुषस्येह लोके (२)ईयुर् for तु आहुर् ); (४)दाशेरका; दशैरका; दशेरकान् दश दासा; दिशः; दश दिशो; दश देशा for दश दाशा ); दशार्हाः,

(०५) (१) (ए)कादशिनां दशानिः पृथि व्याम् for पशूनाम् ); (२)एकाद शैकत्र for शैवात्र ); एकादशैकाः

अष्टावक्रः

संवत्सरं द्वादशमासमाहुर्जगत्याः पादो द्वादशैवाक्षराणि।

द्वादशाहः प्राकृतो यज्ञ उक्तो द्वादशादित्यान्कथयन्तीह धीराः ।। १८ ।।(०१)

वन्दी

त्रयोदशी तिथिरुक्ता प्रशस्ता त्रयोदशद्वीपवती मही च ।। १८ ।।(०२)

लोमशः

एतावदुक्त्वा विरराम बन्दी श्लोकस्यार्धं व्याजहाराष्टवक्त्रः ।।

अष्टावक्रः

त्रयोदशाहानि ससार केशी त्रयोदशादीन्यतिच्छन्दांसि चाहुः ।। १९ ।।(०३)

लक्षालङ्कारः- त्रयोदशाहानि इत्यत्र केशी केशिनी दमयन्त्या दूती बाहुकनामतया स्थितनलस्वरूपविवेचनार्थं त्रयोदशाहानि ससार । आदीनि मुख्यानि च्छन्दांसि त्रयोदश आहुः ।

लोमशः

ततो महानुदतिष्ठन्निनादस्तूष्णीम्भूतं सूतपुत्रं निशाम्य।

अधोमुखं ध्यानपरं तदानीमष्टावक्रं चाप्युदीर्यन्तमेव ।। २०।।(०४)

तस्मिंस्तथा सङ्कुले वर्तमाने स्फीते यज्ञे जनकस्या(स्यो)त राज्ञः ।

---

प्रभवन्ति यूपाः,

(०१) (२)पादौ; पादा for पादो ); (३)सुद्वादशाहाः for द्वादशाहः ); पुण्यकृतो; प्रकृतो; प्राकृत for प्राकृतो ); (४)वीराः; धीराः for विप्राः ),

(०२) (१)प्रशस्ता for महोग्रा ),

(०३) (३)त्रयोदशादीनि वानरः for केशी );(४)त्रयोदशानि for दशादीनि ); ०छन्दांस्यथाहुः च,

(०४) लोमश उं (२)तूष्णी for दूष्णीं ); निशाम्य,

अष्टावक्रं पूजयन्तोऽभ्युपेयुर्विप्राः सर्वे प्राञ्जलयः प्रतीताः ।। २१ ।।(०१)

अस्मिन् पर्वाणि १०८अध्याये २१श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि अष्टाधिकशततमोऽध्यायः ।। १०८ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 109 Adhyaya

# १०९.नवाधिकशततमोऽध्यायः

जलमज्जितेपु सर्वविप्रेपु समुत्थितेषु अष्टावक्रेण स्वपित्रा कहोलेन मातुलेन च सह स्वाश्रमगमनम् ।।

अष्टावक्रः

अनेनैव ब्राह्मणाः शुश्रुवांसो वादे जित्वा सलिले मज्जिताः प्राक्।
तानेव धर्मानयमद्य बन्दी प्राप्नोतु गृह्याप्सु निमज्जयैनम्।। १ ।।(०२)

वन्दी

अहं पुत्रो वरुणस्योत राज्ञस्तत्रास सत्रं द्वादशवार्षिकं वै।
सत्रेण ते जनक तुल्यकालं तदर्थं ते प्रहिता मे द्विजाग्र्याः ।। २ ।।(०३)

ते तु सर्वे वरुणस्योत यज्ञं द्रष्टुं गता इम(इह) आयान्ति भूयः ।

---

(०१) (१)तदा for तथा ); वर्तमाने विवादे for सङ्कुले वर्त ); (२)स्थिते for स्फीते० ); उ त for अ थ ); आजमीढ for अ थ राज्ञः ); जग्मुः for राज्ञः ),
(०२) (१) (ए)व (ए)के for वै) (२)प्राकू; वै; च for किल ); (३)सर्वान् for धर्मान् ); एव for अद्य ); (४)सम्प्राप्नुतां; प्राप्तो निगह्य for प्राप्नोतु गृह्य ); नीत्वा for गृह्य ); (आ)शु for (अ)प्सु ),
(०३) (१)अहं हि पुत्रो (इ) ह (ए)व; for उ त ); (२)स तत्र; तत्रापि for तत्रास ); आस च for वै ); (३)समानं for तुल्य ); (४)मे; वै for ते ); प्रेषितास्; प्रेरिता for प्रहिता ); सम्प्रहिता for प्रहिता मे ); ते; वै for मे ); द्विजाश्च for द्विजाग्र्याः ),

अष्टावक्रं पूजये पूजनीयं यस्य हेतोर्जनितारं समेष्ये ।। ३ ।।(०१)

अष्टावक्रः

विप्राः समुद्राम्भसि मज्जिता ये वाचा जिता मेधया वा विदानाः ।
तां मेधया वाचमथोज्जहार यथा वाचमवचिन्वन्ति सन्तः ।। ४ ।।(०२)

अग्निर्दहञ्जातवेदाः सतां गृहान्विसर्जयंस्तेजसा न स्म धाक्षीत्।
बालेषु पुत्रेषु कृपणं वदत्सु तथा वाचमवचिन्वन्ति सन्तः ।। ५।।(०३)

श्लेष्मातकी क्षीणवर्चाः शृणोषि उताहो त्वां स्तुतयो मादयन्ति।
हस्तीव त्वं जनक विनुद्यमानो न मामिकां वाचमिमां शृणोषि ।।(०४)

लक्षालङ्कारः- श्लेष्मातक इत्यत्र 'शेलुः श्लेष्मातकः शीत' इत्यभिधानात् श्लेष्मातकः अपवित्रवृक्षविशेषः, तद्वत् स्थित इत्यर्थः ।

जनकः

शृणोमि वाचं तव दिव्यरूपाममानुषीं दिव्यरूपोऽसि साक्षात्।
अजैषीर्यद्बन्दिनं त्वं विवादे निसृष्ट एष तव कामोऽद्य बन्दी ।। ७ ।।(०५)

---

(०१) (१)त एते ते तु वै; ते० तु; ते वै; एते वै; य एते for एते ); राज्ञो for यज्ञं ); (२)यज्ञं; दृष्ट्वा for द्रष्टुं ); गतास्ते; यज्ञं; यातास्ते for गता ); इह यान्ति; इहायान्ति; इम यान्ति; इममायान्ति; इहायान्तु (३)पूजयेः; पूजयन्; पूजय,

(०२) (१)निर्जितास् for मज्जितास् ); ये for ते ); (२)वादे for वाचा ); चाविदानाः; वा० for आ० ); (३)तान् तान् for तां ); श्रेयसो; श्रेयसे for मेधया ); अथो जहार; अथाजहार; असौ जहार for अथोज्जहार ); ते वै तथा वाचमथो उदाहरन् (४)अविचिन्वन्ति; अवभासन्ति for अवचि ),

(०३) (१)गृहान्वै for सतां गृहान् ); (२)विवर्जयन्; विवर्धयन्; विस्पर्धमानः नः; मा for न ); (अ) प्यधाक्षीदत् व्यधा for स्म धा ); (३)बाले पुत्रे for बालेषु पुत्रेषु ); वै कृपणं (४)अवि;उप ( अपि ); for अव ),

(०४) (१)श्लेष्मातकः; ष्मान्तकिः; ०ष्मान्तकी; ष्मान्तकः; ष्मातकिः; तकीः; ०तङ्कः क्षीणवाचा श्रृणोति; श्रृणोमि (२) त्वा for त्वां ); स्तुतये मावहन्ति; मोदयन्ति; मादयन्तु; मोहयन्ति (३)विनुद्यमानो; तुद्यमानो for यत्तुद्यं ); (४)मामकीं; चैव मे,

(०५) (१)राजा तुल्यरूपाम्; देवरूपाम्; विप्राग्र्य मुख्याम् for दिब्यरूपाम् );(२) दैवं for दिव्यं ); (४)

### अष्टावक्रः

नानेन जीवता कश्चिदर्थो मे बन्दिना नृप।
पिता यद्यस्य वरुणो मज्जयैनं जलाशये ।। ८ ।।(०१)

### बन्दी

अहं पुत्रो वरुणस्योत राज्ञो न मे भयं विद्यते मज्जितस्य ।
इमं मुहूर्तं पितरं द्रक्ष्यतेऽयमष्टावक्रश्चिरनष्टं कहोडम् ।। ९ ।।(०२)

### लोमशः

ततस्ते पूजिता विप्रा वरुणेन महात्मना।
उदतिष्ठंस्ततः सर्वे जनकस्य समीपतः ।। १० ।।(०३)

### कहोलः

इत्यर्थमिच्छन्ति सुताञ्जना जनक कर्मणा।
यदहं नाशकं कर्तुं तत्पुत्रः कृतवान्मम ।। ११ ।।(०४)

उताबलस्य बलवानुत बालस्य पण्डितः ।
उत वाविदुषो विद्वान्पुत्रो जनक जायते ।। १२ ।।

लक्षालङ्कारः- पुत्रो जनक जायत इत्यत्र जनकेति राज्ञः सम्बुद्धिः । पुत्रः पितुरुद्धर्ता जायते ।

### वन्दी

---

विसृष्ट for नि) एव for एष ); तव विप्राग्र्य; तव वाक्याच्च; तव कामेद्य; तव कामाद्धि; क्षतकामोद्य,

(०१) (२)वै for मे ); (३) (ए)व for अ स्य ),

(०२) (२)विद्यते for सलिले ); (३) च०से त्वम्, द्रक्ष्यसे द्य त्वम् for यम् ); (४)चिरदृष्टं; चिरकाङ्क्षं कहोळां,

(०३) (१)सर्वे for विप्रा ); (३) वै for ते ); उदतिष्ठंस्ततः ( था; दा );सर्वे (४)महात्मनः; महीपतेः for समी० ),

(०४) (१)सुताञ् जनाः तथा for जना ); जनन for जनक ); जनक कर्म णाधिकान्,

शितेन ते परशुना स्वयमेवान्तको नृप।
शिरांस्यपहरन्नाजौ(पाहरत्वाजौ) रिपूणां भद्रमस्तु ते ।। १३ ।।[०१]

लक्षालङ्कारः- सितेन ते परशुना इत्यत्र सितेन ते परशुना पुण्यकीर्त्याख्यपरशुना ।

महदुक्थ्यं गीयते साम चाग्र्यं सम्यक्सोमः पीयते चात्र सत्रे।
शुचीन्भगान्प्रतिजगृहुश्च हृष्टाः साक्षाद्देवा जनकस्योत राज्ञः ।। १४ ।।[०२]

लक्षालङ्कारः- उक्थ्यम् उक्थनामक मुख्यप्राणसम्बन्धि ।

लोमशः

समुत्थितेष्वथ सर्वेषु राजन्विप्रेषु तेष्वधिकं सुप्रभेषु।
अनुज्ञातो जनकेनाथ राज्ञा विवेश तोयं सागरस्योत बन्दी।। १५ ।।[०३]
अष्टावक्रः पितरं पूजयित्वा सम्पूजितो ब्राह्मणैस्तैर्यथावत्।
प्रत्याजगामाश्रममेव चाग्र्यं जित्वा सौतिं सहितो मातुलेन।। १६ ।।[०४]

* ततोऽष्टावक्रमातुरथान्तिके पिता नदीं समङ्गां शीघ्रमिमां विशस्व ।
प्रोवाच चैनं स तथा विवेश समैरङ्गैश्चापि बभूव सद्यः ।
* नदी समङ्गा च बभूव पुण्या यस्यां स्नातोमुच्यते किल्बिषाद्धि।
त्वमप्येनां स्नानपानावगाहैः सभ्रातृकः सहभार्यो विशस्व ।
* ततोऽष्टावकं मातुरथान्तिके पिता नदीं समङ्गां शीघ्रमिमां विशस्व ।

---

(०१) (३)अपहरन्; अपा हरन्; अपाहरत्; अपहरतु; अपहरति त्वाजौ; चाजौ for आ जौ ),
(०२) (१)महदुक्तं; दुक्यं; दौक्थ्यं ( ०दौक्थं ); ०दौथ्यं; दौस्थां; महेन्द्रोष्ट्यं; महदौग्ध्यं; ब्रह्मदुग्धं (३) भोगान्; भारान् for भागान् ); प्रतिजहुश्च; अभिजगृहुश्च; उज्जगृहुश्चात्र; जगृ हुश्चात्र तुष्टाः for हृष्टाः ); शुचींश्च भोगाञ्जगृ हुशश्च हृष्टाः (४)देव; देवाञ् for देवा ); उत; इव for इह) राज्ञ राज्ञे for यज्ञे ),
(०३) (१)अथ धर्मेषु for सर्वेषु ); एवं हि सर्वेषु समुत्थितेषु (२)राजन्विप्रेषु for विप्रेषु तेषु ); तेषु अ धिकप्रभेपुः अ भ्यधिकप्रभेषुः स्वप्रभेषु; सम्प्रभेषु (३)जनकस्य इ ह; ए व अ थ (४)अ थ इ ति इ व ए व for उ त ),
(०४) (३)अभ्या for प्रत्या ); आशु for एव ); हृष्टो for चाग्र्यं ); (४)सौतिं for बन्दिं ),

प्रोवाच चैनं स तथा विवेश  समैरङ्गैश्चापि बभूव सद्यः ।
* नदी समङ्गा च बभूव पुण्या  यस्यां स्नातो मुच्यते किल्विषाद्धि ।
त्वमप्येनां स्नानपानावगाहैः  सभ्रातृकः सहभार्यो विशस्व ।[०१]

अत्र कौन्तेय सहितो भ्रातृभिस्त्वं सुखोषितः सह विप्रैः प्रतीतः ।

पुण्यान्यन्यानि शुचिकर्मैकभक्तिर्मया सार्धं चरितस्याजमीढ्।। १७ ।।[०२]

* पुण्यनद्याः सुतीर्थानि धुतपाप्मा गतक्लमः ।
भावेन दृढभक्त्या च मया सार्धं चरिष्यसि ।

**अस्मिन्  पर्वणि १०९ अध्याये १७श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि नवाधिकशततमोऽध्यायः ।। १०९ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 110 Adhyaya

# ११०. दशाधिकशततमोऽध्यायः

**कर्दीमिलक्षेत्रादि तीर्थानां माहात्म्यम् । रैभ्यस्य भरद्वाजपुत्रयवक्रीतस्य च कथा । लोमशेन रैभ्याश्रमं गतं युधिष्ठिरं प्रति यवक्रीतोपाख्यानकथनारम्भः ।। १ ।। भरद्वाजपुत्रेण यवक्रीतेन स्वपितृमित्रे रैभ्ये तत्पुत्रयोरर्वावसुपरावस्वोश्वासूयया विनैवैपदेशं वेदादिज्ञानाय इन्द्रं प्रति तपश्चरणम् ।। २ ।। इन्द्रनिवारितेनापि यवक्रीतेन बलात्कारेण तस्माद्वरग्रहणम् ।। ३ ।। भरद्वाजेन लब्धवरं यवक्रीतं प्रति गार्वेण रैभ्यपीडाप्रतिषेधाय बालध्युपाख्यानकथनम् ।।**

---

(०१) ( ऽपि for  पिता ); गङ्गां for  नदीं ); पिता समङ्गीं for  नदीं समङ्गां ); तथा तां for  तथा ); सा for  च ); किल्बिषेण for  षाद्धि ); वै for  हि ); ए वं for  ए नां ); ,

(०२) (१)तत्र for  अत्र ); (२)सुखोचितः; स्नातोषितः; उपोवितः; सुखोषितैः (३)शुचिर्  शुभकर्मा for शुचिकर्मा ); शुचिकर्मा ततस्त्वं; पास्यसि पुण्यनद्या; आशुकर्मैकभक्ति; आशु कर्माणि कर्तु; आशुकर्मेह भक्तिः (४)सञ्चरतु for  चरितासि ); चरस्व तीर्थान्यमितान्या ( ण्यपराण्या ); जमीढ,

४ ॥ ऋषीणामनिष्टकरमान्मेधा-विनो मृत्युश्च ॥ ५ ॥

लोमशः

एषा मधुविला राजन्समङ्गा सम्प्रकाशते ।
एतत्कर्दमिलं नाम भरतस्याभिषेचनम् ॥ १ ॥[०१]

लक्षालङ्कारः- समङ्गा सम्प्रकाशत इत्यत्र समङ्गा समङ्गानाम्नी नदी ।

अलक्ष्म्या किल संयुक्तो वृत्रं हत्वा शचीपतिः ।
आप्लुतः सर्वपापेभ्यः समङ्गायां व्यमुच्यत ॥ २ ॥[०२]

एतद्विनशनं कुक्षौ मैनाकस्य नरर्षभ।
अदितिर्यत्र पुत्रार्थं तदन्नमपचत्पुरा ॥ ३ ॥[०३]

एनं पर्वतराजानमारुह्य भरतर्षभाः ।
अयशस्यामसंशब्यामलक्ष्मीं व्यपनोत्स्यथ।[०४]
एते कनखला राजन्नृषीणां दयिता नगाः ॥ ४ ॥[०५]

एषा प्रकाशते गङ्गा युधिष्ठिर महानदी।
(४) यशस्विनी for महा० )

---

(०१) (१) क०ग०मधुवहा नाम समाङ्गासं, घ०मधुबिला नाम समन्तात् सं,मधश्रवा लिहा वहा वना for ०विला ); नाम for राजन् ); (२) समं तात् for समङ्गा );च for सं ); (३) क०ख०एतन्मधुबिलं नाम ,ग०घ०एतत्कर्दमिलं. कर्दबिलं; कर्दबलिद्; मधुबिलं; कर्दविलं,

(०२) (१) क०ख०ग०घ०संयुक्तो वृत्रं हत्वा, ह्यत्र; यत्र for किल ); (२)पुरन्दरः; शतक्रतुः for शची ); (४)स गङ्गायां for समं ); व्ययुज्यत; विमुच्यते; च मुच्यते; प्रमुच्यते,

(०३) (१)विनाशनं (३)पुत्रार्थे (४)तपश्चर्या पुराचरत्; तपस्तीव्रं समा ( पुरा ); चरत्; तपः समचरत्पुरा; तपस्ती ब्रमुपाचरत्,

(०४) (१)एतं for एनं ); पर्वत मारुह्य; पर्वतराजेन्द्र (२)राजानः for आरुह्य ); भरतर्षभ; भरतर्षभाः; पुरुषर्षभाः (३)अयशस्यम् असंशम्याम्; अशब्दं च; असंशिष्याम्; असंस्पृश्याम्; असभ्यां च; असंशा०ख्याम् ( अशंस्यं त्वम् ); असह्यां च; अधर्म्या त्वम्; अशस्यां त्वम् for असंशब्याम् ); (४)व्यपनेष्यति; व्यपनेष्यथ ( सि ); अपनो त्स्यथ; अपनोत्स्यसि; अपनोत्यथ; अपनेष्यथ,

(०५) (१)कनखले (२)गमिता; गदि० for दयि ),

सनत्कुमारो भगवानत्र सिद्धिमगात्पुरा ।। ५ ।।(०१)

आजमीढावगाह्यैनां सर्वपापैः प्रमोक्ष्यसे ।। ६ ।।(०२)

अपां ह्रदं च पुण्याख्यं भृगुतुङ्गं च पर्वतम्।
उष्णीगङ्गे च कौन्तेय सामात्यः समुपस्पृश ।। ७ ।।(०३)

आश्रमः स्थूलशिरसो रमणीयः प्रकाशते।
अत्र मानं च कौन्तेय क्रोधं चैव विवर्जय ।। ८ ।।(०४)

एष रैभ्याश्रमः श्रीमान्पाण्डवेय प्रकाशते।
भारद्वाजो यत्र कविर्यवक्रीतो व्यनश्यत ।। ९ ।।

लक्षालङ्कारः- यवक्रीतो व्यनश्यत इत्यत्र भारद्वाचः भरद्वाजपुत्रः यवक्रीतः वयक्रीतनामकः, वयक्रीरिति तस्यैव नाम ।

* नानापुष्पसमाकीर्णः फलपुष्पोपशोभितः ।
* नानाविहगसङ्घुष्टस्तापसालय उत्तमः ।
* रैभ्यस्यैष महाराज आश्रमः पुण्यकर्मणः ।।(०५)

## युधिष्ठिरः

कथं युक्तोऽभवदृषिर्भरद्वाजः प्रतापवान्।
किमर्थं च यवक्रीतः पुत्रोऽनश्यत वै मुनेः ।। १० ।।(०६)

---

(०१) (१)यत्र for अत्र ); पुरा for पराम् ),

(०२) (३) ए तां for ए नां ); (४)विमोक्ष्यसे,

(०३) (२)भृगुतुन्दं उष्णी गङ्गे; उष्णीं गङ्गां राजेन्द्र for कौन्तेय ); तूष्णीं कौन्तेय गङ्गायां (४)सानुजः ( गः ); for सामात्यः ); सभ्रातृक उपस्पृश,

(०४) (३)अति for अत्र ); (४)विसर्जय; समुत्सृज,

(०५) (३)यत्र कविः (४) ()प्यनश्यत for व्यनश्यत ),

(०६) (१)मृतो; वृत्तो for युक्तो ); बभूव for भवद् ); विप्रो for ऋषिर् ); (२)भारद्वाजः (४)ऋषेः पुत्रो हि; पि for वि ); पुत्रोनश्यत वै मुनेः ,

एतत्सर्वं यथावृत्तं श्रोतुमिच्छामि तत्त्वतः ।
कर्मभिर्देवकल्पानां कीर्त्यमानैर्भृशं रमे ॥ ११ ॥(०१)

लोमशः

भरद्वाजश्च रैभ्यश्च सखायौ सम्बभूवतुः ।
तावूषतुरिहात्यन्तं प्रीयमाणावनन्तरम् ॥ १२ ॥(०२)

रैभ्यस्य तु सुतावास्तामर्वावसुपरावसू।
आसीद्यवक्रीः पुत्रस्तु भरद्वाजस्य भारत ॥ १३ ॥(०३)

रैभ्यो विद्वान्सहापत्यस्तपस्वी चेतरोऽभवत्।
तयोश्चाप्यतुला कीर्तिर्बाल्यात्प्रभृति भारत ॥ १४ ॥(०४)

यवक्रीः पितरं दृष्ट्वा तपस्विनमसत्कृतम्।
दृष्ट्वा च सत्कृतं विप्रै रैभ्यं पुत्रैः सहानघ ॥ १५ ॥(०५)

पर्यतप्यत तेजस्वी मन्युनाभिपरिप्लुतः ।
तपस्तेपे ततो घोरं वेदज्ञानाय पाण्डव ॥ १६ ॥(०६)

स समिद्धे महत्यग्नौ शरीरमुपतापयन्।

---

(०१) (२)तत्वतः for लोमश ),

(०२) (१)भारद्वाजश्च (२)तौ वै; द्वौ for सं ); (३)अ न्योन्यं for अ त्यन्तं ); (४) अनन्तरं मनोहरौ for वनान्तरे ),

(०३) (१)द्वौ; च for तु ); (३)तथा for आसीद् ); च; वै for तु ); (४)भारवद्वाजस्य,

(०४) (१)नियतो; तापसो; त्वितरो for चेतरो ); तपस्वी नियतो भवेत्; तपः कर्तुं समाद्रवत् तप स्यभिरतोभवत् (३) कीर्तिर् for प्रीतिर् ); अभवद्भरतर्षभ,

(०५) (२)तपस्विभिर् for तपस्विनम् ); (४)सहानघः; ०नघं ( नुजं ); ०न्वयं,

(०६) (३)ततस for तपस् ); तपो for ततो ); ततोत्मानं for त्ततो घोरं ); यवक्रीतस्तपस्तेपे,

जनयामास सन्तापमिन्द्रस्य सुमहातपाः ॥ १७ ॥[०१]

तत इन्द्रो यवक्रीतमुपगम्य युधिष्ठिर ।
अब्रवीत्कस्य हेतोस्त्वमास्थितस्तप उत्तमम् ॥ १८ ॥[०२]

यवक्रीतः

द्विजानामनधीता वै वेदाः सुरगणार्चित।
प्रतिभान्त्विति तप्येऽहमिदं परमकं तपः ॥ १९ ॥[०३]

स्वाध्यायार्थं समारम्भो ममायं पाकशासन।
तपसा ज्ञातुमिच्छामि सर्वज्ञानानि कौशिक ॥ २० ॥[०४]

कालेन महता वेदाः शक्या गुरुमुखाद्विभो।
प्राप्तुं तस्मादयं यत्नः परमो मे समास्थितः ॥ २१ ॥[०५]

इन्द्रः

अमार्ग एष विप्रर्षे येन त्वं यातुमिच्छसि।
किं विघातेन ते विप्र गच्छाधीहि गुरोर्मुखात् ॥ २२ ॥[०६]

लोमशः

एवमुक्त्वा गतः शक्रो यवक्रीरपि भारत।
भूय एवाकरोद्यत्नं तपस्यमितविक्रमः ॥ २३ ॥[०७]

---

(०१) (१)सुसमृद्धे; स समिद्धे (४)च महात्मनः; च महातपाः for सुमहा ),

(०२) (२)उपागम्य विशां पते for युधि० ),

(०३) (१) घ०मनधीयानां वेदास्संप्रतिभान्त्विति, देवदेवेह तप्येऽहं,यवक्रीत उं ( उं ); (३)तस्यार्थम् for तप्येऽहम् ),

(०४) (१)स्वाध्यायार्थी; र्थे र्थे तपः सम्यक् for समा ); (२) (इ) दं for (अं)यं ),

(०५) (२)प्रभो for विभो ); (४) वै for मे ),

(०६) (१)ब्रह्मर्षे for विप्र ); (२)ज्ञातुम् for यातुम् ); (३) वापथेन for विधा० ); विप्रर्षे for ते विप्र ); (४)गच्छाधीष्व; गच्छस्वेति,

(०७) (१)एवमुक्तस्तु शक्रेण (२)यवक्रीरितिः क्रीतोपिः (४) विक्रमः ,

घोरेण तपसा राजंस्तप्यमानो महत्तपः ।
सन्तापयामास भृशं देवेन्द्रमिति नः श्रुतम् ।। २४ ।।(०१)

तं तथा तप्यमानं तु तपस्वीत्रं महामुनिम्।
उपेत्य बलभिद्देवो वारयामास वै पुनः ।। २५ ।।(०२)

इन्द्रः

अशक्योऽर्थः समारब्धो नैतद्बुद्धिकृतं तव ।
प्रतिभास्यन्ति वै वेदास्तव चैव पितुश्च ते ।। २६ ।।(०३)

यवक्रीतः

न चैतदेवं क्रियते देवराज ममेप्सितम्।
महता नियमेनाहं तप्स्ये घोरतरं तपः ।। २७ ।।(०४)

समिद्धेऽग्नावुपकृत्याङ्गमङ्गं होष्यामि वा मघवंस्तन्निबोध।
यद्येतदेवं न करोषि कामं ममेप्सितं देवराजेह सर्वम् ।। २८ ।।(०५)

लोमशः

निश्चयं तमभिज्ञाय मुनेस्तस्य महात्मनः ।
प्रतिवारणहेत्वर्थं बुद्ध्या सञ्चिन्त्य बुद्धिमान् ।। २९ ।।(०६)

ततः इन्द्रोऽकरोद्रूपं ब्राह्मणस्य तपस्विनः ।

---

(०१) (२)महातपः; महत्तपः महायशाः (४)देवराज मिति श्रुतिः,

(०२) (२)समास्थितिं; महाद्युतिं for महा ); (३)वलभिद् (४)तं for वै ); प्रभुः for पुनः ),

(०३) (१)अशक्यार्थः अशक्येर्थे; अशक्यार्थे संमारभो,

(०४) यवक्रीत उ ( उ० ); समीप्सितं for ममे० ); (४)तप्ये घोरतमं,

(०५) (१)अङ्गमङ्गं निकृत्य; अहमङ्गान्निकृत्य; अहमङ्गं निकृत्य; अथ चोत्कृत्य मेङ्गं; उकृत्याङ्गमङ्गं for उपकृत्या ); (३)ए वमेतच्च; ए वमेतं; ए व मेवं for ए तदेवं ),

(०६) (१)अभिप्रायं for अभिज्ञाय ); (४) निश्चित्य for सञ्चिन्त्य ); वीर्यवान् for बुद्धि ); न स चक ?> द्विजोत्तम,

अनेकशतवर्षस्य दुर्बलस्य सयक्ष्मणः ॥ ३० ॥(०१)

यवक्रीतस्य यत्तीर्थमुचितं शौचकर्मणि।
भागीरथ्यां तत्र सेतुं वालुकाभिश्चकार सः ॥ ३१ ॥(०२)

यदास्य वदतो वाक्यं न स चक्रे द्विजोत्तमः ।
वालुकाभिस्ततः शक्रो गङ्गां समभिपूरयन्।(०३)
वालुकामुष्टिमनिशं भागीरथ्यां व्यसर्जयत् ॥ ३२ ॥

सेतुमभ्यारभच्छक्रो यवक्रीतं निदर्शयन् ॥ ३३ ॥(०४)

तं ददर्श यवक्रीतो यत्नवन्तं निबन्धने।
प्रहसंश्चाब्रवीद्वाक्यमिदं स मुनिपुङ्गवः ॥ ३४ ॥(०५)

यवक्रीतः

किमिदं वर्तते ब्रह्मन्किं च ते ह चिकीर्षितम्।
अतीव हि महान्यत्नः क्रियतेऽयं निरर्थकः ॥ ३५ ॥(०६)

इन्द्रः

बन्धिष्ये सेतुना गङ्गां सुखः पन्था भविष्यति।
क्लिश्यते हि जनस्तात तरमाणः पुनः पुनः ॥ ३६ ॥(०७)

---

(०१) (४)सलक्षणं for सयक्ष्मणः ),
(०२) (३)भागीरथ्यास् ततः for तत्र ); (४)चकार ह; समाकरोत्; सुरेश्वरः,
(०३) (२)करोति; च कुर्याद् for स चक्रे ); (३) तदा for ततः ); चक्रे for शक्रो ); (४)समनुपूरयन्; च समपूरयन्; समभिपूरयत् ,
(०४) (२)समुत्सृजन् ( त् ); विसर्जयत् ( न् ); (३)बन्धम्; बद्धुम्; बन्धुम् for सेतुम् ); समारभत्; अभ्यागतं० ( तः ); (४)निदर्शयत्; न्यदर्शयेत्; अ ( न्य ); दर्शयत् ,
(०५) (१)यवक्रीतो for ०क्रीस्तु ); (२)प्रयत्नं तं for यत्नवन्तं ); (४)एतत् for इदं ); मुनिसत्तमः ,
(०६) यवक्री उ; यवक्रीत उ किं तवेह; किं च तेत्र; किञ्चित्तेत्र; किं तवेदं for किं च ते ह ); (४)तन्; ह; हि; यन् for यं ),
(०७) शक्रः for इन्द्र उं ); (२)सुखं for सुखः ); (३) ()त्रः ()यं for हि ); सर्वस् for तात ); (४)रममाणः; त्वरमाणः ,

यवक्रीतः

नायं शक्यस्त्वया बद्धुं महानोघस्तपोधन।
अशक्याद्विनिवर्तस्व शक्यमर्थं समारभ ।। ३७ ।।[०१]

इन्द्रः

यथैव भवता चेदं तपो वेदाथमुद्यतम्।
अशक्यं तद्वदस्माभिरयं भारः समाहितः ।। ३८ ।।[०२]

यवक्रीतः

यथा तव निरर्थोऽयमारम्भस्त्रिदशेश्वर ।
तथा यदि ममापीदं मन्यसे पाकशासन ।। ३९ ।।[०३]

क्रियतां यद्भवेच्छक्यं त्वया सुरगणेश्वर ।
वरांश्च मे प्रयच्छान्यान्यैरन्यान्भवितास्म्यति ।। ४० ।।[०४]

लोमशः

तस्मै प्रादाद्वरानिन्द्र उक्तवान्यान्महातपाः ।
प्रतिभास्यन्ति ते वेदाः पित्रा सह यथेप्सिताः ।। ४१ ।।[०५]

यच्चान्यत्काङ्क्षसे कामं यवक्रीर्गम्यतामिति।
स लब्धकामः पितरं समेत्याथेदमब्रवीत् ।। ४२ ।।[०६]

---

(०१) (१)रोद्ध; बद्धुं; for बद्दुं) (२)मार्गः for ओघः ); तपोधन प्रयत्नतः for कथं ); (४)कर्म; कर्तुं for अर्थं० ); समाचर for रभ ),

(०२) ब्राह्मण उ (१)यथैव तव तातेदं ( तपो यथैव तातेदं ); (२)त्वया for तपो ); (३)अशक्यस् (४) आरम्भोयं; परं भारः समाहितः for समु ); गङ्गासेतोश्च बन्धनं ,

(०३) यवक्रीत उं ( उं ); (३) (ए)व हि for यदि ); ममारम्भं for पीदं ),

(०४) (१)कृत्यं च for क्रियतां ); (२)अन्यत् for अन्यं ); त्वया; मह्यं for मया ); (३)प्रदीयन्तां for प्रयच्छान्यान् ); (४)यैरर्थैर्भविता स्मृतिः; यैर्विद्वान्भवितास्म्य ( ता ह्यहं ); हं,

(०५) (२)तपोधनः ( न ); for महा ); (४)यथेप्सितं,

(०६) (१)यान् for यत् ); अन्यं; अन्यान् for अन्यत् ); मन्यसे for काङ्क्षसे ); तात; कामान् for

### यवक्रीतः

प्रतिभास्यन्ति वै वेदा मम तातस्य चोभयोः ।
अति वा(चा)न्यान्भविष्यावो वरा लब्धास्तदा मया ।। ४३ ।।(०१)

### भरद्वाजः

दर्पस्ते भविता तात वराँल्लब्ध्वा यथेप्सितान्।
स दर्पपूर्णः कृपणः क्षिप्रमेव विनङ्क्ष्यसि ।। ४४ ।।(०२)

अत्राप्युदाहरन्तीमा गाथा देवैरुदाहृताः ।
मुनिरासीत्पुरा पुत्र बालधिर्नाम वीर्यवान् ।। ४५ ।।(०३)

स पुत्रशोकादुद्विग्नस्तपस्तेपे सुदुष्करम् ।
भवेन्मम सुतोऽमर्त्य इति तं लब्धवांश्च सः ।। ४६ ।।(०४)

तस्य प्रसादो वै देवैः कृतो न त्वमरैः समः ।
नामर्त्यो विद्यते मर्त्यो निमित्तायुर्भविष्यति ।। ४७ ।।(०५)

### बालधिः

यथेमे पर्वताः शश्वत्तिष्ठन्ति सुरसत्तमाः ।
अक्षयास्तन्निमित्तं मे सुतस्यायुर्भविष्यति ।। ४८ ।।(०६)

---

कामं ); (२)यवक्रिन् गृह्य for गम्य ); (३)लब्धकामः स पितरम् (४) समुपेत्य; समेत्याथ; अभ्युपेत्य; अभ्येत्याथः उपेत्य च; अभिगम्य for उपत्योथ ); इ दमब्रवीत्; वचो० for ततो ),

(०१) यवक्रीत उं ( उ ); (२)पित्रा सह यथेप्सिताः (३)अतीवान्ये; अति चान्यद्;अती वान्यान् भविष्यन्ति
,

(०२) भारद्वाज उं ( उ ); (३)दर्पपूर्णः सुकृपणः; दर्पपूर्णः कृपणकः (४)प्रणश्यति; प्रणश्यसि; विनङ्क्ष्यसि ( ति ); विनश्यति; नशिष्यसि,

(०३) (१) इ मां for इ मा ); (२)गाथां कथांfor गाथा ); उदा हृतां इतिहासं पुरातनं (३)मुनिर् for ऋषिर् ); विप्र ( विद्वान् ); for पुत्र ); (४)वालधिर् विश्रुतः for वीर्य ),

(०४) (२)सुदुष्करं (४)तल् for तं ); इति लब्धवरः ( ०रां ); श्च सः; इति कृत्वा तताप ह,

(०५) (१)तस्य प्रसादाद्; लब्धप्रसाते दैवस्य; वै देवैः for देवैश्च ); (३)न मर्त्यो for नामर्त्यो ),

(०६) (३) क०ख०ग०घ० अक्षयास्तन्निमित्तं वे सुतस्यायुर्भवेद्ध्रुवम् । वालं for बालं ); (४)एतस्यायुर

भरद्वाजः

तस्य पुत्रस्तदा जज्ञे मेधावी क्रोधनस्तदा।
स तच्छ्रुत्वाकरोद्दर्पमृषींश्चैवावमन्यत ।। ४९ ।।(०१)

विकुर्वाणो मुनीनां च व्यचरत्स महीमिमाम्।
आससाद महावीर्यं धनुषाक्षं मनीषिणाम् ।। ५० ।।(०२)

तस्यापचक्रे मेधावी तं शशाप स वीर्यवान्।
भव भस्मेति चोक्तः स न भस्म समपद्यत ।। ५१ ।।(०३)

धनुषाक्षस्तु तं दृष्ट्वा मेधाविनमनामयम्।
निमित्तं महिषैरस्य भेदयामास पर्वतान् ।। ५२ ।।(०४)

लक्षालङ्कारः- निमित्तं महिषैः इत्यत्र अस्य ऋषिपुत्रस्य निमित्तं जीवननिमित्तं महीतलं महिषैर्भेदयामास । महीतलवत् पर्वतवत् मत्पुत्रः जीवतु इति खलु वरः महीतलस्य भेदने पुत्रस्यापि मरणं न्याय्यमभूदिति भावः ।।

* मुनिस्तत्कारणं ज्ञात्वा स्वयं महिषरूपधृक् ।
श्रृङ्गेणाद्रीनचलयत्ततोऽयं भस्मसादभूत् ।(०५)

स निमित्ते विनष्टे तु ममार सहसा शिशुः ।
तं मृतं पुत्रमादाय विललाप ततः पिता ।। ५३ ।।(०६)

---

सुतस्तद्वद्; ब्रह्मचर्यं for सुतस्यायुर् ); भविष्यति; भवेद् ध्रुवं ,

(०१) (१)तथा for तदा ); (२)तदा; तथा for सदा ); (३)तु लब्ध्वा for तच्छ्रुत्वा ); स तु लब्ध दत्त वरो दर्पाद् (४)अत्य० for अव ),

(०२) (१)च for तु ); (२)व्यचरत्स for चरमाणो ); (४)धनु षाख्यं अमर्षणं; तपस्विनं for मनी० ),

(०३) (२)स मन्युमान्; सुदुःखितः; च वीर्यं वान् (३)सन् for स ),

(०४) (१)धनुषाख्यस् , (३) ख०- मुनिस्तत्कारणं ज्ञात्वा स्वयं महिषरूपकधृत् । शृङ्गेणाद्रीनचलयत् ततोऽतयं भस्मसादभूत् ।,

(०५) (३)महर्षिर्; ब्रह्मर्षिर् for महिषैर् ); (४)सादयामास पर्वतान् ( वीर्यवान् ),

(०६) (१)निमित्ते विनष्टे (३)हतं for मृतं ),

लालप्यमानं तं दृष्ट्वा मुनयः परमार्तवत्।
ऊर्चुर्वेदविदः सर्वे गाथां यां तां निबोध मे ॥ ५४ ॥(०१)

न दिष्टमर्थमत्येतुमीशो मर्त्यः कथञ्चन।
महिषैर्भेदयामास धनुषाक्षो महीधरान् ॥ ५५ ॥(०२)

एवं लब्ध्वा वरान्बाला दर्पपूर्णास्तपस्विनः ।
क्षिप्रमेव विनश्यन्ति तथा न स्यात्तथा भवान् ॥ ५६ ॥(०३)

एष रैभ्यो महावीर्यः पुत्रौ चास्य तथाविधौ।
तं यथा पुत्र नाभ्येषि तथा कुर्यास्त्वतन्द्रितः ॥ ५७ ॥(०४)

स हि क्रुद्धः समर्थश्च(स्त्वां) पुत्र पीडयितुं रुषा।
रैभ्यश्चापि तपस्वी च कोपनश्च महानृषिः ॥ ५८ ॥(०५)

यवक्रीतः

एवं करिष्ये मा तापं तात कार्षीः कथञ्चन।
यथा हि मे भवान्मान्यस्तथा रैभ्यः पिता मम ॥ ५९ ॥(०६)

लोमशः

उक्त्वा स पितरं श्लक्ष्णं यवक्रीरकुतोभयः ।

---

(०१) (२)परमार्तवत् ( पुनराद्रवन् ); पर्यवारयन्; पुनराव्रजन्; पुनरब्रवन् (३)सर्वे for पूर्वं ); ऊचुर्वेदविदः सर्वे (४)गाथां यां; गाधया for गाथ ); तं; तां for तन् ); निबोधत; निबोधनं,

(०२) (१)न दृष्टं; तदेष्टम्; निर्दिष्टम् for न दिष्टम् ); मृत्युम् for अर्थम् ); अभ्यति क्रान्तुम् for अर्थमत्येतुम् ); अभ्येतुम् for अत्येतुम् ); (३)महर्षिर् for महिषैर् ); (४)धनुषाख्यो,

(०३) (१)लब्धवरान्; लब्ध्वा वरं बाल्याद्; मौढ्या for बाला ); (२)दर्पपूर्णस् तपस्विनः (३)हि नश्यन्ति; हनिष्यन्ति; नशिष्यन्ति for विन ); (४)नश्येत्; अन्ये न for न स्यात् ); भव for भवान् ),

(०४) (२)पुत्रश्चास्य तथाविधः (३)तान् for तं ); नान्वेषि; नाभ्यैषीस् (४)अतन्द्रितः; स्वतन्द्रितः for त्व ),

(०५) (१)त्वा; च for त्वां ); (२)पुत्रं for पुत्र ); तथा; क्षणात् for रुषा ); (३)रैभ्यश्च; विदग्धश्; वेदवित् for वैद्यश्च ); हि; च; व for अ पि ),

(०६) यवीक्रीत उ ( उ ); (४)पितुर् for पिता ),

विप्रकुर्वनृषीनन्यानतुष्यत्परया मुदा ॥ ६० ॥

अस्मिन् पर्वणि ११०अध्याये ६०श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि दशाधिकशततमोऽध्यायः ॥ ११० ॥

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 111Adhyaya

# १११. एकादशाधिकशततमोऽध्यायः

रैभ्याश्रमे तत्स्नुषायाः परावसुभार्याया दर्शनाज्जातकामेन यवक्रीतेन एकान्ते बलात्कारेण तदुपभोगः ॥ १ ॥ रुदत्या तया निवेदितवृत्तान्तेन रैभ्येण यवक्रीतहननाय जटाभ्यां कृत्यारक्षसोरुत्सर्जनम् ॥ २ ॥ कृत्यया रूपसंपदा संमोह्य कमण्डलुहरणे राक्षसाभिद्रावितेन यवकीतेन स्वपितुरग्निहोत्रगृहप्रवेशः ॥ ३ ॥ तदा अन्धेन द्वारकशूद्रेण निवारितस्य यवक्रीतस्य राक्षसेन हननम् ॥ ४ ॥

लोमशः

चङ्क्रम्यमाणः स तदा यवक्रीरकुतोभयः ।
जगाम माधवे मासि रैभ्याश्रमपदं प्रति ॥ १ ॥(०१)

स ददर्शाश्रमे रम्ये पुष्पितद्रुमभूषिते।
विचरन्तीं स्नुषां तस्य किन्नरीमिव भारत ॥ २ ॥(०२)

यवक्रीस्तामुवाचेदमुपातिष्ठस्व मामिति।
निर्लज्जो लज्जया युक्तां कामेन हृतचेतवः(नः) ॥ ३ ॥(०३)

---

(०१) (१)तु तदा; स यदा; स तथा; सततं (२) अ०ख०यवक्रीतोऽकुतोभयः,यवक्रीतोकुतो (३)मासे for मासि ),

(०२) (१)रम्ये for पुण्ये ); (२)०भूमिके; ०शोभिते (३)दृष्ट्वा; तत्र for तस्य ),

(०३) (१)यवक्रीत for यवक्रीस्ताम्) (४)उपातिष्ठस्व ( मानिनि; भामिनि for मामिति) (४) (आ) तृवृतचेतनः हतचेतनः;) । हृतचेतसः ,

सा तस्य शीलमाज्ञाय तस्माच्छापाच्च बिभ्यती।
**तेजस्वितां च रैभ्यस्य तथेत्युक्त्वाऽऽजगाम ह** ।। ४ ।।(०१)

✻ अथाश्रमपदं प्राप्य यवक्रीतेन याचिता ।

तत एकान्तमुन्नीय मज्जयामास भारत।
**आजगाम तदा रैभ्यः स्वमाश्रममरिन्दम** ।। ५ ।।(०२)

रुदतीं च स्नुषां दृष्ट्वा भार्यामार्तां परावसोः ।
**सान्त्वयञ्श्लक्ष्णया वाचा पर्यपृच्छद्युधिष्ठि** ।। ६ ।।(०३)

सा तस्मै सर्वमाचष्ट यवक्रीभाषितं शुभा।
**प्रत्युक्तं च यवक्रीतं प्रेक्षापूर्वं तथाऽऽत्मना** ।। ७ ।।(०४)

शृण्वानस्यैव रैभ्यस्य यवक्रीत विचेष्टितम्।
**दहन्निव तदा चेतः क्रोधः समभवन्महान्** ।। ८ ।।(०५)

स तदा मन्युनाऽऽविष्टस्तपस्वी कोपनो भृशम्।
**अवलुच्य जटामेकां जुहावाग्नौ सुसंस्कृते** ।। ९ ।।(०६)

ततः समभवन्नारी तस्या रूपेण सम्मिता।
**अवलुच्यापरां चापि जुहावाग्नौ जटां पुनः** ।। १० ।।(०७)

---

(०१) (३)तेजस्विनी; तेजस्विनशू (४) स for ह),

(०२) (१)आनीय; आसाद्य; आनाय्य; आसार्य for उन्नीय ); (२)क्रीडयामास; लज्ज; सज्जं; मर्द; धर्षं (३) ततो for तदा ); (४)स्वमाश्रमपदं तथा,

(०३) (१)रुदतीं च; रोदमानां तु; तां for च ); तदा for स्नुषां ),

(०४) (२)यवक्रीतस्य भाषितं यवक्रीतं (४)प्रेक्ष्य पूर्व यथात्मना तथात्मना; यतात्मनः; महात्मनः ,

(०५) (१)श्रृण्व तश्चैव; श्रृण्वतस्तस्य; श्रृण्वानश्चैव; तच्छ्रुत्वा तस्य (२)यवक्रेस्तद्धि ( स्य ); चेष्टितं ( ष्टनं ); यवक्रीतस्य चेष्टितं,

(०६) (१)भृशं for तदा ); (२)०स्वी कोपनो भृशं (३)अवलुं ( लो ); प्य; अवलुञ्च्य (व्य) (४) सुसंस्कतैः; सुसत्कृते,

(०७) (३)अवलुच्य अवलुञ्च्य अवलुंवय परां for (अ) परां ); चापि for चाथ),

ततः समभवद्रक्षो घोराक्षं भीमदर्शनम्।
**अब्रूतां तौ तदा रैभ्यं किं कार्यं करवावहै ।। ११ ।।**(०१)

तावब्रवीदृषिः क्रुद्धो यवक्रीर्वध्यतामिति।
**जग्मतुस्तौ तथेत्युक्त्वा यवक्रीतजिघांसया ।। १२ ।।**

✻ ततः स्नुषाकृतीकृत्य यवक्रीतमुपागमत् ।

✻ यवक्रीतोऽपि रैभ्यस्य स्नुषां मत्वा जगाम ताम् ।

ततस्तं समुपास्थाय कृत्या सृष्टा महात्मना ।
**कमण्डलुं जहारास्य मोहयित्वेव भारत ।। १३ ।।**(०२)

उच्छिष्टं तु यवक्रीतमपकृष्टकमण्डलुम्।
**तत उद्यतशूलः स राक्षसः समुपाद्रवत् ।। १४ ।।**(०३)

तमाद्रवन्तं(षतन्तं) सम्प्रेक्ष्य शूलहस्तं जिघांसया।
**यवक्रीः सहसोत्थाय प्राद्रवद्येन वै सरः ।। १५ ।।**(०४)

जलहीनं सरो दृष्ट्वा यवक्रीस्त्वरितः पुनः ।
**जगाम सरितः सर्वास्ताश्चाप्यासन्विशोषिताः ।। १६ ।।**(०५)

स काल्यमानो घोरेण शूलहस्तेन रक्षसा।
**अग्निहोत्रं पितुर्भीतः सहसा प्रविवेश ह ।। १७ ।।**(०६)

स वै प्रविशमानस्तु शूद्रेणान्धेन रक्षिणा।

---

(०१) (२)भीमाक्षं धोरदर्शनं; दीप्तास्यं घोरं (३)तं; च for तौ ); (४)करवामहै; वहै वहे,

(०२) (१)सा for तं ); समुपस्थाय; तमुपा (४)इ ह इ व for तु ),

(०३) (२)अपनीतं अपहृत्य; अपकृष्य (३)उद्यम्य शूलं; उद्यम्य शूलः; उद्धृत ,

(०४) (१)तमाव्रजन्तं; तमाद्रवतं; समा पतन्तं (२)शूलपाणिं (४)यत्र for येन ),

(०५) (२)त्वरितं ,

(०६) (३)अग्निहोत्रे (४)समुपाविशत्; प्रविवेश ह ,

निगृहीतो बलाद्वारि सोऽवातिष्ठत पार्थिव ॥ १८ ॥(०१)

निगृहीतं तु शूद्रेण यवक्रीतं स राक्षसः ।
ताडयामास शूलेन स भिन्नहृदयोऽपतत् ॥ १९ ॥

यवक्रीतं स हत्वा तु राक्षसो रैभ्यमागमत्।
अनुज्ञातस्तु रैभ्येण तया नार्या सहावसत् ॥ २० ॥(०२)

अस्मिन् पर्वणि १११अध्याये २०श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि एकादशाधिकशततमोऽध्यायः ॥ १११ ॥

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 112Adhyaya

# ११२. द्वादशाधिकशततमोऽध्यायः

भरद्वाजस्य पुत्रशोकेन विलापः । द्वाररक्षकशूद्रेण निवेदितपुत्रमरणेन भरद्वाजेन रैभ्यस्यापि ज्येष्ठसुतेन हननरूपशापदानम् ॥ १ ॥ पुत्रमरणदुःखितेन भरद्वाजेन तद्देहदहनपूर्वकमग्नौ प्रवेशः ॥ २ ॥

लोमशः

भरद्वाजस्तु कौन्तेय कृत्वा स्वाध्यायमाह्निकम्।
समित्कलापमादाय प्रविवेश स्वमाश्रमम् ॥ १ ॥(०३)

तं स्म दृष्ट्वा पुरा सर्वे प्रत्युत्तिष्ठन्ति पावकाः ।
न त्वेनमुपतिष्ठन्ति हतपुत्रं तदाग्नयः ॥ २ ॥(०४)

---

(०१) (४)वतिष्ठत प्यतिष्ठत; तिष्ठत्तत्रः वारितः; भारत for पार्थिव ),
(०२) (२)आगतः for आगमत् ); (३) च for तु ); (४)तथा for तया ); समाचरत्; सहावसत्,
(०३) (१)भारद्वाजस् (३)समिश्रशम्,
(०४) (१)दृष्ट्वा सर्वे (३)न च; तथा for न तु ); उपतिष्ठन्त; उदतिष्ठन्त; नोपतिष्ठन्ति; उदतिष्ठन्ति

पुत्रमृत्युजमाशौ चं भरद्वाजो न जज्ञिवान् ।
वैकृतं त्वग्निहोत्रे स लक्षयित्वा महातपाः ।
**तमन्धं शूद्रमासीनं गृहपालमथाब्रवीत्** ।। ३ ।।(०१)

किं तु मे नाग्नयः शूद्र प्रतिनन्दन्ति दर्शनम्।
**त्वं चापि न यथापूर्वं कच्चित्क्षेममिहाश्रमे** ।। ४ ।।(०२)

कम्चिन्न रैभ्यं पुत्रो मे गतवानल्पचेतनः ।
**एतदाचक्ष्व मे शीघ्रं न हि शुद्ध्यति मे मनः** ।। ५ ।।(०३)

शूद्रः

रैभ्यं यातो नूनमयं पुत्रस्ते मन्दचेतनः ।
**तथा हि निहतः शेते राक्षसेन बलीयसा** ।। ६ ।।(०४)

प्रकाल्यमानस्तेनायं शूलहस्तेन रक्षसा।
**अग्न्यागारं प्रति द्वारि मया दोर्भ्यां निवारितः** ।। ७ ।।(०५)

ततः स विहताशोऽत्र जलकामोऽशुचिर्ध्रुवम्।
**निहतः सोऽतिवेगेन शूलहस्तेन रक्षसा** ।। ८ ।।(०६)

---

( पुत्रं पचत्वमापन्नं ),
(०१) (१) ख०पुत्रमृत्यकृताशखौचं भरद्वाजो न जज्ञिवान्। चाग्निहोत्रं for त्वग्निहोत्रे ),
(०२) (१)भरद्वाजः /*(१)तु मे; त्विमे for नु मे ),
(०३) (२)मन्द for अल्पं ); (३)सर्वं for शीघ्रं ); (४)शुध्यति मे for मे शुध्यते ),
(०४) (१)यासो for गतो ); अयं; एष for असौ ); स तु रैभ्यो गातो नूनं (२) पुत्रस्ते for सुत ); (३)यथा वि अ भि for हि ),
(०५) (१)परि० for प्रं ); तेनासौ; सहसा (२)तेनायं शूलपाणिना (३)अग्न्यगारं व्रजन्; व्रज for प्रति ); तथा द्वारं for प्रति द्वारि ); (४)शीघ्रं for दोर्भ्यां ),
(०६) (१)सोत्र; चात्र; शेते; यत्र; ()प्यत्र for ह्यत्र ); ततः स वि ( स्म नि; स्म वि ); हताशोत्र; ततो विनिहतः सोत्र; ततः स विहतः शेते; ततः स्म प्रवि शन्नत्र;(३)क०ग०घ०सम्पादितो हि तूर्णोन; ख० संभावितो हि तूर्णोन, (४)हतः स ( स्म ); इति वै तूर्णं; सम्भावितोतिवेगेन; निहतः सोति वेगेन; सभाजयति वेगेन; निहतः सेति वै तूर्णं; हतः स इह वै तूर्ष्णीं; पातितो हि स तृणेन ( शूलेन ); सम्भावितो हि तूर्णं स; ०तोतितूर्णं वै,

भरद्वाजस्तु तच्छ्रुत्वा शूद्रस्य विप्रियं महत्।
गतासुं पुत्रमादाय विललाप सुदुःखितः ।। ९ ।।(०१)

भरद्वाजः

ब्राह्मणानां किलार्थाय ननु त्वं तप्तवांस्तपः ।
द्विजानामनधीता वै वेदाः सम्प्रतिभान्त्विति ।। १० ।।(०२)

तथा कल्याणशीलस्त्वं ब्राह्मणेषु महात्मसु।
अनागाः सर्वभूतेषु कर्कशत्वमुपेयिवान् ।। ११ ।।(०३)

प्रतिषिद्धो मया तात रैभ्यावसथदर्शनात्।
गतवानेव तं द्रष्टुं कालान्तकयमोपमम् ।। १२ ।।(०४)

यः स जानन्महातेजा वृद्धस्यैकं ममात्मजम्।
गतवानेव कोपस्य वशं परमदुर्मतिः ।। १३ ।।(०५)

पुत्रशोकमनुप्राप्त एष रैभ्यस्य कर्मणा।
त्यक्ष्यामि त्वामृते पुत्र प्राणानिष्टतमान्भुवि ।। १४ ।।(०६)

यथाहं पुत्रशोकेन देहं त्यक्ष्यामि किल्बिषात्(षी)।
तथा ज्येष्ठः सुतो रैभ्यं हिंस्याच्छीघ्रमनागसम् ।। १५ ।।(०७)

सुखिनो वै नरा येषां जात्या पुत्रो न विद्यते।

---

(०१) भारद्वाजस् च for तु ); शूद्रस्य तच्छुत्वा तच्छुत्वा; शूद्राद्वै for शूद्रस्य ); शूद्राद्वै; श्रुत्वा तद् for तच्छ्रुत्वा ); महत् for वचः ),

(०२) भरद्वाज उ /*(१)हिता for किला ); (४)भान्ति हि ,

(०३) (३)अनाशाः (४)कथं मृत्युम् for कर्कशत्वम् ); कथं मृत्युवशं गतः ,

(०४) प्रतिषिद्धोसि च मया मा गा रैभ्याश्रमं प्रति ( सुत ); (३)असि for एव );द्रष्ढं; विप्रं for क्षुद्रं

(०५) (१)सं; तु for स ); (४)भृशं for वशं ),

(०६) (१)अनुप्राप्त (३)त्वदृते; त्वत्कृते; त्वां विना for त्वामृते ); (४)इष्टतरान् अहं; भृशं; इमान् for भुवि ),

(०७) (२)अ किल्बिषं; अ किल्बिषी for किल्बिषी ); (३) ज्येष्ठसुतो (४)हन्याच् for हिंस्याच् ),

ते पुत्रशोकमप्राप्य विचरन्ति यथासुखम् ।। १६ ।।[०१]

ये तु पुत्रकृताच्छोकाद्भृशं व्याकुलचेतसः ।
शपन्तीष्टान्सखीनार्तास्तेभ्यः पापतरो नु कः ।। १७ ।।[०२]

परासुश्च सुतो दृष्टः सप्तश्चेष्टः सखा मया।
ईदृशीमापदं कोऽत्र द्वितीयोऽनुभविष्यति ।। १८ ।।[०३]

लोमशः

विलप्यैवं बहुविधं भरद्वाजोऽदहत्सुतम्।
सुसमिद्धं ततः पश्चात्प्रविवेश हुताशनम् ।। १९ ।।[०४]

अस्मिन् पर्वणि११२अध्याये १९श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि द्वादशाधिकशततमोऽध्यायः ।। ११२ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 113Adhyaya

## ११३. त्रयोदशाधिकशततमोऽध्यायः

रैभ्ययाज्येन बृहद्युम्नेन सत्रे सहायत्वेन वृतयोरर्वावसुपरावस्वोस्तदर्थं गमनम् ।। १ ।। भार्यादिदृक्षया पुनराश्रमं गतेन परावसुना रात्रौ मृगचर्मेण कृष्णाजिनसंवीतस्य रैभ्यस्य हननम् ।। २ ।। परीवसुचोदनया बृहद्युम्नो ब्रह्महत्याग्रस्त इति प्रोत्सायमाणेन अर्वावसुना तपः प्रसादितसूर्यादिदेवेभ्यो रैभ्यभरद्वाजयवक्रीतोत्थानादिवर-

(०१) (१)ते for वै ); लोके for येषां० ); (२)जात्या पुत्रो येषां for जात्या ); (३)ये for ते ),
(०२) (३) अ०शपन्ति तीक्ष्णशेकेन सखीनपि विमोहिताः । आप्तान् (आर्ताः) (४) त्र for नु) लो किं (कः),
(०३) (१)परासुं च सुतं दृष्ट्वा (३) ()त्र; हि for नु ); (४) ()नुसहिष्यति,
(०४) लोमश उ /*(१)विला प्यैवं (२)भार महत् for दहत् ),

ग्रहणम् ।। अर्वावसोस्तपः प्रभावेण परावसोर्ब्रह्महत्याविमुक्तिः ।। ३ ।। देवैर्यवक्रीत-दुःखस्य विनोपदेशं वेदाभ्यासफलत्वकथनपूर्वकं रैभ्यभरद्वाजयवक्रीतानामुज्जीवनम् ।। ४ ।।

लोमशः

एतस्मिन्नेव काले तु बृहद्द्युम्नो महीपतिः ।
सत्रं तेने महाभागो रैभ्ययाज्यः प्रतापवान् ।। १ ।।(०१)

तेन रैभ्यस्य वै पुत्रावर्वावसुपरावसू।
वृतौ स(सं)हायौ सत्रार्थं बृहद्द्युम्नेन धीमता ।। २ ।।(०२)

तत्र तौ समनुज्ञातौ पित्रा कौन्तेय जग्मतुः ।
आश्रमे त्वभवद्रैभ्यो भार्या चैव परावसोः ।। ३ ।।(०३)

अथावलोककोऽगच्छद्गृहानेकः परावसुः ।
कृष्णाजिनेन संवीतं ददर्श पितरं वने ।। ४ ।।(०४)

जघन्यरात्रे निद्रान्धः सावशेषे तमस्यपि।
चरन्तं गहनेऽरण्ये मेने स पितरं मृगम् ।। ५ ।।(०५)

मृगं तु मन्यमानेन पिता वै तेन हिंसितः ।
अकामयानेन तदा शरीरत्राणमिच्छता ।। ६ ।।

* ततः समीपमासाद्य पितरं दृष्टवान्हत्तम् ।
* अज्ञानात्पितरं हत्वा मृगबुःद्ध्या परावसुः ।

---

(०१) (३)तेने for आस्ते ); महाभौमो; महाभाग,
(०२) (३)पुत्रार्थं; सत्रार्थं; पुत्रार्थे for सत्रार्थे ),
(०३) (३)चाभवद्; अभवम्; तु भवद् for त्वभवद् ); (४)चैका for चेव ),
(०४) (२)भार्याम् for गृहान् ); एव for एकः ); (४)ततः; मुनेः for वने ),
(०५) (१)जघान रात्रौ; जघन्यरावौ निद्रालुं for निद्रान्धः ); (२)अ थ; च for अ पि ); (३)पुण्ये for रण्ये ),

✻ विलप्य बहुधा राजन्नैभ्यस्य च महात्मनः ।

तस्य स प्रेतकार्याणि कृत्वा सर्वाणि भारत।
पुनरागत्य(म्य) तत्सत्रमब्रवीद्भ्रातरं वचः ।। ७ ।।(०१)

परावसुः

इद्रं दर्म न शक्तस्त्वं वोढुमेकः कथञ्चन।
मया तु हिंसितस्तातो मन्यमानेन तं मृगम् ।। ८ ।।(०२)

सोऽस्मदर्थं व्रतं तात चर त्वं ब्रह्महिंसनम्।
समर्थोऽप्यहमेकाकी कर्म कर्तुमिदं मुने ।। ९ ।।(०३)

अर्वावसुः

करोतु वै भवान्सत्रं बृहद्द्युम्नस्य धीमतः ।
ब्रह्मवध्यां चरिष्येऽहं त्वदर्थं नियतेन्द्रियः ।। १० ।।(०४)

✻ सोऽगच्छद्वनमेकाग्रो ब्रह्महत्याव्रतं चरन्

✻ तच्छ्रुत्वार्वावसुः पश्चत्प्रायश्चित्तं विधाय च ।

लोमशः

स तस्य ब्रह्मवध्यायाः पारं गत्वा युधिष्ठिर ।
अर्वावसुस्तदा सत्रमाजगाम पुनर्मुनिः ।। ११ ।।(०५)

ततः परावसुर्दृष्ध्वा भ्रातरं समुपस्थितम्।

---

(०१) हतस्य; तस्य स; स कृत्वा for स तस्य ); (३)आगत्य सर्वम् for सत्रम् ); (४)ततः for वचः ),

(०२) (३)च for तु ); (४)वै for त ); मन्यमानो वने मृगं; मन्यता तु वने मृगं ( मृगं वने ),

(०३) (१)अर्थं for अर्थं ); भ्रातशू तात for साधु ); (२) ब्रह्महिंसकं; ब्रह्मरक्षणे (३) पि। स्मिः न for हि ),

(०४) (१) (इ)दं for वै ); (३) ब्रह्मवध्यां; ब्रह्मचर्य तै चरिष्ये वै; चरिष्यामि (४) यदर्थ त्वदर्थे निभृतेन्द्रियः,

(०५) (१)तदाः तस्य; यदा for तस्या ); ब्रह्मवध्यायाः ,

बृहद्द्युम्नमुवाचेदं वचनं हषगद्गदम् ।। १२ ।।(०१)

परावसुः

एष ते ब्रह्महा यज्ञं मा द्रष्टुं प्रविशेदिति।
ब्रह्महा प्रेक्षितेनापि पीडयेत्त्वामसंशयम् ।। १३ ।।(०२)

लोमशः

* तच्छ्रुत्वैव तदा राजा प्रेष्यानाह स विट्पते ।

प्रेष्यैरुत्सार्यमाणस्तु राजन्नर्वावसुस्तदा।
मम या(न मया) ब्रह्महत्येयं कृतेत्याह पुनः पुनः ।। १४ ।।(०३)

उच्यमानोऽसकृत्प्रेष्यैर्ब्रह्महन्निति भारत }
नैव स्म प्रतिजानाति ब्रह्मवध्यां स्वयङ्कृताम्।
मम भ्रात्रा कृतमिदं मया स परिमोक्षितः ।। १५ ।।(०४)

स तथा प्रवदन्क्रोधात्तैश्च प्रेष्यैः प्रभाषितः ।
तूष्णीं जगाम ब्रह्मर्षिर्वनमेव महातपाः ।। १६ ।।

उग्रं तपः समास्थाय दिवाकरमथाश्रितः ।
रहस्यवेदं कृतवान्सूर्यस्य द्विजसत्तमः ।। १७ ।।

मूर्तिमांस्तं ददर्शाथ स्वयमग्रभुगव्ययः ।। १८ ।।(०५)

---

(०१) (४)भ्रातरं for वचनं ); परिषद्गतः; हर्षगद्गद ( परिसङ्गतं ),

(०२) (१)वै (forते ); सत्रं (forयज्ञं ); (२) द्रष्ट्वं मा ( असौ न ); (४)नात्र for त्वां न ); असंशयं for न संशयः ),

(०३) (२)राज्ञा ह्यर्वा,

(०४) (२)ब्रह्महा for ब्रह्महन् ); (३)नैवम्; न वै; नैष for नैव ); स्म for स ); स स्म प्रजानाति; अस्मि प्रजानामि; तां स प्रजानाति; वाहं प्रजानामि; सम्प्रति जानाति (४) ब्रह्मवध्यां स ( च ); for तु ); चरितं व्रतं०; परिमोक्षितः; कृतरक्षितं; परिमोक्षितं; परिरक्षितुं,

(०५) ( प्राद्रवत् for प्रवदन् ); आर्तस् for क्रोधात् ); विप्रैः for प्रेष्यैः); स भाषितः; विप्रैश्चैव् विवासितः विप्र for व्रह्य) रहस्यमेवं),

लोमशः

प्रीतास्तस्याभवन्देवाः कर्मणार्वावसोर्नृप।
तं ते प्रवरयामासुर्निरासुश्च परावसुम् ।। १९ ।।[०१]

ततो देवा वरं तस्मै ददुरग्निपुरोगमाः ।
स चापि वरयामास पितुरुत्थानमात्मनः ।। २० ।।[०२]

अनागस्त्वं ततो भ्रातुः पितुश्चास्मरणं वधे।
भरद्वाजस्य चोत्थानं यवक्रीतस्य चोभयोः ।। २१ ।।[०३]

* प्रतिष्ठां चापि वेदस्य सौरस्य द्विजसत्तमः ।
एवमस्त्विति तं देवाः प्रोचुश्चापि वरान्ददुः ।।

* प्रतिष्ठां चापि वेदस्य सौरस्य द्विजसत्तमः ।
* एवमस्त्विति तं देवाः प्रोचुश्चापि वरान्ददुः ।[०४]

ततः प्रादुर्बभूवुस्ते सर्व एव युधिष्ठिर ।
अथाब्रवीद्यवक्रीतो देवानग्निपुरोगमान् ।।

यवक्रीतः

समधीतं मया ब्रह्म व्रतानि चरितानि च ।। २२ ।।

कथं च रैभ्यः शक्तो मामधीयानं तपस्विनम्।
तथायुक्तेन विधिना निहन्तुममरोत्तमाः ।। २३ ।।[०५]

देवाः

---

(०१) (२) कर्मणा सह वासवाः (३) ततस्तं व ( वा );रयामासुर् (४)निरस्तश्च; निरस्य च; निरस्तं च; परासुश्च,

(०२) (२)इन्द्र for अग्नि ),

(०३) (१)अनागास्त्वं; अनागसं ततो for तथा ); (२)च (३)भारद्वा (४)चोद्भवं for चोभयोः ),

(०४) ( प्रीता for प्रोचु० ); ),

(०५) (१)समधीता मया वेदा, (३)तु च for नु),

मैवं कृथा यवक्रीत यथा वदसि वै मुने ।
ऋते गुरुमधीता हि सुखं वेदास्त्वया पुरा ।। २४ ।।(०१)

अनेन तु गुरून्दुःखात्तोषयित्वाऽऽत्मकर्मणा ।
कालेन महता क्लेशाद्ब्रह्माधिगतमुत्तमम् ।। २५ ।।(०२)

लोमशः

यवक्रीतमथोक्त्वैवं देवाः साग्निपुरोगमाः ।
सञ्जीवयित्वा तान्सर्वान्पुनर्जग्मुस्त्रिविष्टपम् ।। २६ ।।(०३)

ततो वै स यवक्रीतो ब्रह्मचर्यं चचार ह ।
अष्टादश च वर्षाणि त्रिशंतं च युधिष्ठिर ।। २७ ।।

* ततो वै स यवक्रीतो ब्रह्मचर्य चचार ह ।
* अष्टौ दश च वर्षाणि त्रिशंतं च युधिष्ठिर ।(०४)

आश्रमस्तस्य पुण्योऽयं सदापुष्पफलद्रुमः ।
अत्रोष्य राजशार्दूल सर्वं पापं प्रमोक्ष्यसि ।। २८ ।।(०५)

अस्मिन् पर्वणि ११३ अध्याये २८ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि त्रय ोदशाधिकशततमोऽध्यायः ।। ११३ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

महाभारततात्पर्यनिर्णये २२ अध्याये

(०१) (१)वेद for कृथा) (३)विना for ऋते) (४)स्वयं for सुखं ),
(०२) (१)गुरुं पूर्वं; गुरून्पूर्वं; गुरुं दुःखात् (२) आ त्म; सुfor स्व ); (४) प्राप्तम् for गतम् ),
(०३) (१)इ दं for (ए) वं ); (२) सेन्द्र; शक्रं; ह्यग्निं; अग्निं; तेग्नि for साग्नि ); (४)त्रिपिष्टपं,
(०४) ( अष्टा for अष्टौ ); अष्टौ दशसहस्राणि त्रिशतं , ),
(०५) (२)सदाफलयुतद्रुमः (४) सर्वपापात्; सर्वं पापं; सर्वपापं; सर्व पापैः प्रमुच्यते; प्रमोक्ष्यसि; विमोक्ष्यसे,

एवं वसत्यमितपौरुषवीर्यसारे
सम्प्राप्य लोमशमुनिः सकलानि तीर्था-
न्याप्तुं स पाण्डुतनयेषु सहाय आसीत् ।। २५७ ।।
पृथ्वीं प्रदक्षिणत एत्य समस्ततीर्थस्नानं यथाक्रमत एव विधाय पार्थाः ।
सम्पूज्य तेषु निखिलेषु हरिं सुभक्तया कृष्णे समर्पयितुमापुरथ प्रभासम् ।
सम्भावनाय सकलैर्यदुभिः समेतःतेषां च रामसहितो हरिराजगाम ।। २५८ ।।
पार्थैः सम्पूजितस्तत्र कृष्णो यदुगणैः सह ।
पार्थान् सम्पूजयामासुर्वृष्णयश्चाऽज्ञया हरेः ।। २५९ ।।
तत्र भीमं तपोवेषं दृष्ट्वाऽतिस्नेहकारणात् ।
दुर्योधनं निन्दयति रामे सात्यकिरब्रवीत् ।। २६० ।।
सर्वे वयं निहत्याद्य सकर्णान् धृतराष्ट्रजान् ।
अभिमन्युं स्थापयामो राज्ये यावत् त्रयोदशम् ।। २६१ ।।
संवत्सरं समाप्यैव पुरं यास्यन्ति पाण्डवाः ।
ततो युधिष्ठिरो राजा राज्यं शासतु पूर्ववत् ।। २६२ ।।
एवं वदत्येव शिनिप्रवीरे जनार्दनः पार्थमुखान्युदीक्ष्य ।
उवाच शैनेय न पाण्डुपुत्राः परेण संसाधितराज्यकामाः ।। २६३ ।।
स्वबाहुवीर्येण निहत्य शत्रूनाप्स्यन्ति राज्यं त इतीरितेऽमुना ।
तथेति पार्था अवदंस्ततस्ते कृष्णं पुरस्कृत्य ययुर्दशार्हाः ।। २६४ ।।

## 03- 04 - 114 Adhyaya

# ११४. चतुर्दशाधिकशततमोऽध्यायः

लोमशचोदनया युधिष्ठिरेण कैलासादिगिरिप्रवशः ।। पाण्डवानामुत्तरदिग्यात्रा लोमशकर्तृकं तद्दुर्गमताकथनम्।। १ ।।

लोमशः

उशीरबीजं मैनाकं गिरिं श्वेतं च भारत ।

समतीतोऽसि कौन्तेय कालशैलं च पार्थिव ।। १ ।।[०१]

एषा गङ्गा सप्तविधा राजते भरतर्षभ।

स्थानं विरजसं पुण्यं यत्राग्निर्नित्यमिध्यते ।। २ ।।[०२]

एतद्वै मानुषेणाद्य न शक्यं द्रष्टुमद्भुतम् ।
समाधिं कुरुताव्यग्रास्तीर्थान्येतानि द्रक्ष्यथ ।। ३ ।।[०३]

* एतद्द्रक्ष्यसि देवानामाक्रीडं चरणाङ्कितम् ।
अतिक्रान्तोऽसि कौन्तेय कालशैलं च पर्वतम् ।।
* एतद् दृश्यति देवानामक्रीडं चरणाङ्कितम् ।
* अतिक्रान्तोऽसि कौन्तेय कालशैलं च पर्वतम् ।।[०४]

श्वेतं गिरिं प्रवेक्ष्यामो मन्दरं चैव पर्वतम् ।

यत्र माणिवरो यक्षः कुबेरश्चैव यक्षराट् ।। ४ ।।[०५]

अष्टाशीतिसहस्राणि गन्धर्वाः शीघ्रगामिनः ।

तथा किम्पुरुषा राजन्यक्षाश्चैव चतुर्गुणाः ।। ५ ।।[०६]

अनेकरूपसंस्थाना नानाप्रहरणाश्च ते ।

यक्षेन्द्रं मनुजश्रेष्ठ माणिभद्रमुपासते ।। ६ ।।[०७]

तेषामृद्धितीवात्र गतौ वायुसमाश्च ते ।

---

(०१) (३)स प्रतीतोस्मि; समतीतोस्मि; समतीताः स्म ( ०स्तु ); (४)भारत; पर्वतं for पार्थिव ); कैलासं चापि पर्वतं,
(०२) (२)भ्राजते for रां ); (३)एतद् for स्थानं ); विरजसो; ०सां पुण्यं for रम्यं ),
(०३) (१) (इ)ह for (अ)द्य) (२) अ०ख०मुच्यते;, शक्यं द्रष्टु उत्तमं; अद्भुत; अच्युत for अप्युत ),
(०४) ( द्रक्ष्यसि अतीव तप्तः for अतिक्रान्तोसि ); महागिरिं for च पर्वतम् ); ,
(०५) (३)मणि चरो; माणिवरो (४)चैव for चापि ),
(०६) (२)गन्धर्वाः शीघ्रगामिनः; ०र्वाः श्रीः ( स्त्री ); विहारिणः; ०र्वाणां विहारिणां (३) चैव for राजन् ),
(०७) (२)तथा for च ते) (३)यक्षेन्द्रा; यक्षं तं पुरुषव्याघ्र ( श्रेष्ठ ); (४)मणिभद्रम्,

स्थानात्प्रच्यावयेयुर्ये देवराजमपि ध्रुवम् ।। ७ ।।[०१]

तैस्तात बलिभिर्गुप्ता यातुधानैश्च रक्षिताः ।
दुर्गमाः पर्वताः पार्थ समाधिं परमं कुरु ।। ८ ।।[०२]

कुबेरसचिवाश्चान्ये रौद्रा मैत्राश्च राक्षसाः ।
तैः समेष्याम कौन्तेय संयतो विक्रमेण च ।। ९ ।।[०३]

कैलासः पर्वतो राजन्षड्योजनसमुच्छ्रितः ।
यत्र देवा समायान्ति विशाला यत्र भारत ।। १० ।।[०४]

असङ्ख्येयास्तु कौन्तेय यक्षराक्षसकिन्नराः ।
नागाः सुपर्णा गन्धर्वाः कुबेरसदनं प्रति ।। ११ ।।[०५]

तान्विगाहस्व पार्थाद्य तपसा च दमेन च ।
रक्ष्यमाणो मया राजन्भीमसेनबलेन च ।। १२ ।।[०६]

स्वस्ति ते वरुणो राजा यमश्च समितिञ्जयः ।
गङ्गा च यमुना चैव पर्वतश्च दधातु ते ।। १३ ।।[०७]

* मरुतश्च सहाश्विभ्यां सरितश्च सरांसि च ।
स्वस्ति देवासुरेभ्यश्च वसुभ्यश्च महाद्युते ।।

---

(०१) (१)अ त्र for अ थ ); अ न्या; अ न्याः अ न्यं for अ ग्र्या); (२) जवे for गतौ ); कुबेरेण समाश्च ते (३)हि च for ये ),
(०२) (१)बहु for बलि ); (४)परमां उत्तमं for परमं ); स समाधिं परां कुरु ,
(०३) (२)भारत for रराक्षसाः); (३)समेष्यामि ष्यसि (४)संयतो विक्रमे भव ( विक्रमेण च );युक्तो विक्रमणो भव ,
(०४) (१)कैलाशः (२)शतो च्छ्रितः; समुच्छ्रितः; गतोच्छ्रितः; शतायतः; गुणान्वितः; शतान्वितः ,
(०५) (४)कुबेरभवनं,
(०६) (१)तं for तान् ); कौन्तेय for पार्थाद्य ); (२)नियमेन for च दमेन ); (३) महाराज for मया राजन् ); (४)भीमार्जुनबलेन च; सेनेन भारत,
(०७) (१)इन्द्रश्च for स्वस्ति ते ); इन्द्रः कुबेरो वरुणो (२)पितृभिः सह; समितिञ्जय (४) सर्वे स्वस्ति ( कालं ); दिशन्तु ते; पर्वताश्चच दिशन्तु ( तथैव ); ते,

✻ मरुतश्च सहाश्विभ्यां सरितश्च सरांसि च ।
स्वस्ति देवासुरेभ्यश्च वसुभ्यश्च महाद्युते ।।(०१)

इन्द्रस्य जाम्बूनदपर्वताद्धि शृणोमि घोषं तव देवि गङ्गे ।

**गोपायैनं त्वं सुभगे गिरिभ्यः सर्वाजमीढापचितं नरेन्द्रम् ।। १४ ।।**

**दरस्व शर्म प्रविविक्षतोऽस्य शैलानिमाञ्छैलसुते नृपस्य। (०२)**

✻ उत्त्वा तथा सागरगां स विप्रो यत्तो भवस्वेति शशास पार्थम्।

✻ उत्त्वा तथा सागरगां स विप्रो यत्तो भवस्वेति शशास पार्थम् ।(०३)

**शिवप्रदा सर्वसरित्प्रधाने सभ्रातृकस्येह युधिष्ठिरस्य ।। १५ ।।**

✻ शिवप्रदा सर्वसरित्प्रधाने सभ्रातृकस्येह युधिष्ठिरस्य ।

## युधिष्ठिरः

**अपूर्वोऽयं सम्भ्रमो लोमशस्य कृष्णां च सर्वे रक्षत मा प्रमादम्।**

**देशो ह्ययं दुर्गतमो मतोऽस्य तस्मात्परं शौचमिहाचरध्वम् ।। १६ ।।(०४)**

## वैशम्पायनः

**ततोऽब्रवीद्भीममुदारवीर्यं कृष्णां यत्तः पालय भीमसेन।**

**शून्येऽर्जुनेऽसन्निहिते च तात त्वामेव कृष्णा भजते भयेषु ।। १७ ।।(०५)**

**ततो महात्मा स यमौ समेत्य मूर्धन्युपाघ्राय विमृज्य गात्रे।**

---

(०१) ( विशां पते for महा );) ,

(०२) (१) क०ख०ग०भरस्व घर्मं पृथिवीक्षीतोऽस्य : घ०भज, नदपर्वताद्वै (३)गोपायेमं त्वं; गोपायैनं त्वं for गोपाययेमं ); ()सु रभ्येः; रिपुभ्यः for गिरिभ्यः ); (४)सर्वाजमीढोपचितं ( तिं ); सदाजमीढं प्रथितं; सर्वाजमीढापचितिं ( तिर् ); (३)ददस्व; भज for भव ); धर्मं ( धर्मात् ); for शर्म ); परिवेक्षतो,

(०३) ( तदा; यथा गां सविता for साग रगां ); शशंस ),

(०४) (२)च कृष्णां प्रमादः (३)दुर्गमो वै for दुर्गतमो ),

(०५) (३)गते for शून्ये ); (४)कृष्णा for कृष्णां ); त्वा मेव कृष्णा भजते भयेषु,

उवाच तौ बाष्पकलं स राजा मा भैष्टमागच्छतमप्रमत्तौ ।। १८ ।।[०१]

अस्मिन् पर्वणि ११४ अध्याये १८ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि च तुर्दशादधिकशततमोऽध्यायः ।। ११४ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 115Adhyaya

# ११५. पञ्चदशाधिकशततमोऽध्यायः

भीमेन दुर्गमे गमनाक्षमतया युधिष्ठिरनिवारितानां द्रौपद्यादीनां वहनाङ्गीकारः ।। १ ।। भीमसेनस्योत्साहः । पथि कुलिन्दाधिपतिना सुबाहुना पूजितैर्युधिष्ठिरादिभिस्तस्मिन् भृत्यवर्गस्थापनपूर्वकमर्जुनदिदृक्षया गन्धमादनहिमालयौ प्रति प्रस्थानम् ।। २ ।।

युधिष्ठिरः

अन्तर्हितानि भूतानि बलवन्ति महान्ति च ।
अग्निना तपसा चैव शक्यं गन्तुं वृकोद ।। १ ।।[०२]

सन्निवर्तय कौन्तेय क्षुत्पिपासे बलाश्रयात्।
ततो बलं च दाक्ष्यं च संश्रयस्व वृकोद ।। २ ।।[०३]

---

(०१) (१)सयमौ for यमजौ ); (२)विमृश्य नेत्रे; गात्रैः (३) अ०क०ख०घ०तौ, तान् for तौ ); हि for स ); (४)मा भष्टमागच्छतमा ( चा ); प्रमत्तौ; मा भैष्टमागच्छतमप्रमादं; मा भैष्टश्चागच्छत चाप्रमत्ताः ( तमाप्रमादाः ०तमाप्रमत्ताः ); मा भैष्टं चागच्छतमग्रमत्तौ ,

(०२) (२)प्रभवन्ति for बलं ); बल वन्ति महान्ति च ,

(०३) (१)संनिवर्तस्व; ०धापय (२)क्षुत्पिपासा बलान्वयात्; से बलाश्रयात् (३)तपो for ततो ); (४) वृकोदर for कुरु ),

ऋषेस्त्वया श्रुतं वाक्यं कैलासं पर्वतं प्रति।
**बुद्ध्या प्रपश्य कौन्तेय कथं कृष्णा गमिष्यति ।। ३ ।।**[०१]

अथवा सहदेवेन धौम्येन च समं विभो।
**सूतैः पौरोगवैश्चैव सर्वैश्च परिचारकैः ।। ४ ।।**[०२]

रथैरश्वैश्च ये चान्ये विप्राः क्लेशासहाः पथि।
**सर्वैस्त्वं सहितो भीम निवर्तस्वायतेक्षण ।। ५ ।।**[०३]

त्रयो वयं गमिष्यामो लघ्वाहारा यतव्रताः ।
**अहं च नकुलश्चैव लोमशश्च महातपाः ।। ६ ।।**[०४]

ममागमनमाकाङ्क्षन्गङ्गाद्वारे समाहितः ।
**वसेह द्रौपदीं रक्षन्यावदागमनं मम ।। ७ ।।**[०५]

**भीमः**

राजपुत्री श्रमेणार्ता दुःखार्ता चैव भारत।
**व्रजत्येव हि कल्याणी श्वेतवाहदिदृक्षया ।। ८ ।।**[०६]

*** अपश्यन्तीह तं वीरमेवमेषा सुदुःखिता ।**
**किं पुनर्नकुलं त्वां च तं च वीरं धनञ्जयम् ।।**
*** तव चाप्यरतिस्तीव्रा वर्तते तमपश्यतः ।**
**गुडाकेशं महात्मानं सङ्ग्रामेष्वपलायिनम् ।।**

---

(०१) (१)श्रुतं त्व ( म ) या लोमशस्य (३)प्रविश्य; प्रपत ,
(०२) (२) अ०सहदेवेन कोन्तैय कृष्णाया च नरोत्तम ।, (ए)व for च ); महात्मना समं विभो सहैव भो; तथा विभो for सहा ); धौम्येन सहिता प्र ( भि ); भो धौम्येन सह कृष्णया (३)सूदैः सूतैः ,
(०३) एतैस् for सर्वैस् ); तु; तां for त्वं ); वीर for भीम ); निवर्त सहितैः ( तः); सर्वैर्यावद्वयमिहागताः ,
(०४) (२)धृतं for यत ),
(०५) (१)समा for ममा ); (३)वसेस्तु; स्त्वं for ह ); रक्ष for रक्षन् ); (४)चा ( आ ); गमनान्,
(०६) भीमसेन उ० ( उ ); (४)वाहनकाङ्क्षया,

* किं पुनः सहदेवं च मां च कृष्णां च भारत।[०१]
गुडाकेशं महात्मानं सङ्ग्रामेष्वपलायिनम् ।।

द्विजाः कामं निवर्तन्तां सर्वे च परिचारकाः ।
सूताः पौरोगवाश्चैव यं च मन्येत नो भवान् ।। १० ।।[०२]

न ह्यहं हातुमिच्छामि भवन्तमिह कर्हिचित्।
शैलेऽस्मिन्राक्षसाकीर्णे दुर्गेषु विषमेषु च ।। ११ ।।[०३]

इयं चापि महाभागा राजपुत्री पतिव्रता।
त्वामृते पुरुषव्याघ्र नोत्सहेद्विनिवर्तितुम् ।। १२ ।।[०४]

तथैव सहदेवोऽयं सततं त्वामनुव्रतः ।
न जातु विनिवर्तेत मनोज्ञो ह्यहमस्य वै ।। १३ ।।[०५]

अपि चात्र महाराज सव्यसाचिदिदृक्षया ।
सर्वे लालसभूताः स्म तस्माद्यास्यामहे सह ।। १४ ।।[०६]

यद्यशक्यो रथैर्गन्तुं शैलोऽयं बहुकन्दरः ।
पद्भिरेव गमिष्यामो मा राजन्विमना भव ।। १५ ।।[०७]

अहं वहिष्ये पाश्चालीं यत्र यत्र न शक्ष्यति ।

---

(०१) (२)वर्तते; पर्व; विद्य for वर्ध ),

(०२) (१)द्विजाः; यथा; तथा for रथाः ); कामान्; कथं for कामं ); (३)सूताः for सूदाः ); (४) मन्यन्ते यदि for यत्र ); वै for नो ); यत्र वै ( था वा; त्र वा ); मन्यते भवान्; यं च मन्येत नो भवान्,

(०३) (३)राक्षसैः कीर्णे for राक्षसा ),

(०४) (१)पाश्चाल च for इयं चापि ); महाराज (२)पति for यत ); (३)त्वदृते; त्वां विना (४)नोत्सहेद्वै निवर्तितुं; नोत्सहेत निव,

(०५) (४)मनोज्ञो for मतज्ञो ); ()स्मि for हि ); अद्य for अस्य ); मनो ह्यस्य विषीदति,

(०६) (१)महाभागा वयं for सह ),

(०७) (४)हि भूः; अ भिभूः for भव ); तस्मात्किं भविता भयं,

इति मे वर्तते बुद्धिर्मा राजन्विमना भव ।। १६ ।।(०१)

सुकुमारौ तथा वीरौ माद्रीनन्दिकरावुभौ ।
दुर्गे सन्तारयिष्यामि यत्राशक्तौ भविष्यतः ।। १७ ।।(०२)

युधिष्ठिरः

एवं ते भाषमाणस्य बलं भीमाभिवर्धताम् ।
यत्त्वमुत्सहसे वोढुं पाञ्चालीं च यशस्विनीम् ।। १८ ।।(०३)

यमजौ चापि भद्रं ते नैतदन्यत्र विद्यते।
बलं तव यशश्चैव धर्मः कीर्तिश्च वर्धताम् ।। १९ ।।(०४)

यत्त्वमुत्सहसे नेतुं भ्रातरौ सह कृष्णया।
मा ते ग्लानिर्महाबाहो मा च तेऽस्तु पराभवः ।(०५)

वैशम्पायनः

ततः कृष्णाब्रवीद्वाक्यं प्रहसन्ती मनोरमा ।। २० ।।(०६)

द्रौपदी

गमिष्यामि न सन्तापः कार्यो मां प्रति भारत ।। २१ ।।(०७)

लोमशः

---

(०१) (१) ख०अहं सक्ष्यामि पाञ्चलीं मा राजन् विमना भव । मध्ये अर्धं नास्ति,(२)रक्षामि; वक्ष्यामि; रक्ष्यामि for वहिष्ये );(२)शक्ष्यते; शक्यते (४)हि भूः; (अ) भिभू for भव )

(०२) (१)महावीर्यौ for तथा वीरौ ); (२)माद्रीनन्दकरौ; ममानद०; माद्र्यानन्द० इ मौ for उ भौ ); (४)यत्रां for यद्य ),

(०३) (३)यत् for यस् ); नेतुं for वोढुं); (४)पाञ्चालीं for द्रौपदीं ); विषमे for विपुले ); पाञ्चालीं च यशस्विनीं; द्रौपदीं विपुलेक्षणां; भ्रातरौ सह कृष्णया; द्रौपदीं विषमेष्वपि,

(०४) (२)अन्यस्य for अन्यत्र ); वर्धते for विद्य० ); (३)तव for च ते ),

(०५) (१)यत् for यस् ); वोढुं for नेतुं ); (२)द्रौपदीं विपुलेध्वनि; भ्रातरौ कृष्णया सह (४) परिश्रमः for परा ),

(०६) (२)मनोरमं; मनोहरा,

(०७) (३)सन्देहः for तापः),

तपसा शक्यते गन्तुं पर्वतो गन्धमादनः ।
तपसा चैव कौन्तेय सर्वे योक्ष्यामहे वयम् ।। २२ ।।(०१)

नकुलः सहदेवश्च भीमसेनश्च पार्थिव ।
अहं च त्वं च कौन्तेय द्रक्ष्यामः श्वेतवाहनम् ।। २३ ।।(०२)

वैशम्पायनः

एवं सम्भाषमाणास्ते सुबाहुविषयं महत् ।
ददृशुर्मुदिता राजन्प्रभूतगजवाजिमत् ।। २४ ।।(०३)

किराततङ्गणाकीर्णं पुलिन्दशतसङ्कुलम् ।
हिमवत्यमरैर्जुष्टं बह्वाश्चर्यसमाकुलम् ।। २५ ।।(०४)

सुबाहुश्चापि तान्दृष्ट्वा पूजया प्रत्यगृह्णत।
विषयान्ते कुलिन्दानामीश्वरः प्रीतिपूर्वकम् ।। २६ ।।(०५)

ततस्ते पूजितास्तेन सर्व एव सुखोषिताः ।
प्रतस्थुर्विमले सूर्ये हिमवन्तं गिरिं प्रति ।। २७ ।।(०६)

इन्द्रसेनमुखांश्चापि भृत्यान्पौरोगवांस्तथा।
सूदांश्च पारिबर्हांश्च द्रौपद्याः सर्वशो नृप ।। २८ ।।(०७)

राज्ञः कुलिन्दाधिपतेः परिदाय महारथाः ।

---

(०१) (२)पर्वते मादनेः पर्वतं मादनं,
(०२) (२)पाण्डव for पार्थिव ),
(०३) (२)सुबाहोर्नगरं; सुबाहु विषयं (३)विविशुर् प्राप्ताश्च for ददृशुर् ),
(०४) (१)किराततङ्क ( ०जग ); णाकीर्णं; किरातगणसङ्कीर्णं तं किरातगणा ( शता ); कीणं; तत्किरात गणा (२)कुलिन्द; पुलिन्दं for कुणिन्द ); हिमवत्यचले जुष्टं; ०वत्परमैर्जुष्टं वत्विदशैर्जुष्टं (४)समन्वितं,
(०५) (२)प्रत्यपूजयत्; प्रत्यगृह्यत पूजयामास भारत (३)कुलिन्दानां०; पुलिन्दानां वसध्वमिति चोवाच,
(०६) (१)ततम् for तत्र ),
(०७) (१)चापि for चैव ); (३)सूतांश्च for सूदांश्च ); पारिबहं; परिचारान्; पा ( प ); रिबर्हान् (४)सहगो for सर्वशो ); तथा for नृप ); द्रौपद्याः सर्वमेव हि ( च ),

**पद्भिरेव महावीर्या ययुः कौरवनन्दनाः ॥ २९ ॥(०१)**

**ते शनैः प्राद्रवन्सर्वे कृष्णया सह पाण्डवाः ।**
**तस्माद्देशात्सुसंहृष्टा द्रष्टुकामा धनञ्जयम् ॥ ३० ॥(०२)**

**अस्मिन् पर्वाणि ११५ अध्याये ३०श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 116Adhyaya

# ११६. षोडशाधिकशततमोऽध्यायः

**धनञ्जयादर्शनदुःखितेन युधिष्ठिरेण भीमं प्रति धनञ्जयप्रशंसनपूर्वकं तद्दर्शनाय गन्धमादनप्रवेशनिश्चयः ॥**

**युधिष्ठिरः**

**भीमसेन यमौ चोभौ पाञ्चालि च निबोधत।**
**नास्ति भूतस्य नाशो वै पश्यतास्मान्वनेचरान् ॥ १ ॥(०३)**

**दुर्बलाः क्लेशिताः स्मेति यद्ब्रवामेतरेतरम्।**
**अशक्येऽपि व्रजामो यद्धनञ्जयदिदृक्षया ॥ २ ॥(०४)**

**तन्मे दहति गात्राणि तूलराशिमिवानलः ।**

---

(०१) (१)रथान् for राज्ञः ); कुलिन्दाधिपतेः; पुलिन्दा; कुलिन्दनृपतेः (३)महावीरा,
(०२) (२)कृष्णामादाय पाण्डवाः (३)तस्मिन्देशे for तस्माशात् ); सम्प्रहृष्टा,
(०३) (१)चैव for चोभौ ); (२) निबोध मे (३)दुःखस्य for भूत० ),
(०४) (१)दुर्बलैः for लाः ); स्मेह for स्मेति ); (२) यद्ब्रु (द्रु)वामे; यद्बुम इ; गच्छाम इ; यद्व्रहामे; यद्व्रजामे०; यद्रवीते for यद्रवीथे० ); यद्ब्रूयां योगमात्मनः; यद्रन्धतान्योन्यमात्मना (३)अशक्येस्मिन्; अशक्योपि व्रजामि; व्रजामः for व्रजाम ); (अ) द्य; यत्; अ त्र for इ ति ); (४)दिदृक्षवः ,

यच्च वीरं न पश्यामि धनञ्जयमुपान्तिकात् ।। ३ ।।[०१]

तस्य दर्शनतृष्णं मां सानुजं वनमास्थितम्।
याज्ञसेन्याः परामर्शः स च वीर दहत्युत ।। ४ ।।[०२]

नकुलात्पूर्वजं पार्थं न पश्याम्यमितौजसम्।
अजेयमुग्रधन्वानं तेन तप्ये वृकोदर ।। ५ ।।[०३]

तीर्थानि चैव रम्याणि वनानि च सरांसि च ।
चरामि सह युष्माभिस्तस्य दर्शनकाङ्क्षया ।। ६ ।।[०४]

पञ्चवर्षाण्यहं वीरं सत्यसन्धं धनञ्जयम्।
यन्न पश्यामि बीभत्सुं तेन तप्ये वृकोद ।। ७ ।।[०५]

तं वै श्यामं गुडाकेशं सिंहविक्रान्तगामिनम्।
न पश्यामि महाबाहुं तेन तप्ये वृकोद ।। ८ ।।

कृतास्त्रं निपुणं युद्धेऽप्रतिमानं धनुष्मताम्।
न पश्यामि कुरुश्रेष्ठ तेन तप्ये वृकोद ।। ९ ।।[०६]

चरन्तमरिसङ्घेषु काले क्रुद्धमिवान्तकम्।
प्रभिन्नमिव मातङ्गं सिंहस्कन्धं धनञ्जयम् ।। १० ।।[०७]

---

(०१) (४)उपान्तिकात् फाल्गुनं तमि हागतं,

(०२) (१)तृष्णार्तः; ०तृष्णान्तः; तृष्णा मां; तृष्णं वै; दृष्टं मां; तुष्ट्या मां तस्यादर्शं नतप्तं मां (२)सानुजो आस्थितः आश्रितं for आस्थितम् ); (४)ह for च ); वीरा; वीरान for वीर ); अ दहत्पुरा for त्युत ); तेन तप्ये वृकोदर,

(०३) (१)बालं for पार्थं ); (२)श्वेताश्वम् for न पश्यामि ); (३)यन्न पश्यामि बीभत्सुं; न वः पश्यामि तं येन,

(०४) (१)तत्तीर्थान्याचरिष्यामि; तीर्थानि च चरिष्यामि,

(०५) (२)मत्तमातगगामिनं,

(०६) (३)नरुश्रेष्ठं; कुरुश्रेष्ठं, (ष्ट) धनुःश्रेष्ट,

(०७) (२)काले for कालं ); क्रुद्धं कालमिवानघ,

यः स शक्रादनवरो वीर्येण द्रविणेन च ।
यमयोः पूर्वजः पार्थः श्वेताश्वोऽमितविक्रमः ।। ११ ।।(०१)

नारायणसमो युद्धे सत्यसन्धो दृढव्रतः ।
तं ममापश्यतो भीम न शान्तिर्हृदयस्य वै ।। १२ ।।(०२)

दुःखेन महताविष्टस्तं न पश्यामि फाल्गुनम्।
अजेयमुग्रधन्वानं तेन तप्ये वृकोदर ।। १३ ।।(०३)

सततं यः क्षमाशीलः क्षिप्यमाणोऽप्यणीयसा।
ऋजुमार्गप्रपन्नस्य शर्मदाताभयस्य च ।। १४ ।।(०४)

स तु जिह्मप्रवृत्तस्य माययाभिजिघांसतः ।
अपि वज्रधरस्यापि भवेत्कालविषोपमः ।। १५ ।।(०५)

* शत्रोरपि प्रपन्नस्य सोऽनृशंसः प्रतापवान्।
दाताभयस्य बीभत्सुरमितात्मा महाबलः ।(०६)
सदा जिष्णुरदीनात्मा महात्मा पाकशासनिः ।। १६ ।।

सर्वेषामाश्रयोऽस्माकं रणेऽरीणां प्रमर्दिता।
आहर्ता सर्वरत्नानां सर्वेषां नः सुखावहः ।। १७ ।।(०७)

---

(०१) (१)स तु for स ); ०वमो for वरो ); (२) च बलेन; विनयेन for द्रवि ),
(०२) ( अपश्यतोद्य न for तं ममापश्यतो ); मे for वै );,
(०३) (२)अ नवर्तिनः; अ नुवर्तिना; अ भि वर्तिना; अ तिवर्तिना निवर्तिना for अ निवर्तिना ); तं न पश्यामि फा ( फ ); ल्गुनं; चिन्तयामि दिवानिशं (४) न तं फल्गुणं; फाल्गुनं ( फ ); तेन तप्ये वृकोदर,
(०४) (१)च; तु for यः); (३)ऋजुरार्त ( र्तः ) ; रार्ति for मार्ग ); प्रवृत्तस्य for प्रपन्नस्य ); (४) भयेषु for अ भयस्य ); यः; वै; सः for च ),
(०५) (२)अ प; अ पि; वि for अ भि ); जिघांसकः (३)आ जौ; अ थ for अ पि ),
(०६) (१) क०ग०अरेरपि प्रपन्नस्य; ख०इदमादिअर्धचतुष्टयं नास्ति, घ०सुरैरपि प्रपन्नस्य, सुरैर्; अरेर् for शत्रोर् ); अभ्यपिप; अप्यभिप for अपि प्रप) (२) स्वाः ( स्व ); नृशंस्यः; स्वानृशंस्यात्; नृशंसस्य; योनृशंसः (३) क०ग०घ०दाताऽभयस्य बीभत्सुर् अदीनात्मा महाबलः । (४)अदीनात्मा for अमितात्मा ),
(०७) (१)संश्रयो; संशये for आश्रयो ),

रत्नानि यस्य वीर्येण दिव्यान्यासन्पुरा मम।
**बहूनि बहुजातीनि यानि प्राप्तः सुयोधनः ॥ १८ ॥**[०१]

यस्य बाहुबलाद्वीर सभा चासीत्पुरा मम।
**सर्वरत्नमयी ख्याता त्रिषु लोकेषु पाण्डव ॥ १९ ॥**

वासुदेवसमं वीर्ये कार्तवीर्यसमं युधि।
**अजेयममितं युद्धे तं न पश्यामि फाल्गुनम् ॥ २० ॥**[०२]

सङ्कर्षणं महावीर्यं त्वां च भीमापराजितम्।
**अनुयातः स्ववीर्येण वासुदेवं च शत्रुहा ॥ २१ ॥**[०३]

यस्य बाहुबले तुल्यः प्रभावे च पुरन्दरः ।
**जवे वायुर्मुखे सोमः क्रोधे मृत्युः सनातनः ॥ २२ ॥**[०४]

ते वयं तं नरव्याघ्रं सर्वे वीर दिदृक्षवः ।
**प्रवेक्ष्यामो महाबाहो पर्वतं गन्धमादनम् ॥ २३ ॥**[०५]

विशाला बदरी यत्र नरनारायणाश्रमः ।
**तं सदाध्युषितं यक्षैर्द्रक्ष्यामो गिरिमुत्तमम् ॥ २४ ॥**[०६]

कुबेरनलिनीं रम्यां राक्षसैरभिसेविताम्।
**पद्भिरेव गमिष्यामस्तप्यमाना महत्तपः ॥ २५ ॥**[०७]

---

(०१) सर्वाणि for रत्नानि ); रत्नानि दिव्यानि रत्नानि; दिग्भ्यश्च; दीप्तानि for दिव्यानि ); (३) बहुजातीनि (४)प्राप for प्राप्तः ),

(०२) (१)अमितं for अजितं ); (४)न तं फाल्गुनं,

(०३) (३)अनुयातः स्व; तु for स ); अनुजातस्य वीर्येण,

(०४) (१)तस्य; ना० for यं ); (२)स्वभावे for प्र ); वा for च ),

(०५) (१)वयं चैते for ते वयं तं ); ते; हि; तु for तं ); (२)वीरं; वीरा for वीर ); दिदृक्षया (३) प्रवेक्ष्यावो; क्ष्याम,

(०६) विशालबदरी यत्र for नर; यत्र ); (४)द्रक्ष्यामि,

(०७) (२)अभिसेवितां; अभिसंवृतां (३)पद्भ्याम् for पद्भिर् ); ष्यामि for ष्यामस् ); (४)तप्यमानो,

**न च यानवता शक्यो गन्तुं देशो वृकोदर ।**
**न नृशंसेन लुब्धेन नाप्रशान्तेन भारत ।। २६ ।।**(०१)

**तत्र सर्वे गमिष्यामो भीमार्जुनगवेषिणः ।**
**सायुधा बद्धनिस्त्रिंशाः सार्धं विप्रैर्महाव्रतैः ।। २७ ।।**(०२)

**मक्षिकादंशमशकान्सिंहान्व्याघ्रान्सरीसृपान्।**
**प्राप्नोत्यनियतः पार्थ नियतस्तान्न पश्यति ।। २८ ।।**(०३)

**ते वयं नियतात्मानः पर्वतं गन्धमादनम्।**
**प्रवेक्ष्यामो मिताहारा धनञ्जयदिदृक्षया(वः) ।। २९ ।।**(०४)

**अस्मिन् पर्वणि ११६अध्याये २९श्लोकाः सन्ति**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि षोडशाधिकशततमोऽध्यायः ।। ११६ ।।**

❇ पाण्डवकर्तृकं गङ्गाया वन्दनम् श्रीविष्णुविहितनरकासुरवधस्य वाराहावतारकृतधरोद्धारस्य च लोमशकर्तृकं वर्णनम्

लोमशः

❇ द्रष्टारः पर्वताः सर्वे नद्यः सपुरकाननाः ।
❇ तीर्थानि चैव श्रीमन्ति स्पृष्टं च सलिलं करैः ।। १ ।।
❇ पर्वतं मन्दरं दिव्यमेष पन्थाः प्रयास्यति।
❇ समाहिता निरुद्विग्नाः सर्वे भवत पाण्डवाः ।। २ ।।

---

(०१) न स ( च ); यानवता; न मया भवता; मनसा भवता for नातप्त० ); शक्यं for शक्यो ); शक्यो गन्तुं देशं गन्तुं; गन्तुं देशो कथश्चन for वृको ); नृशंसेन च लु,
(०२) (१)ततः for तत्र ); (२)गवे for पदै० ); (४)सार्ध for सह ); महात्म धि for व्रतैः ),
(०३) (१)मक्षिका for कान् ); पक्षिकान्दशान्; दशमशकान् for मशकान्दंशान् ); (२)सिंहव्याघ्रान्; सिंहान्व्याघ्रान्; सिंहा न्ययाघ्र; सिंहव्याघ्र; ऋक्षान्व्याघ्रान् (४) नियमस् for नियतस् ); तन् for तान् ); निधावति for न पश्यति ),
(०४) (१)प्रयतात्मानः; संयतां; संहिता; संशिता (४)दिदृक्षया,

✼ अयं देवनिवासो वै गन्तव्यो वो भविष्यति।
✼ ऋषीणां चैव दिव्यानां निवासः पुण्यकर्मणाम्।। ३ ।।
✼ एषा शिवजला पुण्या याति सौम्य महानदी।
✼ बदरीप्रभवा राजन्देवर्षिगणसेविता।। ४ ।।
✼ एषा वैहायसैर्नित्यं बालखिल्यैर्महात्मभिः ।
✼ अर्चिता चोपयाता च गन्धर्वैश्च महात्मभिः ।। ५ ।।
✼ अत्र साम स्म गायन्ति सागणाः पुण्यनिःस्वनाः ।
✼ मरीचिः पुलहश्चैव भृगुश्चैवाङ्गिरास्तथा।। ६ ।।
✼ अत्राह्निकं सुरश्रेष्ठो जपते समरुद्गणः ।
✼ साध्याश्चैवाश्विनौ चैव परिधावन्ति तं तदा।। ७ ।।
✼ चन्द्रमाः सह सूर्येण ज्योर्तीषि च ग्रहैः सह ।
✼ अहोरात्रविभागेन नदीमेनामनुव्रजन्।। ८ ।।
✼ एतस्याः सलिलं मूर्ध्ना(र्ध्नि) वृषाङ्कः पर्यधारयत्।
✼ गङ्गाद्वारे महाभाग येन लोकस्थितिर्भवेत्।। ९ ।।
✼ एतां भगवतीं देवीं भवन्तः सर्व एव हि।
✼ प्रयतेनात्मना तात प्रतिगम्याभिवादत।। १० ।।
✼ तस्य तद्वचनं श्रुत्वा लोमशस्य महात्मनः ।
✼ आकाशगङ्गां प्रयताः पाण्डवास्तेऽभ्यवादयन्।। ११ ।।
✼ अभिवाद्य च ते सर्वे पाण्डवा धर्मचारिणः ।
✼ पुनः प्रयाताः संहृष्टाः सर्वैरृषिगणैः सह ।। १२ ।।
✼ ततो दूरात्प्रकाशन्तं पाण्डुरं मेरुसन्निभम्।
✼ ददृशुस्ते नरश्रेष्ठा विकीर्णं सर्वतोदिशम्।। १३ ।।
✼ तान्प्रष्टुकामान्विज्ञाय पाण्डवान्स तु लोमशः ।
✼ उवाच वाक्यं वाक्यज्ञः शृणुध्वं पाण्डुनन्दनाः ।। १४ ।।

❇ एतद्विकीर्णं सुश्रीमत्कैलासशिखरोपमम्।
❇ यत्पश्यसि नरश्रेष्ठ पर्वतप्रतिमं स्थितम्।। १५ ।।
❇ एतान्यस्थीनि दैत्यस्य नरकस्य महात्मनः ।
❇ पर्वतप्रतिमं भाति पर्वतप्रस्तराश्रितम्।। १६ ।।
❇ पुरातनेन देवेन विष्णुना परमात्मना।
❇ दैत्यो विनिहतस्तेन सुरराजहितैषिणा।। १७ ।।
❇ दशवर्षसहस्राणि तपस्तप्यन्महामनाः ।
❇ ऐन्द्रं प्रार्थयते स्थानं तपःस्वाध्यायविक्रमात्।। १८ ।।
❇ तपोबलेन महता बाहुवेगबलेन च ।
❇ नित्यमेव दुराधर्षो धर्षयन्स दितेः सुतः ।। १९ ।।
❇ स तु तस्य बलं ज्ञात्वा धर्मे च चरितव्रतम्।
❇ भयाभिभूतः संविग्नः शक्र आसीत्तदानघ ।। २० ।।
❇ तेन सञ्चिन्तितो देवो मनसा विष्णुरव्ययः ।
❇ सर्वत्रगः प्रभुः श्रीमानागतश्च स्थितो बभौ।। २१ ।।
❇ ऋषयश्चापि तं सर्वे तुष्टुवुश्च दिवौकसः ।
❇ तं दृष्ट्वा ज्वलमानश्रीर्भगवान्हव्यवाहनः ।। २२ ।।
❇ नष्टतेजाः समभवत्तस्य तेजोऽभिभर्त्सितः ।
❇ तं दृष्ट्वा वरदं देवं विष्णुं देवगणेश्वरम्।। २३ ।।
❇ प्राञ्जलिः प्रणतो भूत्वा नमस्कृत्य च वज्रभृत्।
❇ प्राह वाक्यं ततस्तत्त्वं यतस्तस्य भयं भवेत्।। २४ ।।
❇ विष्णुः,
❇ जानामि ते भयं शक्र दैत्येन्द्रान्नरकात्ततः ।
❇ ऐन्द्रं प्रार्थयते स्थानं तपः सिद्धेन कर्मणा।। २५ ।।
❇ सोऽहमेनं तव प्रीत्या तपः सिद्धमपि ध्रुवम्।

✻ वियुनज्म्यासु(ज्मि) देहाद्देवेन्द्र मुहूर्तं प्रतिपालय।। २६ ।।
✻ तस्य विष्णुर्महातेजाः पाणिना चेतनां हरत्।
✻ स पपात ततो भूमौ गिरिराज इवाहतः ।। २७ ।।
✻ तस्यैतदस्थिसङ्घातं मायाविनिहतस्य वै।
✻ इदं द्वितीयमपरं विष्णोः कर्म प्रकाशते।। २८ ।।
✻ नष्टा वसुमती कृत्स्ना पाताले चैव मज्जिता।
✻ पुनरुद्धरिता तेन वाराहेणैकशृङ्गिणा।। २९ ।।

## युधिष्ठिरः

✻ भगवान्विस्तरेणेमां कथां कथय तत्त्वतः ।
✻ कथं तेन सुरेशेन नष्टा वसुमती तदा।। ३० ।।
✻ योजनानां शतं ब्रह्मन्पुनरुद्धरिता तदा।
✻ केन चैव प्रकारेण जगतो धरणी ध्रुवा।। ३१ ।।
✻ शिवा देवी महाभागा सर्वसस्यप्ररोहिणी।
✻ कस्य चैव प्रभावाद्धि योजनानां शतं गता।। ३२ ।।
✻ केन तद्वीर्यसर्वस्वं दर्शितं परमात्मनः ।
✻ एतत्सर्वं यथातत्त्वमिच्छामि द्विजसत्तम।
✻ श्रोतुं विस्तरशः सर्वं त्वं हि तस्य प्रतिश्रयः ।। ३३ ।।

लोमशः

✻ यत्तेऽहं परिपृष्टोऽस्मि कथामेतां युधिष्ठिर।
✻ तत्सर्वमखिलेनेह श्रूयतां मम भाषतः ।। ३४ ।।
✻ पुरा कृतयुगे तात वर्तमाने भयङ्करे।
✻ यमत्वं कारयामास आदिदेवः पुरातनः ।। ३५ ।।
✻ यमत्वं कुर्वतस्तस्य देवदेवस्य धीमतः ।
✻ न तत्र म्रियते कश्चिज्जायते वा तथाप्युत।। ३६ ।।

✻ वर्धन्ते पक्षिसङ्घाश्च तथा पशुगवेडकम्।
✻ गवाश्वं च मृगाश्चैव सर्वे ते पिशिताशनाः ।। ३७ ।।
✻ तथा पुरुषशार्दूल मानुषाश्च परन्तप।
✻ सहस्रशो ह्ययुतशो वर्धन्ते सलिलं यथा।। ३८ ।।
✻ एतस्मिन्सङ्कुले तात वर्तमाने भयङ्करे।
✻ अतिभाराद्वसुमती योजनानां शतं गता।। ३९ ।।
✻ सा वै व्यथितसर्वाङ्गी भारेणाक्रान्तचेतना।
✻ नारायणं वरं देवं प्रपन्ना शरणं गता।। ४० ।।

पृथिवी

✻ भगवंस्त्वत्प्रसादाद्धि तिष्ठेयं सुचिरं त्विह ।
✻ भारेणास्मि समाक्रान्ता न शक्नोमि स्म वर्तितुम्।। ४१ ।।
✻ ममेमं भगवन्भारं व्यपनेतुं त्वमर्हसि।
✻ शरणागतास्मि ते देव प्रसादं कुरु मे विभो।। ४२ ।।
✻ तस्यास्तद्वचनं श्रुत्वा भगवानक्षरः प्रभुः ।
✻ प्रोवाच वचनं हृष्टः श्रव्याक्षरसमीरितम्।। ४३ ।।

विष्णुः

✻ न ते महि भयं कार्यं भारार्ते वसुधारिणि।
✻ अहमेवं तथा कुर्मि यथा लघ्वी भविष्यसि।। ४४ ।।

लोमशः

✻ स तां विसर्जयित्वा तु वसुधां शैलकुण्डलाम्।
✻ ततो वराहः संवृत्त एकशृङ्गो महाद्युतिः ।। ४५ ।।
✻ रक्ताभ्यां नयनाभ्यां तु भयमुत्पादयन्निव ।
✻ धूमं च ज्वलयँल्लक्ष्म्या तत्र देशे व्यवर्धत।। ४६ ।।
✻ स गृहीत्वा वसुमतीं शृङ्गेणेकेन भास्वता।

✻ योजनानां शतं वीर समुद्धरति सोऽक्षरः ।। ४७ ।।
✻ तस्यां चोद्धार्यमाणायां सङ्क्षोभः समजायत।
✻ देवाः सङ्क्षुभिताः सर्वे ऋषयश्च तपोधनाः ।। ४८ ।।
✻ हाहाभूतमभूत्सर्वं त्रिदिवं व्योम भूस्तथा।
✻ न पर्य वस्थितः कश्चिद्देवो वा मानुषोऽपि वा।। ४९ ।।
✻ ततो ब्रह्माणमासीनं ज्वलमानमिव श्रिया।
✻ देवाः सर्षिगणाश्चैव उपतस्थुरनेकशः ।। ५० ।।
✻ उपसर्प्य च देवेशं ब्रह्माणं लोकसाक्षिकम्।
✻ भूत्वा प्राञ्जलयः सर्वे वाक्यमुच्चारयंस्तदा।। ५१ ।।
✻ लोकाः सङ्क्षुभिताः सर्वे व्याकुलं च चराचरम्।
✻ समुद्राणां च सङ्क्षोभस्त्रिदशेश प्रकाशते।। ५२ ।।
✻ सैषा वसुमती कृत्स्ना योजनानां शतं गता।
✻ किमेतद्दिंक प्रभावेण येनेदं व्याकुलं जगत्।
✻ आख्यातु नो भवाञ्शीघ्रं विसञ्ज्ञाः स्मेह सर्वशः ।। ५३ ।।

ब्रह्मा

✻ असुरेभ्यो भयं नास्ति युष्माकं कुत्रचित्क्वचित्।
✻ श्रूयतां यत्कृतेष्वेष सङ्क्षोभो जायतेऽमराः ।। ५४ ।।
✻ योऽसौ सर्वत्रगः श्रीमानक्षरात्मा व्यवस्थितः ।
✻ तस्य प्रभावात्सङ्क्षोभस्त्रिदिवस्य प्रकाशते।। ५५ ।।
✻ यैषा वसुमती कृत्स्ना योजनानां शतं गता।
✻ समुद्धृता पुनस्तेन विष्णुना परमात्मना।। ५६ ।।
✻ तस्यामुद्धार्यमाणायां सङ्क्षोभः समजायत।
✻ एवं भवन्तो जानन्तु छिद्यतां संशयश्च वः ।। ५७ ।।

देवाः

✻ क्व तद्भूतं वसुमतीं समुद्धरति हृष्टवत्।

✻ तं देशं भगवन्ब्रूहि तत्र यास्यामहे वयम्।। ५८ ।।

ब्रह्मा

✻ हन्त गच्छत भद्रं वो नन्दने पश्यत स्थितम्।

✻ एषोऽत्र भगवाञ्श्रीमान्सुपर्णः सम्प्रकाशते।। ५९ ।।

✻ वाराहेणैव रूपेण भगवाँल्लोकभावनः ।

✻ कालानल इवाभाति पृथिवीतलमुद्धरन्।। ६० ।।

✻ एतस्योरसि सुव्यक्तं श्रीवत्समभिराजते।

✻ पश्यध्वं विबुधाः सर्वे भूतमेतदनामयम्।। ६१ ।।

लोमशः

✻ ततो दृष्ट्वा महात्मानं श्रुत्वा चामन्त्र्य चामराः ।

✻ पितामहं पुरस्कृत्य जग्मुर्देवा यथागतम्।। ६२ ।।

**वैशम्पायनः**

✻ श्रुत्वा तु तां कथां सर्वे पाण्डवा जनमेजय।

✻ लोमशादेशितेनाशु पथा जग्मुः प्रहृष्टवत्।

✻ इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां गन्धमादनप्रवेशेद्विचत्वारिंशदधिकशततमोऽध्यायः ।। १४२ ।।

✻ This Aadya is Mensitioned No. 142 Extra in TRK

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 117Adhyaya

# ११७. सप्तदशाधिकशततमोऽध्यायः

**गन्धमादनं प्रस्थितेपु पाण्डवेषु मध्येमार्ग महावृष्टेः प्रादुर्भावः ।। १ ।। तदा पाद-पाद्यान्तरितैस्तैर्वृष्ट्युपरमे पुनः प्रस्थानम् ।। २ ।।**

**वैशम्पायनः**

**ते शूरास्ततधन्वानस्तूणवन्तः समार्गणाः ।**
**बद्धगोधाङ्गुलित्राणाः खड्गवन्तोऽमितौजसः ।। १ ।।(०१)**

**परिगृह्य द्विजश्रेष्ठाञ्ज्येष्ठाः सर्वधनुष्मताम्।**
**पाञ्चालीसहिता राजन्प्रययुर्गन्धमादनम् ।। २ ।।(०२)**

**सरांसि सरितश्चैव पर्वतांश्च वनानि च ।**
**वृक्षांश्च बहुलच्छायान्ददृशुर्गिरिमूर्धनि ।। ३ ।।**

**नित्यपुष्पफलान्देशान्देवर्षिगणसेवितान्।(०३)**
**आत्मन्यात्मानमाधाय वीरा मूलफलाशिनः ।। ४ ।।**

**चेरुरुच्चावचाकारान्देशान्विषमसङ्कटान्।**
**पश्यन्तो मृगजातानि बहूनि विविधानि च ।। ५ ।।(०४)**

**ऋषिसिद्धामरयुतं गन्धर्वाप्सरसां प्रियम्।**
**विविशुस्ते महात्मानः किन्नराचरितं गिरिम् ।। ६ ।।(०५)**

**प्रविशत्स्वथ वीरेषु पर्वतं गन्धमादनम्।**
**चण्डवातं महद्वर्षं प्रादुरासीत्विशाम्पते ।। ७ ।।(०६)**

---

(०१) (१)वीराः; शूल for शूराः ); बद्धधन्वानः; वरध; पाण्डवा राजन् सज्जध; समवर्तत; आत्तध for ततध ); (२)तुणा; तूणी for तूण ),

(०२) (२)ज्येष्ठाः for श्रेष्ठाः ),

(०३) (१)दिव्य for नित्य ); फलोपेतान् for फलान्देशान् ); देवगन्धर्व,

(०४) (१)शिनः for शनाः ); (४)विषय for विषम ); कण्टकान् for सङ्कटान् ); मृगजातीनि; यूथानि; जालानि विविधानि बहूनि च,

(०५) (४)शिरं; शुभं for गिरिम् ); हिमवन्तं महागिरिं,

(०६) (१)च; अ पि; (ए)व for अ थ ); (३)महावर्षं (४)मही for विशां ),

ततो रेणुः समुद्भूतः सपत्रबहुलो महान्।
पृथिवीं चान्तरिक्षं च द्यां चैव सहसाऽऽवृणोत् ।। ८ ।।(०१)

न स्म प्रज्ञायते किञ्चिदावृते व्योम्नि रेणुना ।
न चापि शेकुस्तत्कर्तुमन्योन्यस्याभिभाषणम् ।। ९ ।।(०२)

न चापश्यंस्ततोऽन्योन्यं तमसावृतचक्षुषः ।
आकृष्यमाणा वातेन साश्मचूर्णेन भारत ।। १० ।।(०३)

द्रुमाणां वातभग्नानां पततां भूतलेऽनिशम् ।
अन्येषां च महीजानां शब्दः समभवन्महान् ।। ११ ।।(०४)

द्यौः स्वित्पतति किं भूमिर्दीर्यते पर्वतो नु किम्।
इति ते मेनिरे सर्वे पवनेनापि मोहिताः ।। १२ ।।(०५)

ते पथानन्तरान्वृक्षान्वल्मीकान्विषमाणि च ।
पाणिभिः परिमार्गन्तो भीता वायोर्निलिल्यिरे ।। १३ ।।(०६)

ततः कार्मुकमादाय भीमसेनो महाबलः ।
कृष्णामादाय सङ्गम्य तस्थावाश्रित्य पादपम् ।। (०७)
धर्मराजश्च धौम्यश्च निलिल्याते महावने ।। १४ ।।

---

(०१) (१)समुद्धृतः (३)चान्तरीक्षं; अन्तरिक्षं ( च ); (४)दिशश्च for द्यां चैव ); सहसा for तमसा ); दिशश्चैव समावृणोत्,
(०२) (१)सं; च; तत् for स्म ); (३)तत् for ते ); (४)अन्योन्यं प्रति;अन्योन्यस्यापि for स्याभि,
(०३) (१) अ पश्यंस्ततो; अ पश्यंश्च ते for अपश्यन्त ते ); न चान्योन्यमप श्यन्त ( तः ); (२)आ वृतं for हतं ); आक्रम्यमाणा; प्रमृद्य०; प्रमृड्य; प्रसृज्य (४)साश्मपूर्णेन,
(०४) (२)निशं for भृशम् ),
(०५) (१)किं पततां for पतति किं ); भूमिर् for भूमौ ); (२)दीर्यते पर्वतो ध्रुवं; च किं for नु किम् ); (४)अ भि अ पि for वि ),
(०६) (१)तद् for ते ); पथा for यथा० ),
(०७) (१)आदाय for उद्यम्य ); (३)आगम्य for आदाय ); सङ्गम्य; त्य for ०त्या ); (४)तथा चाश्रित्य for तस्थावा ); पादपान्,

अग्निहोत्राण्युपादाय सहदेवस्तु पर्वते । [०१]

**नकुलो ब्राह्मणाश्चान्ये लोमशश्च महातपाः ।। १५ ।।**

वृक्षानासाद्य सन्त्रस्तास्तत्र तत्र निलिल्यिरे ।। १६ ।।[०२]

मन्दीभूते तु पवने तस्मिन्रजसि शाम्यति ।

**महद्भिर्पृषतैः धारैर्वर्षमभ्याजगाम ह ।। १७ ।।**[०३]

लक्षालङ्कारः- महद्भिः पृषतैः इत्यत्र 'पृषन्ति बिन्दुपृषतौ' इत्यभिधानात् पृषतैः जलाबिन्दुभिः ।

*** भृशं चटचटाशब्दो वज्राणां क्षिप्यतामिव ।**
**ततस्ताश्चञ्चलाभासश्चेरुरभ्रेषु विद्युतः ।।**

*** भृशं चटचटाशब्दो वज्राणां क्षिप्यतामिव ।**
**ततस्ताः चञ्चलाभासश्चेरुरभ्रे च विद्युतः ।।**

ततोऽश्मसहिता धाराः संवृण्वन्त्यः समन्ततः ।

**प्रपेतुरनिशं तत्र शीघ्रवातसमीरिताः ।। १८ ।।**[०४]

तत्र सागरगा ह्यापः कीर्यमाणाः समन्ततः ।

**प्रादुरासन्सकलुषाः फेनवत्यो विशाम्पते ।। १९ ।।**[०५]

वहन्त्यो वारि बहुलं फेनोडुपपरिप्लुतम् ।

**परिसस्रुर्महाशब्दाः प्रकर्षन्त्यो महीरुहान् ।। २० ।।**[०६]

---

(०१) (२)विलिल्याते (४)च for तु ); पर्वतं,
(०२) (३)आश्रित्य for आसाद्य ); सन्त्रासात् for सन्त्रस्तास् ); (४)वि० for नि० ),
(०३) (१)तु; थ for च ); (३)पूर्णं for तूर्ण ); महद्भिर्जलधारौवैः ( ०धाराभिः ),
(०४) (३)नि for प्र) अशनीस् for अनिशं ); राजन् for तत्र ); (४)तीव्र वातं; दीर्घवायु; खरवायुं,
(०५) (१)तत्र for ततः ); ह्यापः for आपः ); ततस्ताः सागरा ह्यापः; सतताः सागरा ह्यापः (२)किर for कीर्य० ); (३)सुकलुषाः; सकल्माषाः ,
(०६) (१)विपुलं for बहुलं ); (२)फेनो त्तप; फेनोद्रुम; फेनोडुश्च; फेनोडुं च परिष्कृतं; परिच्छदं for

तस्मिन्नुपरते शब्दे वाते च समतां गते ।
गते ह्यम्भसि निम्नानि प्रादुर्भूते दिवाकरे ।। २१ ।।(०१)
निर्जग्मुस्ते शनैः सर्वे समाजग्मुश्च भारत।
प्रतस्थिरे पुनर्वीराः पर्वतं गन्धमादनम् ।। २२ ।।(०२)

अस्मिन् पर्वणि ११७ अध्याये २२ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि सप्तदशाधिकशततमो अध्यायः ।। ११७ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

महाभारततात्पर्यनिर्णये - २२ अध्याये

अतीत्य शर्वश्वशुरं गिरिं ते सुवर्णकूटं निषधं गिरिं च ।
मेरोः प्राच्यां गन्धमादे गिरौ च प्रापुर्बदर्याश्रममुत्तमं भुवि ।। २६७ ।।
तस्मिन् मुनीन्द्रैरभिपूज्यमाना नारायणं पूजयन्तः सदैव ।
चक्रुस्तपो ज्ञानसमाधियुक्तं सुतत्त्वविद्यां प्रतिपादयन्तः ।। २६८ ।।

## 03- 04 - 118 Adhyaya

# ११८.अष्टाधिकशततमोऽध्यायः

**गन्धमादनप्रयाणे गमनाक्षमतया अधःपतनेन मूर्च्छिताया द्रौपद्या पाण्डवैः सलिलसेचनादिना श्रमापनोदनम् ।। पाण्डवानामुपचारेण तस्याः सञ्ज्ञालाभः । १ ।। पाश्चाल्या दुश्चराध्वसश्चरणे चिन्तयमानं युधिष्ठिरं प्रति भीमेन स्वेन घटोत्कचेन वा तस्या वहनोक्तिः ।। २ ।।**

**वैशम्पायनः**

---

परिप्लुतम् ); (३)परिवव्रुर्; पूर्णा महानद्यः; तेजाः (४)महाद्रुमान् for मही ),
(०१) (१)शब्दे for वर्षे ); (३)गर्भे for गते ); गतेम्भसि च for गते ह्यम्भसि ); व्यपयाते च पानीये,
(०२) (१)ततः for शनैः ); सम्प्रा( प्र ); ह ( प ); शंसत ते सर्वे (३)प्रत स्थिरे ( स्थुस्ते ); महावीराः प्रतस्थुर्मुदिता ( स्थुः सहिता ); वीराः (४)सहिता ( मुदिता ); for पर्वतं),

क्रोशमात्रं प्रयातेषु पाण्डवेषु महात्मसु ।
पद्भ्यामनुचिता गन्तुं द्रौपदी समुपाविशत् ।। १ ।।[०१]

श्रान्ता दुःखपरीता च वातवर्षेण तेन च ।
सौकुमार्याच्च पाञ्चाली सम्मुमोह तपस्विनी ।। २ ।।[०२]

सा कम्पमाना मोहेन बाहुभ्यामसितेक्षणा ।
वृत्ताभ्यामनुरूपाभ्यामूरू समवलम्बत ।। ३ ।।[०३]

आलम्बमाना सहितावूरू गजकरोपमौ ।
पपात सहसा भूमौ वेपन्ती कदली यथा ।। ४ ।।[०४]

तां पतन्तीं वरारोहां भज्यमानां लतामिव ।
नकुलः समभिद्रुत्य परिजग्राह वीर्यवान् ।। ५ ।।[०५]

नकुलः

राजन्पञ्चालराजस्य सुतेयमसितेक्षणा ।
श्रान्ता निपतिता भूमौ तामवेक्षस्व भारत ।। ६ ।।[०६]

अदुःखार्हा परं दुःखं प्राप्तेयं मृदुगामिनी ।
आश्वासय महाराज तामिमां श्रमकर्शिताम् ।। ७ ।।[०७]

वैशम्पायनः

---

(०१) (१)मात्रेण; मात्रे तु for मात्रेषु ); क्रोशमात्रं प्रयातेषु; ततः प्रयाता मार्गेषु,
(०२) (२)चा ( भ ); र्दिता for तेन च ); (३)हि for च ); पाञ्चाली तु वरारोहा (४)सा for सं ); तप for यश ),
(०३) (१)पीड्यमाना; कम्प,
(०४) (१)सा भीता for सहितौ ); (२)करि for गज ),
(०५) (२)भज्य मुह्य for सज्ज ),
(०६) (१)पञ्चाल for पाञ्चाल ),
(०७) (२)अनु for मृदु ); (३)०बाहो for राज ); (४)त्वमिमां श्रमकर्षितां,

राजा तु वचनात्तस्य भृशं दुःखसमन्वितः ।
भीमश्च सहदेवश्च सहसा समुपाद्रवन् ॥ ८ ॥[०१]

तामवेक्ष्य तु कौन्तेयो विवर्णवदनां कृशाम्।
अङ्कमानीय धर्मात्मा पर्यदेवयदातुरः ॥ ९ ॥[०२]

युधिष्ठिरः

कथं वेश्मसु गुप्तेषु स्वास्तीर्णशयनोचिता ।
भूमौ निपतिता शेते सुखार्हा वरवर्णिनी ॥ १० ॥[०३]

सुकुमारौ कथं पादौ मुखं च कमलप्रभम् ।
मत्कृतेऽद्य वरार्हायाः श्यामतां समुपागतम् ॥ ११ ॥[०४]

किमिदं द्यूतकामेन मया कृतमबुद्धिना ।
आदाय कृष्णां चरता वने मृगगणायुते ॥ १२ ॥[०५]

सुखं प्राप्स्यसि कल्याणि पाण्डवान्प्राप्य वै पतीन् ।
इति द्रुपदराजेन पित्रा दत्ताऽऽयतेक्षणा ॥ १३ ॥[०६]

तत्सर्वमनवाप्येयं श्रमशोकाध्वकर्शिता ।
शेते निपतिता भूमौ पापस्य मम कर्मभिः ॥ १४ ॥[०७]

---

(०१) (२)शोक दुःख (४)गमन् for द्रवन् ),

(०२) (२)विषण्ण for विवर्ण ); भृशं for कृशाम् ); (३)आदाय; आरोप्य for आनीय ),

(०३) युधिष्ठिर उ for युधिष्ठिरः (३) शेते भूमौ,

(०४) (४)गमत् for गतम् ),

(०५) (३)चरामि कृष्णामा दाय (४)कुले for युते ),

(०६) (१)प्राप्स्यसि for ति ); कल्याणी ( णि ); for पाञ्चाली ); (२)प्राप्य पाडुंसुतान् पतीन् (४)सुता for पित्रा ),

(०७) (१)अनवद्या for अनवाप्य ); (ए)वं; (इ)यं for (ए)व ); (२) शोकाच्च; ०शोकाध्व; ०शोकाद्धि; शोकवि शोकाभि; शोकार्ति for शोकाद्धि ); कर्षिता (४)मम पापस्य कर्मणा for कर्मभिः ),

वैशम्पायनः

तथा लालप्यमाने तु धर्मराजे युधिष्ठिरे ।
धौम्यप्रभृतयः सर्वे तत्राजग्मुर्द्विजोत्तमाः ।। १५ ।।[०१]

ते समाश्वासयामासुराशीर्भिश्चाप्यपूजयन् ।
रक्षोघ्नांश्च तथा मन्त्राञ्जेपुश्चक्रुश्च ते क्रियाः ।। १६ ।।[०२]

पठ्यमानेषु मन्त्रेषु शान्त्यर्थं परमर्षिभिः ।
स्पृश्यमाना करैः शीतैः पाण्डवैश्च मुहुर्मुहुः ।। १६ ।।[०३]

सेव्यमाना च शीतेन जलमिश्रेण वायुना ।
पाञ्चाली सुखमासाद्य लेभे चेतः शनैः शनैः ।। १८ ।।

परिगृह्य च तां दीनां कृष्णामजिनसंस्तरे।
पार्था विश्रामयामासुर्लब्धसञ्ज्ञां तपस्विनीम् ।। १९ ।।[०४]

तस्या यमौ रक्ततलौ पादौ पूजितलक्षणौ।
कराभ्यां किणजाताभ्यां शनकैः संववाहतुः ।। २० ।।[०५]

पर्याश्वासयदप्येनां धर्मराजो युधिष्ठिरः ।
उवाच च कुरुश्रेष्ठो भीमसेनमिदं वचः ।। २१ ।।

युधिष्ठिरः

---

(०१) वैशं उं ( वैशं ); (२)राजपुत्रे for धर्मं ); (४)समा for तत्रा ); महर्षयः for द्विजो ),

(०२) (१)याश्चक्रुः for यामासुः (२) चाशीर्भिशू for आशीर्भिशू ); अ भि for अ पि ); (अ)योज for अ पूज ); आशीर्वादैः सुमङ्गलैः (३)ततो for तथा ); (४)तथा; च वै; च ताः for च ते ); जेपुश्च नियर्तेंद्रियाः,

(०३) (२)शान्त्यर्थे ब्राह्मणैश्च महर्षिभिः (४)पाण्डवास्ते; ०वै सा for वैश्व ),

(०४) (३)पार्था for तद्रा ); (४)मन for तप ),

(०५) (२)पादौ परपुरञ्जयौ (३)किणविद्धा भ्यां; ०बद्धाभ्यां युक्ताभ्यां,

बहवः पर्वता भीम विषमा हिमदुर्गमाः ।
तेषु कृष्णा महाबाहो कथं नु विचरिष्यति ।। २२ ।।(०१)

भीमसेनः

त्वां राजन्राजपुत्रीं च यमौ च पुरुषर्षभ।
स्वयं नेष्यामि राजेन्द्र मा विषादे मनः कृथाः ।। २३ ।।(०२)

हैडिम्बश्च महावीर्यो विहगो मद्बलोपमः ।
वहेदनघ सर्वान्नो वचनात्ते घटोत्कचः ।। २४ ।।(०३)

* एतच्छ्रुत्वा तु वचनं भीमसेनस्य धर्मराट् ।
* भीमं सम्पूजयंस्तुष्ट एवमस्त्वित्यभाषत ।।

अस्मिन् पर्वणि ११८ अध्याये २४ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि सप्तदशाधिकशततमो अध्यायः ।। ११८ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

महाभारततततात्पर्यनिर्णये २२ अध्याये

क्रमेण पार्था अपि शैशिरं गिरिं समासदंस्तत्र कृष्णां सुदुर्गे ।
विषज्जन्तीमीक्ष्य तैः संस्मृतोऽथ हैडिम्ब आयात् सहितो निशाचरैः ।। २६५ ।।
उवाह कृष्णां स तु तस्य भृत्या ऊहुः पार्थांस्ते बदर्याश्रमं च ।
प्राप्यात्र नारायणपूजया कृतस्वकीयकार्या ययुरुत्तरां दिशम् ।। २६६ ।।

## 3- 04 - 119 Adhyaya

# ११९. एकोनविंशत्यधिकशततमो अध्यायः

---

(०१) (२)हि सुदु for हिमदु ) (३)भागा ( भाग ); for बाहोः ),
(०२) (२)भरतर्षभ; भरतर्षभौ; पुरुषर्षभ,
(०३) (१)यो for अ सौ ); हैडिम्ब( बि ); श्च महावीर्यो (२)विहङ्गो राक्षसो ह्यचलोपमः (३)प्रवहेदथ for वहेदनघ ),

भीमसेनस्मरणमात्रसन्निहितेन घटोत्कचेन दुर्गमे पथि द्रौपद्या वहनम् ।। १ ।। तदनुचरै राक्षसैः पाण्डवानां विप्राणां च वहनम् ।। २ ।। सर्वैर्नरनारायणाश्रममेत्य तत्र सुखेन निवासः ।। ३ ।।

### युधिष्ठिरः

धर्मज्ञो बलवाञ्शूरः सत्यो राक्षसपुङ्गवः ।
भक्तोऽस्मानौरसः पुत्रो भीम गृह्णातु माचिरम् ।। १ ।।(०१)

तव बाहुबलेनाह मतिभीमपराक्रम ।
अक्षतः सह पाञ्चाल्या गच्छेयं गन्धमादनम् ।। २ ।।(०२)

### वैशम्पायनः

भ्रातुर्वचनमाज्ञाय भीमसेनो घटोत्कचम् ।
✻ आदिदेश नरव्याघ्रस्तनयं शत्रुकर्शनम्।(०३)
चिन्तयामास बलवान्महाबलपराक्रमम् ।। ३ ।।
घटोत्कचश्च धर्मात्मा स्मृतमात्रः पितुस्तदा ।
कृताञ्जलिरुपातिष्ठदभिवाद्याथ पाण्डवान् ।
उवाच भीमसेनं स पितरं सत्यविक्रमः ।। ४ ।।

---

(०१) (२)सभ्यो; सत्यो for सद्यो ); (४)नेतुमर्हति ( ०सि ); for भीम गृह्णातु ); माचिरं for मातरम् ),

(०२) (१)बाहु for भीम ); सुते for बले ); अ यम् for अ हम् ); (२)नीतो; इतो; भीतो for अति ); वीर्य for भीम ),

(०३) कर्षणः ( कर्शनः ); for कर्शनम् ); उवाच श्लक्ष्णया वाचा सान्त्वपूर्वमिदं वचः; चिन्तयामास तं प्राप्तमित्युवाच वृकोदरः; चिन्तयामास बलवान्महाभीमपराक्रमं ( मः ); ( या समनु for यामास तं);),

घटोत्कचः

आज्ञापय महाबाहो सर्वं कर्तास्त्म्यसंशयम् ।। ५ ।।

वैशम्पायनः

तच्छ्रुत्वा भीमसेनस्तु राक्षसं परिषस्वजे।
चिन्तया समनुप्राप्तमित्युवाच वृकोदरः ।। ६ ।।

भीमसेनः

हैडिम्बेय परिश्रान्ता तव मातापराजित।
त्वं च कामगमस्तात बलवान्वह तां खग ।। ७ ।।(०१)
स्कन्धमारोप्य भद्रं ते मध्येऽस्माकं विहायसा।
गच्छ नीचिकया गत्या यथा चैनां न पीडयेः ।। ८ ।।(०२)

घटोत्कचः

धर्मराजं च धौम्यं च कृष्णां च यमजौ तथा ।
एकोऽप्यहमलं वोढुं किमुताद्य सहायवान् ।
मन्दंमन्दं गमिष्यामि वहन्द्रुपदनन्दिनीम् ।। ९ ।।(०३)

* अन्ये च शतशः शूरा विहङ्गाः कामरूपिणः ।
सर्वान्वो ब्राह्मणैः सार्धं वक्ष्यन्ति सहितानघ ।।
* अन्धे च शतशः शूरा विहगाः कामरूपिणः ।
सर्वान्वो ब्राह्मणैः सार्ध वक्ष्यन्ति सहितानघ ।

---

(०१) भीमसेन उं हैडिबेयं तपस्विनी; अ पराजित for अ पराजिता ); हैडिम्ब तव मातेयं ( बेयं तव माता ); परिश्रान्ता तव स्विनी (३)गतस्; गतिस् for गमस् ); (४) वहतां वरः; वह मातरं; मातरं वह for वह तां खग ); खगः for खग ),
(०२) (१)जननीं; तां मध्ये; तां वीर for भद्रं ते ); (२)अस्माकं च for मध्येस्माकं ); (३)नैचिकयाः नाधि; नीच; नीचतया (४)पीडयेत् for येः ),
(०३) (१)त्वां चापि धर्मराजं च (२)पुत्रौ for पुत्रीं ); कृष्णां च यमजौ तथा; यमौ चापि महाबल (३) हि for पि ); ए नामहं for अ हमलं ); सोढुं for वोढुं ),

वैशम्पायनः

एवमुक्त्वा ततः कृष्णामुवाह स घटोत्कचः ।
पाण्डूनां मध्यगो वीरः पाण्डवानपि चापरे ।। १० ।।(०१)

लोमशः सिद्धमार्गेण जगामानुपमद्युतिः ।
स्वेनैव स प्रभावेण द्वितीय इव भास्करः ।। ११ ।।(०२)

ब्राह्मणांश्चापि तान्सर्वान्समुपादाय राक्षसाः ।
नियोगाद्राक्षसेन्द्रस्य जग्मुर्भीमपराक्रमाः ।। १२ ।।(०३)

एवं सुरमणीयानि वनान्युपवनानि च ।
आलोकयन्तस्ते जग्मुर्विशालां बदरीं प्रति ।। १३ ।।(०४)

ते त्वाशुगतिभिर्वीरा राक्षसैस्तैर्महाजवैः ।
उह्यमाना ययुः शीघ्रं दीर्घमध्वानमल्पवत् ।। १४ ।।(०५)

देशान्म्लेच्छजनाकीर्णान्नानारत्नाकरायुतान् ।
ददृशुर्गिरिपादांश्च नानाधातुसमाचितान् ।। १५ ।।(०६)

आसेविताच्छिपुरुषैर्गन्धर्वैश्च समन्ततः ।*
विद्याधरसमाकीर्णान्युतान्वानरकिन्नरैः ।। १६ ।।(०७)

---

(०१) (३)मध्यतो; मो for गो ); वीर (४)चापरान्; कम्बरे; चाम्बरे for चापरे ),

(०२) (१)स तथा for लोमशः ); (३)तेनैव for स्वे ); अ ति; स; अ भि for आ त्म ); (४)प्रभावेण पावकः for भास्करः ),

(०३) (२)उपादायाथ for समुपादाय ); (३)निदेशाद्राक्ष०,

(०४) (२)वनानि चं सरांसि च; वनानि सरितांसि च (३)ते जग्मुः (४)अनु for प्रति ),

(०५) (१)वीरैः; वीर for वीरा ); (२)ते सु for तैर् ); ०जवैः; भुजैः for ०बलैः ); (४) दीर्घम for महदं ),

(०६) (१)जना०; ०समां; करा for ०गणा० ); (२)नानारत्नगणायुतान् ( कुलान् ); (३)दुर्गाश्च; धात्ंश्च for पादांश्च ); (४)समायुतान्; ०समन्वितान्,

(०७) (१)समा for गणा ); विद्याधरैराचरितान् ( रैः समाकीर्णान् ); (२)युक्तान्; यक्ष for युतान्

✻ तथा किम्पुरुषैश्चैव गन्धर्वैश्च समन्ततत: ।(०१)

मयूरैश्चमरैश्चैव वानरै रुरुभिस्तथा ।

वराहैर्गवयैश्चैव महिषैश्च समावृतान् ॥ १७ ॥

✻ सृमरैश्चमरैश्चैव वानरै रुरुभिस्तथा ।

✻ वराहैर्गवयैश्चैव महिषैश्च समावृतान्

✻ नानाविधैर्मृगैरन्यैरुपेतान्सौम्यदर्शनैः ।

नदीजालसमाकीर्णान्नानापक्षियुतान्बहून् ।
नानाविधमृगैर्जुष्टान्वानरैश्चोपशोभितान् ॥ १८ ॥(०२)

समदेश्चापि विहगैः पादपेरन्वितांस्तथा ।✻(०३)
तेऽवतीर्य बहून्देशानुत्तरांश्च कुरूनपि ॥ १९ ॥

ददृशुर्विविधाश्चर्यं कैलासं पर्वतोत्तमम् ॥ २० ॥(०४)
तस्याभ्याशे तु ददृशुर्नरनारायणाश्रमम् ।

उपेतं पादपैर्दिव्यैः सदापुष्पफलोपगैः ॥ २१ ॥(०५)

ददृशुस्तां च बदरीं वृत्तस्कन्धां मनोरमाम्।

---

); चामरैश्च निषेवितान्,

(०१) (३) आसेविताष्किम्पुरुषैर् (४)ततस्ततः for समन्ततः ),

(०२) (१)नदीजलसमाकीर्णां; नदीशतसमाकीर्णान्; नदीजल; नदाञ्जल०; विद्याधरगणा (२)समाकुलां ०रुतान्बहून्; ०युतान्बहून्; चारणैश्च निषेवितान्; युतान्वानरकिंनरै ०(३)विध for विधेर् ); जुष्टां; घुष्टान् चान्यैर् for जुष्टान् ); (४)चामरै; चारणैः वारणै; उपेता न्सौम्यदर्शनैः,

(०३) ( सदामदैश्च for समदेश्चापि ); अचिन्तान् आवृतान् for अन्वितान् ); ,

(०४) (१)त्वतीत्य; वतीर्य for व्यतीत्य ); (२)प्रति; तथा for अपि ); उत्तमाद्रि ( मर्धि ); समावृ ( यु )तान् (४)कैलाशं पर्वतं गन्धमादनं,

(०५) (१)तस्याभ्यासे थ च for तु ); (३)भूषितं for उपेतं ); रम्यैः for दिव्यैः ); (४)फलान्वितैः; ०फलोपमैः; ०फलोदकैः,

स्निग्धामविरलच्छायां श्रिया परमया युताम् ।। २२ ।।[०१]

पत्रैः स्निग्धैरविरलैरुपेतां मृदुभिः शुभाम् ।

विशालशाखां विस्तीर्णामतिद्युतिसमन्विताम् ।। २३ ।।[०२]

फलैरुपचितैर्दिव्यैराचितां स्वादुभिर्भृशम् ।

मधुस्रवैः सदा दिव्यां महर्षिगणसेविताम् ।। २४ ।।

मदप्रमुदितैर्नित्यं नानाद्विजगणैर्युताम् ।[०३]

अदंशमशके देशे बहुमूलफलोदके ।। २५ ।।[०४]

नीलशाद्वलसंञ्छन्ने देवगन्धर्वसेविते।[०५]

सुसमीकृतभूभागे स्वभावविहिते शुभे ।। २६ ।।[०६]

जातां हिममृदुस्पर्शे देशेऽपहतकण्टके।[०७]

तामुपेत्य महात्मानः सह तैर्ब्राह्मणर्षभैः ।

अवतेरुस्ततः सर्वे राक्षसस्कन्धतः शनैः ।। २७ ।।[०८]

---

(०१) रलच्छाया शाखां वि (३)रम्यस्निग्धघनच्छायां (४)नानाद्विज ( पक्षि ); गणाः (णौर्)युतां ( ०वृतां
(०२) शाखां वि (२)उपेत्य for उपेतां ); शुभैः कृतां for शुभाम् ); निरन्तरफलैः शुभैः ,
(०३) (१)उपचितां for उपचितैर् ); हृद्यैर्; कृत्यैर् for दिव्यैर् ); (२)अमृत for आचितां ); वृतां for भृशम् ); अमृतास्वादसंमितैः; आचितां स्वादुसंमितैः अमृतस्वादुसंनिभैः (३)मधुश्रवैः; ०स्रावैः दिव्यैर् for दिव्यां ); सदा for मद ); नृत्यं for नित्यं ); मुनि भिर्मु ( र्ना ); दितैर्नित्यं; सेवितां मुनिभिर्नित्यं ०गणायुतां,
(०४) (१)सदंश for अदंश ); (२)बहुपुष्प; बहुमूलफलोपमे; ०फलोपगे; फले शुभे समे च सजले ( विषमे ); शुभे,
(०५) (३)शाड्वलं महर्षिगण,
(०६) (१)सङ्काशे सु ( ते सा ); भूमिभागे विशदे (२)विमले; विशदे for विहिते),
(०७) (३)जित जाता; जाती; जातं for जातां ); मृदुहिम (४)दिव्ये for देशे ); पहतं; विह ( विग ); त for पहत ),
(०८) (१)तम् for ताम् ); समेत्य for उपेत्य ); (२)सहितैर्; सहिता for सह तैर् ); ब्राह्मणर्विभिः; णैः सह; णैस्ततः (४)रक्षसां स्कन्धतः; रक्षःस्कन्धगताः,

ततस्तमाश्रमं रम्यं नरनारायणाश्रितम्।
**ददृशुः पाण्डवा राजन्सहिता द्विजपुङ्गवैः ।। २८ ।।**(०१)

तमसा रहितं पुण्यमनामृष्टं रवेः करैः ।
**क्षुत्तृट्शीतोष्णदोषैश्च वर्जितं शोकनाशनम् ।। २९ ।।**(०२)

महर्षिगणसम्बाधं ब्राह्म्यालक्ष्म्या समन्वितम्।
**दुष्प्रवेशं महाराज नरैर्धर्मबहिष्कृतैः ।। ३० ।।**(०३)

बलिहोमार्चितं दिव्यं सुसम्मृष्टानुलेपनम्।
**दिव्यपुष्पोपहारैश्च सर्वतोऽभिविराजितम् ।। ३१ ।।**(०४)

विशालैरग्निशरणैः स्रुग्भाण्डैराचितं शुभैः ।
**महद्भिस्तोयकलशैः कठिनैश्चोपशोभितम् ।। ३२ ।।**

शरण्यं सर्वभूतानां ब्रह्मघोषनिनादितम्।(०५)
**दिव्यमाश्रयणीयं तमाश्रमं श्रमनाशनम् ।। ३३ ।।**(०६)

श्रिया युतमनिर्देश्यं देवचर्योपशोभितम्।(०७)
**फलमूलाशनैर्दान्तैश्चारुकृष्णाजिनाम्बरैः ।। ३४ ।।**(०८)

---

(०१) (१)रम्यं for पुण्यं ); (२) श्रमं; र्जितं; र्चितं; न्वित (४)सहितैर्; सह तैर् for सहिता ); ब्राह्मणर्षभैः; ब्राह्मणर्षिभिः; विप्रपुङ्गवैः ,

(०२) (१)रम्यम्; दिव्यम् for पुण्यम् ); (२)अनास्पृष्टं; नातिस्पृ ( ०सृ ); ष्टं for अनामृष्टं ); (३) शोकैश्च,

(०३) (१)सङ्घुष्टं (२)समावृतं; समाकुलं for समं ); (३)दुष्प्रवेश्यं (४)जनैर्; द्विजैर् for नरैर् );ब्रह्म for धर्मं ),

(०४) (१)न्वितं for र्चितं ); पुण्यं for दिव्यं ); (३)दिव्यं पुष्पविहारैश्च,

(०५) (१)विमलैश्चा ( ०र ); ग्नि (२)स्रग्भाण्डैशू; स्रुग्गन्धैशू चार्चितं; चाचितं for आचितं ); (३)समिद्भिम् for महद्भिस् ); (४)काश्चनै for कठिनै ); विना for निना ),

(०६) (१)च रमणीयं for आश्रयणीयं ); च,

(०७) तद् for तम् ); युक्तम् for युतम् ); (४)तं ( ते ); बदर्योप; देवदर्शोप०; देवदेशोप,

(०८) (२)चारु० for चरि ),

सूर्यवैश्वानरसमैस्तपसा भावितात्मभिः ।
**महर्षिभिर्मोक्षपरैर्यतिभिर्नियतेन्द्रियैः** ।। ३५ ।।[०१]

**ब्रह्मभूतैर्महाभागैरुपेतं ब्रह्मवादिभिः** ।। ३६ ।।[०२]

सोऽभ्यगच्छन्महातेजास्तानृषीन्प्रयतः शुचिः ।
**भ्रातृभिः सहितो धीमान्धर्मपुत्रो युधिष्ठिरः** ।। ३७ ।।[०३]

दिव्यज्ञानोपपन्नास्ते दृष्ट्वा प्राप्तं युधिष्ठिरम् ।
**अभ्यगच्छन्त सुप्रीताः सर्व एव महर्षयः** ।। ३८ ।।

आशीर्वादान्प्रयुञ्जानाः स्वाध्यायनिरता भृशम्।[०४]
**प्रीतास्ते तस्य सत्कारं विधिना पावकोपमाः ।**
**उपाजह्रुश्च सलिलं पुष्पमूलफलं शुचि** ।। ३९ ।।[०५]

स तैः प्रीत्याथ सत्कारमुपनीतं महर्षिभिः ।
**प्रयतः प्रतिगृह्याथ धर्मराजो युधिष्ठिरः** ।। ४० ।।[०६]

तं शक्रसदनप्रख्यं दिव्यगन्धं मनोरमम् ।
**प्रीतः स्वर्गोपमं पुण्यं पाण्डवः सह कृष्णया** ।। ४१ ।।[०७]

विवेश शोभया युक्तं भ्रातृभिश्च सहानघ ।

---

(०१) (४)तापसैर् for तपसा )
(०२) (१)ब्रह्मर्षि for महर्षि ); तपोवृद्धैर् for मोक्षपरैर् ); (२)यतिभिर्नियतात्मभिः ,
(०३) (२)प्रयतः for नि ); (३)कामाद्; श्रीमान्; राजन् for धीमान् ); (४)राजो for पुत्रो ),
(०४) (३)सुप्रीत्या; सहसा for सुप्रीताः ); (४)दिव्या देवमह (३)आशीर्वादं प्रयुञ्जन्तः नियता भृशं,
(०५) (३)उपा for उपा)सु स for च ); (४)फलानि च for फलं शुचि ),
(०६) (१)प्रीतोथ for प्रीत्या ); ब्राह्मणर्क्षिषिभि श्चैव; तदा प्रभूतं सत्कारम् (२)तं महात्म भिः (३) प्रति ( परि ); जग्राह (४)राजो for पुत्रो ),
(०७) (१)ब्रह्म for शक्र ); तं ब्रह्मसदनं क्षिप्रं (२)०गन्ध for गन्धं ); ०हरं for रमम् ); (३) रम्यं; दिव्यं for पुण्यं ),

**ब्राह्मणैर्वेदवेदाङ्गपारगैश्च सहस्रशः ।। ४२ ।।**(०१)

**तत्रापश्यत धर्मात्मा देवदेवर्षिपूजितम् ।**
**नरनारायणस्थानं भागीरथ्योपशोभितम् ।। ४३ ।।**(०२)

✻ पश्यन्तस्ते नरव्याघ्रा रेमिरे तत्र पाण्डवाः ।

**मधुस्रवफलं दिव्यं ब्रह्मर्षिगणसेवितम्।**
**तदुपेत्य महात्मानस्तेऽवसन्ब्राह्मणैः सह ।। ४४ ।।**(०३)

**मुदा युक्ता महात्मानो रेमिरे तत्र ते तदा।**(०४)
**आलोकयन्तो मैनाकं नानाद्विजगणायुतम् ।। ४५ ।।**(०५)

**हिरण्यशिखरं चैव तच्च बिन्दुसरः शिवम् ।**
**भागीरथीं च शीतामसजलां शीवाम् ।। ४६ ।।**(०६)

✻ तस्मिन्विहरमाणाश्च पाण्डवाः सह कृष्णया।

✻ मनोज्ञे काननवरे सर्वर्तुकुसुमोज्ज्वले।

✻ पादपैः पुष्पविकचैः फलभारावनामिभिः ।

✻ शोभिते सर्वतो रम्यैः पुंस्कोकिलगणायुतैः ।

✻ स्निग्धपत्रैरविरलैः शीतच्छायैर्मनोरमैः ।

---

(०१) (२)सहानघः; ०धीः (४)सहाच्युत; सहस्रशः; सहाच्युतं; महाद्युतिः; सहार्चितः,

(०२) (१)अ पश्यत; पश्यत्स for अ पश्यत्स ); (४)गङ्गयैव ( या च ); for भागीरथ्या ); परिप्लुतं for उ पशो ),

(०३) (१)श्रव for स्रव ); फलं दिव्यं for फलां दिव्यां ); तस्मिन्मधुस्रवफलां ( लं ); (२)ब्रह्मर्षि for महर्षि ); सेवितं; भाविनं; भाविनीं; पावनीं (३)तद्; तम् for ताम् ); उत्पत्य; उत्पात्य for उपेत्य ); बदरीं तामुपाश्रित्य ( मुपस्पृश्य; मपाश्रित्य ); (४)तु for ते ); ब्राह्मणैः सह पाण्डवाः; पाण्डवो भ्रातृभिः सह; पाण्डवा ब्राह्मणैः सह,

(०४) ( पाण्डवाः; ते सदा; तत्र ते for ते तदा );,

(०५) (२)नानामृग; धातुसुसंयतं,

(०६) (४)तत्र; मध्ये for तच्च ); शुभं for शिवम् ),

✼ सरांसि च विचित्राणि प्रसन्नसलिलानि च ।
✼ कमलैः सोत्पलैश्चैव भ्राजमानानि सर्वशः ।
✼ पश्यन्तश्चारुरूपाणि रेमिरे तत्र पाण्डवाः ।
✼ पुण्यगन्धःसुखस्पर्शो ववौ तत्र समीरणः ।
✼ ह्लादयन्पाण्डवान्सर्वान्द्रौपद्या सहितान्प्रभो।
✼ भागीरथीं सुतीर्थां च शीतां विमलपङ्कजाम्।(०१)
✼ मणिप्रवालप्रस्तारां पादपैरुपशोभिताम्।
✼ प्राप्य पुण्यां देवनदीं विशालां बदरीं तथा ।(०२)

**दिव्यपुष्पसमाकीर्णां मनःप्रीतिविवर्धिनीम् ।। ४७ ।।**

**वीक्षमाणा महात्मानो विशालां बदरीमनु ।। ४८ ।।**(०३)

**तस्मिन्देवर्षिचरिते देशे परमदुर्गमे ।**
**भागीरथीपुण्यजले तर्पयाश्चक्रिरे तदा ।। ४९ ।।**

**✼ देवानृषींश्च कौन्तेयाः परमं शौचमास्थिताः ।**
**तस्मिन्देवर्षिचरिते देशे परमदुर्गमे ।**
**भागीरथीपुण्यजले तर्पयाश्चक्रिरे तदा ।।**

**देवानृषींश्च कौन्तेयाः परमं शौचमास्थिताः ।** (०४)
**तत्र ते तर्पयन्तश्च जपन्तश्च कुरूद्वहाः ।**
**ब्राह्मणैः सहिता वीरा ह्यवसन्पुरुषर्षभाः ।। ५० ।।**(०५)

---

(०१) (१)उपतीर्थां; सूपतीर्थां सोपतीर्थां; महातीर्थां तपस्तीर्थां for सुतीर्थां च ); (२)सीतां; गीतां; शातां for शीत ); सीतां नामतः विमल पङ्कजां for अ मलजलां शिवाम् ),
(०२) ( अनु for तथा );) (३)स्तीर्णां; विस्तीर्णां; विस्तारां,
(०३) (१)चित्रपुष्पफलाकीर्णां (२)मनःप्रीतिविव; मनसा प्रीतिव ०वर्धिनीं (३)प्रीत्या for ०त्मानो ); प्राप्य ( प्रोष्य ); पुण्यां देवनदीं (४)विशालां बदरीमनु ( रीं तथा ); न्यवसन्पाण्डुनन्दनाः,
(०४) ( जले पुण्ये for पुण्यजले ); पितॄन् for तदा ); वेदान् for देवान् ); चैव हि for ऋषींश्च );
(०५) (१)ऋषीन् for पितॄन् ); तर्पयन्तुः पितॄन्देवान्; ते तर्पयन्तः पितॄन्; तत्र ते तर्पयन्तश्च (२)जपन्तश्च

कृष्णायास्तत्र पश्यन्तः क्रीडितान्यमरप्रभाः ।
विचित्राणि नरव्याघ्रा रेमिरे तत्र पाण्डवाः ।। ५१ ।।(०१)

अस्मिन् पर्वणि ११९अध्याये ५१श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि एक
ेनविंशत्यधिकशततमोऽध्यायः ।। ११९ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

**महाभारततत्तात्पर्यनिर्णये २२ अध्याये १२०- अध्यायः**

एवं बदर्यां विहरत्सु तेषु क्वचिद् रहः कृष्णया वायुसूनौ ।
स्थिते गरुत्मानुरगं जहार महाह्रदाद् वासुदेवासनाग्र्यः ।। २६९ ।।
तत्पक्षपातेन विचालिते तु तस्मिन् गिरौ कमलं हैममग्र्यम् ।
पपात कृष्णाभीमयोः सन्निधाने उद्यद्भानोर्मण्डलाभं सुगन्धम् ।। २७० ।।
दृष्ट्वाऽतिगन्धं वरहेमकञ्जं कुतूहलाद् द्रौपदी भीमसेनम् ।
बहून्ययाचत् तादृशान्यानुभावमविषह्यं जानती देवदैत्यैः ।। २७१ ।।
तयाऽर्थितः सगदस्तुङ्गमेनं गिरिं वेगादारुहद् वायुसूनुः ।
प्रशस्यमानः सुरसिद्धसङ्घैः मृत्नन् दैत्यान् सिंहशार्दूलरूपान् ।। २७२ ।।
आसेदिवांस्तत्र हनूमदाख्यं निजं रूपं प्रोद्यदादित्यभासम् ।
जानन्नप्येनं स्वीयरूपं स भीमश्चिक्रीड एतेन यथा परेण ।। २७३ ।।

## 03- 04 - 120 Adhyaya

# १२०. विंशत्यधिकशततमोऽध्यायः

---

कुरूद्वहाः ( ह ); (३)प्रीत्या for वीरा ); (४)ह्यवसन् for न्यव ); पाण्डुनदनाः for पुरु ),
(०१) (१)कृष्णया for कृष्णायास् ); ते ततस्तत्र ( दर्शयन्तस्ते ); सह पश्यन्तः for तत्र प ); (२)अमितं for अमरं ); क्रीडितान्पुरुषर्षभाः (३)पश्यन्तो हि ( वै ); for विचि ); च रूपाणि; नरव्याघ्र पश्यन्तः पुरुषव्याघा (४)तस्मिन्बहुलपादपे,

**कदाचन पाञ्चाल्त्या भीमसन्निधानं वाय्वानीताद्भुतसौगन्धिकपुष्पदर्शनम् ।। १ ।। तया तादृशबहुपुष्पानयनं प्रार्थितेन भीमेन तदर्थं गमनम् ।। २ ।। भीमसेनस्य सौगन्धिकानयनाय गमनम् । कदलीवने तस्य हनुमता सह समागमश्च । भीमस्य मध्येमार्ग स्वमार्गनिरोधकेन हनूमता सह संवादः ।। ३ ।।**

**वैशम्पायनः**

**तत्र ते पुरुषव्याघ्राः परमं शौचमास्थिताः ।**
**षड्रात्रमवसन्वीरा धनञ्जयदिदृक्षवः ।। १ ।।**

**तस्मिन्विहरमाणाश्च रममाणाश्च पाण्डवाः ।(०१)**
**मानोज्ञे काननवरे सर्वभूतमनोरमे ।। २ ।।(०२)**

**पादपैः पुष्पविकचैः फलभारावनामितैः ।(०३)**
**शोभितं सर्वतो रम्यं पुंस्कोकिलविराजितम् ।**
**स्निग्धपत्रैरविरलैश्शीतच्छायैर्मनोरमैः ।। ३ ।।(०४)**

**सरांसि च विचित्राणि प्रसन्नसलिलानि च ।**
**कमलैस्सोत्पलैस्तत्र भ्राजमानानि सर्वशः ।। ४ ।।**
**पश्यन्तश्चारुरूपाणि रेमिरे तत्र पाण्डवः ।। ५ ।।(०५)**
**पुण्यगन्धस्सुखस्पर्शो ववौ तत्र समीरणः ।**

---

(०१) (१)ततस्ते ( ते तत्र ); (२) परं शौचं समा ( उपा ); श्रिताः (४)दिदृक्षवः रमन्तश्चैव पाण्डवाः पाण्डवाः सह कृष्णया,

(०२) (१)मनोज्ञ; मनोज्ञैः for मनोज्ञे ); काननोद्देशे; ; कानने देशे; काननवने (२)र्तुकुसुमान्विते ( सर्वं तु कुसुमोज्जलं ); सर्वर्तुकुसुमोज्ज्वे लैः सर्वर्तुकुसुमायुते; सर्वत्र कुसुमाचिते; सर्वभूतमनोहरे,

(०३) (३)विकचैः पुष्पैः for पुष्पं ); (४)वि for अ व ); नामिभिः,

(०४) (१)शोभितैः ते; तान्; तः तु चलं; पर्वतं; पर्वतान्; पर्वतो; पर्वते for सर्वतो ); रम्यं for रम्यैः ); (२)कुलाकुलं; ०कुलावृतं; लायुतैः; गणायुतैः शतायुतैः; गणैर्युतं; रवाकुलं,

(०५) (३)चैव for तत्र ); (४)नानापुष्पसम न्वितैः,

ह्लादयन्पाण्डवान्सर्वान्सकृष्णान्सद्विजर्षभान् ।। ६ ।।(०१)

ततः पूर्वोत्तरे वायुः प्लवमानो यदृच्छया।

सहस्रपत्रमर्काभं दिव्यं पद्ममुपाहरत् ।। ७ ।।(०२)

तदवैक्षत पाञ्चाली दिव्यगन्धं मनोरमम्।

अनिलेनाहृतं भूमौ पतितं जलजं शुचि ।। ८ ।।(०३)

तच्छुभा शुभमासाद्य सौगन्धिकमनुत्तमम्।

अतीव मुदिता राजन्भीमसेनमथाब्रवीत् ।। ९ ।।(०४)

द्रौपदी

पश्य दिव्यं सुरुचिरं भीम पुष्पमनुत्तमम्।

गन्धसंस्थानसम्पन्नं मनसो मम नन्दनम् ।। १० ।।(०५)

इदं च धर्मराजाय प्रदास्यामि परन्तप ।

हरेदं मम कामाय काम्यके पुनराश्रमे ।(०६)

गृह्यापराणि पुष्पाणि बहूनि पुरुषर्षभ ।। ११ ।।(०७)

यदि तेऽहं प्रिया पार्थ बहूनीमान्युपाहर ।

---

(०१) (१)पुण्यगन्ध (२)शीतस्तत्रा निलो ववौ (३)वीरान् for सर्वान् ); (४)सहृष्टान् for सकृष्णान् ); द्रौपद्या सहितान्प्रभो,

(०२) (१)तत्र for ततः ); पूर्वोत्तरे; सर्वोत्तरो (२)वहं; म्लध प्लव for पव ); आनयत्पुष्पमुत्तमं (३) आदाय for अर्काभं ); (४) क०ख०ग०पुष्पमुदाहरत्; घ० पद्ममुदावहत्, दिव्यपद्मम्; दिव्यपुष्पम्; दिव्यं पुष्पम्; दिव्यं गन्धम् उपाहरत्; उदाहरत्; उपावहत्,

(०३) (१)तम्; ततो for तद् ); अपश्यच्च; अवैक्षत for अपश्यत ); (२)गन्ध for गन्धं ); हरं for रमम् ); (३)अनिलाद् for लेन ); (४)जलजं पतितं शुचि,

(०४) (१)शुभाबुजम् for शुभा शुभम् ); (२)अनूपमं for अनुत्तमम् ),

(०५) द्रौपद्युवाच; पाञ्चाली (३)पत्रसंस्थानसञ्छन्नं (४)मनो हृदय; मनोनयन for मनसो मम ),

(०६) (१)इदं च; एतद्वै for एतत्तु ),

(०७) (३) हरेदं मम कामाय; प्रीतये मम नेष्यामि ( पुनरेष्यामि ); (४)काम्यकं पुनराश्रमं,),

**तान्यहं नेतुमिच्छामि काम्यकं पुनराश्रमम् ।। १२ ।।(०१)**

**वैशम्पायनः**

**एवमुक्त्वा शुभापाङ्गी भीमसेनमनिन्दिता।**
**जगाम पुष्पमादाय धर्मराजाय तत्तदा ।। १३ ।।(०२)**

अभिप्रायं तु विज्ञाय महिष्याः पुरुषर्षभः ।
**प्रियायाः प्रियकामः स प्रायाद्भीमो महाबलः ।। १४ ।।(०३)**

वातं तमेवाभिमुखो यतस्तत्पुष्पमागतम् ।
**आजिहीर्षुर्जगामाशु स पुष्पाण्यपराण्यपि ।। १५ ।।(०४)**

**रुक्मपृष्ठं धनुर्गृह्य शरांश्चाशीविषोपमान् ।**
**मृगराडिव सङ्क्रुद्धः प्रभिन्न इव कुञ्जरः ।। १६ ।।**

* व्यनदत्स महानादं भीमसेनो महाबलः ।
* ददृशुः सर्वभूतानि महाबाणधनुर्धरम्।
* न ग्लानिर्न च वैक्लव्यं न भयं न च सम्भ्रमः ।
* कदाचिज्जुषते पार्थमात्मजं मातरिश्वनः ।
* ददृशुः सर्वभूतानि महाबाणधनुर्धरम् ।
* न ग्लानिर्न च वैक्लव्यं न भयं न च सम्भ्रमः ।
* कदाचिज्जद्धषते पार्थमात्मजं मातरिश्वनः ।

**द्रौपद्याः प्रियमन्विच्छन्स बाहुबलमाश्रितः ।**

---

(०१) (१)यदि भीम प्रिया तेहं (२)अ न्यानि for इ मानि ),
(०२) (१)शुभापाङ्गी for तु पाञ्चाली ); धर्मराजाय पुष्पमादाय भामिनी; तत्तथा for तत्तदा ),
(०३) (२)भरतर्षभः; पुरुषर्षभ (४)प्रायाद्भीमो महाबलः; भीमसेनः पराक्रमी,
(०४) (१)मुखं (मुखो) (४)च for अ पि ),

**व्यपेतभयसम्मोहः शैलमभ्यपतद्बली ।। १७ ।।(०१)**

**लतागुल्मतृणच्छन्नम् इन्द्रनीलशिलातलम् ।**

✻ स ते द्रुमलतागुल्मच्छन्नं नीलशिलातलम्।

**गिरिं चचारारिहरः किन्नराचरितं शुभम् ।। १८ ।।**

**वैशम्पायनः**

**नानावर्णधरैश्चित्रं धातुद्रुममृगाण्डजैः ।**
**सर्वभूषणसम्पूर्णं भूमेर्भुजमिवोच्छ्रितम् ।। १९ ।।(०२)**

**सर्वत्र रमणीयतेषु गन्धमादनसानुषु।**
**सक्तचक्षुरभिप्रायान्हृदयेनानुचिन्तयन् ।। २० ।।(०३)**

**पुंस्कोकिलनिनादेषु षट्पदाचरितेषु च ।**
**बद्धश्रोत्रमनश्चक्षुर्जगामामितविक्रमः ।। २१ ।।(०४)**

**आजिघ्रन्स महातेजाः सर्वर्तुकुसुमोद्भवम्।**
**गन्धमुद्धतमुद्दामो वने मत्त इव द्विपः ।। २२ ।।(०५)**

✻ वीज्यमानः सुपुण्येन नानाकुसुमगन्धिना।
( द्रुमसु for कुसुमं );

**पितुः संस्पर्शशीतेन गन्धमादनवायुना ।**
**ह्रियमाणश्रमः पित्रा सम्प्रहृष्टतनूरुहः ।। २३ ।।**

**स यक्षगन्धर्वसुरब्रह्मर्षिगणसेवितम् ।**

---

(०१) (२)सु; स for स्व ); (३)बल for भय ); (४)अभ्य ( भ्या ); गमद् for पतद् ); तस्मिच्छैलेपतद्बली,

(०२) (३)सम्पन्नं,

(०३) (१)सर्वत्र for सर्वर्तु ); रमणीयं च for रमणीयेषु ); (३)रक्तचक्षुर्; स गृहीतुम् for सक्तं ); अभिप्रायान्; प्रायो प्रायात् for प्रायं ); (४)कमलानि for हृदयेन ); आ सु for अ नु ),

(०४) (२)दाचरितेषु for दाभिरुतेषु ); (३) दधत् for बद्ध ),

(०५) (१)आजिघ्रन्स for जिघ्र माणो ); (३)उद्ध ( द्ध ); तम् for उद्दामम् ),

**विलोकयामास तदा पुष्पहेतोररिन्दमः ।। २४ ।।**[०१]

**विषमञ्छदैरचितैरनुलिप्त इवाङ्गुलैः ।**

**वलिभिर्धातुविच्छेदैः काञ्चनाञ्जनराजतैः ।। २५ ।।**[०२]

**सपक्षमिव नृत्यन्तं पार्श्वलग्नैः पयोधरैः ।**
**मुक्ताहारैरिव चितं च्युतैः प्रस्रवणोदकैः ।। २६ ।।**[०३]

**अभिरामदरीकुञ्जनिर्झरोदककन्दरम् ।**
**अप्सरोनूपुररवैः प्रनृत्तवरबर्हिणम् ।। २७ ।।**[०४]

**दिग्वारणविषाणाग्रैर्घृष्टोपलशिलातलम् ।**

**स्रस्तांशुकमिवाक्षोभ्यैर्निम्नगानिःसृतैर्जलैः ।। २८ ।।**[०५]

**सशष्पकवलैः स्वस्थैरदूरपरिवर्तिभिः ।**

**भयानभिज्ञैर्हरिणैः कौतूहलनिरीक्षितः ।। २९ ।।**[०६]

**चालयान स्व(यन्नुरु)वेगेन लताजालान्यनेकशः ।**
**आक्रीडमानो हृष्टात्मा श्रीमान्वायुसुतो ययौ ।। ३० ।।**[०७]

**प्रियामनोरथं कर्तुमुद्यतश्चारुलोचनः ।**

---

(०१) (१)गन्धर्वप्रभं; गधर्वपुरं; सुरः अ सुर गन्धर्व रक्षोगन्धर्व for गन्धर्वसुर ); (२)महर्षि for ब्रह्मर्षि ); (३)विलोड विलोळं; विलोक गिरिं for तदा ),
(०२) (१)च्छदै; ०च्छद for च्छेद ); रुचिरैर्; रहितैर् for रचितैर् ); (२)लित इव for लिप्तमिव ); (३)बलिभिर् विषमैर् for विमलैर् ); (४)राजितैः ,
(०३) (१)सक्तैः for लग्नै );(२) क०ख०ग०घ०पार्श्वसक्तैः, (३)विरचितं; उप for इव चितं ); (४)च्युत; धूतैः for च्युतैः ); प्रश्रवं for प्रस्रवं ),
(०४) (१)दरी for नदी ); कुञ्जं; दुर्गाः; फूलं for कुञ्ज ); (२)(अ)तिभनोहर; प्रश्चवणोदर निर्क्षरोदक; निर्वारोदक for निर्झरोदर ); कुञ्जरं; मन्दिरं for कन्दरम् ); (३)साप्सरो for अप्सरो ); सा ( अ ); प्सरोनूपरारावैः; नूपुररव (४)वरं मिव; इव for बहु ); कदरं for बर्हिणम् ),
(०५) (१)वि षाणाग्र (३)अक्षोभ्यं; भ्यां for भ्यैर् ); (४) वि for निः ),
(०६) (३)भयप्राज्ञैश्च; भयानभिज्ञैर्,
(०७) (१)उरु; चैव for ऊरु ); चालयानः स्वा ( च ); वेगेन (३)हृष्टात्मा; सहसा for कौन्तेयः),

**प्रांशुः कनकवर्णाभः सिंहसंहननो युवा ।। ३१ ।।**[०१]

मत्तवारणविक्रान्तो मत्तवारणवेगवान्।
**मत्तवारणताम्राक्षो मत्तवारणवारणः ।। ३२ ।।**

प्रियपार्श्वोपविष्टाभिर्व्यावृत्ताभिर्विचेष्टितैः ।
**यक्षगन्धर्वयोषाभिरदृश्याभिर्निरीक्षितः ।। ३३ ।।**[०२]

✻ यक्षराक्षसगन्धर्वनागकन्यापणाजिरे ।

नवावतारो रूपस्य विक्रीडन्निव पाण्डवः ।
**चचार रमणीयेषु गन्धमादनसानुषु ।। ३४ ।।**[०३]

संस्मरन्विविधान्क्लेशान्दुर्योधनकृतान्बहून् ।
**द्रौपद्या वनवासिन्याः प्रियं कर्तुं समुद्यतः ।। ३५ ।।**

सोऽचिन्तयद्गते स्वर्गमर्जुने मयि चागते।
पुष्पहेतोः कथं त्वार्यः करिष्यति युधिष्ठिरः ।। ३६ ।।[०४]

स्नेहान्नरवरो नूनमविश्वासाद्बलस्य च ।
**नकुलं सहदेवं च न मोक्ष्यति युधिष्ठिरः ।। ३७ ।।**[०५]

कथं तु कुसुमावाप्तिः स्याच्छीघ्रमिति चिन्तयन् ।

---

(०१) (३) क०ख०ग०घ० तासाभः वर्णाभः for तालाभः,

(०२) (२)व्यावृत्तैर्वा; त्तार्ध; ०रयार्ध; त्ताथः त्तान्य; द्धार्ध for व्यावृत्ताभिर् ); विलोकितैः; विलोचनैः for विचेष्टितैः ); व्यावृत्ताबवलोकितैः; ०त्तार्धावलोकितैः (३) गन्धर्वयक्ष; गन्धमादन; यक्षराक्षस (४)अवेक्षितः for निरी ),

(०३) (२)विक्रीडन्; विकरन् विकीर्णन् विकिरन् for विक्रीणन् ),

(०४) (१)तदा पार्थो for गते स्वर्गम् ); (२)मयि त्वत्रापराध्यति; मयि त्विह विलम्बति; मयि त्वथ विलम्बिनि (३)कथङ्कारं; कथं त्वार्य; कथं चार्यः; कथं वार्य; कथं त्वार्याः; कथं कार्यं (४)भवि for करि ); नराधिपः for युधि ),

(०५) (१)सोयं for स्नेहान् ); नरेश्वरो for नरवरो ); (२)बलस्य for वनस्य ); विश्चासाद्धनदस्य च (४)नियोक्ष्यति; न त्यक्ष्यति for न मो ); नराधिपः for युधि ),

**प्रतस्थे नरशार्दूलः पक्षिराडिव वेगितः ॥ ३८ ॥**[०१]

**सज्जमानमनोदृष्टिः फुल्लेषु गिरिसानुषु।**
**द्रौपदीवाक्यपाथेयो भीमः शीघ्रतरं ययौ ॥ ३९ ॥**

**कम्पयन्मेदिनीं पद्भ्यां निर्घात इव पर्वसु।**
**त्रासयन्गजयूथानि वातरंहा वृकोदरः ॥ ४० ॥**[०२]

✻ सिंहव्याघ्रमृगांश्चैव मर्दयानो महाबलः ।

✻ उन्मूलयन्महावृक्षान्पोथयंस्तरसा बली।[०३]

**लतावल्लीश्च वेगेन विकर्षन्पाण्डुनन्दनः ।**
**उपर्युपरि शैलाग्रमारुरुक्षुरिव द्विपः ॥ ४१ ॥**

**जलावलम्बो(विनर्दमानो)ऽतिभृशं सविद्युदिव तोयदः ।**[०४]

✻ रुरुवानरयोधानि महिषाश्च जलाश्रयाः ।

**व्यनदत्सुमहानादं भीमसेनो महाबलः ॥ ४२ ॥**

**तेन शब्देन महता भीमस्य प्रतिबोधिताः ।**

✻ समुत्पेतुः खगास्त्रस्ता मृगयूथानि दुद्रुवुः ।[०५]

✻ गुहां सन्तत्यजुर्व्याघ्रा निलिल्युर्वनवासिनः ।

**गुहाः सन्तत्यजुर्व्याघ्रा निलिस्युर्बिलवासिनः ॥ ४३ ॥**[०६]

**समुत्पेतुः खगास्त्रस्ता मृगयूथानि दुद्रुवुः**

---

(०१) (१)च; तु for नु ); (४)वेगतः पपात रुचिराननः!,

(०२) (३)मृगयूथानि; सर्वभूतानि for गजं ),

(०३) (१)मृगान्; मृगाः for गणान् ); (२)मर्दयानो वृकोदरः for महा ); सज्जमानमनो (४)पात for पोथ ); तरसा बली; च महाबली for चोरसा बली ),

(०४) (३)विमर्द०; स नर्द; जला ( जिता ); वलम्बो for विनर्दमानो ),

(०५) (१)तेन for तस्य ); नादेन for शब्देन ); महता for घोरेण ); (२)चाविभो; चाभिभोः भीमस्य प्रतिबोधिताः ,

(०६) ( गुहां वन for बिल ); ),

**ऋक्षाश्चोत्ससृजुर्वृक्षांस्तत्यजुर्हरयो गुहाम् ।। ४४ ।।**

**व्यजृम्भन्त महासिंहा महिषाश्चावलोकयन् ।। ४५ ।।**

**तेन वित्रासिता नागाः करेणुपरिवारिताः ।**
**तद्वनं स परित्यज्य जग्मुरन्यन्महावनम् ।। ४६ ।।**

**वराहमृगसङ्घाश्च महिषाश्च वनेचराः ।**
**व्याघ्रगोमायुसङ्घश्च प्रणेदुर्गवयैः सह ।। ४७ ।।**

**रथाङ्गसाह्वदात्यूहा हंसकारण्डप्लवाः ।**
**शुकाः पुंस्कोकिलाः क्रौञ्चा विसञ्ज्ञा भेजिरे दिशः ।। ४८।।**

**तथान्ये दर्पिता नागाः करेणुशरपीडिताः ।**

- ✻ ऋक्षाश्चोत्ससृजुर्वृक्षांस्तत्यजुर्हरयो गुहाम् ।
- ✻ व्यजम्भन्त महासिंहा महिषाश्चावलोकयन् ।(०१)
- ✻ तेन वित्रासिता नागाः करेणुपरिवारिताः ।
- ✻ तद्वनं सम्परित्यज्य जग्मुरन्यन्महावनम् । (०२)
- ✻ वराहमृगसङ्घाश्च महिषाश्च वनेचराः ।०
- ✻ व्याघ्रगोमायुसङ्घाश्च प्रणेदुर्गवयैः सह ।(०३)
- ✻ रथात्त्याह्वदात्यूहा हंसकारण्डवप्लवाः ।(०४)
- ✻ शुकाः पुंस्कोकिलाः क्रौञ्चा विसञ्ज्ञा भेजिरे दिशः ।
- ✻ तथान्ये दर्पिता नागा महिषाश्च महाबलाः ।(०५)

**सिंहव्याघ्राश्च सङ्क्रुद्धा भीमसेनमथाद्रवन् ।**

---

(०१) (१) निपेतुर्; पेतुश्च for तत्यजुर् ); (२)गुहाः for गुहाम् );,

(०२) (४)महद्वनं for महावनम् );,

(०३) (२)वनेचराः ( व्यलोकयन् ); for अ वलोकयन् );(३) सिंहाश्च for सङ्घाश्व ); महिषांश्च व्यलोकयन् for वेनचराः ); (३) तथाः तदा for व्याघ्र );(४) पृषतैः; वृषतैः for गवयैः );,

(०४) (१) रथाङ्गाहय for रथाङ्गसाह्व ); नत्यूहा for दात्यूहाः );(२) कारण्डवैः सह for वप्लवाः );,

(०५) (१)पारावताः for पुंस्को );(२) करेणुशत ( शर ); पीडिताः; महिषाश्च वनेचराः,

शकृन्मूत्रं च मुञ्चाना भयविभ्रान्तमानसाः ।
**व्यादितास्या महारौद्रा व्यनदन्भीषणान्रवान्** ।। ४९ ।।

ततो वायुसुतः क्रोधात्स्वबाहुबलमाश्रितः ।
**गजेनान्यान्गजाञ्छ्रीमान्सिंहं सिंहेन वा विभुः** ।। ५० ।।

तलप्रहारैरन्यांश्च व्यहनत्पाण्डवो बली ।। ५१ ।।

ते वध्यमाना भीमेन सिंहव्याघ्रतरक्षवः ।
**भयाद्विससृजुर्भीमं शकृन्मूत्रं च सुस्रुवुः** ।। ५२ ।।

प्रविवेश ततः क्षिप्रं तानपास्य महाबलः ।
**वनं पाण्डुसुतः श्रीमाञ्छब्देनापूरयन्दिशः** ।। ५३ ।।

अथापश्यन्महाबाहुर्गन्धमादनसानुषु।
**सुरम्यं कदलीषण्ड बहुयोजनविस्तृतम्** ।। ५४ ।।[०१]

तमभ्यगच्छद्वेगेन क्षोभयिष्यन्महाबलः ।
**महागज इवास्रावी प्रभञ्जन्विविधान्द्रुमान्** ।। ५५ ।।[०२]

उत्पाट्य कदलीस्तम्भान्बहुतालसमुच्छ्रयान्।
**चिक्षेप तरसा भीमः समन्ताद्बलिनां वरः** ।। ५६ ।।[०३]

**महान्तमकरोचत्र कुरूणामृषभो बली।**

✲ महान्तमकरोत्तत्र तरूणां पाण्डवो बली ।
विनदन्सुमहातेजा नृसिंह इव दर्पितः ।

---

(०१) (१)बाहो for बाहुर् ); कदळीं; खण्डं,

(०२) (१)तद् for तम् ); (२)पोथ for क्षोभ ); (३) गजो मदोत्कट ( शूरो मत्तद्विप ); (४) इव काननद्रुमान्; काननोत्तमं for विविधान्द्रु ),

(०३) (१) क०ख०ग०घ०स्कन्धान्, कदली कन्दान्; स्तभान्; षण्डान्; च तस्रकन्धान् (२)समुच्छ्रितान् (३) क०ख०ग०घ०ङीनस् समन्ताद् बलवद्बली,वीरः for भीमः ); (४) बलवद् ( वान् ); बली for बलिनां वरः ),

**विमर्दं सुमहातेजा नृसिंह इव दर्पितः ।। ५७ ।।**(०१)

**ततः सत्त्वान्युपाक्रामद्बहूनि सुमहान्ति च ।**
**रुरुवानरसिंहांश्च महिषांश्च जलाशयान् ।। ५८ ।।**(०२)

**प्रविवेश ततः क्षिप्रं तानपास्य महाबलः ।**
**वनं पाण्डुसुतः श्रीमाब्दाब्देनापूरयन्दिशः ।। ५९ ।।**(०३)

✼ दध्मौ च शङ्खं स्वनवत्सर्वप्राणेन पाण्डवः ।
सिंहव्याघ्राश्च सङ्क्रुद्धा भीमसेनमभिद्रवन् (०४)

✼ व्यादितास्या महारौद्रा विनदन्तोऽतिभीषणाः(०५)
शकृन्मूत्रं च मुञ्चानां भयविभ्रान्तमानसाः ।(०६)

✼ ततो वायुसुतः क्रोधात्स्वबाहुबलमाश्रितः(०७)
गजेनाघ्नन्गजं भीमः सिंहं सिंहेन चाभिभूः (०८)

✼ तलप्रहारैरन्यांश्च व्यहनत्पाण्डवो बली ।।(०९)

---

(०१) ( विमृदत्; विनदन्; विमृद्नन् for विमर्दं ); ),

(०२) अप अपां for उपा ); सु for च ); सुबहूनि महान्ति च ततः स ( ते ); न्यपतंस्तत्र सुबहूनि बृहन्ति च (३)वानर for वारण ); सङ्घश्च; सिंहाश्च; सिंहश्च; चूथानि for सङ्घाश्च ); (४)महिषांश्च; पक्षिणश्च जलाशयान्; शयं,

(०३) ( शीघ्रं for क्षिप्रं ); एवं for वनं ); तेषां for श्रीमाञ् ); ),

(०४) (३)सिंहा for सिंह ); (४)अभ्यद्रवन्; अभिद्रुताः उपाद्रवन्; अथाद्रवन् for अभिद्रवन् ); भीमसभ्यद्रवन्द्रुतं,

(०५) (२)विनर्दन्तो for विनदन्तो );,

(०६) (१) शकृन्मूत्रान् (त्रं) विमुचतो ) (२) विभीषणाः;तिभीषणं विनदन्तोरुभीषणाः; व्यनदन्भीषणात्रवान्; नदन्तो भैरवात्रवान्,

(०७) (१)तत्र for ततो ); भीम for क्रोधात् );,

(०८) (१)गजान् ( भीमः); for गजं ); (२) ताल for तल ); (४)सिंहान्; सिंहः for सिंहं ); वा for च ); विभुः; ()भिभोः for (अ)भिभूः );,

(०९) (१) (अ)न्यं (अ)न्यान् for अ घ्नन् );(२) व्यहरत्; न्यहनत्; न्यवधीत्; व्यनदन्; ( अ)प्य for हनत् व्यहनत् ),

✻ ते हन्यमाना भीमेन सिंहव्याघ्रतरक्षवः ।।(०१)

✻ भयाद्विससृपुः सर्वे शकृन्मूत्रं च सुस्रुवुः ।।(02)

✻ प्रविवेश ततः क्षिप्रं तानपास्य महाबलः ।

✻ वनं पाण्डुसुत श्रीमान्नादेनापूरयन्दिशः ।

(१)तानपास्य तु स क्षिप्रं ( सुसन्त्रस्तान् ; स्तान्कृतः क्षिप्रं );(२) प्रविवेश महाबलः (३) श्रीमान् for भीमः ); (४)आ गुनादयन् for आ पूरयन् ),

**तेन शब्देन चैवाथ भीमसेनरवेण च ।**
**वनान्तरगताश्चापि वित्रेसुर्मृगपक्षिणः ।। ६० ।।(०३)**

**तं शब्दं सहसा श्रुत्वा मृगपक्षिसमीरितम्।**
**जलार्द्रपक्षा विहगाः समुत्पेतुः सहस्रशः ।। ६१ ।।(०४)**

**तानौदकान्पक्षिगणान्निरीक्ष्य भरतर्षभः ।**
**तानेवानुसरन्रम्यं ददर्श सुमहत्सरः ।। ६२ ।।(०५)**

**काञ्चनैः कदलीषण्डैर्मन्दमारुतकम्पितैः ।**
**वीज्यमानमिवाक्षोभ्यं तीरात्तीरविसर्पिभिः ।। ६३ ।।(०६)**

**तत्सरोऽथावतीर्यैव प्रभूतनलिनोत्पलम् ।**
**महागज इवोद्दामश्चिक्रीड बलवद्बली ।। ६४ ।। (०७)**

---

(०१) (१)वध्य for हन्य ); (१)तेजसा भीमसेनश्च (२)व्याघ्रास्तरस्विनः,

(०२) (३)सर्वे for भयाद् ); विससृजु; विनिःसृताः; विसुस्रुबुः; ()पि सुश्रुवुः; विदुद्रुवुः for विससृपुः ); भीमं; तूर्णं for सर्वे ); (४)भीम सेनभयार्दिताः,

(०३) (१)घोरेण; चैवाथ for चोग्रेण ); (२) ख०अयं पादोऽनन्तरश्च न स्तः,भीमसेनस्य नर्दतः; मृगाणां विरुतेन च (३)वनान्तरं स चापि for सर्वे ),

(०४) (१)तस्मिन्नथ प्रवृत्ते तु (२)नाना for मृग ); नानापक्षिगणास्ततः; सङ्क्षोभे मृगप क्षिणां ,

(०५) तानौ निरीक्ष्य र्षभः for र्षभः) (३)सरद् for सरन् ); दिव्यं for रम्यं ); (३)विमलं;स महत् for सुमहत् ),

(०६) (१)खडैर् for षण्डैर् ); (४)तीरात्तीर!,

(०७) (१) ()पि सो for थ) अ थ for आ शु ); (२)नलिनों; सलिलो for ०कमलो ),

**विक्रीड्य तस्मिन्सुचिरमुत्ततारामितद्युतिः ।**

**क्षोभयन्सलिलं भीमः प्रभिन्न इव वारणः ॥ ६५ ॥**(०१)

**ततोऽध्यगन्तुं वेगेन तद्वनं बहुपादपम् ।**

**दध्मौ च शङ्खं स्वनवत्सर्वप्राणेन पाण्डवः ॥ ६६ ॥**(०२)

✻ आस्फोटयच्च बलवान्भमिः संनादयन्दिशः ।

**तस्य शङ्खस्य शब्देन भीमसेनरवेण च ।**
**बाहुशब्देन चोग्रेण नदन्तीव गिरेर्गुहाः ॥ ६७ ॥**(०३)

✻ ततः शङ्खस्वनं श्रुत्वा नर्दितं चमुहुर्मुहुः
वृक्षाणां भज्यमानानां शब्दं श्रुत्वा तदा गिरौ ।(०४)

✻ गन्धमादनपार्श्र्वस्थो रामस्याभिमतः सस्वा ।
हनूमान्नाम स कपिर्लाङ्गूलमधुनोत्ततः ।

✻ तस्य दोधूयमानस्य लाङ्गूलं लीलया मुहुः ।(०५)
तेन लात्त्यशब्देन स्वनन्तीव दिशो दश ।

✻ ततः पृथ्वी च शैलाश्च प्रकम्पितमिवाभवत् (!) (०६)

**तं वज्रनिष्पेषसममास्फोटितमहारवम् ।**
**श्रुत्वा शैलगुहासुप्तैः सिंहैर्मुक्तो महास्वनः ॥ ६८ ॥**(०७)

---

(०१) (४)विचरन् for बलवद् ); वैशं उ विक्रीड; चिक्रीड्य; चिक्रीड for विक्रीड्य ); रुचिरम्; सुरुचिरम् for सुचिरम् ); स क्रीडित्वास्मिन्सुचिरं; स क्रीडित्वा सुरुचिरं महां; अ मर for अ मित ); पपौ जलमनुत्तमं,
(०२) (१)वगाहद्; व्यगाहद्; ()ध्यगन्तुं; ()ध्यगात्तु; जगाम; बभञ्ज; जगाहे for वगाह्य ); (३)स शंस्वं; शङ्खं, च आस्फोटयच्च बलवान्भीमः सन्नादयन्दिशः ।,
(०३) (१)भीमं शब्देन (४)नदन्तवि,
(०४) ( नादितं for नर्दितं ); दोधुनत् for अधुनोत् );,
(०५) तस्य दोधुनतो राजन,
(०६) (३)सशैला च for च शैलाश्च );(४) प्रकम्पित for पितम् ); ,
(०७) (२)रवं महत्; वरं भहत्; रवं तदा; महारवं रवं ताा for रवम्भृशम् );
(३)नादं; चैव for शैल ); सक्तैः for सुतैः ),

**सिंहनादभयत्रस्तैः कुञ्जरैरपि भारत ।**

**मुक्तो विरावः सुमहान्पर्वतो येन पूरितः ॥ ६९ ॥**

**तं तु नादं ततः श्रुत्वा मुक्तं वारणपुङ्गवः ।**

**प्राजृम्भत महाकायो हनुमान्नाम वानरः ॥ ७० ॥**[०१]

✻ भ्रातरं भीमसेनं तु विज्ञाय हनुमान्कपिः ।
दिवङ्गमं रुरोधाथ मार्गं भीमस्य कारणात् ॥

✻ अनेन हि पथा मा वै गच्छेदिति विचार्य सः ।
आस्त एकायने मार्गे कदलीषण्डमण्डिते ॥

✻ भ्रातुर्भीमस्य रक्षार्थं तं मार्गमवरुध्य वै।
मात्र प्राप्स्यति शापं वा धर्षणां वेति पाण्डवः ॥

**कदलीषण्डमध्यस्थो ह्येवं सञ्चिन्त्य वानरः ।**

**भ्रातरं भीमसेनं तु विज्ञाय हनुमान्कपिः ॥ ७१ ॥**

✻ दिवङ्गमं रुरोधाथ मार्गं भीमस्य कारणात्।[०२]

✻ अनेन हि पथा मा वै गच्छेदिति विचार्य सः ।

✻ आस्त एकायने मार्गे कदलीषण्डमण्डिते ॥

✻ भ्रातुर्भीमस्य रक्षार्थं तं मार्गमवरुध्य वै।

✻ मात्र प्राप्स्यति शापं वा धर्षणां वेति पाण्डवः ।

✻ कदलीषण्डमध्यस्थो एवं सञ्चिन्त्य वानरः । [०३]

**जृम्भमाणः सुविपुलं शक्रध्वजमिवोच्छ्रितम् ।**

---

(०१) (२)मुक्तं वारणपुंन्त्यै वारणपुङ्गवः ( वानरपुङ्गवैः ),

(०२) (१)(१)मार्गो भीमो नैव for मा वै)(४) खण्ड for षण्ड );( तं च for तु ); विहङ्गमं दिवङ्गमो for दिवङ्गमं );,

(०३) (१)सोत्र मत्तः for मात्र );(४) ह्येवं for ०एवं ); ),

**आस्फोटयच्च लाङ्गूलमिन्द्राशनिसमस्वनम् ।। ७२ ।।**[०१]

✻ तेन शब्देन महता व्यबुध्यत महाकविः ।

**तस्य लाङ्गूलनिनदं पर्वतः सुगुहामुखैः ।**
**उद्गारमिव गौर्नर्दन्नुत्ससर्ज समन्ततः ।। ७३ ।।**[०२]

✻ लाङ्गूलास्फोटशब्दाच्च चलितः स महागिरिः ।[०३]
विघूर्णमानशिखरः समन्तात्पर्यशीर्यत।[०४]

**स लाङ्गूलरवस्तस्य मत्तवारणनिःस्वनम् ।**
**अन्तर्धाय विचित्रेषु चचार गिरिसानुषु ।। ७४ ।।**[०५]

✻ तस्य श्रुत्वा तु निनदं महामेघरवस्वनम् ।
प्रतिनेदुर्गजाः सिंहा विद्युश्च मृगद्विजाः ।।

**स भीमसेनस्तच्छ्रुत्वा सम्प्रहृष्टतनूरुहः ।**
**शब्दप्रभवमन्विच्छंश्चचार कदलीवनम् ।। ७५ ।।**[०६]

**लाङ्गूलास्फोटशब्दाच्च चलितस्य महागिरिः ।**
**विघूर्णमानस्सहसा समन्ताश्च व्यशीर्यत ।। ७६ ।।**

**कदलीवनमध्यस्थमथ पीने शिलातले ।**
**ददर्श सुमहाबाहुर्वानराधिपतिं तदा ।। ७७ ।।**[०७]

---

(०१) (१) खण्ड for षण्ड) (३) निद्रामथ for निद्रावस),
(०२) (१)निनदः (२)पर्वतस्य for पर्वतः स) सु for स) (३) अ०हुङ्कारमिव कैन्तेयो ; घ० उद्गारमिव गौर्नन्नु,उद्गातम् for उद्गातम्) सोनर्दम् सौहित्याद् गोर्नादम् for गैर्नर्दम्) मन्दम् नर्दन् नादम् for नर्दम्) निमित्तिकृत्य गौर्नादं,
(०३) (१) शब्दश्च शब्दैश्च for शब्दाच्च );,
(०४) (१)विधूर्णः सहसा तस्य; मानः सहसा च ( स );(२) व्यशीर्यत ),
(०५) (२)निः for नि ); स्वनः (३)विशालेषु for विचित्रेषु ); (४)ससार for चचार ); गन्धमादनसानुषु,
(०६) (१)तत् for तं ); भीमसेनस्तु तं श्रुत्वा ( दृष्ट्वा ); वि for सं ),
(०७) (१)खण्ड ( षण्ड ); for वनं ); (२)अथ पीन; अथ पीनं; मधुपीते; अथ नीले; हनूमन्तं(३)ददर्श सु; सन्ददर्श for स ददर्श ); (४)तदा for स्थितम् ),

विद्युत्सम्पातनिनदं विद्युत्सम्पातचञ्चलम् ॥ ७८ ॥(०१)

बाहुस्वस्तिकविन्यस्तपीनह्रस्वशिरोधरम्।
स्कन्धभूयिष्ठकायत्वात्तनुमध्यकटीतटम् ॥ ७९ ॥(०२)

किञ्चिच्चाभुग्नशीर्षेण दीर्घरोमाञ्चितेन च ।
लाङ्गूलेनोर्ध्वगतिना ध्वजेनेव विराजितम् ॥ ८० ॥(०३)

ह्रस्वौष्ठं ताम्रजिह्वास्यं रक्तकर्णं चलद्भ्रुवम्।
अपश्यद्वदनं तस्य रश्मिवन्तमिवोडुपम् ॥ ८१ ॥(०४)

✻ विवृत्तदंष्ट्रादशनं शुक्लतीक्ष्णाग्रशोभितम् ।(०५)

वदनाभ्यन्तरगतैः शुक्लैर्दन्तैरलङ्कृतम् ।
केसरोत्करसम्मिश्रमशोकानामिवोत्करम् ॥ ८२ ॥(०६)

हिरण्मयीनां मध्यस्थं कदलीनां महाद्युतिम्।
दीप्यमानेन वपुषा स्वर्चिष्मन्तमिवानलम् ॥ ८३ ॥(०७)

निरीक्षन्तममित्रघ्नं लोचनैर्मधुपिङ्गलैः ॥ ८४ ॥(०८)

---

(०१) (१)त्सम्पात; त्सङ्घेव for त्सङ्घात ); सम्प्रेक्ष्यं; दुष्प्रेक्षं (२)त्सम्पात for त्क्षङ्घात ); चञ्चलं; वर्चसं for पिङ्गलम् ); त्सम्पात for त्सङ्घात ); निनदं for सदृशं ); (४)त्सम्पातfor त्सङ्घात ); पिङ्गलं for चञ्चलम् ),

(०२) (१)स्वस्तिषु; स्तम्भसु for स्वस्तिक ); विन्यस्तं (२)वृत्त for ह्रस्व ),

(०३) (१)च (४)ध्वजेनैव विराजता,

(०४) (१)हस्वोष्ठं ( हस्वौष्ठं ); for रक्तोष्ठं ); दंष्ट्र ( दन्त ); ताम्राक्षं (२)रक्तवर्णं; कण्ठं चलभ्रुवं; चलद्रुतं,

(०५) (२) शुष्क; शुक्तं for शुक्ल ); ) (३)वदने वदनोद्धृत दंष्ट्राग्रं; अपश्यद्वदनं तस्य ( श्यामं ); वदनावृत्तदं (४)रश्मिमन्तम् ,

(०६) (२)शुक्लाभासैर; शुक्लैर् (क्ल) दन्तैर्; मुक्ताभासैर्; शुक्ल हासैर् (४) असनानामिवो; सवनानामिवो,

(०७) (३)दीप्यमानं सु ; मानेन for मानं स्व ); (४)स्वर्चिष्मन्तम्; मूर्तिमतम्; रश्मिमन्तम् त्वर्चिष्मन्तम् for अर्चिष्मन्तम् ); अर्चिष्मन्तम्,

(०८) (१)इव ( वा ); त्रस्तैर्; सूत्र अमित्रघ्नं; इवा (व) त्रस्तं for अवित्रस्तं ),

**तं वानरवरं धीमानतिकायं महाबलम्** ।। ८७ ।।[०१]

**स्वर्गपन्थानमावृत्य हिमवन्तमिव स्थितम्** ।। ८८ ।।

✼ स्वर्गपन्थानमावृत्य हिमवन्तमिव स्थितम् ।[०२]

✼ दृष्ट्वा चैनं महाबाहुरेकं तस्मिन्महावने।

**अथोपसृत्य तरसा विभीर्भीमस्ततो बली ।**

**सिंहनादं चकारोग्रं वज्राशनिसमं बली ।**

**तेन शब्देन भीमस्य वित्रेसुर्मृगपक्षिणः** ।। ८६ ।।[०३]

✼ भीमो भीमबलस्तत्र प्रविष्टः कदलीवनम् ।

✼ अपश्यद्वानरं सुप्तमेकायनगते पथि ।

✼ प्रबोधनार्थाय सिंहनादमथाकरोत्

**हनूमांश्च महासत्त्व ईषदुन्मील्य लोचने।**

**दृष्ट्वा तमथ सावज्ञं लोचनैमधुपिङ्गलैः** ।। ८७ ।।[०४]

**ततः पवनजः श्रीमानन्तिकस्तं महौजसम्।**

✼ ततः पवनजः श्रीमानन्तिक्त्यं महौजसम् ।

**स्मितेन चैनमासाद्य हनूमानिदमब्रवीत्** ।। ८८ ।।

## हनूमान्

**किमर्थं सरुजस्तेऽहं सुखसुप्तः प्रबोधितः ।**[०५]

**ननु नाम त्वया कार्या दया भूतेषु जानता** ।। ८९ ।।

---

(०१) (३)धीमान्; धरिम् for वीरम् ),

(०२) (१) स्थितं for स्वर्ग ); हनूमन्तमवस्थितं; पादं हे ( हैं ); मगिरेरिव ),

(०३) (२)महा वीर्योपराजितः; विभीभीमस्ततो बली,

(०४) (३)हनुमान् तु for च ); वीर्य for सत्त्व ); तमवैक्षत सां; दृष्ट्वा तमथ सां; तदवेक्षत सां भीम सेनं महाबलं,

(०५) (१)स्मितेन चैनमास्नाद्य ( भाष्य ); हश्मानिदम ब्रवीत् हनूमानुवाच,

वयं धर्मं न जानीमस्तिर्यग्योनिमुपाश्रिताः ।(०१)
**नरास्तु बुद्धिसम्पन्ना दयां कुर्वन्ति जन्तुषु ॥ ९०॥(०२)**

क्रूरेषु कर्मसु कथं देहवाक्चित्तदूषिषु ।
**धर्मघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ ९१ ॥(03)**

न त्वं धर्मं विजानासि बुधा नोपासितास्त्वया ।
**अल्पबुद्धितया बाल्यादुत्सादयसि यन्मृगान् ॥ ९२ ॥(०४)**

ब्रूहि कस्त्वं किमर्थं वा किमिदं वनमागतः ।
**वर्जितं मानुषैर्भावैस्तथैव पुरुषैरपि ॥ ९३ ॥(०५)**

क्व च त्वयाद्य गन्तव्यं प्रब्रूहि पुरुषर्षभ।(०६)
**अतः परमगम्योऽयं पर्वतः सुदुरारुहः ॥ ९४ ॥**

विना सिद्धगतिं वीर गतिरत्र न विद्यते।(०७)
✻ देवलोकस्य मार्गोऽयमगम्यो मानुषैः सदा।
**कारुण्यात्त्वामहं वीर वारयामि निबोध मे ॥ ९५ ॥**

नातः परं त्वया शक्यं गन्तुमाश्वसिहि प्रभो ।(०८)
**स्वागतं सर्वथैवेह तवाद्य मनुजर्षभ ॥ ९६ ॥**

---

(०१) (४)उपा for समां ),
(०२) (१)नरास्तु ( स्तद् ); for मनुष्या );,
(०३) (१)तथा for कथं ); कथं कर्मसु क्रूरेषु (२)मनो; देव for देह );(३) चारित्र; वाग्वित्त for वाक्चित्त );(४) दुःखिषु; भूयिषु for दूषिषु ); देहिनो बुद्धिदूषिषु,
(०४) (१)न धर्म त्वं वि ( न ); जानीषे (२)बुधा ( बुद्धा ); for वृद्धा ); (३)बाल्याद्; यन्माम्; चान्यान् for वन्यान् ); (४)वित्रासयसि ( उत्थाप ); for उत्सादने ); मादृशान् चापलात् for यन्मृगान् ),
(०५) (२)किमिदं वनमागतः; वनान्तं त्वमिहागतः (३)सर्वैर् for भावैस् ); (४)देवता भिश्च सेवितं,
(०६) (१) च for वा ); अ द्य तात for त्वयाद्य ); ब्रवीहि; यद्ब्रूहि त्वं ब्रूहि for प्रब्रूहि ); ),
(०७) (२)दृशः; ०हरः; सदः for ख्यः ); पर्वतस्तु सुदाख्यः (३)सिद्धगतं सिद्धिगतिं,
(०८) (१)क्ष्णत्सामहं वीर (२) वारयित्वा for वारण्ये त्वां ); वारयामि निमेध मे परतरं for परं त्वया ); शक्यं गन्तुम् आश्वासिहि for आश्व ),

✻ स्वागतं सर्वथैवेह तवाद्य मनुजर्षभ ।(०१)

**इमान्यमृतकल्पानि मूलानि च फलानि च**
**भक्षयित्वा निवर्तस्व मा वृथा प्राप्स्यसे वधम् ।। ९७ ।।**

✻ ग्राह्यं यदि वचो मह्यं हितं मनुजपुङ्गव ।(०२)

**अस्मिन् पर्वणि १२० अध्याये ९७ श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि विंशत्यधिकशततमोऽध्यायः ।। १२० ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

महाभारततात्पर्यनिर्णये २२ अध्याये १२१-१२२-१२३- अध्यायाः

धर्मो देवानां परमो मानुषत्वे स्वीये रूपेऽप्यन्यवदेव वृत्तिः ।
अनादानं दिव्यशक्तेर्विशेषान्नरस्वभावे सर्वदा चैव वृत्तिः ।
तस्माद् भीमो हनुमांश्चैक एव ज्यायःकनीयोवृत्तिमत्राभिपेदे ।। २७४ ।।
सर्वे गुणा आवृता मानुषत्वे युगानुसारान्मूलरूपानुसारात् ।
क्रमात् सुराणां भागतोऽव्यक्तरूपा आदानतो व्यक्तिमायान्त्युरूणाम् ।। २७५ ।।
नैवाव्यक्तिः काचिदस्तीह विष्णोः प्रादुर्भावेष्वतिसुव्यक्तशक्तेः ।
इच्छाव्यक्तिः प्रायशो मारुतस्य तदन्येषां व्यक्तता कारणेन ।। २७६ ।।
तस्माद् भीमो धर्मवृद्ध्यर्थमेव स्वीये रूपेऽप्यन्यवद् वृत्तिमेव ।
प्रदर्शयामास तथाऽसुराणां मोहायैवाशक्तवच्छक्तिरूपः ।। २७७ ।।
तद्रूपवृद्धिं भीमसेनोऽथ दृष्ट्वा श्रुत्वा हनूमन्मुखतः कथाश्च ।
रामस्य तच्चातुरात्म्यं च दिव्यं चातुर्युगं धर्ममप्यग्र्यमेव ।। २७८ ।।
ध्वजाद् बीभत्सोर्गर्जनेनैव शत्रुपराभवे तेन दत्तेऽर्जुनस्य ।

---

(०१) (१) अ द्येह; चैव; चेह; वै ह for (ए)वहे );(२) मनुजोत्तम; जेश्वर;(४) पुरुषर्षभ ( भरतर्षभ ); for मनु ),
(०२) (१)यदि ग्राह्यं मह्यं for मम );(२) हितं मनुजपुङ्गव,

ययौ प्रणम्यैनमाश्वेव भीमः सौगन्धिकं वनमत्यग्र्यरूपम् ।। २७९ ।।

## 03- 04 - 121Adhyaya

# १२१. एकविंशदधिकशततमोऽध्यायः

भीमेन स्वमार्गादपसरणं चोदितेन हनूमता तं प्रति अपसरणे स्वस्याशक्तिकथनपूर्वकं स्वनालोद्धरणेन गमनचोदना ।। १ ।। प्रयतने अपि पुच्छचालने अप्यसमर्थेन भीमेन तं प्रति तत्प्रभवादिप्रश्नः ।। २ ।। हनूमता स्वप्रभवादिकथनपूर्वकं रामकथाकथनारम्भः ।। ३ ।। श्रीहनुमद्भीमसेनयोः संवादः ।। ४ ।।

वैशम्पायनः

एतच्छ्रुत्वा वचस्तस्य वानरेन्द्रस्य धीमतः ।
भीमसेनस्तदा वीरः प्रोवाचामित्रकर्षणः ।। १ ।।(०१)

भीमः

को भवान्किं निमित्तं वा वानरं वपुरास्थितः ।
ब्राह्मणानन्तरो वर्णः क्षत्रियस्त्वां तु पृच्छति ।। २ ।।(०२)

कौरवः सोमवंशीयः कुन्त्या गर्भेण धारितः ।
पाण्डवो वायुतनयो भीमसेन इति श्रुतः ।। ३ ।।(०३)

वैशम्पायतः

स वाक्यं कुरुवीरस्य स्मितेन प्रतिगृह्य तत्।
हनूमान् वायुतनयो वायुपुत्रमभाषत ।। ४ ।।(०४)

हनूमान्

(०१) (४)प्रोवाचामितविक्रमः कर्षणः for कर्शनः ),
(०२) (२)आस्थितः for आश्रितः ); (४)त्वां तु; त्वाभि; साधु; चानु for त्वानु ),
(०३) (१)कौरव्यः (२)गर्भे तु for गर्भेण ),
(०४) वैशं उं (१)कुरुवीरस्य ( राजस्य ); (२) प्रत्यगृह्यत; परिगृह्य तत् (३)हनुमान्,

वानरोऽहं न ते मार्गं प्रदास्यामि यथेप्सितम्।
साधु गच्छ निवर्तस्व मात्वं प्राप्स्यसि वैशसम् ।। ५ ।।(०१)

भीमसेनः

वैशस वास्तु यद्वान्यन्न त्वां पृच्छामि वानर।
प्रयच्छ मार्गमुत्तिष्ठ मा मत्तः प्राप्स्यसेव्यथाम् ।। ६ ।।(०२)

हनूमान्

नास्ति शक्तिर्ममोत्थातुं व्याधिना क्लेशितो ह्यहम्।
यद्यवश्यं प्रयातव्यं लङ्घयित्वा प्रयाहि माम् ।। ७ ।।(०३)

भीमः

निर्गुणः परमात्मा तु देहं व्याप्यावतिष्ठते।
तमहं ज्ञानविज्ञेयं नावमन्ये न लङ्घये ।। ८ ।।(०४)

यद्यागमैर्न विद्यां च तमहं भूतभावनम्।
क्रमेयं त्वां गिरिं चैव हनूमानिव सागरम् ।। ९ ।।(०५)

हनूमान्

क एष हनुमान्नाम सागरो येन लङ्घितः ।

---

(०१) (१) वानरः; हनुमान् (४)प्राप्स्यसे वैशसं महत्

(०२) (२)त्वां for त्वा ); (३) मे मार्ग शीघ्रभुत्तिष्ठ मामत्र; प्रयच्छ मार्गमुत्तिष्ट (४)त्वं प्राप्स्यसि हि वैशसं; मा मत्तः प्राप्स्यसे ( सि ); व्यथां; मा त्वं प्राप्स्यसि वे व्यथां,
(०३) (१)शक्यं ममोत्थानं ( तुं ); (२) क०ख०ग०क्लेशितोऽस्म्यहम्,जरया for व्याधिना ); ()स्म्यहं ह्ययं;भृशं for ह्यहम् ),
(०४) (१)स तु; ते; अ सौः अ यं अ त्र for इ ति ); (२)तं for ते ); आवृत्य; प्राप्याव for ते व्याप्य ); देहं व्याप्यावतिष्ठते (३)ज्ञातविज्ञेयं,
(०५) (१)निर्णीयं जानीयां निर्णेयं; विज्ञेयं; विद्यां च for विन्देयं ); (३) क०ख०ग०घ त्वां गिरिं चैव, क्रामयित्वा; क्रामये त्वा; क्रमये त्वां for क्रमेयं त्वां ); श्रस्तं चैव for चेमं ); (४)हनुमान्; विश्वस्तम्,

पृच्छामि त्वां नरश्रेष्ठ कथ्यतां यदि शक्यते ।। १० ।।[०१]

**भीमः**

भ्राता मम गुणश्लाघ्यो बुद्धिसत्त्वबलान्वितः ।
रामायणेऽतिविख्यातः श्रीमान्वानरपुङ्गवः ।। ११ ।।[०२]

रामपत्नीकृते येन शतयोजनविस्तृतः ।
सागरः प्लवगेन्द्रेण क्रमेणैकेन लङ्घितः ।। १२ ।।[०३]

स मे भ्राता महावीर्यस्तुल्योऽहं तस्य तेजसा।
बले पराक्रमे युद्धे शक्तोऽहं तव निग्रहे ।। १३ ।।[०४]

इमं देशमनुप्राप्तः कारणेनास्मि केनचित्।
✽ इदं देशमनुप्राप्तः कारणेनास्मि केनचित् ।
उत्तिष्ठ देहि मे मार्गं पश्य मे चाद्य पौरुषम्।
मच्छासनमकुर्वाणं त्वां वा नेष्ये यमक्षयम् ।। १४ ।।[०५]

**वैशम्पायनः**

विज्ञाय तं बलोन्मत्तं बाहुवीर्येण दर्पितम्।
हृदयेनावहस्यैनं हनूमान्वाक्यमब्रवीत् ।। १५ ।।[०६]

**हनूमान्**

---

(०१) (३)त्वां for त्वा ); सतां; नर for कुरु ); (४)ज्ञायते यदि for यदि शक्यते ),
(०२) (१)गुणैः for गुण ); (२)गुणां; समं; गणा for बला ); (३) ()भि हि च for ति ); (४) श्रीमान्; श्रुतो for शूरो ); वानरः for पुङ्गवः ),
(०३) (१)पत्न्याः for पक्षी ); (२)योज्जनविस्तृतः ,
(०४) (३)परदमे; वरतमो for परां ); (४)च for (अ)हं) तस्य for तव ),
(०५) (१)मार्ग मे (२)वा मम; मे चा ( वा ); द्य for वा मेध ); (४)मत्वा; मा च; मा त्वां; त्वां वा; अहं; हत्वा for मा त्वा ),
(०६) (२)गर्हितं; दर्पितं; गर्जितं; पाण्डवं for गर्वि ); (३)अ वहास्यः विहस्य अ पहा ( ह ); स्य for अ वहस्व ); इ मं इ दं ए वं for ए नं) (४)हनुमान् इदम् for बाक्यम् ),

**प्रसीद नास्ति मे शक्तिरुत्थातुं जरयानघ ।**
**ममानुकम्पया त्वेतत्पुच्छमुत्सार्य गम्यताम् ।। १६ ।।**(०१)

✽ एवमुक्ते हनुमता हीनवीर्यपराक्रमम्।
✽ मनसाचिन्तयद्भीमः स्वबाहुबलदर्पितः ।
✽ पुच्छे प्रगृह्य तरसा हीनवीर्यपराक्रमम्।
✽ सालोक्यमन्तकस्यैनं नयाम्यद्येह वानरम्।
✽ एवमुक्ते हनुमता हनिवीर्यपराक्रमम्
✽ मनसाचिन्तयद्भीमः स्ववाहुवलदर्पितः ।
✽ पुच्छे प्रगृह्य तरसा हीनवीर्यपराक्रमम्।
✽ **सालोक्यमन्तकस्यैनं नयाम्यद्यह वानरम्।**

**वैशम्पायनः**

**एवमुक्तस्तु बलवान्भीमो भीमपराक्रमः ।**(०२)
**सावज्ञमथ वामेन स्मयञ्जग्राह पाणिना ।। १७ ।।**

**न चाशकच्चालयितुं भीमः पुच्छं महाकपेः ।। १८ ।।**(०३)

**उच्चिक्षेप पुनर्दोर्भ्यामिन्द्रायुधमिवोच्छ्रितम्।**
**नोद्धर्तुमशकद्भीमो दोर्भ्यामपि महाबलः ।। १९ ।।**(०४)

**उत्क्षिप्तधू(भ्रू)र्विवृत्ताक्षः संहतभ्रुकुटीमुखः ।**

---

(०१) हनूमानुवाच ( उं ); (२)सन्तप्तो for उत्थातुं ); रुजया for जरया ); हि वै for अ नघ ); उत्थानं तु रूजया for जरया) हि वै for अ नघ) उत्थानं तु रुजानघ (३)त्वेनं; त्वेतं; न्वैतत्; (ए) वाद्य ह्येतत् वीर; राजन् for त्वेतत् ); () उत्क्षिप्य for उत्सार्य ),
(०२) ( वैशं स for तु ); ),
(०३) वैशं उवाच (२)स्वयं for स्मयञ् ); पाण्डवः for पाणिना ); (३)तं न; न वा; न तु for न च ); अ शक्तश् अ शकच् ,
(०४) (१)उच्चैः क्षिप्तुं; उच्चिक्षिप्तं क्षिप्सुः; उत्क्षेप्तुच; उच्चिक्षिपुः for क्षेप ); (२)इन्द्राशनिमिवो; इद्रध्वजमिवो (३)नोद्यन्तुम् for नोद्धर्तुम् ),

**स्विन्नगात्रोऽभवद्भीमो न चोद्धर्तुं शशाक तम्** ।। २० ।।[०१]

यत्नवानपि तु श्रीमाँल्लाङ्गूलोद्धरणे ततः(णोद्धुरः)।
**कपेः पार्श्र्वगतो भीमस्तस्थौ व्रीडानताननः ।**[०२]
**प्रणिपत्य च कौन्तेयः प्राञ्जलिर्वाक्यमब्रवीत्** ।। २१ ।।

भीमसेनः

**प्रसीद कपिशार्दूल दुरुक्तं क्षम्यतां मम** ।। २२ ।।[०३]

सिद्धो वा यदिवा देवो गन्धर्वो वाथ गुह्यकः ।
**पृष्टः सन्काम्यया ब्रूहि कस्त्वं वानररूपधृक्** ।। २३ ।।[०४]

✻ शिष्यवत्त्वां तु पृच्छामि उपपन्नोऽस्मि तेऽनघ ।

हनूमान्

**यत्ते मम परिज्ञाने कौतूहलमरिन्दम।**
**तत्सर्वमखिलेन त्वं शृणु पाण्डवनन्दन** ।। २४ ।।[०५]

अहं केसरिणः क्षेत्रे वायुना जगदायुषा।
**जातः कमलपत्राक्ष हनूमान्नाम वानरः** ।। २५।।[०६]

---

(०१) (१)उत्क्षिप्य भ्रूर्; उच्चिक्षिप्सुर् ( प्सुं ); विवृत्तास्यः (२)तलं (४)तं for ह ),
(०२) (१)तत्; च for तु ); शीघ्रं; क्षिप्रं for श्रीमान् ); (२)लाग्मोद्धरणाय सः ( च ); णोद्यतः; णोद्धुरः; णोद्धूतः; णे ततः; णोद्धतः; (३)जानुभ्यामगमद् for कपेः पार्श्र्वगतो ); पार्श्र्व for पार्श्र्व ); ततो for गतो ); तस्थौ; राजन् for भीमस् ); (४)भीमो for तस्थौ ); व्रीडन्नषे; व्रीडान ताननः; दवाङ्मुखः ,
(०३) (१)प्रणम्य चैनं for प्रणिपत्य च ); तु (ए)व for च),
(०४) (२)वापि for वाथ ); (३)हि मया for कामया ); काम्यया ( को मया; कामया; कृपया ); पृच्छतो ब्रूहि (४)पुङ्गव for रूपधृक् ); श्रोतव्यं स्याद्यदा मयि,

न चेद्गुह्यं महाबाहो श्रोतव्यं चेद्भवेन्मम।

(१) (१) (ते for चेद् ); भाग for बाहो );(२) स्याद् for चेद् ; यदा मयि; मया यदि भवेन्मया,
(०५) (१) यदि ते मत् for यत्ते मम ); परिज्ञानं (३)तच्छृणुष्व यथाश्रद्धं ( मया तथ्यं ); (४) कौरव for पाण्डवं ); वदतो मे नरोत्तम; कथ्यमानं नरोत्तम,
(०६) (२) युना ( त्मना ); for युषा ); (४)हनुमान् नामतः for वानरः ),

सूर्यपुत्रं च सुग्रीवं शक्रपुत्रं च वालिनम्।
**सर्वे वानरराजानस्तथा वानरयूथपाः** ।। २६ ।।(०१)

उपतस्थुर्महावीर्या मम चामित्रकर्षण।
**सुग्रीवेणाभवत्प्रीतिरनिलस्याग्निना यथा** ।। २७ ।।(०२)

✻ तयोर्भ्रात्रोर्महात्मनोः तयोर्नासीत्समो वीर्ये ।(०३)

निकृतः स ततो भ्रात्रा कस्मिंश्चित्कारणान्तरे।
**ऋष्यमूके मया सार्धं सुग्रीवो न्यवसच्चिरम्** ।। २८ ।।(०४)

अथ दाशरथिर्वीरो रामो नाम महाबलः ।
**विष्णुर्मानुषरूपेण चचार वसुधातलम्** ।। २९ ।।(०५)

स पितुः प्रियमन्विच्छन्सहभार्यः सहानुजः ।
**सधनुर्धन्विनां श्रेष्ठो दण्डकारण्यमाश्रितः** ।। ३० ।।(०६)

तस्य भार्या जनस्थानाच्छलेनापहृता बलात्।
**वञ्चयित्वा नरव्याघ्रं मारीचेन तदानघ** ।। ३१ ।।(०७)

राक्षसेन्द्रेण बलिना रावणेन दुरात्मना।
**सुवर्णरत्नचित्रेण मृगरूपेण रक्षसा** ।। ३२ ।।

✻ राक्षसेन्द्रेण बलिना रावणेन दुरात्मना ।

---

(०१) (३) सर्वे for सर्व ); राजौ तौ; राजानः; राजानं (४)तथा; सर्वे; तदा for सर्व ),

(०२) (१) त्मानो for वीर्या ); जातः कमलपत्राक्षः ,

(०३) (१) (भाग for त्मनोः ); द्वयोर् for तयोर् ); न ) (२)कर्षण for कर्शन ); (३)सुग्रीवे च for वेण ),

(०४) (१) स्म; तु for स ); तदा for ततो ); (३)ऋष्य ( ऋषि ); for ऋश्य ); (४) ह्यवसच् for न्य; पुरा for चिरम् ),

(०५) (४) वसुधातलं तले for मिमाम्),

(०६) (१)यः for स) (२)सभार्यः सह चा; सभार्यश्च सहा (४)स्थितः ; गतः for श्रितः ),

(०७) (१)हृता वीर; हृता सीता for जनस्थानाद् ); (२) घ०सुग्रीवेण;, ख०ग०सुघ्रीवस्य, छले नापहृता for रावणेनहृता ); बलाद्धृता पुरा; वने; वनात् for बलात् ); शुभा जनक नन्दिनी,

✻ सुवर्णरत्नचित्रेण मृगरूपेण रक्षसा ।

✻ हरिणेन स राक्षसः; रक्षसा सुगरूपिणाः ।।[०१]

**अस्मिन् पर्वणि १२१ अध्याये ३२ श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि एकविंशत्यधिकशततमोऽध्यायः ।। १२१ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 122Adhyaya

# १२२. द्वाविंशत्यधिकशततमोऽध्यायः

**हनुमता भीमं प्रति समग्ररामकथाकथनम् ।।**

**हनूमान्**

**हृतदारः सह भ्रात्रा पत्नीं मार्गन्स राघवः ।**
**दृष्टवाञ्शैलशिखरे सुग्रीवं वानरर्षभम् ।। १ ।।**[०२]

**तेन तस्याभवत्सख्यं राघवस्य महात्मनः ।**
**स हत्वा वालिनं राज्ये सुग्रीवमभिषिक्तवान् ।। २ ।।** [०३]

**स राज्यं प्राप्य सुग्रीवः सीतायाः परिमार्गणे।**[०४]
**वानरान्प्रेषयामास शतशोऽथ सहस्रशः ।। ३ ।।**

✻ वानरान्मेषयामास शतशोऽथ सहस्रशः ।

**ततो वानरकोटीभिः सहितोऽहं नरर्षभ।**

---

(०१) (३) नरश्रेष्टं नरव्याघ्रं महाबाहुं महात्मानं for महाबुद्दिं (४) मारिचेनं for ) महाबुद्दिं (४) मारिचेन तदानघ तु राघवं तदा वने दुरात्मना

(०२) इनूमाचुवाच ( उवाच ); (२)सवान्धवः for स राघवः ); रामोथ रघुनन्दनः ,

(०३) (२) घ०सुग्रीवेण; ख०ग०सुग्रीवस्य, राघवेण; सुग्रीवस्य for राघवस्य ); (३)राज्यं for राज्ये ),

(०४) (४)सुग्रीवे अभिषिक्तवान् for प्रत्यं ); (३)स राज्यं प्राप्य सुग्रीवः ,

✻ ततः प्रवृत्तिः सीताया गृध्रेण सुमहात्मना।

**सीतां मार्गन्महाबाहो प्रयातो दक्षिणां दिशम् ।। ४ ।।**

✻ सहितोऽहं नरर्षभ सीतां मार्गन्महाबाहो[०१]

**तत्र प्रवृत्तिस्सीताया गृध्रेणैव महात्मना ।**
**सम्पातिना समाख्याता रावणस्य निवेशने ।। ५ ।।[०२]**

**ततोऽहं कार्यसिद्ध्यर्थं रामस्याक्लिष्टकर्मणः ।**

✻ शतयोजनविस्तीर्णमर्णवं सहसाऽऽप्लुतः ।
सम्पातिगृघ्राषिगतप्रवृत्तिः पाण्डुनन्दन।

**सम्पातिगृध्राधिगतप्रवृत्तिः पाण्डुनन्दन ।। ६ ।।**

✻ ( वाक्याधिगता प्रवृत्तिः; गृम्भाषिपतिप्रवृत्त्वा )[०३]

**अहं स्ववीर्यादुत्तीर्य सागरं मकरालयम् ।**

**सुतां जनकराजस्य सीतां सुरसुतोपमाम् ।**

**अहं स्ववीर्यदुत्तीर्य सामरं मकरालयम् ।। ७ ।।**

**सुतां जनकराजस्य सीतां सुरसुतोपमाम् ।[०४]**
**दृष्ट्वान्भरतश्रेष्ठ रावणस्य निवेशने ।। ८ ।।**

**समेत्य तामहं देवीं वैदेहीं राघवप्रियाम्।**

**दग्ध्वा लङ्कामशेषेण साट्टप्राकारतोरणाम् ।। ९ ।।[०५]**

**प्रतागतः पुनश्चापि नाम तत्र प्रकाश्य वै ।[०६]**

---

(०१) (२)प्रयातो ( प्रस्थितो; सहितो ); दक्षिव्यं यां दिशं प्रस्थिता वयं; जविवान्मस्थितो दिशं,
(०२) (३)ततः for तत्र ); (४) गृघ्रेन्द्रेण महात्मनाः गृध्रेण सुमहात्मना,
(०३) (३) विस्तरम् (४) अ प्लुवं for आ प्लतः) सहसार्नवं अन्तरं सहसाप्लुतं,
(०४) ( स्वावीर्वादइमुर्चाव वन्त्यं, ) ,
(०५) (१)दृष्ट्वा for दृष्टा ); च सा सीता for देवी ); दृष्टवान् भरत ( पाण्डव ); श्रेष्ठ ,
(०६) (२)राक्षसस्य for रावं ); (सप्राकारां स ( राट्ट ); तोरणां,) (३)पुनश्चापि; चास्मि पुनर्;

✼ समेत्य तामहं देवीं वैदेहीं राघवप्रियाम् ।

दग्ध्वा लङ्कामशेषेण साट्टप्राकारतोरणाम् ।

**मद्वाक्यं चावधार्याशु रामो राजीवलोचनः ॥ १० ॥**

**अबद्धपूर्वमन्यैश्च बद्ध्वा सेतुं महोदधौ ।**
**वृतो वानरकोटीभिः समुत्तीर्णो महार्णवम् ॥ ११ ॥**

✼ मद्वाक्यं चावधार्याशु रामो राजीवलोचनः ।

**अबद्धपूर्वमन्यैश्च बद्धा सेतुं महोदधौ ।**

✼ वृतो वानरकोटीभिः समुत्तीर्णो महार्णवम् ।(०१)

ततो रामेण वीरेण हत्वा तानेव (सर्व)राक्षसान्।

✼ पुनः प्रत्याहृता भार्या नष्टा वेदश्रुतिर्यथा।(०२)

**रणे स राक्षसगणं रावणं लोकरावणम् ।**
**निशाचरेन्द्रं हत्वा तु सभ्रातृसुतबान्धवम् ॥ १२ ॥**(०३)

**राज्येऽभिषिच्य लङ्कायां राक्षसेन्द्रं विभीषणम्।**
**धार्मिकं भक्तिमन्तं च भक्तानुगतवत्सलम् ॥ १३ ॥**(०४)

**प्रत्याहृत्य ततस्सीतां नष्टां वैद श्रुतीमिव ।**
**तयैव सहितः साध्व्या पत्न्या रामो महायशाः ॥ १४ ॥**(०५)

**गत्वा ततोऽतित्वरितः स्वां पुरीं रघुनन्दनः ।**
**अध्यावसत्ततोऽयोध्यामयोध्यां द्विषतां प्रभुः ॥ १५ ॥**

---

चास्य पुनर् (४)तस्य for तत्र ),

(०१) ( स बुद्धिपूर्वं सैन्यस्य त्तीर्य for तीर्णो );,

(०२) (१)वीर्येण for वीरेण ); (२) एव for सर्व ),

(०३) (१)थ for स) वै for तु ); बल; पुत्र for सुतं ); सभृत्यं सहवान्धवं दृढभक्तिं;
बुद्धिमतं for भक्ति ); वत्सलः ,

(०४) (३)ततः for पुनः ); प्रत्याहृत्य ततः सीतां (४)नष्टां वेद श्रुतिं यथा ( श्रुतीमिव ),

(०५) (१) क०ख०ग० श्रुतिं यथा,

*** तयैव सहितः साध्व्या पत्न्या समो महायशाः**
**अध्यावसत्ततोऽयोध्यामयोध्यां द्विषतां प्रभुः ।।(०१)**

**ततः प्रतिष्ठितो राज्ये रामो नृपतिसत्तमः ।**
**वरं मया याचितोऽसौ रामो राजीवलोचनः ।। १६ ।।**

**यावद्राम कथेयं ते भवेल्लोकेषु शत्रुहन्।**
**तावज्जीवेयमित्येवं तथास्त्विति च सोऽब्रवीत् ।। १७ ।।(०२)**

* वरं मया याचितोऽसौ रामो राजीवलोचनः ।।(०३)

**सीताप्रसादाच्च सदा मामिहस्थमरिन्दम।**
**उपतिष्ठन्ति मे दिव्य(दिव्याहि) भोगा भीम यथेप्सिताः ।। १८ ।।**

* सीताप्रसादाच्च सदा मामिहस्थमरिन्दम ।
उपतिष्ठन्ति दिव्या हि भोगा भीम यथेप्सिताः ।(०४)

**दशवर्षसहस्राणि दशवर्षशतानि च ।**
**राज्यं कारितवान्रामस्ततः स्वभवनं गतः ।। १९ ।।(०५)**

---

(०१) (१) राज्यं प्राप्य for साध्व्या पत्न्या );
गत्वा ततोऽतित्वरितः स्वां पुरीं रघुनन्दनः ।
(२) प्रीत्या for पत्न्या ); हि; वै; ()भि for ति);
रेमे दाशरथिर्वीरोह्ययोध्यामागतस्ततः
(१) अध्युवास for अध्यावसत् ); ततः पार्थ for ततोयोध्याम् );(२) विभुः; गणै for प्रभुः ); प्रजारञ्जनतत्परः; द्विषतां कण्टको विभुः ),

(०२) (१)प्रतिष्ठितो ( प्रीतः स्थितो ); राज्ये; राजन् for रामे ); (२)वरो for वीरो ); रामो (र ज्ये ); नृपत्तिसत्तमः (()सौ रघुसत्तमः ),

(०३) (३) (इ)यं ते; लोके for वीर ); (४)तिष्ठेल्लोकेषु; त्रिषु लोकेषु; तिष्ठन्ति तव शाश्वती for शत्रुं ); तिष्ठेयम्; जीवेहम् for जीवेयम् ); इत्येव; इत्युक्तः for इत्येवं ); तावद्यणान्धारयेयं मां तथेति for तथास्त्विति ); वचो for च सो ),

(०४) ( तदा for सदा ); मे दिव्या; दिव्या वै for दिव्या हि ); दिव्या भोगामया for यथा ); ),

(०५) (३)च रतवान्; च कृतवान् for कारितवान् ); राज्यं कृत्वा महाबाहुसू; रामो राज्यं पालयित्वा (४) ततश्च; ततोस; स ततः; ततः स for ततस्तु ); स्वभ ( भु ); दनं त्रिभुवनं स्वर्भवनं; स्वर्गमितो for तु

तदिहाप्सरसस्तात गन्धर्वाश्च सदानघ ।
तस्य वीरस्य चरितं गायन्तो रमयन्ति माम् ॥ २० ॥(०१)

अयं च मार्गो मर्त्यानामगम्यः कुरुनन्दन।
ततोऽहं रुद्धवान्मार्गं तवेमं देवसेवितम् ॥ २१ ॥

त्वामनेन तथा यान्तं यक्षो वा राक्षसोऽपि वा।
धर्षयेद्वा शपेद्वापि मा कश्चिदिति भारत ॥ २२ ॥(०२)

✻ त्वामनेन पथा यान्तं यक्षो वा राक्षसोऽपि वा ॥(०३)

दिव्यो देवपथो ह्येष नात्र गच्छन्ति मानुषाः ।
यदर्थमागतश्चासि अत एव सरश्च तत् ॥ २३ ॥(०४)

अस्मिन् पर्वणि १२२अध्याये २३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि

तीर्थयात्रापर्वणि द्वाविंशदधिकशततमोऽध्यायः ॥ १२२॥

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 123

# १२३. त्रयोविंशत्यधिकशततमोऽध्यायः

---

त्रिदिर् ),
(०१) (१)तमिहा; सदेवा; सदिहा for तदिहा ); (२)तदा; तथा; यथा for सदा) (३) राम for वीर ); (४)गायन्तो वै मनोरमं; रमयन्ति च,
(०२) (१)मार्गस्तु; स मार्गो for च मार्गो ); (२)पुरुषर्षभ; भरतर्षभ for कुरु ); (४)तमिमं; तवेदं for तदेवं ); तमेवं for तवेमं ); भीम दुर्गमं; दुर्गमं नरैः for देव ),
(०३) (१) त्वा; त्वां for अ पि ); कौरव for भारत ),
(०४) (२)मानवाः for मानुषाः ); (३) (अ)पि; त्वं for अ सि ); (४)वा for हि ); तु for हि ); त एव सरसश्च तु; अत एव सरश्च तत् ( हि तत्सरः ); सरसोभ्यास एष हि; तत्सर्वं वेद्मि पाण्डव; अतोवसरतश्च तत्,

**भीमेन जलाधिलङ्घनकालिकपृथुरूपप्रदर्शनं प्रर्थितेन हनूमता तं प्रति एतत्कालिकैस्तात्कालिकरूपस्य दुर्निरीक्षताकथनपूर्वकं चतुर्युगधर्मप्रतिपादनम् ।।**

**वैशम्पायनः**

**एवमुक्तो महाबाहुर्भीमसेनः प्रतापवान्।**
**प्रणिपत्य ततः प्रीत्या भ्रातरं हृष्टमानसः ।**
**उवाच श्लक्ष्णया वाचा हनूमन्तं कपीश्वरम् ।। १ ।।(०१)**

**मया धन्यतरो नास्ति यदार्यं दृष्टवानहम्।**
**अनुग्रहो मे सुमहांस्तृप्तिश्च तव दर्शनात् ।। २ ।।(०२)**

**एकं तु कृतमिच्छामि त्वयाद्य प्रियमात्मनः ।। ३ ।।(03)**

**यत्ते तदाऽऽसीत्प्लवतः सागरं मकरालयम्**
**रूपमप्रतिमं वीर तदिच्छामि निरीक्षितुम्।(०४)**
**एवं तुष्टो भविष्यामि श्रद्धास्यामि च ते वचः ।। ४ ।।**

**वैशम्पायनः**

**एवमुक्तः स तेजस्वी प्रहस्य हरिरब्रवीत् ।। ५ ।।(०५)**

**हनूमान्**

**न तच्छक्यं त्वया द्रष्टुं रूपं नान्येन केनचित्।**

---

(०१) (२)महाबलः for प्रता ); (३)प्रीतो for प्रीत्या ); (४)वानरं, for भ्रातरं ); हनुमन्तं, महाकपिंfor कपी );,

(०२) भीमः, (१) यथा; मत्तो for मया ); तमो for ०तरो ); (४)तुष्टिश्च; प्रीति for तृप्ति );,तथा तुस्मिं ( ०प्त ); श्च दर्शनात्,

(०३) (१)एकं (एतत्) ( एवं ); (२) त्वयाचार्य; त्वया त्वयार्येण; त्वयैवश्य for स्वयार्याद्य ); मम प्रियं; मनःप्रियं, त्वया यछस्मइयं वचः; त्ववभ्य for यरवया ); प्रियमात्मनः,

(०४) (३)यत्त्वेतदासीञ्पु (४)वरुणा for मकरा) तम् for तद्),

(०५) (२)ततो for च ते ); (३) तु for स );,

कालावस्था तदा ह्यन्या वर्तते सा न साम्प्रतम्।(०१)
ततोऽद्य दुष्करं द्रष्टुं मम रूपं नरोत्तम ॥ ६ ॥ (०२)

अन्यः कृतयुगे कालस्त्रेतायां द्वापरे परः ॥
अयं प्रध्वंसनः कालो नाद्य तद्रूपमस्ति मे ॥ ७ ॥(०३)

भूमिर्नद्यो नगाः शैलाः सिद्धा देवा महर्षयः ।
कालं समनुवर्तन्ते यथा भावा युगे युगे ॥ ८ ॥

कालं कालं समासाद्यं नारायणं नरपुङ्गव ।
बलवर्ष्मप्रभावा हि प्रहीयन्त्युद्भवन्ति च ॥ ९ ॥(०४)

✻ कालं कालं समासाद्य नराणां नरपुङ्गव ।(०५)

तदलं बत तद्रूपं द्रष्टुं कुरुकुलोद्वह ।
युगं समनुवर्तामि कालो हि दुरतिक्रमः ॥ १० ॥(०६)

भीमः

युगसङ्ख्यां समाचक्ष्व आचारं च युगे युगे।
धर्मकामार्थभावांश्च कर्मवीर्यो भवाभवौ ॥ ११ ॥(०७)

---

(०१) (१)तदशक्यं; तन्न शक्यं for न तच्छक्यं ); (२)रूपं चाप्रतिमं भुवि; न चैवान्येन केनचित्; रूपमन्येन वा पुनः, कालां प्रध्वंसनः (४) न सा वर्तति साम्प्रतं,

(०२) ( तेन तद् for ततोघ );, भीम for द्रष्टुं );,

(०३) (४)प्रध्वंसनः (४)न तादृग् for नाद्य तद् ); च for मे );,

(०४) (२)देव for देवाः ); दिव्या ब्रह्मर्षयस्तथा; (३) सिद्धा ( सिद्ध ); देवर्षयस्तथा ( दा ); (३)सर्वेनु for समनु ); (४)यथा भावि; तथा भावा; भावाभावा,

(०५) (१)बलं वर्म, वर्ष्मवीर्य; बलवत्सु; बद्धवत्सु for बलवर्ष्म );(२) प्रभावश्च; प्रभावाश्च; प्रभावान्हि, for प्रभावा हि ); बलं पुरुषभावश्च हीयन्ते च; , प्रभवन्ति for प्रहीयन्ति );,

(०६) (१) अ०तं महद्रूपं ,तु महद्;, तव मे;, बत तद् मम तद् for तव तद् ); (२)द्भव for द्वह );द्रष्टुं शक्नोमि भारत, (३)वर्तेह for वर्तामि );,

(०७) (१)ममा for समा ); (२) त्वाचारं; आचारान् for आचारं ); (३)धर्मार्थकाम; धर्मार्थभावfor धर्मकामार्थं ); भावानां; कामांश्च for भावांश्च ); (४)कर्मवीर्य ( र्यं ); भवाभवं; धर्मं वीर्यभवाभवौ; तथा

## हनूमान्

कृतं नाम युगं तात यत्र धर्मः सनातनः ।
कृतमेव न कर्तव्यं तस्मिन्काले युगोत्तमे ।। १२ ।।(०१)

न तत्र धर्माः सीदन्ति क्षीयन्ते न च वै प्रजाः ।
ततः कृतयुगं नाम कालेन गुणतां गतम् ।। १३ ।।(०२)

देवदानवगन्धर्वयक्षराक्षसपन्नगाः ।
नासन्कृतयुगे तात तदा न क्रयविक्रयः ।। १४ ।।(०३)

न सामऋग्यजुर्वर्णाः क्रिया नासीच्च मानवी।
अभिध्याय फलं तत्र धर्मः सन्यास एव च ।। १५ ।।(०४)

न तस्मिन्युगसंसर्गे व्याधयो नेन्द्रियक्षयः ।
नासूया नापि रुदितं न दर्पो नापि वैकृतम् ।। १६ ।।(०५)

न विग्रहः कुतस्तन्द्री न द्वेषो न च पैशुनम्।

---

वीर्यभ; वर्ष्मवीर्ये for वर्ष्मवीर्यौ ); कर्मबीजं; वर्ष्मवीर्य भ; कर्मवीर्ये ( र्यं ); भ; धर्मं वीर्यं भ; कर्मवीर्यं र्य भ धर्म वीर्य भ कर्म वीर्य भवाभवान्,

(०१) हनुमान्, /*(१)युगश्रेष्ठं; युगं तत्र for युगं तात );(३) ख० इतमर्धं नास्ति, (४)नरो त्तम for युगो );,

(०२) (२)न च क्षीयन्ति; क्षीयन्ते न च; न क्षीयन्ति च न च प्रक्षीयन्ति प्रजाः (३)युगे काले for युगं नाम ); (४)कालेन गुणितां गताः; कालो नु महः गुण तां गतः,

(०३) (१)गन्धर्वा for गन्धर्व );(२) किंनराः for पन्नगाः ); (३)काले for तात ); नादानं; न दान for तदान ); क्रयविक्रयः; विक्रयौ; क्रमविक्रमौ दानाध्ययनविभ्रमाः,

(०४) (१)यजुऋग्वेद, ( ०दाः; दा ); ऋग्यजुर्वे र्भे ऋग्यजुर्वर्णाः for यजुऋग्वर्णः ); (२) न च मानसि for मानवी) क्रिया चासीत्प्रबाधिनी (३) अभिधाय धान for ध्याय) यच्च नात्र; यत्र ,for तत्र ); (४)धर्म;, धर्मे for धर्मः ); सत्यं च; स्वाध्याय for संन्यास ),

(०५) (१)नैतस्मिन्; ,तस्मिंश्च for न तस्मिन् ); युगसंसर्गाः वागसंसर्गो र्गे न च तस्मिक्षुपासर्गो (३)वैकृतं; नाधयो for व्याधयो ); (३)नाभिसरणं; नाभिच ( व ); रणं for नापि रुदितं ); (४) क०ख०ग०घ० न दर्पो, न च for नापि ); वैकृतं for पैशुनम् ),

**न भयं नापि सन्तापो न चेर्ष्या न च मत्सरः ।। १७ ।।**[०१]

**ततः परमकं ब्रह्म सा गतिर्योगिनां परा।**
**आत्मा च सर्वभूतानां शुक्लो नारायणस्तदा ।। १८ ।।**[०२]

**ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च कृतलक्षणाः ।**
**कृते युगे समभवन्स्वकर्मनिरताः प्रजाः ।। १९ ।।**[०३]

**लक्षालङ्कारः- शूद्राश्च कृतलक्षणा इत्यत्र कृतलक्षणाः कृततप्तचक्रसङ्खादिलाञ्छनाः ।**

**समाश्रयं समाचारं समज्ञानं च केवलम्।**
**तदा हि समकर्माणो वर्णा धर्मानवाप्नुवन् ।। २० ।।**[०४]

**एकदेवसदायुक्ता एकमन्त्रविधिक्रियाः ।**
**पृथग्धर्मास्त्वेकवेदा धर्ममेकमनुव्रताः ।। २१ ।।**[०५]

**चातुराश्रम्ययुक्तेन कर्मणा कालयोगिना।**
**अकामफलसंयोगात्प्राप्नुवन्ति परां गतिम् ।। २२ ।।**[०६]

✻ कामः कामयमाणेषु ब्राह्मणेषु तिरोहितः ।

**एतत्कृतयुगं नाम त्रैगुण्यपरिवर्जितम् ।। २४ ।।**

---

(०१) (१)विग्रह कृता ( तसू ); हि ग्रह कुता विग्रहः क्रुधस्; विग्रहः कृतस् for विग्रहः कुतसू ); न विभ्रमः कुतः स्तम्भो (२)नास्ति; न च for नापि ); मत्सरः; पैशुनं; अ शोभनं for वैकृतम् ); (३)नासूयं; न भियो for न भयं );, नापि for न च ); (४) नापि for न च ); वै कलिः; विभ्रमः for मत्सरः ),

(०२) (१)तपः, for ततः ); ब्रह्मन् for ब्रह्म ); (२)सा for या ); पुरा for परा ); (४)प्रभुः; तथा for तदा );,

(०३) (२)शुम for कृतं ); (३) सम्भवन्ति for समभवन् ); (४)धर्म for कर्मं ),

(०४) (१)समाश्रया; श्रमाः; स्वामाश्रम; श्रयं for श्रमं ); समाचाराः, (२)सर्व, स्वं च for सम ); ज्ञानं for ज्ञान ); मतीबलाः; महीतलं; विधेर्बलं; च ( अ; हि ); केवलं; मतिर्बलं; मतिं बलं for मतीबलम् ); (३)सर्वं for सम ); (४)वर्ण, सर्व for वर्णा ); धर्माः; धर्मः; धर्मम् for धर्मान् ); समाप्नुवन् अवाप्नुयुः; अवाप्नुयात,

(०५) (१)एकवर्णं; ०देव; एकं ( क ); देवं for एकवेद ); सदा for समा );,

(०६) (१)चातुराश्रमं; चतु राश्रमं (३) संयोगाः संयोगां (४)वर्णस्य; वर्ण्य च शाश्वतं,

आत्मयोगसमायुक्तो धर्मोऽयं कृतलक्षणः ।
**कृते युगे चतुष्पादश्चातुर्वर्ण्यस्य शाश्वतः ।। २३ ।।**

त्रेतामपि निबोध त्वं यस्मिन्सत्रं प्रवर्तते।[०१]
**पादेन ह्रसते धर्मो रक्ततां याति चाच्युतः ।। २५ ।।**[०२]

सत्यप्रवृत्ताश्च नराः क्रियाधर्मपरायणाः ।
**ततो यज्ञाः प्रवर्तन्ते धर्माश्च विविधाः क्रियाः ।। २६ ।।**[०३]

त्रेतायां भावसङ्कल्पाः क्रियादानफलोपगाः ।[०४]

प्रचलन्ति न वै धर्मात्तपोदानपरायणाः ।
**स्वधर्मस्थाः क्रियावन्तो नरास्त्रेतायुगेऽभवन् ।। २७ ।।**[०५]

द्वापरे च युगे धर्मो द्विभागोनः प्रवर्तते।
**विष्णुर्वै पीततां याति चतुर्धा वेद एव च ।। २८ ।।**[०६]

ततोऽन्ये च चतुर्वेदास्त्रिवेदाश्च तथापरे।
**द्विवेदाश्चैकवेदाश्चाप्यनृचश्च तथापरे ।। २९ ।।**[०७]

एवं शास्त्रेषु भिन्नेषु बहुधा नीयते क्रिया।
**तपोदानप्रवृत्ता च राजसी भवति प्रजा ।। ३० ।।**[०८]

---

(०१) (४)सत्वं सर्वः सर्वं for सत्रं),

(०२) (१) हीयते,, ग्रस्व for हस ); ,पादेन ऊनो धर्मश्च, (२)वै इरिः,for चाच्युतः );,

(०३) (१) धर्माः for यज्ञः ); स्वधर्मस्वाः क्रियावन्तो (२) धर्मश्च; धर्म्या, (forधर्मा) ततो यज्ञाः प्रवर्तते,

(०४) (३) संयुक्ताः सङ्कल्पात् (४) पगाः for दयाः),

(०५) (१) प्रचलन्ते; प्रचरन्ति न ते; ततौ; तपो for न वै० ); धर्मास्;, धर्मान्;, धर्मं for धर्मात् ); (२)धर्म for दान ); स्वकर्मस्थाः, प्रजाः सर्वा for क्रिया ); (४)राजन्; नरास् for जनास् ),

(०६) (१)च; हि; तु for पि ); (२)द्विभागो न द्विपादोनः; द्विभागेन (३)विष्णुः पीतत्वमायाति,

(०७) (२) क०ख०ग०घ० वेदाश्वपरे तथा, अ परे द्विजाः; षरे तदा; परे तथा; अ परे तथा; अ परे जनाः ( तथा ); for तथापरे ); (४) अ वेदा for अ नृच ); सत्यं चैवानृतं तथा ( तदा );,

(०८) (२)वर्तते; नियता; क्रियते; धीय० for नीय० ); (३)तपोधर्म०; प्रयुक्ता,

एकवेदस्य चाज्ञानाद्वेदास्ते बहवः कृताः ।
**सत्त्वस्य चेह विभ्रंशात्सत्ये कश्चिदवस्थितः ।। ३१ ।।**[०१]

सत्यात्प्रच्यवमानानां व्याधयो बहवोऽभवन्।
**कामाश्चोपद्रवाश्चैव तदा वै दैवकारिताः ।। ३२ ।।**[०२]

यैरर्द्यमानाः सुभृशं तपस्तप्यन्ति मानवाः ।
**कामकामाः स्वर्गकामा यज्ञांस्तन्वन्ति चापरे ।। ३३ ।।**[०३]

एवं द्वापरमासाद्य प्रजाः क्षीयन्त्यधर्मतः ।
**पादेनैकेन कौन्तेय धर्मः कलियुगे स्थितः ।। ३४ ।।**[०४]

**तामसं युगमासाद्य कृष्णो भवति केशवः ।। ३५ ।।**

वेदाचाराः प्राशाम्यन्ति धर्मयज्ञक्रियास्तथा।[०५]
**ईतयो व्याधयस्तन्द्री दोषाः क्रोधादयस्तथा।**
**उपद्रवंश्च वर्तते(वाः प्रवर्तन्ते) आधयः क्षुद्भयं तथा ।। ३६ ।।**[०६]

युगेष्वावर्तमानेषु धर्मो व्यावर्तते पुनः ।
**धर्मे व्यावर्तमाने तु लोको व्यावर्तते पुनः ।। ३७ ।।**[०७]

---

(०१) (१)देवस्य for वेदस्य ); अ ज्ञाने for अ ज्ञानाद् ); एकस्य वेदस्याज्ञानाद्, (२)स्मृताः for कृताः ); (३)सत्वस्य for सत्यस्य ); चैव; चैक; , चापि for चेह ); विज्ञानात्; अ विज्ञानात् for विभ्रंशात् ); (४) सत्वे for सत्ये );,

(०२) (१)सत्वात्; सत्यं for सत्यात् ); प्रमुच्य for प्रच्यव ); (४)तथा for तदा ); दैवेन; ते देव; वै दैव ( देव ); for दैवत );,

(०३) (१)तैर् for यैर् ); (३)यज्ञ for स्वर्ग० );,

(०४) (३)नश्यन्ति for क्षीयन्ति ); धर्मतः for अ धर्मतः );,

(०५) (३)प्रणश्यन्ति for प्रशा ); (४) धर्मा यज्ञ; यज्ञधर्म तदा for तथा );,

(०६) (१)क्षुद्भयं for व्याधयस् ); स्नेहा तन्द्रीर् चैव for तन्द्री ); (२)क्रोधा दोषाः क्रौर्या, दोषो क्रोधो दमास्तथा, (३)उपप्लवा, प्र for च ); वर्धते for वर्तन्ते ); (४) ईतयः for आधयः );, क्षुद्भयं for व्याधयस् ); धर्मश्च क्षीयते क्रमात्,,

(०७) (३) घ०धर्मेषु वर्तमानेषु लोको व्यावर्ततेपुनः। धर्मेष्वावर्तमानेषु,

लोके क्षीणे क्षयं यान्ति भावा लोकप्रवर्तकाः ।
युगक्षयकृता धर्माः प्रार्थनानि विकुर्वते ।। ३८ ।।(०१)

एतत्कलियुगं नाम अचिराद्यत्प्रवर्तते।
युगानुवर्तनं त्वेतत्कुर्वन्ति चिरजीविनः ।। ३९ ।।(०२)

यच्च ते मत्परिज्ञाने कौतूहलमरिन्दम ।
अनर्थकेषु को भावः पुरुषस्य विजानतः ।। ४० ।।

एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
युगसङ्ख्यां महाबाहो स्वस्ति प्राप्नुहि गम्यताम् ।। ४१ ।।

अस्मिन् पर्वणि १२३अध्याये ४१श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि त्रयोविंशत्यधिकशततमोऽध्यायः ।। १२३ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04- 124 Adhyaya

## १२४. चतर्विंशत्यधिकशततमोऽध्यायः

भीमसेनस्याग्रहेण हनुमतस्तत्समक्षे समुद्रतरणकलिकपृथुतरनिजरूपप्रदर्शनपूर्वकं प्रकटीकरणं चातुर्वर्ण्यधर्माणां प्रतिपादनं च ।।

भीमसेनः

पूर्वरूपमदृष्ट्वा ते न यास्यामि कथञ्चन।
यदि तेऽहमनुग्राह्यो दर्शयात्मानमात्मना ।। १ ।।

---

(०१) (२)भावा लोके प्रवर्तिताः, (३) क्षये for क्षय ); कृतो धर्मः; कृतान्ध र्मान् for कृता धर्माः ); (४) प्रधा नानि; प्रयाणानि for प्रार्थ० ); वि प्र; च for वि ); प्रार्थनापूर्विकाः स्मृताः,
(०२) (२)नचिराद् for अचिराद् ); प्रतिपत्स्यते; सम्प्रवर्तते;, यत्प्रवर्त्स्यते, (३)एतच्च ( ह्येतत् ); चैव ( चेमं ); for त्वेतत् );,

वैशम्पायनः

एवमुक्तस्तु भीमेन स्मितं कृत्वा प्लवङ्गमः ।
तद्रूपं दर्शयामास यद्वै सागरलङ्घने ॥ २ ॥

भ्रातुः प्रियमभीप्सन्वै चकार सुमहद्वपुः ।
तद्रूपं यातु परा तस्य बभूवौदधिलङ्घने ॥ ३ ॥

देहस्तस्य ततोऽतीव वर्धत्यायामविस्तरैः ।(०१)
✲ तपं यत्पुरा तस्य बभूवोदच्छिकने ॥(०२)
सद्रुमं कदलीषण्डं छादयन्नमितद्युतिः । ॥ ४ ॥

गिरेश्चोच्छ्रयमाक्रम्य तस्थौ तत्र च वानरः ।(०३)
समुच्छ्रितमहाकायो द्वितीय इव पर्वतः ॥ ५ ॥

ताम्रेक्षणस्तीक्ष्णदंष्ट्रो भृकुटीकुटिलाननः ।
दीर्घलाङ्गूलमाविध्य दिशो व्याप्य स्थितः कपिः ॥ ६ ॥(०४)

तद्रूपं महदालक्ष्य भ्रातुः कौरवनन्दनः ।
विसिष्मिये तदा भीमो जहृषे च पुनः पुनः ॥ ७ ॥(०५)

तमर्कमिव तेजोभिः सौवर्णमिव पर्वतम्।
प्रदीप्तमिव चाकाशं दृष्ट्वा भीमो न्यमीलयत् ॥ ८ ॥

आबभाषे च हनुमान्भीमसेनं स्मयन्निव ।

---

(०१) (२)सुमहत् ( ०हा ); कपिः,

(०२) (३)च वीरस्य for ततोतीव ); स देहस्त्य वीरस्य; स्वं देहं वर्धयामास (४)अ वर्धता यामं; हनुमान्यवनात्मजः; वृद्ध आयामं,

(०३) (१)तद्बोर्धं; सद्रुमं; सद्रूपं for तद्रपं );सण्ढं for षण्डं ); (३)चिरं चेच्छत्य शिखरोच्छ्रयम्; मरिइए गिरेश्चोच्छ्रायस् च बाकम आसान् आवृत्य for आगस्थ ); (४)च for स ); तस्थौ गिरिम्भोक्ष्मः ,

(०४) (२)भास्करः for पर्वतः ); तत्रासौ वा नरोत्तमः (४)कुटिलाननः,

(०५) (३)विसिस्मये स्मियेत सिष्मिये पार्थो for भीमो); (४)जहर्षे; जहर्ष,

एतावदिह शक्तस्त्वं द्रष्टुं रूपं ममानघ ॥ ९ ॥[०१]

हनूमान्

वर्धेऽहं चाप्यतो भूयो यावन्मे मनसि स्थितम्।
भीमशत्रुषु चात्यर्थं वर्धते मूर्तिरोजसा ॥ १० ॥[०२]

वैशम्पायनः

तदद्भुतं महारौद्रं विन्ध्यपर्वतसन्निभम् ।
दृष्ट्वा हनूमतो वर्ष्म सम्भ्रान्तः पवनात्मजः ॥ ११ ॥[०३]

प्रत्युवाच ततो भीमः सम्प्रहृष्टतनूरुहः ।
कृताञ्जलिरदीनात्मा हनूमन्तमवस्थितम् ॥ १२ ॥[०४]

भीमसेनः

दृष्टं प्रमाणं विपुलं शरीरस्यास्य ते विभो ।
संहरस्व महावीर्य स्वयमात्मानमात्मना ॥ १३ ॥

न हि शक्नोमि त्वां द्रष्टुं दिवाकरमिवोदितम् ।
अप्रमेयमनाधृष्यं मैनाकमिव पर्वतम् ॥ १४ ॥[०५]

विस्मयश्चैव मे वीर सुमहान्मनसोऽद्य वै।
यद्रामस्त्वयि पाश्वस्थे स्वयं रावणमभ्यगात् ॥ १५ ॥[०६]

त्वमेव शक्तस्तां लङ्कां सयोधां सहवाहनाम्।

---

(०१) (३)एव for इह ); (४)द्रष्ढं रूपं,
(०२) (१)वर्धतशॄ; वर्धते; वर्धेयं; वर्धये; यदेवं; यदैवं अ भूतोयं for अ तो भूयो ); (२)यावान्मे; यन्मे तन् मनसीप्सितं; मनसि स्थितं० यावदिच्छा भवेन्मम ,
(०३) वैशम्पायन उं ( उ ); (२)पर्वत (३)हनुमतो रूपं for वर्ष्म ),
(०४) (४)हनुमन्तम् अवस्थितः; उपस्थितः for अवस्थितम् ),
(०५) (१)नाहं for न हि ); शक्तोस्मि for शक्नोमि ); ते for त्वां ); द्रष्टुं त्वां न हि शक्नोमि ,
(०६) (१)महा; महान्; ए व मे for ए व मे ); (४)यात् for गात् ),

स्वबाहुबलमाश्रित्य विनाशयितुमञ्जसा ।। १६ ।।[०१]

न हि ते किञ्चिदप्राप्यं मारुतात्मज विद्यते।
तव नैकस्य पर्याप्तो रावणः सगणो युधि ।। १७ ।।[०२]

वैशम्पायनः

एवमुक्तस्तु भीमेन हनूमान्प्लवगोत्तमः ।
प्रत्युवाच ततो वाक्यं स्निग्धगम्भीरया गिरा ।। १८ ।।[०३]

हनूमान्

एवमेतन्महाबाहो यथा वदसि भारत।
भीमसेन न पर्याप्तो ममासौ राक्षसाधमः ।। १९ ।।[०४]

मया तु निहते तस्मिन्रावणे लोककण्टके।
कीर्तिर्नश्येत्राघवस्य तत एतदुपेक्षितम् ।। २० ।।[०५]

तेन वीरेण तं हत्वा सगणं राक्षसाधमम्।
आनीता स्वपुरं सीता कीर्तिश्चाख्यापिता नृषु ।। २१ ।।[०६]

तद्गच्छ विपुलप्रज्ञ भ्रातुः प्रियहिते रतः ।
अरिष्टं क्षेममध्वानं वायुना परिरक्षितः ।। २२ ।।

---

(०१) (२)स सह सु for स ); रावणां for वाहनाम् ); (४)अञ्जसा for ओजसा ),

(०२) (३)अपर्याप्तस्तवैकस्य; न चै वैकस्य प; न चैव तव प; तवैवैकस्य पर्याप्तो (४)राक्षसः for रावणः ); न चासौ राक्षसाधमः ,

(०३) (१) स for तु) (२)हनुमान् प्लवगोत्तमः; भरतर्षभ; प्लवगेश्वरः; मनुजर्षभ,

(०४)(४)यथासौ; न चासौ for ममासौ ); धिपः for धमः ); रावणः सगणो युधि,

(०५) (१)निहते तस्मिन् (२)सबले for रावणे ); लोक वारणे; रावणे (३)न स्याद् for नश्येद् ); (४)समी for उपे ); तदेनं निरीक्षितं इ त्यत एवं समीक्षितं; अ तएतत्समी; तत एवमुपे०; इ त्यत एतदुपे; इ त्येवमेतदुपे,

(०६) (१)तं हत्वा; गत्वा तु for हत्वा तु ); तेन हत्वा तु ( सु; स ); वीरेण ( रामेण ); (२)धमं for धिपम् ); (३)स्वपुरीं स्वां पुरीं; स्वपुरे for स्वपुरं ); (४)लोके च ( लोकेषु ); स्थापितं यशः; कीर्तिश्च ( श्चा ); स्थापिता नृषु ,

एष पन्थाः कुरुश्रेष्ठ सौगन्धिकवनाय ते।
द्रक्ष्यसे धनदोद्यानं रक्षितं यक्षराक्षसैः ।। २३ ।।

न च ते तरसा कार्यः कुसुमावचयः स्वयम्।
दैवतानि हि मान्यानि पुरुषेण विशेषतः ।। २४ ।।(०१)

बलिहोमनमस्कारैर्मन्त्रैश्च भरतर्षभ।
दैवतानि प्रसादं हि भक्त्या कुर्वन्ति भारत ।। २५ ।।(०२)

मा तात साहसं कार्षीः स्वधर्मं परिपालय।
स्वधर्मस्थः परं धर्मं बुध्यस्व गमयस्व च ।। २६ ।।(०३)

न हि धर्ममविज्ञाय वृद्धाननुपसेव्य च ।
धर्मार्थौ वि(वे)दितुं शक्यौ बृहस्पतिसमैरपि ।। २७ ।।(०४)

अधर्मो यत्र धर्माख्यो धर्मश्चाधर्मसञ्ज्ञितः ।
स विज्ञेयो विभागेन यत्र मुह्यन्त्यबुद्धयः ।। २८ ।।(०५)

आचारसम्भवो धर्मो धर्मे वेदाः प्रतिष्ठिताः ।
वेदैर्यज्ञाः समुत्पन्ना यज्ञैर्देवाः प्रतिष्ठिताः ।। २९ ।।(०६)

वेदाचारविधानोक्तैर्यज्ञैर्धार्यन्ति देवताः ।

---

(०१) (२)कुसुमा ( मो ); पचयः; कुसुमानयनं (३)वि; इ ह for हि ); विजानता ( विशेषतः ),
(०२) (२)पुरुषर्षभ (३)देवता हि for दैवं ),
(०३) (२)परि for अनु ); पालयन् (३) स्वधर्मस्थापनं धर्म्य (४) गणयस्व; गमयस्व आ गमनेस्य for आ गमयस्व ); बुध्या विगणय स्वयम्,
(०४) (१)शास्त्रम्; धर्मान् for धर्मम् ); अव for अवि ); (२)वृद्धानविगणय्य वा (३)धर्मार्थौ for धर्मो वै ); विचितुं for वेदितुं ); शक्यौ; शक्यं ,
(०५) (१)यश्च; ह्यत्र for यत्र ); (३) स विज्ञेयो; विख्या तव्यो; विज्ञातव्ये हि भागेन for वि ); (४) तत्र for यत्र) बुद्धयः for अ बुद्धयः ),
(०६) (१)प्रभवो (२)धर्मे वेदाः प्रतिष्ठिताः (३)वेदाद् for वेदैर् ); (४) यज्ञे; यज्ञाद् for यज्ञैर् ); वेदाः for देवाः ),

बृहस्पत्युशनःप्रोक्तैर्नयैर्धार्यन्ति मानवाः ।। ३० ।।(०१)

पण्याकरवणिज्याभिः कृष्यागोजाविपोषणैः ।
वार्त(विद्य)या धार्यते सर्वं धर्मैरेतैर्द्विजातिभिः ।। ३१ ।।(०२)

त्रयी वार्ता दण्डनीतिस्तिस्रो विद्या विजानताम्।
ताभिः सम्यक्प्रयुक्ताभिर्लोकयात्रा विधीयते ।। ३२ ।।(०३)

सा चेद्धर्मकृता न स्यात्त्रयीधर्ममृते भुवि।
दण्डनीतिमृते चापि निर्मर्यादमिदं भवेत् ।। ३३ ।।(०४)

वार्ताधर्मे ह्यवर्तिन्यो विनश्येयुरिमाः प्रजाः ।
सुप्रवृत्तैस्त्रिभिर्ह्येतैर्धर्मं सूयन्ति वै प्रजाः ।। ३४ ।।(०५)

जिह्वानाममृतं धर्मो ह्येकश्चैवैकलक्षणः ।
यज्ञाध्ययनदानानि त्रयः साधारणाः स्मृताः ।। ३५ ।।(०६)

लक्षालङ्कारः- जिग्वानाममृतं धर्म इत्यत्र 'अमृतं यदयाचितम्' इति वचनात् अयाचिता वृत्तिः अमृतम् ।

---

(०१) (१)विधानज्ञैर (२)मृष्यन्ति तुष्यन्ति; तृध्यन्ति; ऋध्यं ( इष्यं इध्यं ); ति for धार्यन्ति ); (३) नोर्युक्तैः नःप्रोक्तैः; नज्ञैश्च for नोक्तैश्च ); मानवाः धार्यते (४)ऋध्यन्ति ( तृप्यन्ति ); for धार्यन्ति ),
(०२) (१)बल्याक्यं (२)कृष्णर्योः कृष्याथैर् for कृडयाथो ); कृष्या ( षि ); गोजा ( ग्वैर्गो ); विपो; कृष्या योषाविपों; कृष्या चाधानिपो; (३)विद्यया for वार्त ); धर्मैः; लोकौ; धर्म for सर्व ); (४) धर्मैर्भिर्; धर्मोपेतैर्; सर्वं धर्मैर् for धर्मैरेतैर् ),
(०३) (१)त्रयीति ( त्रयी तु ); निश्चिता वृद्धैः ( बुद्धैः; वार्ता ); दण्डनीतिस्क्यीवार्ता ( ०र्ताः ); (२) विधानतः जगुर्मताः for विजां ); प्रवृत्ताभिर् for प्रयु) (४) प्रवर्तते for विधी ),
(०४) (१)सर्व; सा वै; सतां सा च for सा चैद् ); कर्म धर्मः for धर्मं ); कृता ( कृते ); for किवा ); (२)त्रयीधर्म न ते; धर्मादृते (३) विना for ऋते ); (४)ऋतं for इदं ),
(०५) (१)हि वर्तन्त्यो; ह्यति ( ह्यधि; स्वति ); ष्टन्त्यो; ह्यवर्तिन्यो (३)अ for सु ); (४)धर्मं; धर्मेfor धर्मैः ); सीदन्ति for सूयन्ति ),
(०६) (१)परमो for अमृतं ); तच्च for धर्मो ); द्विजानामथ ये धर्मा; द्विजा तीनामृतं धर्मो (२)धर्मशू for धर्मान् ); धर्मैशू for ह्येकशू ); लक्षणः ( ०वर्णकः ),

याजनाध्यापनं विप्रे धर्मश्चैव प्रतिग्रहः ।
**पालनं क्षत्रियाणां वै वैश्यधर्मश्च पोषणम्** ।। ३६ ।।[०१]

शुश्रूषा च द्विजातीनां शूद्राणां धर्म उच्यते।
**भैक्ष्यहोमव्रतैर्हीनास्तथैव गुरुवासिताः** ।। ३७ ।।[०२]

क्षत्रधर्मोऽत्र कौन्तेय तव धर्मोऽत्र रक्षणम्।
**स्वधर्मं प्रतिपद्यस्व विनीतो नियतेन्द्रियः** ।। ३८ ।।[०३]

वृद्धैः सम्मन्त्र्य सद्भिश्च बुद्धिमद्भिः श्रुतान्वितैः ।
**आस्थितः शास्ति दण्डेन व्यसनी परिभूयते** ।। ३९ ।।[०४]

निग्रहानुग्रहैः सम्यग्यदा राजा प्रवर्तते।
**तदा भवन्ति लोकस्य मर्यादाः सुव्यवस्थिताः** ।। ४० ।।[०५]

तस्माद्देशे च दुर्गे च शत्रुमित्रबलेषु च ।
**नित्यं चारेण बोद्धव्यं स्थानं वृद्धिः क्षयस्तथा** ।। ४१ ।।[०६]

राज्ञामुपायश्चारश्च बुद्धिमन्त्रपराक्रमाः ।
**निग्रहप्रग्रहौ चैव दाक्ष्यं वै कार्यसाधकम्** ।। ४२ ।।[०७]

---

(०१) (१)ध्यापनं; ध्ययने; ध्यापना for ध्यापने ); चोभौ; विप्रे for चोभे ); (२)धर्मश्चैव ( ०कः); ब्राह्मणस्य for ब्राह्म ); परि for प्रति ); (३)च; तु for वै ),

(०२) (१)अ ति आद्य; आ शु च for तु ); (३)भैक्ष्य चापि; चैवः धर्मो; एव; हीनो for हीनास् ); (४) यथैव गुरुवासिताः; वासितः; वासिनः ( सेविताः ),

(०३) (१)क्षत्रधर्मेण; धर्मोथ; तत्र धर्मोत्र तथैव चात्र कौतेयः (२)कुरु for तव ); कर्माभि; धर्मोभि ( थ ); धर्मोत्र ; धर्मोपि; धर्मो हि for धर्माभि ); कारणं for रक्षणम् ),

(०४) (२)श्रिया for श्रुता ); (३)स्वस्थितः; सुस्निग्धः; आस्थितः चास्ति; शांस्ति; शाधि धर्मेण for दण्डेन ); सुस्थितस्यापि दण्डेन; सुस्थिरश्चाप्यदं ,

(०५) (१)निग्रहानुहे; ०हप्रग्रहे (२)नेता for राजा ); (३)भवन्ति for भवति ); (४)मर्यादाः स्थिताः ,

(०६) (१)तिस्माद्देहे शेषु दुर्गेषु (४)वृद्धिक्षयौ; वृद्धिः क्षयं; वृद्धि क्षयं; वृद्धि क्षयं यथा for तथा ),

(०७) (१)राज्ञामुपायश्चरश्च (२)बुद्धिमन्तः; बुद्धिमन्त्र; बुद्धिर्मत्र (त्र)पराक्रमाः; विनि ग्रहः; पराक्रमैः (३) निग्रहेषु ग्रहे; निग्रहप्रग्रहौ हश् निग्रहः प्रग्रहश्; निग्रहानुग्रहं चोभौ; चापि for चैवः ); (४)वै०; चेत् for तत् ); कार्यसाधकं साधकः ,

साम्ना दानेन भेदेन दण्डेनोपेक्षणेन च ।
**साधनीयानि कर्माणि समासव्यासयोगतः ।। ४३ ।।**(०१)

मन्त्रमूला नयाः सर्वे चाराश्च भरतर्षभ।
**सुमन्त्रितेन या सिद्धिस्तां द्विजैः सह मन्त्रयेत् ।। ४४ ।।**(०२)

स्त्रिया मूढेन बालेन लुब्धेन लघुनापि वा।
**न मन्त्रयीत गुह्यानि येषु चोन्मादलक्षणम् ।। ४५ ।।**(०३)
*** सर्वं दोषकृतं येषां वैरं तत्र प्रतिष्ठितम् ।**

मन्त्रयेत्सह विद्वद्भिः शक्तैः कर्माणि कारयेत्।
**स्निग्धैश्च नीतिविन्यासान्मूर्खान्सर्वत्र वर्जयेत् ।। ४६ ।।**(०४)

धार्मिकान्धर्मकार्येषु अर्थकार्येषु पण्डितान्।
**स्त्रीषु क्लीबान्नियुञ्जीत क्रूरान्क्रूरेषु कर्मसु ।। ४७ ।।**

स्वेभ्यश्चैव परेभ्यश्च कार्याकार्यसमुद्भवा।
**बुद्धिः कर्मसु विज्ञेया रिपूणां च बलाबलम् ।। ४८ ।।**(०५)

बुद्ध्या स्वप्रतिपन्नेषु कुर्यात्साधुष्वनुग्रहम्।
**निग्रहं चाप्यशिष्टेषु निर्मर्यादेषु कारयेत् ।। ४९ ।।**(०६)

---

(०१) (३)कर्माणि for कार्याणि ),

(०२) (२)चारश्च; चराश्च; चचार पालिता हि ( तानि ); नरर्षभ; पालिता भरतर्षभ (३)सुमन्त्रिते नये; तेन या; तेषु तैः; तनयैः; सुनयैः सद्भिस् सिद्धिस् (४)तद्विद्भिः; तद्विधैः (तद्वितैः ) तां द्विजैः for तद्विदैः ),

(०३) क्रियामूढेन त्रासयुक्तेन for स्त्रियामूढेन ); मूर्षेण; लुब्धेन; बुद्धेन for मूढेन ); बालेन लुब्धेन ; मूर्खेण बालेन अ पि वा for तथा ); (३)मन्त्रयीत (४)वा for च ); अ न्यदलक्षणं अ मृदु; स्याद० आ स्पदं; अ रुदं; अ त्मानुरक्षणं अस्पष्टलक्षणं आ त्मा दुरक्षणः for उ न्माद ); येषां चैव वेदलक्षणं,

(०४) (१)मन्त्रयन् for मन्त्रयेत् ); (३)नीतिविन्यासैर्,

(०५) (२)द्भवः; द्भवाः; द्भवे; द्भवौ ,

(०६) (१)स्व for सु ); (२)कार्यः; कार्यात्; कायं for कुर्यात् ); साधुषु सङ्गहं; साधुष्वनुग्रहं; साधुषु विग्रहं; साधुषु प्रग्रहं; साधुष्वनिग्रहं; साधुप्रतिग्रहं; कुर्यात्परिग्रहं (३)चाप्रतिट्टेषु चाप्यसाध्येषु; चाप्यनिष्टेषु;

निग्रहे प्रग्रहे सम्यग्यदा राजा प्रवर्तते।
**तदा भवति लोकस्य मर्यादा सुव्यवस्थिता ।। ५० ।।**[०१]

एष तेऽभिहितः पार्थ घोरो धर्मो दुरन्वयः ।
**तं स्वधर्मविभागेन विनयस्थोऽनुपालय ।। ५१ ।।**[०२]

*** साम्ना मित्राणि दानेन ब्राह्मणं कृत्रिमानि च ।।**

* भेदेनारीन्प्रदमयेत्कुण्डेन साधयेप्रजाः ।।[०३]

तपोधर्मदमेज्याभिर्विप्रा यान्ति यथा दिवम्।
**श्रत्रिया हि यथा स्वर्गं भुवि बन्धनपालनैः । ।। ५२ ।।**

दानातिथ्यक्रियाधर्मैर्यान्ति वैश्याश्च सद्गतिम्।[०४]
**द्विजा शुश्रूषया शूद्रा लभन्ते गतिमुत्तमम् ।। ५३ ।।**

* द्विजशुश्रूषया शूद्रा लभन्ते गतिमुत्तमाम्।

*** क्षत्रं याति तथा स्वर्गं भुवि निग्रहपालनैः ।।**

सम्यक्प्रणीतदण्डा हि कामद्वेषविवर्जिताः ।
**अलुब्धा विगतक्रोधाः सतां यान्ति सलोकताम् ।। ५४ ।।**[०५]

**अस्मिन् पर्वणि १२४अध्याये ५४श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि च तुर्विंशत्यधिकशततमोऽध्यायः ।। १२४ ।।

---

चापसृष्टेषु,

(०१) निग्रहे सङ्ग्रहे; निग्रहानुग्रहौ ( हेः; ०हे ); निग्रहप्रग्रहेः निग्रहावग्रहे सम्यक् राजा नेता for राजा ),

(०२) (१)एवं for एष) ()भिहितः ( विदितः ) for विहितः ); (२)धर्मो घोरो दुशसदः दुशचरः दुरत्ययः,

(०३) (३)तं स्वधर्म; स्वधर्मस्थो,

(०४) (१)दमधर्मैस्तपेज्याभिः; तवधर्मजवेयाभिः; दानधर्मवरेज्याभिः; दानधर्मदमे०; दानधर्मपरे ( व्रते ); दमधर्मतपे (२) विप्रो याति तु वै for यथा ); (३)दानतीर्थ; दानादिभिः; नग्नादिग्भ्यः (४)याति for यान्ति ); वैस्वापि; वैद्येपि; वैश्या हि,

(०५) (१)क्षत्रियापि क्षत्रिया हि for क्षत्रं चाति ); यथा (तथा); (२) भूमि for भुवि ); रश्रण वन्धनं for निग्रह) (३) प्रणीय धर्म प्रणीय दण्डा; (४)क्रोध for द्वेष ); विवर्जितं व्धाः श्लेघविमताः विरताः रहिताः ,

(तीर्थयात्रापर्वणि ......ऽध्यायः)

# 03- 04 - 125Adhyaya

# १२५. पञ्चविंशत्यधिकशततमोऽध्यायः

उपसंहृतपृथुरूपेण हनूमता भीमपरिष्वङ्गः, वरदानम् । हनूमद्विसृष्टेन भीमेन गन्धमादने सौगन्धिकसरोदर्शनम् ।।

वैशम्पायनः

ततः संहृत्य विपुलं तद्वपुः कामतः कृतम्।
भीमसेनं पुनर्दोर्भ्यां पर्यष्वजत वानरः ।। १ ।।(०१)

परिष्वक्तस्य तस्याशु भ्रात्रा १भीमस्य भारत।
श्रमो नाशमुपागच्छत्सर्वं चासीत्प्रदक्षिणम् ।। २ ।।(०२)

* बलं चातिबलो मेने न मेऽस्ति सदृशः क्वचित् ।।(०३)

ततः पुनरथोवाच पर्यश्रुनयनो हरिः ।
भीममाभाष्य सौहार्दाद्बाष्पगद्गदया गिरा ।। ३ ।।(०४)

गच्छ वीर स्वमावासं स्मर्तव्योऽस्मि कथान्तरे।
इहस्थश्च कुरुश्रेष्ठ न निवेद्योऽस्मि कर्हिचित् ।। ४ ।।(०५)

शीघ्रं तु कार्यसिध्यर्थं गच्छ त्वं पाण्डुनन्दन ।
स्मर्तब्योऽस्मि त्वया वीर कथास्वमितविक्रम ।।

---

(०१) (२)कामतः कृतं for कामं ); (४)परिष्वजत ,
(०२) (१)तस्याथ; भ्रात्राशु (४)सत्वं ( सर्वं ); चास्य व्य अ भ्य वर्धत,
(०३) ( चातिबलं महान् for क्वचित् ); ),
(०४) (१)उवाचाथ (३)आमन्त्र्य; आसाद्य for आभाष्य ); सौभ्रात्राद् for सौहार्दाद् ),
(०५) (१)समा; त्वमा for स्वमा ); (२)स्मर्तव्याः स्म; व्योर्सि
(३) इहस्थः स्म नरव्याघ्र (४)कर्हि० for कस्य ),

धनदस्यालयाच्चापि विसृष्टानां महाबल।
देशकाल इहायातुं देवगन्धर्वयोषिताम् ।। ५ ।।(०१)

✻ रामाभिधानं विष्णुं हि जगद्धृदयनन्दनम् ।
सीतावक्त्रारविन्दार्कं दशास्यध्वान्तभास्करम् ।(०२)

ममापि सफलं चक्षुः स्मारितश्चास्मिराघवम् ।
रामाभिधानं विष्णुं हि जगद्धृदयनन्दनम् ।
सीतावक्त्रारविन्दार्कं दशास्यध्वान्तभास्करम् ।
मानुषं गात्रसंस्पर्शं गत्वा भीम त्वया सह ।। ६ ।।

तदस्मद्दर्शनं वीर कौन्तेयामोघमस्तु ते।
भ्रातृत्वं त्वं पुरुस्कृत्य वरं वरय भारत ।। ७ ।।(०३)

यदि तावन्मया क्षुद्रा गत्वा वारणसाह्वयम् ।
धार्तराष्ट्रा निहन्तव्या यावदेतत्करोम्यहम् ।। ८ ।।

✻ निहतान्धार्तराष्ट्रांस्तु तन्मे वद च भारत ।

शिलया नगरं वापि मर्दितव्यं मया यदि ।

✻ बद्ध्वा दुर्योधनं चाद्य आनयामि तवान्तिकम्।

यावदेतत्करोम्यद्य कामं तव महाबल ।। ९ ।।(०४)

---

(०१) (२)नि for वि ); (३)काल एष; एष काल for देशं ); (४)यक्षं

(१)चापि for चक्षुः ); (२)चासि; चापि for चास्मि ); भारत राघवः for राघवम् ),
(०२) ( सीतावक्त्रप्रकार्शेदुं ) (४)कृत्वा for गत्वा ),
(०३) (३)च; वै for त्वं ); (४)सुव्रत for भारत ),
(०४) (१)शिलाभिर्; लीलया; निलया for शिलया ); वापि ( चापि ); तस्य; तावन् for वा तन् ); (३)तावद् for यावद् ); एतत्; एत्य for अद्य ); अद्य एतत् एव; एनं एतं; एष for एतत् ); यदि तावत्करोम्ये तत्,

✻ बद्ध्वा दुर्योधनं चाद्य आनयामि तवान्तिकम् ।[०१]

**वैशम्पायनः**

**भीमसेनस्तु तद्वाक्यं श्रुत्वा तस्य महात्मनः ।**
**प्रत्युवाच हनूमन्तं प्रहृष्टेनान्तरात्मना ॥ १० ॥**

**कृतमेव त्वया सर्वं मम वानरपुङ्गव ।**
**स्वस्ति तेऽस्तु महाबाहो कामये त्वां प्रसीद मे ॥ ११ ॥**[०२]

**सनाथाः पाण्डवाः सर्वे त्वया नाथेन वीर्यवन्।**
**तवैव तेजसा सर्वान्विजेष्यामो वयं परान् ॥ १२ ॥**[०३]

**वैशम्पायनः**

**एवमुक्तस्तु हनुमान्भीमसेनमभाषत।**
**भ्रातृत्वात्सौहृदाच्चैव करिष्यामि प्रियं तव ॥ १३ ॥**[०४]

**चमूं विगाह्य शत्रूणां प(श)रशक्तिसमाकुलाम्।**
**यदा सिंहरवं वीर करिष्यसि महाबल ॥ १४ ॥** [०५]

**तदाहं बृंहयिष्यामि स्वरवेण रवं तव ।**[०६]
**यं श्रुत्वेन भविष्यन्ति व्यासऽवर्तते रयोरणे ॥ १५ ॥**

✻ यं श्रुत्वैव भविष्यन्ति व्यसवस्त्वेरयो रणे ।

**विजयस्य ध्वजस्थश्च नादान्मोक्ष्यामि दारुणान्।**

---

(०१) ( सुंयो for दुर्यो ); पार्श्र्वयोरानयामि ते, ),

(०२) (१)एतत् for एव ); (३)तेहं; अ स्तु ते गमिष्यामि; महाभाग for बाहो ); (४)क्षमये; का for क्षां ); त्वा for त्वां ),

(०३) (२)वीर्यवान् ( शत्रुहन् ); (४)विजेष्यामि; हनिष्यामो ( म; मि ); रणे for वयं ); रिपुं; परान् for रिपुन्),

(०४) (३)सौहृदाद्वापि; दांश्चापि; दत्वाच्च; दाच्चैव (४)तव प्रियम्,

(०५) (२)पर for शर ); शक्ति स्वरवेण (४)करिष्यामि for ष्यसि ),

(०६) तं; तु; नु for अ हं ); रणे तव ( तदा ); परन्तप for रवं तव ),

शत्रूणां ये प्राणहराः सुखं येन हनिष्यथ ॥ १६ ॥[०१]

एवमाभाष्य हनुमांस्तदा पाण्डवनन्दनम्।
मार्गमाख्याय भीमाय तत्रैवान्तरधीयत ॥ १७ ॥[०२]

* मया हि प्राणसर्वस्वं छले विनिवेशितम् ।

वैशम्पायनः

* गते तस्मिन्हरिवरे भीमोऽपि बलिनां वरः ।
* तेन मार्गेण विपुलं व्यचरद्गन्धमादनम्।[०३]

अनुस्मरन्वपुस्तस्य श्रियं चाप्रतिमां भुवि।
माहात्म्यमनुभावं च स्मरन्दाशरथेर्ययौ ॥ १८ ॥[०४]

स तानि रमणीयानि वनान्युपवनानि च ।
विलोकयामास तदा सौगन्धिकवनेप्सया ॥ १९ ॥[०५]

फुल्लद्रुमविचित्राणि सरांसि सरितस्तथा।
* नानाकुसुमचित्राणि पुष्पितानि वनानि च ।
नानाविहगजुष्टानि पश्यति स्म समन्ततः ॥ २० ॥

मत्तवारणयूथानि पङ्कक्लिन्नानि भारत।
वर्षतामिव मेघानां वृन्दानि ददृशे तदा ॥ २१ ॥[०६]

---

(०१) (१)अ हं; सन् for च ); विजयस्य ध्वजाग्रस्थो (२)रावान्य for नादान् ); (३)ये; वः तु for ते ); प्राणहरा शत्रूणां प्राणहरणान्; शत्रुप्राणहरान्धोरान् ( ०न्योग्यान् ),
(०२) ( मध्यमं for ०नन्दनम् );) (४)तत्रैवां for इत्युक्त्वा ),
(०३) (१)तस्मिनाते हनुमति for हरिं ); (३)महनं for विपुलं); (४)विचरद्; व्यगाहद्; विचरन् for व्यकरद् ); विपुलं वनं; गहनं वनं for मन्धं ),
(०४) (२)अ नुत्तमां for अ प्रलिमां ); (३)आनुपूर्व्यं; आनुभावं for अनुभावं ),
(०५) (१)विलोकं; विलोळ (४)परी for वने ),
(०६) (१)फुल्लद्रुम० ( फलपत्र ); वल्गुपद्म; फुल्लपत्रं ,

* फुल्लपद्मविचित्राणि सरांसि सरितस्तथा ।[०१]
नानाविहगजुष्टानि पश्यति स्म समन्ततः ।।[०२]

हरिणैश्चपलापाङ्गैर्हरिणीसहितैर्वनम्।
सशष्पकवलैः श्रीमान्पथि दृष्ट्वा द्रुतं ययौ ।। २२ ।।[०३]

महिषैश्च वराहैश्च शार्दूलैश्च निषेवितम्।
व्यपेतभीर्गिरिं शौर्याद्भीमसेनो व्यगाहत ।। २३ ।।[०४]

कुसुमानन्तगन्धैश्च ताम्रपल्लवकोमलैः ।
याच्यमान इवारण्ये द्रुमैर्मारुतकम्पितैः ।। २४ ।।[०५]

कृतपद्माञ्जलिपुटा मत्तषट्पदसेविताः ।
प्रियतीर्थवना मार्गे पद्मिनीः समतिक्रमन् ।। २५ ।।[०६]

सज्जमानमनोदृष्टिः फुल्लेषु गिरिसानुषु।
द्रौपदीवाक्यपाथेयो भीमः शीघ्रतरं ययौ ।। १६ ।।[०७]

परिवृत्तेऽहनि ततः प्रकीर्णहरिणे वने।
काञ्चनैर्विमलैः पद्मैर्ददर्श विपुलां नदीम् ।। १७ ।।[०८]

हंसकारण्डवयुतां चक्रवाकोपशोभिताम्।

---

(०१) (२)सरांसि सरितस्तथा,
(०२) (४)मदक्लिन्नानि ( पङ्कलिप्तानि ),
(०३) (१)चपलां for चञ्चला ); (२)तदा; वनं for वने ); (४)दृष्ड्वा for दृष्टो ),
(०४) (२)चैव सेवितान् for च निषे ); (३)गिरेः श्रृङ्गान् for गिरिं शौर्याद् ),
(०५) (१)नतशाखाग्रैसू; नतगन्धैश्च; नन्तगधैश्च; वायुनानतं (३)वीज्य०; छाद्य for याच्यः ); (४) द्रुमैर्वातवि ( प्र ); कं,
(०६) (३)मना for वना ); (४)सो ( वा ); तिचक्रमे for सम ),
(०७) (१)मज्ज ( सह्यं ); for सज्ज ); (४)भीमो भीमपराक्रमः ,
(०८) (१)विनि for पक्ष ); हनुमति; ह्नि पुनः for ह्नि ततः ); (२)प्रवृत्त; प्रकीर्णे for प्रकीर्ण ); (३)विपुलैः for विमलैः ),

रचितामिव तस्याद्रेर्मालां विमलपङ्कजाम् ॥ १८ ॥(०१)

तस्यां नद्यां महासत्त्वः सौगन्धिकवनं महत्।
अपश्यत्प्रीतिजननं बालार्कसदृशद्युति ॥ १९ ॥(०२)

तद्दृष्ट्वा लब्धकामः स मनसा पाण्डुनन्दनः ।
वनवासपरिक्लिष्टां जगाम मनसा प्रियाम् ॥ ३० ॥(०३)

अस्मिन् पर्वणि १२५अध्याये ३०श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 126 Adhyaya

महाभारततात्पर्यनिर्णये २२ अध्याये १२६- अध्यायः
नरागम्यां नलिनीमेत्य तत्र दृष्ट्वा पद्मान्यद्भुताकारवन्ति ।
हैमानि दिव्यान्यतिगन्धवन्ति समासदद् वार्यमाणो नराशैः ॥ २८० ॥
ते भीममात्तायुधमुग्ररूपं महाबलं रूपनवावतारम् ।
न्यवारयन् क्रोधवशाः समेताः शतं सहस्राण्ययुतानि सङ्घे ॥ २८१ ॥

# १२६. षड्विंशत्यधिकशततमोऽध्यायः

सौगन्धिकसरोविविक्षुं भीमं प्रति तद्रक्षिभिः क्रोधवशनामकै राक्षसै-स्तच्चिकीर्षितप्रश्नः॥

वैशम्पायनः

(०१) (१)हंसं for मत्त ); (३)रुचिता; आचिता for रचिता ); (४)अम्लान; विपुल; विततfor विमलं ),
(०२) (३)परमप्रीतो for प्रीति ); (४)द्युतिं द्युतिः ,
(०३) (१)तां; तं for तद् ); तु सन् for स ); (२)सुमनाः; सहसा for मनसा ),

**स गत्वा नलिनीं रम्यां राक्षसैरभिरक्षिताम्।**
**कैलासशिखराभ्याशे ददर्श शुभकाननाम् ॥ १ ॥[०१]**

✻ नीलशाद्वलपर्यन्तां चित्रद्रुमपरिच्छदाम् ।[०२]

**कुबेरभवनाभ्याशे जातां पर्वतनिर्झरैः ।**
**सुरम्यां विपुलच्छायां नानाद्रुमलताकुलाम् ॥ २ ॥[०३]**

**हरिताम्बुजसञ्छन्नां दिव्यां कनकपुष्कराम्।**
**विचित्रभूतां लोकस्य शुभामद्भुतदर्शनाम् ॥ ३ ॥**

✻ नानापक्षिगणाकीर्णा सूपतीर्थामकर्दमाम् ।।

✻ अतीव रम्यां सुजलां जातां पर्वतसानुषु ।[०४]

**तत्रामृतरसं शीतं लघु कुन्तीसुतः शुभम्।**
**ददर्श विमलं तोयं पिबंश्च बहु पाण्डवः ॥ ४ ॥[०५]**

**तां तु पुष्करिणीं रम्यां दिव्यसौगन्धिकावृताम्।**
**जातरूपमयैः पद्मैश्छन्नां परमगन्धिभिः ॥ ५ ॥[०६]**

**वैदूर्यवरनालैश्च बहुचित्रैर्मनोरमैः ।**
**हंसकारण्डवोद्धू(द्धू)तैः सृजद्भिरमलं रजः ॥ ६ ॥[०७]**

---

(०१) (१)राजन् for रम्यां); (२)अभिनन्दितां; उपसेवि; परिरक्षि०; परिवारि for अभिरक्षि); (३)कैलाश० शिस्वराभ्यासे (शे) (४)शुभकाननां (नं),

(०२) ०ध्वजं for द्रुमं),

(०३) (१)०सदना०; भुवन ०भ्यासे (२)०निर्झरैः; ०निर्क्षरां ०(४)कुलां युतां ,

(०४) ०मृगा०; ०जना० for ०गणा); (३)विचित्रं for पवित्रं),

(०५) (१)समं शीतं (समस्पर्श) (२)शीतं; लब्ध्वा for लघु); सुखं; शिवं for शुभम्);
(३)विपुलं for विमलं); (४)पिबन् for शिवं); च बहु,

(०६) (२)दिव्य० for पद्म०);सौगं धिकावृतां (०सौगन्धिकोत्पलां); सौगन्धिकैर्युन्तां सौगन्धिकवनायुतां,

(०७) (१)मणिं ०वनं; ०मय०० for वरं); (२)०रमैः for ०हरैः)
(३)०वोद्धूतैः (वर्धूतैः) ०वोद्गीतैः (४)वमद्भिर् for सृजद्भिर्),

आक्रीडं राजराजस्य कुबेरस्य महात्मनः ।
गन्धर्वैरप्सरोभिश्च देवैश्च परमार्चिताम् ॥ ७ ॥(०१)

सेवितामृषिभिर्दिव्यैर्यक्षैः किम्पुरुषैस्तथा।
राक्षसैः किन्नरैश्चापि गुप्तां वैश्रवणेन च ॥ ८ ॥(०२)

तां च दृष्ट्वैव कौन्तेयो भीमसेनो महाबलः ।
बभूव परमप्रीतो दिव्यं सम्प्रेक्ष्य तत्प(त्स)रः ॥ ९ ॥(०३)

तच्च क्रोधवशा नाम राक्षसा राजशासनात्।
रक्षन्ति शतसाहस्राश्चित्रायुधपरिच्छदाः ॥ १० ॥(०४)

ते तु दृष्ट्वैव कौन्तेयमजिनैः प्रतिवासितम्।
रुक्माङ्गदधरं वीरं भीमं भीमपराक्रमम् ॥ ११ ॥(०५)

सायुधं बद्धनिस्त्रिंशमशङ्कितमरिन्दमम्।
पुष्करेप्सुमुपायान्तमन्योन्यमभिचुक्रुशुः ॥ १२ ॥(०६)

अयं पुरुषशार्दूलः सायुधोऽजिनसंवृतः ।
यच्चिकीर्षुरिह प्राप्तस्तत्सम्प्रष्टुमिहार्हथ ॥ १३ ॥(०७)

ततः सर्वे महाबाहुं समासाद्य वृकोदरम्।

---

(०१) १)राजं (देवं) for यक्षं) (४)परिवारितां ( तं); परमा (०म) र्चितं,

(०२) (१)दिव्यैर् दिव्यं for दिव्यां);सेवितं मुनिमिर्दिष्यं (३)चापि for चैव);
(४)तु for च); वै वरुणेन हि ,

(०३) (१)तद्धि for तां च);(ए)व इष्ट्वा दृष्ट्वा च तां इष्ट्वैव च कौ
(४)वैfor तत्); दिव्यां सम्प्रेक्ष्व पद्मिनीं; दिव्यं प्रेक्ष्य सरो महत् (सरोरूहं),

(०४) (१)तां च; तां स्या तां स्मः; तंस्तु ततः; ते स्म; तत्तु for तच्च); कोपं for क्रोधं); (३)दशं for शतं),

(०५) (२)प्रतिवासितं for परि),

(०६) (३)पुष्करार्थम् for रेप्सुम्); उपायातम्; त(अ) थायान्तम् ,

(०७) (१)कोयं वै पुरुषव्याघ्रः (३)इहायातस् अनुप्राप्तस् for इह प्राप्तस्); (४)तत्क्षिप्रमनुचिन्त्यतां; तत्कार्य प्रष्टुमर्हथ,

तेजोयुक्तमपृच्छन्त कस्त्वमाख्यातुमर्हसि ।। १४ ।।

मुनिवेषधरश्चैव साायुधश्चैव लक्ष्यसे।
यदर्थमभिसम्प्राप्तस्तदाचक्ष्व महामते ।। १५ ।।(०१)

अस्मिन् पर्वणि १२६अध्याये १५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि षि ष्ठविंशत्यधिकशततमोऽध्यायः ।। १२६ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 127Adhyaya

# १२७. सप्तविंशत्यधिकशततमोऽध्यायः

भीमेन सौगन्धिकसरोरक्षकान् प्रति स्वचिकीर्षितकथनपूर्वकं सौगन्धिकापहरणे प्रवर्तनम् ।। १ ।। तथा सप्रतिषेधं स्वजिघांसूनां तेषां गदया ताडनम् ।। २ ।। भीम-गदाप्रहारमशकुवद्भिस्तैर्भीमवृत्तं निवेदितेन कुबेरेण तदनुमोदनम् ।। ३ ।।

भीमः

पाण्डवो भीमसेनोऽहं धर्मराजादनन्तरः ।
विशालां बदरीं प्राप्तो भ्रातृभिः सह राक्षसाः ।। १ ।।(०२)

अपश्यत्तत्र पाञ्चाली सौगन्धिकमनुत्तमम्।
अनिलोढमितो नूनं सा बहूनि परीप्सति ।। २ ।।(०३)

तस्या मामनवद्याङ्ग्या धर्मपत्न्याः प्रिये स्थितम्।

---

(०१) (१)मुनिवे(वै) शे चैव for चासि); (२)सायुधश्चैव ल (३)अभि; इह; अपि for असि); (४) महीपते; महामते for द्युते),

(०२) (२)राजा for पुत्रा); (३) क०ख०ग०घ०प्राप्तं सां निबोधत, प्राप्तं for प्राप्तो); (४)मां (तन्) निबोधत ,

(०३) (३)अनिलेनोढ (०त्थ) मेतानि; अनिलोत्थमितो नीतं (४)सा बभूव परीप्सती ,

**पुष्पाहारमिह प्राप्तं निबोधत निशाचराः ।। ३ ।।**(०१)

**राक्षसा उचुः**

**आक्रीडोऽयं कुबेरस्य दयितः पुरुषर्षभ।**
**नेह शक्यं मनुष्येण विहर्तुं मर्त्यधर्मणा ।। ४ ।।**(०२)

देवर्षयस्तथा यक्षा देवाश्चात्र वृकोदर ।
**आमन्त्र्य यक्षप्रवरं पिबन्ति रमयन्ति च ।। ५ ।।**(०३)

गन्धर्वाप्सरसश्चैव विहरन्त्यत्र पाण्डव ।
**यक्षादि पश्यानुमते कुबेरस्य महात्मनः ।। ६ ।।**

अन्यायेनेह यः कश्चिदवमान्य धनेश्वरम्।
**विहर्तुमिच्छेद्दुर्वृत्तः स विनश्येन्न संशयः ।। ७ ।।**(०४)

तमनादृत्य पद्मानि जिहीर्षसि बलादृतः ।
**धर्मराजस्य चात्मानं ब्रवीषि भ्रातरं कथम् ।। ८ ।।**(०५)

✻ तेषां तु वचनं श्रुत्वा वार्यमाणोऽपि पाण्डवः ।
✻ आमन्त्र्य यक्षराजं वै ततः पिब हरस्व च ।
✻ नातोऽन्यथा त्वया शक्यं किञ्चित्पुष्करमीक्षितुम्।(०६)

**भीमसेनः**

**राक्षसास्तं न पश्यामि धनेश्वरमिहान्तिके।**

---

(०१) (१)ममा for माम); स तस्या मानवद्याङ्ग्याः (२)प्रियेप्सितं (३)पुष्पहारम् (हेतोर्) अनु प्राप्तं; पुष्पार्थमिह सम्प्राप्तं ,

(०२) (४) क०ख०ग०धर्मणा,मर्त्यधर्मणा ,

(०३) मनुष्याश्च; देवताश्च for देवा श्चत्र); (४) च हरन्ति; च रसन्ति रमयन्ति for विह); देवदानवगुह्यकाः ,

(०४) (१)नः for यः); (२)अवगम्य; मत्य (४)न संशयः for असंशयम्),

(०५) (१)त्वम् for तम्); अस्मान्नादृत्य पं (२)बिलाचितः; बलादिव; दृतः; ०दिह for दितः),

(०६) ०राजानं for ०राजं वै); नष्टो; ततो for नातो),

दृष्ट्वापि च महाराजं नाहं याचितुमुत्सहे।। ९ ।।(०१)

न हि याचन्ति राजान एष धर्मः सनातनः ।
न चाहं हातुमिच्छामि क्षात्रधर्मं कथञ्चन ।। १० ।।(०२)

इयं च नलिनी रम्या जाता पर्वतनिर्झरे।
नेयं भवनमासाद्य कुबेरस्य महात्मनः ।। ११ ।।(०३)

तुल्या हि सर्वभूतानामियं वैश्रवणस्य च ।
एवं गतेषु द्रव्येषु कः कं याचितुमर्हति ।। १२ ।।(०४)

वैशम्पायनः

इत्युक्त्वा राक्षसान्सर्वान्भीमसेनो ह्यमर्षणः ।
तां तु पुष्करिणईं वीरः प्रभिन्न इव कुञ्जरः ।। १३ ।।(०५)

ततः स राक्षसैर्वाचा प्रतिषिद्धः प्रतापवान्।
मा मैवमिति सक्रोधैर्भर्त्सयद्भिः समन्ततः ।। १४ ।।(०६)

* व्यगाहत महाबाहुर्नलिनीं तां महाबलः ।(०७)

कदर्थीकृत्य तु स तान् राक्षसान् भीमविक्रमः ।

---

(०१) (२)उपा for इहा); (३)अदृष्ट्वा for दृष्ट्वापि); तं for च); महात्मानं; धनेशं हि for महाराजं); (४)कं वै for नाहं),

(०२) (२)ह्येष for एष); एष धर्मः (४)क्षत्र०; क्षात्रं for क्षात्र०); सनातनं for कथं),

(०३) रम्या जाता (३)कथं हि भवता सम्यक्,

(०४) (२)यथा for इयं),

(०५) सक्रोधं; सङ्क्रुद्धैर् for सक्रोधैर्); प्रतापवान् for समन्ततः),

(०६) (२)त्यमर्षणः; प्यमर्षणः ह्यमर्षणः for व्यगाहत),

(०७) व्यगाहत for व्यगाहत),

व्यगाहत महातेजास्ते तं सर्वे न्यवारयन् ।। १५ ।।(०१)

लक्षालङ्कारः- कदर्थीकृत्य इत्यत्र कदर्थीकृत्य तुच्छीकृत्य ।

* वलज्वग्राह पद्मानि रक्षसां पश्यतां तदा ।
ते तं न ममृषुर्वीरा गृह्णन्तं कमलोत्तमान् ।।

* अगणय्य स तान्तर्वान्भीमसेनः प्रतापवान्।
पद्मान्यगृह्णत्सहसा पौरुपे स्वे व्ववस्थितः ।।

गृह्णीत बध्नीत प्र(वि)कर्ततेमं पचाम खादाम च भीमसेनम्।
क्रुद्धा ब्रुवन्तोऽभिययुर्द्रुतं ते शस्त्राणि चोद्यम्य विवृत्तनेत्राः ।। १६ ।।(०२)
ततः स गुर्वीं यमदण्डकल्पां महागदां काञ्चनपट्टनद्धाम्।
प्रगृह्य तानभ्यपतत्तरस्वी ततोऽब्रवीत्तिष्ठत तिष्ठतेति ।। १७ ।।(०३)
ते तं तदा तोमरपट्टिशाद्यैर्व्याविद्धशस्त्रैः सहसा निपेतुः ।
जिघांसवः क्रोधवशाः सुभीमा भीमं समन्तात्परिवव्रुरुग्राः ।। १८ ।।(०४)
वातेन कुन्त्यां बलवान्सुजातः शूरस्तरस्वी द्विषतां निहन्ता।

---

(०१) (१)तृणीकृत्यै (त्ये) व; अवमन्य स for कदर्थी) तान्सर्वन्; स तु तान् (३)अलोडयन्; प्रा (प्र) गाहत for व्यगा०); (४)तथा; तं ते; ततः for ते तं),

(०२) (१)विकर्षतैनं विक (निष) र्तन्तेमं(तेनं);निकृत्त चैनं; विकृत्त नेत्रं विकृत्त (त्व)चैनं for निकृन्ततेमं); (ए)नं for (इ)मं); (२)पिबाम for पचाम); परम्बुसं वावृत भीमं (३) (अ)भी (न्व) ययुर; न्वपतन् for नुययुर्) दुतं तं; तदार्वी (४)उद्यम्य शस्त्राणि for शस्त्राणि चोद्यम्य),

(०३) (२)बद्धां for नद्धाम्); (३)ताम् for तान्); गमत् for पतत्); महारथो for तरस्वी); (४) धुन्वन्गदां for ततो० ब्रवीत्),

(०४) (१)भूपास् for ते तं) ततो; तथा for तदा); पट्टिशः (०स) तोम० राधैर् (रादीन्); तोमरपट्टसाद्यैर् (२)व्याविद्ध ; आविद्ध० for व्याविध्य) सर्वे for शस्त्रैः); (अ)भ्यपेतुः; निपेतुः for भिपेतुः); (३)तु for सु),

सत्ये च धर्मे च रतः सदैव पराक्रमे शत्रुभिरप्रधृष्यः ।। १९ ।।(०१)
तेषां स मार्गान्विविधान्महात्मा विहत्य शस्त्राणि च शात्रवाणाम्।
यथा प्रवीरान्निजघान भीमः परं शतं पुष्करिणीसमीपे ।। २० ।।(०२)
ते तस्य वीर्यं च बलं च दृष्ट्वा विद्याबलं बाहुबलं तथैव ।
अशक्नुवन्तः सहितं समन्ताद्धतं प्रवीराः सहसा निवृत्ताः ।। २१ ।।(०३)
विदीर्यमाणास्तत एव तूर्णमाकाशमास्थाय विमूढसञ्ज्ञाः ।
कैलासशृङ्गाण्यभिदुद्रुवुस्ते भीमार्दिताः क्रोधवशाः प्रभग्नाः ।। २२ ।।(०४)
स शक्रवद्दानवदैत्यसङ्घान्विक्रम्य जित्वा च रणेऽरिसङ्घान्।
विगाह्य तां पुष्करिणीं जितारिः कामाय जग्राह ततोऽम्बुजानि।। २३ ।।(०५)

ततः स पीत्वामृतकल्पमम्भो भूयो बभूवोत्तमवीर्यतेजाः ।
उत्पाट्य जग्राह च सोऽम्बुजानि सौगन्धिकान्युत्तमगन्धवन्ति।। २४ ।।(०६)
ततस्तु ते क्रोधवशाः समेत्य धनेश्वरं भीमबलप्रणुन्नाः ।

---

(०१) (१)सु० for स); (३)क्षात्रे for सत्ये); निरतः for च रतः); स for च); तरस्वी; स चैव for सदैव),
(०२) (२)विहन्ति वि (नि)हन्य; निगृह्य for निहत्य); वा ल्यपि इत्यनुनासिका० लोपपक्ष इदं रूपम् (३) प्रवीरं; प्रवीराः प्रकाशं for ०प्रवीरान्); सततं जघान for निजघान वीरः); भीमःfor वीरः); शतान्; परा शता; परिभ्रमन्; ० परं शतं; परःश,
(०३) (३)सहसा; सहितुं; तं for ताः); वसोढुं; समे समर्था for समन्ताद्); (४)द्रुत०; द्रुतं for हत०); प्रवीरै for प्रवीराः); भैमं भीमबलापि सन्तः ,
(०४) (१)विदार्य; विशीर्य; विस्तीर्य; निवार्य; विकीर्य हन्तुम् (तूर्णम्) (२)मार्गं समाहाय for आकाशमास्थाम्); (३)कैलाश,
(०५) (४)कामं स; कामाच्च for य); त्पलानि for ततोम्बु) वैशं उ ,
(०६) (३)च सो; स चा for ततो); महाभुजः for म्बुजानि),

भीमस्य वीर्यं च बलं च सङ्ख्ये यथावदाचख्युरतीव भीताः ।। २५ ।।(०१)

तेषां वचस्तत्तु निशम्य देवः प्रहस्य रक्षांसि ततोऽभ्युवाच ।। २५ ।।

कुबेरः

गृह्णातु भीमो जलजानि कामात्कृष्णानिमित्तं विदितं ममैतत्।। २६ ।।(०२)

ततोऽभ्यनुज्ञाप्य धनेश्वरं ते जग्मुः कुरूणां प्रवरं विरोषाः ।

भीमं च तस्यां ददृशुर्नलिन्यां यथोपजोषं विहरन्तमेकम् ।। २७ ।।(०३)

**अस्मिन् पर्वणि १२७अध्याये २७ श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि सप्तविंशत्यधिकशततमोऽध्यायः ।। १२७ ।।

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 128 Adhyaya

महाभारततात्पर्यनिर्णये २२ अध्याये

वराच्छिवस्यैव परैरजेयाः शस्त्रास्त्रवृष्टिं मुमुचुः सुभीमाम् ।

भीमेऽखिलज्ञे तपसां निधाने बलोदधौ शैवशास्त्रं वदन्तः ।। २८२ ।।

तान् वैष्णवैरेव शास्त्रैः स भीमो विजित्य पूर्वं वाङ्मये सङ्गरे तु ।

शस्त्रास्त्रवर्षस्य कुर्वन् प्रतीपं जघ्नेऽखिलान् गदया तेषु वीरान् ।। २८३ ।।

वातेन कुन्त्यां बलवान् स जातः शूरस्तपस्वी द्विषतां निहन्ता ।

सत्ये च धर्मे च रतः सदैव पराक्रमे शत्रुभिरप्रधृष्यः ।। २८४ ।।

तत्रापरांश्चैव बहूनसत्यं निरीश्वरं चाप्रतिष्ठं च लोकम् ।

---

(०१) (२)भीमवलाठ (३)कार्यं for वीर्यं); सङ्ख्ये for सङ्ख्ये) (४) यथातथा; यथा तदा for यथाचदा); भीताः for दीनाः) सर्वं समाचक्षु सुदीनरूपाः ,

(०२) निशम्य तेषां वचनं महात्मा धनेश्वरः क्रोधवशानुवाच (३)कामात् for कामं),

(०३) (१)ज्ञाप्य for ज्ञाय); (२) सरोवाः for वि); (३)भीमोपि for भीमं च); ततस्ते for च तस्यां) च पुनर् (दहशुर्); तस्याशु ते सन्ददृशु (४)विजहार वीरः for विहरन्तमे),

सिद्धोऽहमीशोऽहमिति ब्रुवाणान् गुणान् विष्णोः ख्यापयन् वादतोऽजैत् ।। २८५ ।।
भिन्नं विष्णुमधिकं सर्वतश्च ब्रुवन् प्रवीरान् लक्षमेषां निजघ्ने ।
ते तस्य वीर्यं च बलं च दृष्ट्वा विद्याबलं बाहुबलं तथैव ।
अशक्नुवन्तः सहिताः समस्ता हतप्रवीराः सहसा निवृत्ताः ।। २८६ ।।
विक्रम्य तान् गदयाऽसौ निहत्य विद्राव्य सर्वान् नलिनीं प्रविश्य ।
पीत्वाऽमृताम्भश्च ततोऽम्बुजानि दिव्यानि जग्राह कुरुप्रवीरः ।। २८७ ।।
अथो कलहशंसीनि निमित्तानि युधिष्ठिरः ।
दृष्ट्वा कृष्णामपृच्छच्च क्व भीम इति दीनधीः ।। २८८ ।।
सौगन्धिकार्थं यातं तं श्रुत्वा कृष्णामुखान्नृपः ।
आरुह्य राक्षसश्रेष्ठान् कृष्णया भ्रातृभिः सह ।। २८९ ।।
ययौ वृकोदरो यत्र दृष्ट्वा चैनमवस्थितम् ।
उवाच मैवमित्येनं भीतो गिरिशकोपतः ।। २९० ।।
देवेभ्यो मरणाद् भीता राक्षसा वित्तपाज्ञया ।
तदीयां नलिनीं ते हि रक्षन्त्यस्याऽश्रयो हरः ।
जानन् वित्तेश्वरो भीममाहात्म्यं न चुकोप ह ।। २९१ ।।

# १२८. अष्टाविंशत्यधिकशततमोऽध्यायः

उत्पातान्दृष्ट्वा युधिष्ठिरादीनां चिन्ता । दुर्निनित्तप्रदर्शिना भीमसेनानवलोकिना च युधिष्ठिरेण द्रौपदीं प्रति भीमाभिगतदेशप्रश्नः ।। १ ।। द्रौपद्या भीमचिकीर्षितं निवेदितानां सर्वेषां गन्धमादनोपरि सौगन्धिकवने घटोत्कचसाहाय्येन भीमसमीप-गनमन् ।। २ ।। कुबेरबहुमानितैस्तैरर्जुनदिदृक्षया तत्रैव सुखेन विहरणम् ।। ३ ।।

**वैशम्पायनः**

ततस्तानि महार्हाणि दिव्यानि भरतर्षभ ।

**बहूनि बहुरूपाणि विरजांसि समाददे ।। १ ।।(०१)**

✻ एतस्मिन्नन्तरे राजन् युधिष्ठिरसमीपतः ।

ततो वायुर्महाञ्शीघ्रो नीचैः शर्करकर्षणः ।
**प्रादुरासीद्खरस्पर्शः सङ्गाममभिचोदयन् ।। २ ।।(०२)**

पपात महती चोल्का सनिर्घाता महाभया।
**निष्प्रभश्चाभवत्सूर्यश्छन्नरश्मिस्तमोवृतः ।। ३ ।।(०३)**

निर्घातश्चाभवद्भीमो भीमे विक्रममास्थिते।
**चचाल पृथिवी चापि पांसुवर्षं पपात च ।। ४ ।।(०४)**

सलोहिता दिशश्चासन्खरवाचो मृगद्विजाः ।
**तमोवृतमभूत्सर्वं न प्राज्ञायत किञ्चन ।। ५ ।।(०५)**

**✻ अन्ये च बहवो भीमा उत्पातास्तत्र जज्ञिरे ।**

तदद्भुतमभिप्रेक्ष्य धर्मपुत्रो युधिष्ठिरः ।
**उवाच वदतां श्रेष्ठः कोऽस्मानभिभविष्यति ।। ६ ।।(०६)**

सज्जीभवत भद्रं वः पाण्डवा युद्धदुर्मदाः ।
**यथारूपाणि पश्यामि स्वभ्यग्रो नः पराक्रमः ।। ७ ।।(०७)**

---

(०१) (२)पुष्पाणि for दिव्यानि); पुरुषर्षभ (भः); भरतर्षभः०,

(०२) (१)जगत् for महान्); (२)०वर्षणः; ०वर्विभिः०कर्षणात् for ०कर्षणः); युधिष्ठिरसमीपतः (३)वरस्यर्शः; स्वररवः सुखस्पर्शः; परं; करं (४) क०ख०ग०घ०रोचयन् , दर्शयन्; नोदयन् तो नदन्; ०रोचयन् ,

(०३) (२)भया; प्रजाः for प्रभा),

(०४) (३)निर्घाताश्चभवनभीमा (४)पुण्यबुष्टिः पांशुवृष्टिः; पांशुवर्ष ह for च),

(०५) (१)लोहिताश्च; तिरोहिता for सलोहिता); सर्वाः for चासन्); (२)मृगास्यवा for सृवद्विष्कः); (४) प्राज्ञा for प्रज्ञां),

(०६) (२)राजो for पुत्रो),

(०७) (३)रूपं न;०रूपां न for ०रूपाणि); (४)सुत्रासो; स्वभ्यासो (०से); प्रत्यग्रो; स्वाभ्यग्रो; सुव्यक्तो; सुव्यग्रो तथा नि परमो जयः ,

एवमुक्त्वा ततो राजा वीक्षांश्चक्रे समन्ततः ।
अपश्यमानो भीमं तु धर्मपुत्रो युधिष्ठिरः ।। ८ ।।[०१]

ततः कृष्णां यमौ चापि समीपस्थावरिन्दमः ।
पप्रच्छ भ्रातरं भीमं भीमकर्माणमाहवे ।। ९ ।।[०२]

युधिष्ठिरः

कच्चित्कभीमः पाञ्चालि किञ्चित्कृत्यं चिकीर्षति ।
कृतवानपि वा वीरः साहसं साहसप्रियः ।। १० ।।[०३]

इमे ह्यकस्मादुत्पाता महासमरदर्शनाः ।
दर्शयन्तो भयं तीव्रं प्रादुर्भूताः समन्ततः ।। ११ ।।[०४]

वैशम्पायनः

तं तथावादिनं कृष्णा प्रत्युवाच मनस्विनी।
प्रिया प्रियं चिकीर्षन्ती महिषी चारुहासिनी ।। १२ ।।[०५]

द्रौपदी

यत्तत्सौगन्धिकं राजन्नाहृतं मातरिश्वना ।
तन्मया भीमसेनस्य प्रीतयाद्योपपादितम् ।। १३ ।।

अपि चोक्तो मया वीरो यदि पश्येर्बहून्यपि ।
तानि सर्वाण्युपादाय शीघ्रमागम्यतामिति ।। १४ ।।[०६]

---

(०१) (३)तं तु for च); (४) पुत्रो for राजो); प्रोवाचेदं वचस्तदा ,
(०२) (१)ततः; यत्र for तत्र); चापि for चैव); (२)समीपस्थावरिन्दमः; धर्मराजो युधिष्ठिरः वीरं for भीमं); अपृच्छद्भीमकर्माणं भ्रातरं भीममाहवे ,
(०३) (१)किञ्चिन्; कश्चिन् for कच्चिन्); नु; क for न); भीमो नु for न भीमः); (२) कच्चित्; कश्चित्; किं च for किञ्चित्); किं चित्कार्यं; कृत्यं किञ्चिच् ,
(०४) ०दर्शनाः; ०शंसिनः घोरं for तीव्रं),
(०५) (२)यशं for मन),
(०६) (१)वीर for वीरो); (२)पश्येर्; पश्ये for पश्येद्); (३)च for (उ)प०),

स तु नूनं महाबाहुः प्रियार्थं मम पाण्डवः ।

प्रागुदीचीं दिशं राजंस्तान्याहर्तुमितो गतः ।

वैशम्पायनः

उक्तस्त्वेवं तया राजा यमाविदमथाब्रवीत् ।। १५ ।।

युधिष्ठिरः

गच्छाम सहितास्तूर्णं येन यातो वृकोदरः ।। १६ ।।(०१)

वहन्तु राक्षसा विप्रान्यथाश्रान्तान्यथाकृशान्।
त्वमप्यमरसङ्काश वह कृष्णां घटोत्कच ।। १७ ।।(०२)

व्यक्तं दूरमितो भीमः प्रविष्ट इति मे मतिः ।
चिरं च तस्य कालोऽयं स च वायुसमो जवे ।। १८ ।।(०३)

तरस्वी वैनतेयस्य सदृशो भुवि लङ्घने ।
उत्पतेदपि वा(चा)काशं निपतेच्च यथेच्छकम् । । १९ ।।(०४)

तमन्वियाम भवतां प्रभावाद्रजनीचराः ।

पुराऽसौ नापराध्नोति सिद्धानां ब्रह्मवादिनाम् ।। २० ।।(०५)

लक्षालङ्कारः- पुराऽसौ नापराध्नोति इत्यत्र अपराध्नोति अपराधं करोति ।

वैशम्पायनः

तथेत्युक्त्वा तु ते सर्वे हैडिम्बप्रमुखास्तदा ।

---

(०१) (१)चैवं for त्वेवं) राजन् for राजा); (३)गच्छामः सहसा; त्वरितास् for सहिताम्),

(०२) (१)मुख्यान् (ख्या) for विप्रान्),

(०३) (३)गतस्य for च तस्य),

(०४) (२)तुल्यो भुवि विलङ्घने (३)चाकाशे (४)निष्पतेच्च (निःपतेत) for निपतेच्च); यथोषुकं यथोचfor यथेच्छं),

(०५) (१)तमन्वयाम (मो); वयं प्रयामो for तमन्वियाम); (२)प्रसादाद्; प्रतापाद् for प्रभावाद्); (३)(अ)सै for स); नोपगच्छेत; नापराध्येतfor राध्नोति); (४)गिरिवासिनां for ब्रह्म),

उद्देशज्ञाः कुबेरस्य नलिन्या भरतर्षभ ।। २१ ।।(०१)

आदाय पाण्डवांश्चैव तांश्च विप्राननेकशः ।
लोमशेनैव सहिताः प्रययुः प्रीतमानसाः ।। २२ ।।(०२)

ते सर्वे त्वरिता गत्वा ददृशुः शुभकाननाम् ।
पद्मसौगन्धिकवतीं नलिनीं सुमनोरमाम् ।। २३ ।।(०३)

तं च भीमं महात्मानं तस्यास्तीरे मनस्विनम्।
ददृशुर्निहतांश्चैव यक्षांश्च विपुलेक्षणान् ।। २४ ।।(०४)

भिन्नकायाक्षिबाहूरून्सञ्चूर्णितशिरोधरान्।
तं च भीमं महात्मानं तस्यास्तीरे व्यवस्थितम् ।। २५ ।।

* सक्रोधं स्तब्धनयनं सन्दष्टदशनच्छदम् ।
उद्यम्य च गदां दोर्भ्यां नदीतीरेष्ववस्थितम् ।।
प्रजासङ्क्षेपसमये दण्डहस्तमिवान्तकम् ।।(०५)

तं दृष्ट्वा धर्मराजस्तु परिष्वज्य पुनः पुनः ।
उवाच श्लक्ष्णया वाचा कौन्तेय किमिदं कृतम् ।। २६ ।।(०६)

साहसं बत भद्रं ते दवानामथ चाप्रियम् ।
पुनरेवं न कर्तव्यं मम चेदिच्छसि प्रियम् ।। २७ ।।(०७)

---

(०१) (२)हैडम्ब ततः तथा for तदा); हिडिम्बाद्या निशाचराः (४)च नृपोत्तमः पुरुषर्षभ for भरत०),
(०२) (१)सर्वान् चापि for चैव); (४)क्रमशस्तदा for प्रीत०),
(०३) (१)त्वरिताः for सहिताः); ते सर्वे त्वरिता गत्वा (२)शुभ० for तत्र); काननां; for ०काननं कानने); (३)पद्मसौगन्धिकवतीं (प्रोत्फुल्ल पङ्कजवनां) (४)रमां for हराम्),
(०४) (२)तरस्विनं; मनस्विनं; तपस्विनं for व्यव०); (४)राक्षसान् for यक्षान्सु);न च for सु),
(०५) (१)उन्नम्य for उद्यम्य); (अ)थ for च); (२) नदीकूले; नद्यास्तीरे बिभ्रयानं महाबलं; नदी तीरेष्ववस्थितं (४)पाणिम् for हस्तम्),
(०६) (२) (इ)दमब्रवीत्; (अ)थ पाण्डव; (पुनपुन;); (३)भ्रातरं for (उ)वाच); (४)किमिदं कुतवानसि,
(०७) (१)वद; तव; बलः च न for बत०); (२)अथ for अपि) वां for चा०) ,

अनुशिष्य तु कोन्तेयं पद्मानि परिगृह्य च ।
तस्यामेव नलिन्यां तु विजह्रुरमरोपमाः ।। २८ ।।[०१]

एतस्मिन्नेव काले तु प्रगृहीतशिलायुधाः ।
प्रादुरासन्महाकायास्तस्योद्यानस्य रक्षिणः ।। २९ ।।[०२]

* उच्चुक्रुशुश्च तेन्योन्यं राक्षसा भीमदर्शनः ।
राज्ञस्ते वै कुबेरस्य नलिनीं वनचारिणः ।।

* सम्भ्रान्तमनसः वें व्यकुलेनान्तरात्मभिः ।
उपतस्थुर्महात्मानं घर्मपुत्रं युधिष्टिरम् ।।

ते दृष्ट्वा धर्मराजानं महर्षि चापि लोमशम् ।
नकुलं सहदेवं च तथान्यान्ब्राह्मणर्षभान् ।। ३० ।।[०३]

विनयेन नताः सर्वे प्रणिपेतुश्च भारत।[०४]
सान्त्विता धर्मराजेन प्रसेदुः क्षणदाचराः ।। ३१ ।।

विदिताश्च कुबेरस्य तत्र ते कुरुपुङ्गवाः ।
ऊषुर्नातिचिरं कालं रममाणाः कुरूद्वहाः ।।[०५]
प्रतीक्षमाणा बीभत्सुं गन्धमादनसानुषु ।। ३२ ।।

**अस्मिन् पर्वणि १२८ अध्याये ३२ श्लोकाः सन्ति**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि**

---

(०१) (१)शिष्य तु (स); ०शास्य स; ०यास्यसि ०शासं च; ०शाखति for ०शास्य चं); (२)परि for प्रतिं); (३)तु for ते),
(०२) (२)प्रतिगृह्य शरासनाः,
(०३) (१)इष्द्वा च for ते इष्द्वा); राजं च for राजानं); (२)महर्षि for देवं); चैव for चापि),
(०४) (३)नताः for (आ) नताः);विनये चामताः सर्वैः पत्य for पेतुश्),
(०५) (२)शशंसु प्रनेसुः प्रशेमुः for प्रसेदुः); च क्षपां for क्षणदा); (३)वेदिता तव ते; तु for च); (४) तत्र for ततस्); पुरुषक्ष्भाः; कुरुपुङ्गवाः for नरं); ततस्ततः; महारथाः for कुरू)० ,

पञ्चाशीतितमोऽध्यायः ॥ १२८ ॥

(तीर्थयात्रापर्वणि ......ऽध्यायः)

## 03- 04 - 129Adhyaya

# १२९.एकोनत्रिंशदधिकशततमोऽध्यायः

गन्धमादनादुत्तरं देशं जिगमिषुणा युधिष्ठिरेण आकाशवाणीश्रवणात्ततः प्रतिनिवृत्य अनुचरैस्सह नरनारायणाश्रमं प्रति पुनरागमनम् ॥

वैशम्पायनः

तस्मिन्निवसमानोऽथ धर्मराजो युधिष्ठिरः ।
कृष्णया सहितान्भ्रातनित्युवाच सहद्विजान् ॥ १ ॥

युधिष्ठिरः

दृष्टानि तीर्थान्यस्माभिः पुण्यानि च शिवानि च ।
मनसो ह्लादनीयानि वनानि च पृथक्पृथक् ॥ २ ॥

देवैः पूर्वं विचीर्णानि मुनिभिश्च महात्मभिः ।
यथाक्रमं विशेषेण द्विजैः सम्पूजितानि च ॥ ३ ॥

ऋषीणां पूर्वचरितं तथा कर्म विचेष्टितम्।
राजर्षीणां च चरितं कथाश्च विविधाः शुभाः ॥ ४ ॥

शृण्वानास्तत्र तत्र स्म आश्रमेषु शिवेषु च ।
अभिषेकं द्विजैः सार्धं कृतवन्तो विशेषतः ॥ ५ ॥

अर्चिताः सततं देवाः पुष्पैरद्भिः सदा च वः ।
यथालब्धैर्मूलफलैः पितरश्चापि तर्पिताः ॥ ६ ॥

यथाक्रमं विशेषेण लोमशेन प्रभाषितम्।

पर्वतेषु च रम्येषु सर्वेषु च सरस्सु च ।
उदधौ च महापुण्ये सूपस्पृष्टं महात्मभिः ॥ ७ ॥

इला सरस्वती सिन्धुर्यमुना नर्मदा तथा ।
नानातीर्थेषु रम्येषु सूपस्पृष्टं सह द्विजैः ॥ ८ ॥

गङ्गाद्वारमतिक्रम्य बहवः पर्वताः शुभाः ।
हिमवान्पर्वतश्चैव नानाद्विजगणायुतः ॥ ९ ॥

विशाला बदरी दृष्टा नरनारायणाश्रमः ।
दिव्या पुष्करिणी दृष्ट्वा सिद्धदेवर्षिपूजिता ॥ १० ॥

यथाक्रमविशेषेण सर्वाण्यायतनानि च ।
दर्शितानि द्विजश्रेष्ठा लोमशेन महात्मना ॥ ११ ॥

इमं वैश्रवणावासं पुण्यं सिद्धनिषेवितम् ।
कथं भीम गमिष्यामो गतिरत्र विधीयताम् ॥ १२ ॥

वैशम्पायनः

एवं ब्रुवति राजेन्द्रे वागुवाचाशरीरिणी ।
न शक्यो दुर्गमो गन्तुमितो वैश्रवणाश्रमात् ॥ १३ ॥

अनेनैव पथा राजन्प्रतिगच्छ यथागतम्।
नरनारायणस्थानं बदरीत्यभिविश्रुतम् ॥ १४ ॥

तस्माद्यास्यसि कौन्तेय सिद्धचारणसेवितम् ।
बहुपुष्पफलं रम्यमाश्रमं वृषपर्वणः ॥ १५ ॥

अतिक्रम्य च तं पार्थ चार्ष्टिषेणाश्रमे वसेः ।
ततो द्रक्ष्यसि कौन्तेय निवेशं धनदस्य च ॥ १६ ॥

एतस्मिन्नन्तरे वायुर्दिव्यगन्धवहः शुचिः ।

**सुखप्रह्लादनः शीतः पुष्पवर्षं ववर्ष च ।। १७ ।।**

श्रुत्वा तु दिव्यामाकाशाद्वाचं सर्वे विसिस्मियुः ।
**ऋषीणां ब्राह्मणानां च पार्थिवानां विशेषतः ।। १८ ।।**

श्रुत्वा तन्महदाश्चर्यं द्विजो धौम्योऽब्रवीत्तदा ।
**न शक्यमुत्तरं वक्तुमेवं भवतु भारत ।। १९ ।।**

ततो युधिष्ठिरो राजा प्रतिजग्राह तद्वचः ।
**प्रत्यागम्य पुनस्तं तु नरनारायणाश्रमम् ।। २० ।।**

भीमसेनादिभिः सर्वैर्भ्रातृभिः परिवारितः ।
**पाञ्चाल्या ब्राह्मणाश्चैव न्यवसन्त सुखं तदा ।। २१ ।।**

**अस्मिन् पर्वणि १२९ अध्याये २१श्लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां
पुनर्नरनारायणाश्रमागमने षट्पञ्चाशदधिकशततमोऽध्यायः ।। १२९ ।।

# जटासुरवधपर्व

## १३०. त्रिंशदधिकशततमोऽध्यायः

विप्रवेषेण पाण्डवनिकटचिरवासिना जटासुरेण भीमासन्निधाने द्रौपदीसहितान् युधिष्ठिरादीनपहृत्य पलायनम् ।। १ ।। मध्येमार्गं यदृच्छासमागतेन भीमेन तस्य मारणम् ।। २ ।।

वैशम्पायनः

ततस्तान्परिविश्वस्तान्वसतस्तत्र पाण्डवान् ।
गतेषु तेषु रक्षःसु भीमसेनात्मजेऽपि च ।। १ ।।

पर्वतेन्द्रे द्विजैः सार्धं पार्थागमनकाङ्क्षया।

आजगाम तदा रक्षो नाम्ना ख्यातो जटासुरः ।

रहितान्भीमसेनेन कदाचित्तान्यदृच्छया।
जहार धर्मराजानं यमौ कृष्णां च राक्षसः ।। २ ।।(०१)

जनमेजयः

ब्रह्मन्कथं धर्मराजं यमौ कृष्णांश्च राक्षसः ।

जगाम कुत्र भीमश्च गतो राक्षसकण्टकः ।

वक्तुमर्हसि विप्राग्र्य वृत्तमेतन्मानघ ।

ब्राह्मणो मन्त्रकुशलः सर्वशास्त्रविदुत्तमः ।
इति ब्रुवन्पाण्डवेयान्पर्युपास्ते स्म नित्यदा ।। ३ ।।(०२)

जामदग्न्यस्य शिष्योहं रामस्याक्लीष्टकर्मणः

(०१) (३)धर्म० राजं च; धर्मराजं वै (for धर्मराजानं),

(०२) (२) वैशं (अ)हमस्मि ब्रह्म० वित्तमः; ० सर्वशास्त्रविदुत्तमः ० ,

परीप्समानः पार्थानां कलापाश्च(नि) धनूंषि च ।
अन्तरं सम्परिप्रेप्सुर्द्रौपद्या हरणं प्रति ।। ४ ।।[०१]

पोषणं तस्य राजेन्द्र चक्रे पाण्डवनन्दनः ।

बुबुधे न च तं पापं भस्मच्छन्नमिवानलम्।

स भीमसेने निष्क्रान्ते मृगयार्थमरिन्दम ।
अन्यद्रूपं समास्थाय विकृतं भैरवं महत् ।। ५ ।।[०२]

घटोत्कचं सानुचरं दृष्ट्वा विप्रद्रुतं दिशः

रो(लो)मशप्रभृतींस्तांस्तु महर्षींश्च समाहितान्।
स्नातुं विनिर्गतान्दृष्ट्वा पुष्पार्थं च तपोधनान् ।। ८ ।।[०३]

गृहीत्वा सर्वशस्त्राणि द्रौपदीं परिगृह्य च ।
प्रातिष्ठत स दुष्टात्मा त्रीन्गृहीत्वा च पाण्डवान् ।। ६ ।।[०४]

सहदेवस्तु यत्नेन ततोऽपक्रम्य पाण्डवः ।
आक्रन्दद्भीमसेनं वै येन यातो महाबलः ।

विक्रम्य कौशिकं खड्गं मोक्षयित्वा ग्रहं रिपोः ।[०५]
तमब्रवीद्धर्मराजो ह्रियमाणो युधिष्ठिरः ।। ७ ।।

युधिष्ठिरः

धर्मस्ते हीयते मूढ न तत्त्वं समवेक्षसे।[०६]
येऽन्ये क्वचिन्मनुष्येषु तिर्यग्योनिगताश्च ये ।। ८।।

---

(०१) (१) परीक्ष्यमाणः; परीप्समानः (२) कला पांश्च (for पानि); (३)च समप्रेप्सुर्; सम्परिप्रेप्सुर्; समनुप्रेप्सुर् ०, (४) राक्षसोथ; समाख्यातो ०,

(०२) (१) भीमसेने च (वि०) निष्क्रान्ते (२) अरिन्दम मृगयां यात्यरिन्दमे ,

(०३) (३)रूपमन्यत् ,

(०४) (३)सु for स); (४) तान्तुहीत्वा; भ्रातृभिस्तान्; भ्रातृन्हत्वा स (for च); गृह्णीत्वा सर्वपाण्डवान् ,

(०५) (३)आ (अ) कन्दन् (४) भये जाते (for येन यातो); वृकोदरः; महाबलं,

(०६) (३)हीयते; हिं (for हीं); (४) वैनं तत्त्वं (for चैनं); अभिवीक्ष्यसे; समुपेक्षसे ,

गन्धर्वोरगरक्षांसि वयांसि पशवस्तथा ।
मनुष्यानुपजीवन्ति ततस्त्वमपि जीवसि ।। ९ ।।[०१]

धर्मं ते समवेक्षन्ते रक्षांसि च विशेषतः
धर्मस्य राक्षसा मूलं धर्मं ते विदुरुत्तमम्।
एतत्परीक्ष्य सर्वं त्वं समीपे स्थातुमर्हसि।
देवाश्च ऋषयः सिद्धाः पितरश्चापि राक्षस।[०२]
तिर्यग्योनिगताश्चैव अपि कीटपिपीलिकाः ।[०३]

समृद्ध्या ह्यस्य लोकस्य लोको युष्माकमृच्छ(ध्य)ति।
इमं तु(च) लोकं शोचन्तमनुशोचन्ति देवताः ।। १० ।।[०४]

पूज्यमानाश्च वर्धन्ते हव्यकव्यैर्यथाविधि ।। ११ ।।[०५]

वयं राष्ट्रस्य गोप्तारो रक्षितारश्च राक्षसः।
राष्ट्रस्यारक्ष्यमाणस्य कुतो भूतिः कुतः सुखम् ।। १२ ।।

न च राजावमन्तव्यो रक्षसा जात्वनागसि।
अणुरप्यपचारश्च नास्त्यस्माकं नराशन ।। १३ ।।[०६]

विघसाशान्यथाशक्त्या कुर्महे देवतादिषु।

---

(०१) (१) किश्चिन्; क्वचिन् (for केचिन्); (२) गणा च ये (नराः) सदा (for अपि); तिर्यग्योनिग० तेष्वपि (षु च),
(०२) (३)गन्धर्वोरग (४) दुष्टानि (for वयांसि),
(०३) (३)अपि; अनु० (for उप०),
(०४) (१) समृद्धाः; द्ध ०द्धौ यस्य; तस्य (for ह्यस्य) समृव्द्या यस्य लोकेषु; द्वेष्टा सर्वस्य लोकस्य (२) लोके एधते; एध्यते; उच्यते; ऋध्यति; ऋच्छति; इज्यते (for ऋध्यते); लोके युष्माभिरिध्यते ,
(०५) (३)तु (for च) शोचन्ति शोचन्तमन्वि(तं मामि)मं लोकं ,
(०६) (१) तु (for च); राजानो नावमन्तव्या; न तु राजाभिहन्तव्यो (२) अनागसः (for अनागसि); राक्षसानां त्वनागसः (३)उपचारस्य; उपकारस्य (for अपचा०); स्वजन० स्योपचाराय (४) च राक्षस (for नराशन),

गुरूंश्च ब्राह्मणांश्चैव प्रणामप्रवणाः सदा।

द्रोग्धव्यं न च मित्रेषु न विश्वस्तेषु कर्हिचित्।
येषां चान्नानि भुञ्जीत यत्र च स्यात्प्रतिश्रयः ।। १४ ।।(०१)

स त्वं प्रतिश्रयेऽस्माकं पूज्यमानः सुखोषितः ।
भुक्त्वा चान्नानि दुष्प्रज्ञ कथमस्मान्जिहीर्षसि ।। १५ ।।(०२)

एवमेव वृथाचारो वृथावृद्धो वृथामतिः ।
वृथामरणमर्हश्च वृथाद्य न भविष्यसि ।। १६ ।।(०३)

अथ चेद्दुष्टबुद्धिस्त्वं सर्वैर्धर्मैर्विवर्जितः ।
प्रदाय शस्त्राण्यस्माकं युद्धेन द्रौपदीं हर ।। १७ ।।(०४)

अथ चेत्त्वमविज्ञानादिदं कर्म करिष्यसि।
अधर्मं चाप्यकीर्तिं च लोके प्राप्स्यसि केवलम ् ।। १८ ।।(०५)

एतामद्य परामृश्य स्त्रियं राक्षस मानुषीम्।
विषमेतत्समालोड्य कुम्भेन प्राशितं त्वया ।। १९ ।।(०६)

वैशम्पायनः

ततो युधिष्ठिरस्तस्य गुरुकः समपद्यत।
स तु भाराभिभूतात्मा न तथा शीघ्रगोऽभवत्।(०७)

---

(०१) (१) मर्त्येषु; विग्रे (for मित्रे); (२) न विश्व विनष्टेषु (for दिश्व); कस्यचित कथश्चन ,
(०२) (१) त्वं च; तरवं (for स त्वं); प्रतिश्रयो ,
(०३) (३) च(for त्वं); (४) वृथैव नः प्रधान्येन ( वृयान्येन) (for वृथाद्य न),
(०४) (१) यथा; अपि (for अथ; (२) सर्वधर्म; सर्वधर्मैर् (३) शस्त्रम्,
(०५) (१) अवज्ञाय; अविज्ञानाद्; न विज्ञाय; एवमज्ञाय; अभिज्ञाय अथ त्वमेवम (व सं) ज्ञाय (२) हीदं कर्म; (अ)धर्ममेवङ्कं,
(०६) (१) एनाम् अपि (for अद्य); परामृष्य ; (४) पिबसि त्वं नराधम ,
(०७) (२) भारकः; गुरुकः; भारिकं ; (३) ततो (for स तु); भाराभि (०रिक) भूतत्वान्,

अथाब्रवीद्द्रौपदीं च नकुलं च युधिष्ठिरः ।। २० ।।

लक्षालङ्कारः- समपद्यत इत्यत्र 'भारवाहस्तु भारिक' इत्यभिधानात् भारिकः दैत्यस्य शिरसि भारं दिशन् ।

युधिष्ठिरः

मा भैष्ट राक्षसान्मूढाद्गतिरस्य मया हृता ।। २१ ।।(०१)

नातिदूरे महाबाहुर्भविता पवनात्मजः ।
अस्मिन्मुहूर्ते सम्प्राप्ते न भविष्यति राक्षसः ।। २२ ।।(०२)

सहदेवस्तु तं दृष्ट्वा राक्षसं मूढचेतस(न)म्।
उवाच वचनं राजन्कुन्तीपुत्रं युधिष्ठिरम् ।। २३।।(०३)

सहदेवः

राजन्किन्नाम सत्कृत्यं क्षत्रियस्यास्त्यतोऽधिकम्।
यद्युद्धेऽभिमुखः प्राणांस्त्यजेच्छत्रुं जयेत वा ।। २४ ।।(०४)

एष चास्मान्वयं चैनं युद्ध्यमानाः परन्तप।
सूदयेम महाबाहो देशकालो ह्ययं नृप ।। २५ ।।(०५)

क्षत्रधर्मस्य सम्प्राप्तः कालः सत्यपराक्रमः ।
जयन्तो हन्यमाना वा प्राप्तुमर्हाम सद्गतिम् ।। २६ ।।(०६)

राक्षसे जीवमानेऽद्य रविरस्तमियाद्यदि।

---

(०१) (१) ततो (for अथा); धर्मराजो; स नकुलं (for द्रौपदीं च); (२) द्रौपदीं (for नकुलं) द्रौपदीं नकुलं तथा (३)र० (रा)क्षसो दुष्टाद् ; रक्षसो मूढद्; राक्षसे मूढे; राक्षसो मूढो ( राक्षसान्मूढो); रक्षसाच्छाद् (४) मया हता; हता मया; हृता मया,

(०२) (१) यावन्नायाति वेगेन (२) मारुता (for पवना); (३) तस्मिन्; सोस्मिन् ,

(०३) (२) मूढचेतनं,

(०४) (१) सत्कृत्यं; यत्कृत्यं (२) ततो (for (अ)स्त्यतो (३)मुखं (for मुखः); (४) शत्रुं ,

(०५) (१) वा (for चा); जयेचू(for वयं); वैनं (for चैनं),

(०६) (२) तूर्णं (for कालः); सत्यपराक्रमः (३)युध्य०; वध्य (for पात्य),

नाहं ब्रूयां पुनर्जातु क्षत्रियोऽस्मीति भारत ।। २७ ।।[०१]

भो भो राक्षस तिष्ठस्व सहदेवोऽस्मि पाण्डवः ।
हत्वा वा मां नयस्वैनां हतो वाद्येह स्वप्स्यसि ।। २८ ।।[०२]

वैशम्पायनः

तदा ब्रुवति माद्रेये भीमसेनो यदृच्छया।
प्रत्यदृश्यद्गदाहस्तः सवज्र इव वासवः ।। २९ ।।[०३]

सोऽपश्यद्भ्रातरौ तत्र द्रौपदीं च यशस्विनीम्।
क्षितिस्थं सहदेवं च क्षिपन्तं राक्षसं तदा ।। ३० ।।

अगा(मार्गा)च्च राक्षसं मूढं कालोपहतचेतसम्।
भ्रमन्तं तत्र तत्रैव दैवेन विनिवारितम् ।। ३१ ।।[०४]

भ्रातंस्तान्ह्रियतो दृष्ट्वा द्रौपदीं च महाबलः ।
क्रोधमाहारयद्भीमो राक्षसं चेदमब्रवीत् ।। ३२ ।।[०५]

भीमसेनः

विज्ञातोऽसि मया पूर्वं पाप शस्त्रपरीक्षणे

---

(०१) (१) तु (for द्य),

(०२) (१) तिष्ठ त्वं (for तिष्ठस्व); (३)मा (for मां);(ए)नां (for (ए)नान्); (४) हतो वाद्य भविष्यसि; हतो वा स्वस्त्यसहि वै ,

(०३) (१) तदा धुवति माद्रेये (३)अदृश्यत; प्रत्यदृश्यन्; अपश्यत गदाहस्तः (for महां); प्रत्यदृश्य द्गदाहस्तः,

(०४) (१) स्थितं च; अगाच्च; पथा च (for मार्गाच्च) रक्षः सं० (for राक्षसं); (२) ०चेतनं (४) परिमोहितं (for विनि) सहदेवेन वारितं; दैवेनोपनिपीडितं ,

(०५) (१) ह्रियतो दृश्य तान्धातृन्; भ्रातृनपहता० न्दृष्ट्वा; हृतान्सन्दृश्य तान्भ्रादन् (भ्रातृंस्तान्) ह्रियतो वीक्ष्य तान्भ्रातृन् ,

आस्था तु त्वयि मे नास्ति यतोऽसि न हतस्तदा ।। ३३ ।।(०१)

लक्षालङ्कारः- आस्थानं त्वयि मे नास्ति इत्यत्र आस्थानम् आस्था विश्वास इत्यर्थः ।

ब्रह्मरूपप्रतिच्छन्नो न नो वदसि चाप्रियम्।
प्रियेषु रममाणं त्वां न चैवाप्रियकारिणम् ।। ३४ ।।

अतिथिं ब्रह्मरूपं च कथं हन्यामनागसम्।
राक्षसं जानमानोऽपि यो हन्यान्नरकं व्रजेत्।
अपक्वस्य च कालेन वधस्तव न विद्यते ।। ३५ ।।(०२)

ब्रह्मरूपेण विहितं नैव वाण्यामनागसम्।(०३)
नूनमद्यासि सम्पक्वो यथा ते मतिरीदृशी ।। ३६ ।।(०४)
दत्तः(त्ता) कृष्णापहरणे कालेनाद्भुतकर्मणा।
सोऽपि कालं समासाद्य तदाद्य न भविष्यति ।। ३७ ।।(०५)

बडिशोऽयं त्वया ग्रस्तः कालसूत्रेण लम्बितः ।
मत्स्योऽम्भसीव स्यूतास्यः कथमद्यभविष्यसि ।। ३८ ।।(०६)

लक्षालङ्कारः- बडिशोऽयं त्वया ग्रस्त इत्यत्र 'बडिशो मत्स्यबन्धनम्' इत्यभिधानात् बडिशः मत्स्यबन्धनमित्यर्थः ।

यं चासि प्रस्थितो देशं मनः पूर्वं गतं च ते।

---

(०१) (२) चेष्ट पाप पाप चेष्टः श्रेष्ट (for चेष्टञ्),
(०२) (१) प्रिये च (ण) (षु) च चरन्तं; रममाणं (for चर); (२) न च वाग्रि०; न च विप्रि,
(०३) (३) प्रियं (for ब्रह्म); ब्रह्मरूपेण वि (पि)हितं (४) नैव (for कथं); (३)हन्य०; जानं (for मन्य); निरयं (for नरकं;) हन्यात्स निरयं व्रजेत् ,
(०४) (१) तु (for च); (२) जन्तोर्; तस्य (for तव); (३)अस्यद्य; त्वमद्य; ० अद्य सु०अस्याद्य (for अद्यासि); नूनं वेत्सस्यपक्वं त्वां; नूनं जानामि त्वां (त्वा) पक्वं; नूनमथास्यसम्पक्वो पक्वः (for दत्ता),
(०५) यदि स वि स त्वं (for सोपि),
(०६) कालरूपेण संवितः; सूत्रेण यन्त्रितः; ग्रस्तेन लम्भितः (३)संस्यूतः; सूत्रस्थः सूत्रस्य (for स्यूतास्तय); मत्स्योपन्नो दुर्बुद्धे मत्त्योभसीव प्रोतास्यः (४) अद्य (for मेद्य) भविष्यसि ,

न तं गतासि गन्तासि मार्गं बकहिडिम्बयोः ।। ३९ ।।(०१)

वैशम्पायनः

एवमुक्तस्तु भीमेन राक्षसः कालचोदितः ।
भीत उत्सृज्य तान्सर्वान्युद्धाय समुपस्थितः ।(०२)
अब्रवीच्च पुनर्भीमं रोषात्प्रस्फुरिताधरः ।। ४० ।।

जटासुरः

न मे मूढा दिशः पाप त्वदर्थं मे विलम्बितम् ।। ४१ ।।(०३)

श्रुता मे राक्षसा ये ये त्वया विनिहता रणे।
तेषामद्य करिष्यामि तवास्रेणोदकक्रियाम् ।। ४२ ।।(०४)

लक्षालङ्कारः- तवास्रेणोदकक्रियाम् इत्यत्र 'रुधिरेऽसुग्लोहितास्ररक्तक्षतजशोणितं' इत्यभिधानात् अस्रं रक्तम्।

एवमुक्त्वा तदा भीमं राक्षसो योद्धुमाययौ।
स्मयमान इव क्रोधात्साक्षात्कालान्तकोपमः ।। ४३ ।।(०५)

ब्रुवन्वै तिष्ठ तिष्ठेति क्रोधसंरक्तलोचनः ।
बीहुसंरम्भनेवेच्छन्नभिदुद्राव राक्षसम् ।। ४४ ।।(०६)

राक्षसोऽपि तदा भीमं युद्धार्थिनमवस्थितम्।

---

(०१) (१) यं चापि; यतोसि (२) मनसा यद् (for मनः पूर्व); पूर्व तरं; पूर्वगतं; पूर्व गतशू (३) मार्ग त्वं (for गन्तासि); (४) ०हिडम्ब ,

(०२) (१) कालनोदितः सहसैव स राक्षसः (३)भीमम्; तत; भीम० (for भीत); तान् (for सर्वान्); (४) समवस्थितः ,

(०३) (१) तदा (for पुनर्); (३)पार्थ; सर्वास् (for पाप); (४) विलम्बितं ह्यविज्ञाता महावने ,

(०४) (४) रूधिरेन्ति तवोदकं,

(०५) (१) तदा (for ततो); (२) सृक्किणी; सकिणी सृक्रणी; सृघिणी; स्रक्रणी परिलेळिहन् ,

(०६) (१) वाहुसंमर्दम् (ए)च्छन् (ए)क्षन् (for (इ)च्छन्),

अभिदुद्राव संरब्धो बलिर्वज्रहरं यथा ॥ ४५ ॥[०१]

मुहुर्मुहुर्व्यादददानः सृक्किणी परिसंलिहन्।[०२]

भीमसेनोऽप्यवष्टब्धो नियुद्धायाभवत्स्थितः ।
राक्षसोऽपि च विस्रब्धो बाहुयुद्धमकाङ्क्षत ॥ ४६ ॥[०३]

वर्तमाने तदा ताभ्यां बाहुयुद्धे सुदारुणे।
माद्रीपुत्रावतिक्रुद्धावुभावप्यभ्यधावताम् ॥ ४७ ॥[०४]

न्यवारयत्तौ प्रहसन्कुन्तीपुत्रो वृकोदरः ।
शक्तोऽहं राक्षसस्येति प्रेक्षध्वमिति चाब्रवीत् ॥ ४८ ॥

आत्मना भ्रातृभिश्चैव धर्मेण सुकृतेन च ।
इष्टेन च शपे राजन्सूदयिष्यामि राक्षसम् ॥ ४९ ॥[०५]

इत्येवमुक्त्वा तौ वीरौ स्पर्धमानौ परस्परम्।
बाहुभ्यां समसज्जेतामुभौ रक्षोवृकोदरौ ॥ ५० ॥[०६]

तयोरासीत्सम्प्रहारः क्रुद्धयोर्भीमरक्षसोः ।
अमृष्यमाणयोः सङ्ख्ये देवदानवयोरिव ॥ ५१ ॥[०७]

आरुज्यारुज्य तौ वृक्षानन्योन्यमभिजघ्नतुः ।

---

(०१) (२) उप (for अव),

(०२) वृनदन्नादमसकृत् व्यायच्छ (दित्स) मानोष्यसकृत् सृक्किणी सृकिणी सृकणी,

(०३) (३)सङ्क्रुद्धो (for संरब्धो); ततः समभवद्युद्धं; अभ्यद्रवस्तुसंरब्धो (४) बलिर् ,

(०४) (१) तथा; तयोः; ततः (for तदा); एवं; दोर्भ्यां; राजन् (for ताभ्यां); (३) माद्रीसुताव् अति०; अपि (for अभि०);(४) अन्तिकं त्वभ्य; त्वरितावभ्य; अन्तिकं समं उभावप्यभि; उभावभ्यव ,

(०५) (१) (ए)व (for (अ)हं) (४) मर्द० (for सूदं),

(०६) (२) वर्ध (for स्पर्ध०); विनिवार्य वृकोदरः (३)बाहुभ्यां समपद्येताम् (४) उभौ भीमनिशाचरौः उभौ राक्षस०पाण्डवौ,

(०७) (३)सङ्के; सङ्ख्ये (४) शक्र०शम्बरयोरिव ,

जीमूताविव गर्जन्तौ निनदन्तौ महाबलौ ।। ५२ ।।[०१]

बभञ्जतुर्महावृक्षानूरुभिर्बलिनां वरौ।
अन्योन्येनाभिसंरब्धौ परस्परवधैषिणौ ।। ५३ ।।[०२]

तद्वृक्षयुद्धमभवन्महीरुहविनाशनम्।
वालिसुग्रीवयोर्भ्रात्रोः पुरा स्त्रीकाङ्क्षिणोर्यथा ।। ५४ ।।[०३]

आविध्याविध्य तौ वृक्षान्मुहूर्तमितरेतरम्।
ताडयामासतुरुभौ विनदन्तौ मुहुर्मुहुः ।। ५५ ।।[०४]

तस्मिन्देशे यदा वृक्षाः सर्व एव निपातिताः ।
पुञ्जीकृताश्च शतशः परस्परवधेप्सया ।। ५६ ।।[०५]

ततः शिलाः समादाय मुहूर्तमिव भारत।
महाभ्रैरिव शैलेन्द्रौ युयुधाते महाबलौ ।। ५७ ।।[०६]

शिलाभिरुग्ररूपाभिर्बृहतीभिः परस्परम्।
वज्रैरिव महावेगैराजघ्नतुरमर्षणौ ।। ५८ ।।[०७]

अभिद्रुत्य तु(च) भूयस्तावन्योन्यं बलदर्पितौ।

---

(०१) आरुह्यारुह्य वृक्षौ तौ वीरौ समभिक्रुद्धावन्योन्यं पर्य(न्यं परि ०न्यमभि) धावतां
(३)गर्जन्तौ (for ०घर्मान्ते); (४) निनदन्तौ; विनर्दन्तौ महारथौ रवान् रवौ ,

(०२) (१) वृक्षौ (for वृक्षान्); (२) क०ख०ग०घ०बलिनावुभौ, च परस्परं; च (सु०) महाबलौ।; बलिनाबुभौ उत्तमौ फलितावुभौ (३)अन्योन्यम् (for अन्योन्येन); अभिसङ्क्रुद्धौ (४) वधैषिणौ ,

(०३) (४) पुरेव कपिमुख्ययोः पुरा स्त्रीकाङ्क्षिणोर्यथा; यथा श्रीकाङ्क्षिणः पुरा ,

(०४) (४) विनर्दन्तौ परस्परं (for मुहु),

(०५) (३)मुञ्जीकृताः; मुञ्जीभूताः; पूगीकृताः ( पुञ्जीभूताः); चूर्णीकृताः; बहुशः; बहवः (for शतशः),

(०६) (१) ततः; तथा (for तदा) (४) परस्परं (for महा),

(०७) (१) गदाभिर्; शिला भिर् (for उग्राभिर्); (२) महाबलौ (for परं);
(४) अभिजघ्नतुस्त्वटैः ०त्कटौ; ल्बणैः ( त्कटं) ,

भुजाभ्यां परिगृह्याथ चकर्षाते गजाविव ।। ५९ ।।(०१)

मुष्टिभिश्च महाघोरैरन्योन्यमभिजघ्नतुः ।
ततः कटकटाशब्दो बभूव सुमहात्मनोः ।। ६० ।।(०२)

ततः संहृत्य मुष्टि तु पञ्चशीर्षमिवोरगम्।
वेगेनाभ्यहनं भीमो राक्षसस्य शिरोधराम् ।। ६१ ।।(०३)

ततः श्रान्तं तु तद्रक्षो भीमसेनभुजाहतम्।
सुपरिश्रान्तमालक्ष्य भीमसेनोऽभ्यवर्तत ।। ६२ ।।(०४)

तत एनं महाबाहुर्बाहुभ्याममरोपमः ।
समुत्क्षिप्य बलाद्भीमो विनिष्पिष्य महीतले ।। ६३ ।।(०५)

ततः सम्पीड्य बलबद्भुजाभ्यां क्रोधमूर्च्छितः ।
तस्य गात्राणि सर्वाणि चूर्णयामास पाण्डवः ।। ६४ ।।

अरत्निना चाभिहत्य शिरः कायादपाहरत्।(०६)
सन्दष्टौष्ठं विवृत्ताक्षं फलं वृक्षादिव च्युतम् ।। ६५ ।।

जटासुरस्य तु शिरो भीमसेनबलाद्धृतम्।
पपात रुधिरादिग्धं सन्दष्टदशनच्छदम् ।। ६६ ।।(०७)

---

(०१) (१) अभिपत्य; अभिद्रुत्य अपसृत्य (२) अन्योन्य० (४) चकृषाते; विक० र्षतौ परस्परं (for गजा),

(०२) (१) महावेगैर् ०घोतैर् (for ०घोरैर्); (२) अन्योन्यमभिज० घ्नतुः अभिजघ्नतुरुत्कटौ
(३) ततश् (for तयोश्); ततः (०योः) कटकटअशब्दो (४) च (for सु),

(०३) (१) संहत्य; ०वर्त्य; वुत्य च; स (for तु),

(०४) (१) शान्तं (for श्रान्तं); (२) भुजार्दितं (३)आलोक्य (for आलक्ष्य);
(४) व्यवर्तत; व्यवर्धत (for भ्य०वर्तत),

(०५) (१) त्वेनं (for एनं); महाबाहो; महाबाहुं (२) अन्तको (for अमरो); (४) विनिष्पिष्य; विनिष्पेष (for निष्पि),

(०६) (३)अरत्रिणा चाभिहतः:; ०हनत्; हत्य चापहत्य; चापहृत्य खङ्गं चाथ समुद्धृत्य,

(०७) (१) सन्दष्टौष्ठं (२) वृक्षाद् (for वृन्ताद्); (३)शीर्ष तु (for तु शिरो); (४) ०भयात् ( बलात्)

**तं निहत्य महेष्वासो युधिष्ठिरमुपागमत्।**
**स्तूयमानो द्विजाग्र्यैस्तु मरुद्भिरिव वासवः ।। ६७ ।।**

बभूव पुरुषव्याघ्रः प्रहृष्ट इव पाण्डवः ।
ततो युधिष्ठिरो राजा धौम्यः कृष्णा यमौ तथा ।
भीमसेनमुपायान्तं ददृशुस्ते च पाण्डवम्।
उपसंहृत्य धौम्यं च पाण्डवं च युधिष्ठिरम्।
पर्क्यवशात दुर्धर्षो यमौ चापि वृक्येदरः ।
हतं जटासुरं दृष्ट्वा पाञ्चाली भमिमञ्चतम्।
मुदितं पूजयामास पौलोमीव पुरन्दरम्।
सम्पूजितः स सद्भिर्ब्राह्मणानभिवाद्य च ।
जितारिर्मुदितो भीमो बभूव भरतर्षभः ।।(०१)

अस्मिन् पर्वणि १३० अध्याये ६७ श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि तीर्थयात्रापर्वणि त्रिंशदधिकशततमोऽध्यायः ।। १३० ।।**

---

हतं; हुतं; वशं (for हृतं); बलाहतं; भुजाहतं; बलोद्धृतं,
(०१) (३)तु च (for तैर्); द्विजमुख्यैः स्तूयमानः,

# यक्षयुद्धपर्व

## १३१.एकत्रिंशदधिकशततमोध्यायः

जटासुरवधानन्तरं सपरिवारेण युधिष्ठिरेण नरनारायणाश्रमे निवासः ।। १ ।। ततो वृषपर्वाश्रमादिषु सुखेन सञ्चरणम् ।। २ ।। तत आर्ष्टिषेणाश्रमगमनम् ।। ३ ।।

वैशम्पायनः

निहते राक्षसे तस्मिन्पुनर्नारायणाश्रमम्।**
अभ्येत्य राजा कौन्तेयो निवासमकरोत्प्रभुः ।। १ ।।[०१]

स समानीय तान्सर्वान्भ्रातनित्यब्रवीद्वचः ।**
द्रौपद्या सहितान्काले संस्मरन्भ्रातरं जयम् ।। २ ।।[०२]

समाश्चतस्रोऽभिगताः शिवेन चरतां वने।**
कृतोद्देशस्तु(शः स) बीभत्सुः पञ्चमीमभितः समाम्।[03]
प्राप्य पर्वतराजानं श्वेतं शिखरिणां वरम् ।। ३ ।।
तत्रापि च कृतोद्देशः समागमदिदृक्षुभिः ।

पुष्पितैर्द्रुमषण्डैश्च मत्तकोकिलषट्पदैः ।
मयूरैश्चातकैश्चापि नित्योत्सवविभूषितम्।
व्याघ्रैर्वराहैर्महिषैर्गवयैर्हरिणैस्तथा ।
श्वापदैर्व्यालरूपैश्च रुरुभिश्च निषेवितम्।

(०१) (१) राजन् (for तस्मिन्); (४) तदा;;विभुः (for प्रभुः,
(०२) (३)सहितः (for सहितान्),
(०३)(१) विगताः;हि गताः; गमिताः;(ऽ)धिगताः;(ऽ)तिगताः; (२) जवेन (for शि); (३)तु;; स (for च,

फुल्लैः सहस्रपत्रैश्च शतपत्रैस्तथोत्पलैः ।[०१]

प्रफुल्लैः कमलैश्चैव तथा नीलोत्पलैरपि।

महापुण्यं पवित्रं च सुरासुरनिषेवितम्।

कृतश्च समयस्तेन पार्थेनामिततेजसा ।। ४ ।।[०२]

पञ्चवर्षाणि वत्स्यामि विद्यार्थीति पुरा मयि ।। ५ ।।[०३]

त(अ)त्र गाण्डीवधन्वानमवाप्तास्त्रमरिन्दमम् ।
देवलोकादिमं लोकं द्रक्ष्यामः पुनरागतम् ।। ६ ।।[०४]

वैशम्पायनः

इत्युक्त्वा ब्राह्मणान्सर्वानामन्त्रयत पाण्डवः ।
कारणं चैव तत्तेषामाचचक्षे तपस्विनाम् ।। ७ ।।[०५]

तानुग्रतपसः प्रीतान्कृत्वा पार्थाः प्रदक्षिणाम् ।
ब्राह्मणास्तेऽन्वमोदन्त शिवेन कुशलेन च ।। ८ ।।[०६]

ब्रह्मणाः

सुखोदर्कमिमं क्लेशमचिराद् भरतर्षभ।
क्षत्रधर्मेण धर्मज्ञ तीर्त्वा गां पालयिष्यसि ।। ९ ।।[०७]

लक्षालङ्कारः- सुखोदर्कमिमं क्लेशम् इत्यत्र सुखात् उदर्कम् उत्कृष्टं सुखोदर्कम् ।

---

(०१) (१) व्यालऋक्षैश्च;करिभिश्च (for रुरुभि); कुमुदे (for कमले) नीलोप्पलवैरेरपि;,

(०२) (३)कृतोद्देशं;;समे देशे; (४) समा०गम्य (for समागम०),

(०३) (३)पञ्च वत्स्यामि विद्यार्थे; (४) विद्या०र्थी च; र्थे च; ०र्थीव; र्थे तु; वर्तति; विद्यार्थी तु;; पुरन्दरे;; पुरा मया,,

(०४) (१) अत्र (for तत्र); (२) सम्प्राप्ता (for अवाप्ता),

(०५) (३)कालं चैव हि तं तेषां,

(०६) (ब्राह्मणाः; (१) तान् (for तम्);तपसं; तपसा;प्रीत्या; प्रीतान्, तमूचुर्मुनयः सर्वे; (२) पार्थान्; पार्थाः; पार्थः;प्रदक्षिणां,

(०७) (४) जित्वा;सर्वां; नीत्वा (for तीर्त्वा,

वैशम्पायनः

तत्तु राजा वचस्तेषां प्रतिगृह्य तपस्विनाम्।
प्रतस्थे सह विप्रैस्तैर्भ्रातृभिश्च परन्तपः ।। १० ।।(०१)

द्रौपद्या सहितः श्रीमान्हैडिम्बेयादिभिस्तदा।**
राक्षसैरनुयातो वै लोमशेनाभिरक्षितः ।। ११ ।।(०२)

क्वचित्पद्भ्यां ततोऽगच्छद्राक्षसैरुह्यते क्वचित्।**
तत्र तत्र महातेजा भ्रातृभिः सह सुव्रतः ।। १२ ।।(०३)

ततो युधिष्ठिरो राजा बहून्क्लेशान्विचिन्तयन्।**
सिंहव्याघ्रगजाकीर्णामुदीयां प्रययौ दिशम् ।। १३ ।।(०४)

अवेक्षमाणः कैलासं मैनाकं चैव पर्वतम्।**
गन्धमादनपादांश्च श्वेतं चापि शिलोच्चयम् ।। १४ ।।(०५)

उपर्युपरि शैलस्य बह्वीश्च सरितः शिवाः ।**
पृष्ठं हिमवतः पुण्यं ययौ सप्तदशेऽहनि ।। १५ ।।(०६)

ददृशुः पाण्डवा राजन्गन्धमादनमन्तिकात्।}
पृष्ठे हिमवतः पुण्ये नानाद्रुमलतावृते ।। १६ ।।(०७)

---

(०१) (१) तत्र; स तु (for तत्तु ); (३)विप्रेन्द्रैर् (for विप्रैस्तैर्) ;प्रतस्थे भ्रातृभिश्चैव;; (४) समाश्वस्तः (for भ्रातृभिश्च) ;परन्तप,,

(०२) (१) च सह (for सहितः); (३)यातो वै (for यातश्च),

(०३) (१) क्वचित्पद्भ्यां समागच्छां (च्छे)द्;; क्वचित्पच्छां तदागच्छद् क्वचित्पभ्ध्यां ततोगच्छद्; (३) क्वचित् (for तत्र ); (४) भिः स महाभुजः भिः सुमहाव्रतः,

(०४) (२) अचिन्तयन् (for विचिन्त); (३)गणा; समा; मृगा;मुखा (for गजा,) ४)कौबेरीं (for उदीचीं) ;उदीचीं दिशमाययौ,,

(०५) (१) अन्वीक्षमाणः;अवेक्ष्य;कैलाशं; (२) श्वतं (for मेरुं,

(०६) (१) शैलानां (for शैलस्य); (३)पृष्ठं (for प्रस्थं); (४) ययुः(for ययौ,

(०७) (४) लतावृते,,

सलिलावर्तसञ्जातैः पुष्पितैश्च महीरुहैः ।**
समावृतं पुण्यतममाश्रमं वृषपर्वणः ।। १७ ।।(०१)

तमुपागम्य राजर्षिं धर्मात्मानमरिन्दमाः ।**
पाण्डवा वृषपर्वाणमवन्दन्त गतक्लमाः ।। १८ ।।(०२)

अभ्यनन्दत्स राजर्षिः पुत्रवद्भरतर्षभान्।**
पूजितास्चावसंस्तत्र सप्तरात्रमरिन्दमाः ।। १९ ।।(०३)

अष्टमेऽहनि सम्प्राप्ते तमृषिं लोकविश्रुतम्।**
आमन्त्र्य वृषपर्वाणं प्रस्थानं प्रत्यरोचयन् ।। २० ।।(०४)

एकैकशश्च तान्विप्रान्निवेद्य वृषपर्वणि।**
न्यासभूतान्यथाकालं बन्धूनिव सुसत्कृतान् ।। २१ ।।(०५)
पारिबर्हं च तं शेषं परिदाय महात्मने।(०६)

लक्षालङ्कारः- न्यासभूतान् यथाकालम् इत्यभ नितराम् आरः अस्मत्समीपे आसनं येषां ते न्यासभूताः ।

ततस्ते यज्ञपात्राणि रत्नान्याभरणानि च ।**
न्यदधुः पाण्डवा राजन्नाश्रमे वृषपर्वणः ।। २२ ।।(०७)

अतीतानागते विद्वान्कुशलः सर्वधर्मवित्।**

---

(०१) (१) सङ्घातैः; (२) महाद्रुमैः (for मही); पुण्यकर्मा (for तमम्) ह्याश्रमं (for आश्रमं,
(०२) (१) उपागम्य; उपाक्रम्य; (२) दम, दमः; (४) अवदन्त (for अवन्दन्त),
(०३) (१) अभ्यनन्दत (दश्च); (२) ०र्षभ; (३)ते (for च); (४) कुरूद्वहाः(for अरिन्दमाः,
(०४) (२) संशित (श्रित ; सति);व्रतं (for लोक); (४) चाभ्य;तेभ्य; प्रत्य (for सम,
(०५) (२) वृषपर्वणः; णि; (४) सुसंस्कृतान्; सुहृत्सुतान्,,
(०६) ((१) पारिबर्हं; ते (for तं); प्रदाय वृषपर्त्रणे,
(०७) (१) ततो मुख्यानि वस्त्राणि;; ततस्ते यज्ञ।०पात्राणि;;ततस्ते त्वथ वस्त्राणि ततस्ते रथपत्राणि; (२) शुभ्राणि;; रत्नानि (for शुभानि); (३)निदधुः;राजन्; सर्वे (for तस्मिन्); (४) भरतर्षभ (for वृष ,

अन्वशासत्स धर्मज्ञः पुत्रवद्भरतर्षभान् ।। २३ ।।[०१]

तेऽनुज्ञाता महात्मानः प्रययुर्दिशमुत्तराम्
कृष्णया सहिता वीरा ब्राह्मणैश्च महात्मभिः ।। २४ ।।

तान्प्रस्थितानभ्यगच्छद्वृषपर्वा महीपतिः ।[०२]
उपन्यस्य महातेजा विप्रेभ्यः पाण्डवांस्तदा ।। २५ ।।

अनुसंसार्य कौन्तेयानाशीर्भिरभिनन्द्य च ।**
वृषपर्वा निववृते पन्थानमुपदिश्य च ।। २६ ।।[०३]

नानामृगगणैर्जुष्टं कौन्तेयः सत्यविक्रमः ।**
पदातिर्भ्रातृभिः सार्धं प्रातिष्ठत युधिष्ठिरः ।। २७ ।।

नानाद्रुमनिरोधेषु वसन्तः शैलसानुषु।**
पर्वतं विविशुः श्वेतं चतुर्थेऽहनि पाण्डवाः ।। २८ ।।[०४]

महाभ्रघनसङ्काशं सलिलोपहितं शुभम्।**
मणिकाञ्चनरूप्यस्य शिलानां च समुच्चयम् ।। २९ ।।[०५]

रूपं हिमवतः प्रस्थं बहुकन्दरनिर्झरम्।
शिलाविभङ्गविकटं लतापादपसङ्कुलम् ।। ३० ।।

ते समासाद्य पन्थानं यथोक्तं वृषपर्वणा।

---

(०१) ((१) जानन्; काले;वृद्धान् (for विद्वान् ); (३)अन्वजानात्;;अन्वजानत् ; (४) र्षभ,

(०२) (१) अनुज्ञाता; ते प्रस्थिता (for तेऽनुं);महाप्राज्ञाः; (३)०तान्पार्थान्; ता पार्थां (for ता वीरा);अभ्य; अन्य (व) गमद्;महामतिः; महाद्युतिः;महीपतीन्,,

(०३) (३)सत्रं समाप्य; स तु संसाध्य; स तु संस्थाप्य; अनुसंसार्य;अनुसम्भाष्य; स तु संशाम्य अनुशास्य स; अभिसंसाध्य (अपि संवाध्य); (४) अभिनन्दितान् ( दितः),

(०४) (१) विचित्रेषु; (२) वसन्वै (for वसन्तः); (३)ते तं; चैतं; चैनं (for श्वेतं ,

(०५) (२) सलिलावत (०न) तं शुभं;;०लावृतनिर्भरं;;०लान्तर्हितंशुभं;;लावहितं शुभं, ३)रूप्येषु; रूपस्य;;रूप्यस्य;रूपाणां (for रम्यं च); (४) शिलानां समुच्च(for ०च्छ्र)यं,शैलं नानासमुच्चयं,

**अनुसस्रुर्यथोद्देशं पश्यन्तो विविधान्नगान्   ।। ३१ ।।**[०१]

**उपर्युपरि शैलस्य गुहाः परमदुर्गमाः ।****
**सुदुर्गमांस्ते सुबहून्सुखेनैवाभिचक्रमुः   ।। ३२ ।।**[०२]

**धौम्यः कृष्णा च पार्थाश्च लोमशश्च महानृषिः ।****
**अगच्छन्सहितास्तत्र न कश्चिदवहीयते   ।। ३३ ।।**[०३]

**ते मृगद्विजसङ्घुष्टं नानाद्रुमलतायुतम्।****
**शाखामृगगणैश्चैव सेवितं सुमनोरमम्   ।। ३४ ।।**[०४]

**पुण्यं पद्मसरोयुक्तं सपल्वलमहावनम्।****
**उपतस्थुर्महाभागा माल्यवन्तं महागिरिम्।। ३५ ।।**[०५]

गजसङ्घसमावासं सिंहव्याघ्रगणायुतम् ।[०६]

शरभोन्नादसङ्घुष्टं नानामृगनिषेवितम् ।[०७]

**ततः किम्पुरुषावासं सिद्धचारणसेवितम्।****
**ददृशुर्हृष्टरोमाणः पर्वतं गन्धमादनम्   ।। ३६ ।।**

---

(०१) (३)अवसस्रुर्; अनुजग्मुर्; अनुसृत्य,

(०२) (३) क०तटिनीश्चासु; ख०सरितश्च सु;, घ०सुदीर्गाश्च सुबहीश्च, सदु (for सुदु);सदुर्गमास्तेषु बहून्; सुदुर्गमास्ते बह्वीश्च; दुर्गमां०स्तेषु सुबहून्; सुदुः (अमा) र्गमार्गान्सुबहून्; समावसन्तो बह्वीश्च; सरितः (दुर्गमा ; सुदीर्घा)श्च सुबह्वीश्च; (४) दुःखेनैवोपचक्रमुः;सुखेनैवाति,

(०३) (२) महायशाः (for नृषिः); (३)अ (आ) गच्छन्;अभ्यगच्छन्त सहिता ४)पर्यहीयत; परि०हीयते; । अवसीदति;;अपि हीयते;;अपहीयते,

(०४) (२) नानापक्षिसमावृतं; नानाद्विज (सत्व०;० मृग०; द्विप);गणायुतं;द्रुमलतायुतं (कुलं); नागद्विपगणायुतं; नानाद्विजसमायुतं; (३)चापि (for चैव); (४) सुमनोरमं,

(०५) (१) पुण्यगन्धरजो (सो) पेतं; पुण्यं पद्मसरोयुक्तं; पुण्यगन्धवहोपेतं; पुपयपद्मसरो०; पुण्यपद्मवनो; (३)महाभागा (०त्मानो),

(०६) (गजसङ्घसमावापिं (पं); सिंहसमा०वासं (पं);सिंहव्याघ्रसमाकुलं; समाः(गाणा) वृतं;, सिंहशार्दूलसङ्कुलं; मृगव्याघ्रसमायुतं,

(०७) ( सुरभीनाद;;शरभोन्माद०;मृगनिनादितं,

विद्याधरानुचरितं किन्नरीभिस्तथैव च ।**
गजसङ्घसमावासं सिंहव्याघ्रगणायुतम्।(01)
शरभोन्नादसङ्घुष्टं नानामृगनिषेवितम् ॥ ३७ ॥

ते गन्धमादनवनं तन्नन्दनवनोपमम्।(०२)
मुदिताः पाण्डुतनया मनोहृदयनन्दनम् ॥ ३८ ॥(०३)

विविशुः क्रमशो वीराः शरण्यं शुभकाननम् ॥ ३९ ॥(०४)

द्रौपदीसहिता वीरास्तैश्च विप्रैर्महात्मभिः ।
शृण्वन्तः प्रीतिजननान्वल्गून्मदकलाञ्छुभान् ॥ ४० ॥

श्रोत्ररम्यान्सुमधुराञ्छब्दान्खगमुखेरितान्।(०५)
सर्वर्तुफलभाराढ्यान्सर्वर्तुकुसुमोज्ज्वलान् ॥ ४१ ॥

पश्यन्तः पादपांश्चापि फलभारावनामितान्।(०६)
आम्रानाम्रातकान्भव्यान्नारिकेलान्सतिन्दुकान् ॥ ४२ ॥(०७)

मुञ्जातकांस्तथाञ्जीरान्दाडिमान्बीजपूरकान्।(08)

---

(०१) (२) ०भिश्च सर्वशः; (३)गजसङ्घ (सिंह) समाशसं; ०सिंहमहाकीर्णं; ४)सिंहव्याघ्रगणा(समा) युतं;;काननं शरभायुत,,
(०२) (१) अश्वै (for अन्यै);मृगैस्; तथा (for तदा); (२) तथा (for मृगैर्) द्विजनगादिभिः; मृदुनि०नादितैः,
(०३) (२) मनोनयन,
(०४) (३)विद्याधरानुचरितं; (४) ह्यरण्यं; पाण्डवाः; शरण्यं; सुरम्यं, ह्यचलं (for अरण्यं),
(०५) (४) बहून्;,नादान् त्तीवम्गून्);मन्दकराञ्; मदकराग्; मन्दकलाम्,श्रोत्ररम्यसुखाञ्छब्दाध्य;;श्रुत्वा (for शब्दान्,
(०६) ((१) दानाड्यान्,
(०७) (१) भव्यान्; भल्लान् (for फुल्लान्); (२) नालिके०रान् ;,
(०८) (३)मुञ्जीतकांस्; मुञ्जीरि०; मुं (सं) जात (for अजात);तथाञ्जीरा( वा )न्;तथाभीरान् अशोकांस्तिलकान्नागान्,

पनसाँल्लकुचान्मोचान्खर्जूरानम्लवेतसान्  ।। ४३ ।। [०१]

पारावतांस्तथा क्षौद्रान्नीपांश्चापि मनोरमान्।[०२]
(अतिमनोरमान् पुनागान्बकुलानपि।)
बिल्वान्कपित्थाञ्जम्बूंश्च काश्मरीर्बदरीस्तथा  ।। ४४ ।।

प्लक्षानुदुम्बरबटानश्वत्थान्क्षीरिकांस्तथा।
भल्लातकानामलकीर्हरीतकबिभीतकान्  ।। ४५ ।।[०३]

इङ्गुदान्करमर्दांश्च तिन्दुकांश्च महाफलान्।**
एतानन्यांश्च विविधान्गन्धमादनसानुषु।[०४]
फलैरमृतकल्पै स्तानाचितान्स्वादुभिस्तरून्  ।। ४६ ।।[०५]

तथैव चम्पकाशोकान्केतकान्बकुलांस्तथा  ।। ४७ ।।[०६]

पुन्नागान्सप्तपर्णांश्च कर्णिकारान्सकेतकान्।**
पाटलान्कुटजान्रम्यान्मन्दारेन्दीवरांस्तथा  ।। ४८ ।।[०७]

पारिजातान्कोविदारान्देवदारुद्रुमांस्तथा।
शालांस्तालांस्तमालांश्च पिप्पलान्हिङ्गुकांस्तथा ।
शाल्मलीः किंशुकाशोकाञ्छिंशपाः सरलांस्तथा  ।। ४९ ।।[०८]

---

(०१) (१) लकुचा (इङ्गुदा) न् (for लि); (२) खर्जूरान०(ना) म्ल; रान्नीप,
(०२) (३)पालेवतां; परावतां; ऐलेवतां; क्षेटान्; क्षोदान्; क्षोटान्;; क्ष्वेडान्; क्षोद्रान्; क्षोडान् द्राक्षान् (for क्षौद्रान्); (४) निबान् (for नीपान् );(अ)तिः (पि) मनोहरान्,
(०३) (२) काश्मीरान्; काश्मीरीर्;, कश्मरी०; कार्ष्मरी०;काश्मरि०; काष्मरी०;(४) क्षीरिकास्तथा; क्षरिकां०; क्षीरिका;; बल्ला;आमलकीर्;बिभी० तकहरीतकीः; हरीतकिबिभीतकान्; हारीतकबिभी,
(०४) (१) मकरन्दांश्च;;करमर्दा; करवन्दां (for करवीरां ); (२) चम्पकांश्च (for तिन्दु०) महाबलान्; मनोहरान्; मनोरमान्; (३)सुबहून् (for विविधान्,
(०५) (१) अमृतकल्पान्;च (for तान् ),
(०६) ((२) ह्याचितान्;; आहितान्;;स्वचितान् (for आचि ); (४) बकुलान्वजुलास्तथा,
(०७) (२) सवञ्जुलान् (for सकेत); (३)पाटलाः; पाटल्यः;पाटली०(४) मन्दारान्दीपकास्तथा,
(०८) (१) सतिलकान् (for कोवि ); (२) देवदारूस्तथा तरून्; को०विदारतरूम्प्लुथा;

चकोरैः शतपत्रैश्च भृङ्गराजैस्तथा शुकैः ।। ५० ।।[०१]

कोकिलैः कलविङ्कैश्च हारितैर्जीवजीविकैः ।[०२]

प्रियकैश्चातकैश्चैव तथान्यैर्विविधैः खगैः ।
श्रोत्ररम्यं सुमधुरं कूजद्भिश्चात्यधिष्ठितान् ।। ५१ ।।[०३]

सरांसि च मनोज्ञानि समन्ताज्जलचारिभिः ।। ५२ ।।[०४]

कुमुदैः पुण्डरीकैश्च तथा कोकनदोत्पलैः ।**
कह्लारैः कमलैश्चैव आचितानि समन्ततः ।। ५३ ।।[०५]

कादम्बैश्चक्रवाकैश्च कुररैर्जलकुक्कुटैः ।
कारण्डवैः प्लवैर्हंसैर्बकैर्मद्गुभिरेव च ।। ५४ ।।

एतैश्चान्यैश्च कीर्णानि समन्ताज्जलचारिभिः ।[०६]
दृष्टैस्तथा तामरसरसासवमदालसैः ।। ५५ ।।

पद्मोदरच्युतरजः किञ्जल्कारुणरञ्जितैः ।[०७]

---

देवदारुद्रुमांस्तथा; ०दारूस्तथैव च; (३)सालां (for शालां); (४) पिचुकाल्लँकुचास्तथा; पिप्पलान्हिगुकां(निग ुदां;०न्हिङ्गुलां)स्तथा;प्रियालान्सरलां;शाल्मली०; शल्मलीः;शाल्मलीन्; शल्मल्यः;शिंशपान्;;सिञ्छि०पान्;;शि ाशंपा; शिशुपान्; शैशिपान्; शिंशपाः;सरलास्तथा; शाल्मलीकिंशुकान्सर्वान्सनिबानथशिशुंपान्;शल्मलीकिंशुका शोकशिशुंपान्सरलांस्तथा; शल्मलीकिं०शुकासर्जान्सबिम्बानथ शिशंपान्,

(०१) (१) पारा०वतैः शतपत्रैर्;,

(०२) (४) हारितैर्; हरी,,

(०३) (१) प्रियसी०धुसातकैश्च; प्रियशीधुचातकैश्च; सीधुकैश्चतकैः;कैश्चातकैश्चैव;;वाग्भिश्चातकैश्च; वाग्भिश्चकोरैश्च; (२) द्विजैः(for खगैः); (४) कूजद्भिश्चाव;(र्व ; प्य);धिष्ठितं; ०द्भिश्च तथा द्विजैः; ०द्भिश्चारुचेष्टितैः; द्भिः श्रोत्र (द्भिस्तत्र; द्भिश्चात्र ) विष्ठितैः,

(०४) (१) मनोज्ञानि (for विचि ); (२) समं०ताज्जलचारिभिः,

(०५) (३)कुसुमैः;कुमुदै;पुण्डरीकैश्च कुमुदैः;फुद्रकारैः(for कह्ला );चापि (for चैव ); कल्होरदीवरैः;फुल्लैद्;स्वाचितानि;शोभि;आपी,,

(०६) (१) कादम्बै;कारण्डवैश्चक्रवाकैः; (३)बकैर् (प्लवैर्);
(४) प्लवैर्; स्वरैर् (for बकैर् )च मधुरस्वरैः; वल्गुभिरेव च,

(०७) (तामरसै०रपालसमदालसैः;तामरसैरसासवमदा; तामरस०सारसैर्मदलालसैःताम रसासवमदालसैः;'

मञ्जुस्वरैर्मधुकरैर्विरुतान्कमलाकरान् ।
अपश्यंस्ते नरव्याघ्रा गन्धमादनसानुषु ।। ५६ ।।(०१)

तथैव पद्मषण्डैश्च मण्डितांश्च समन्ततः ।। ५७ ।।

शिखण्डिनीभिः सहिताँल्लतामण्डलकेषु च ।
मेघतूर्यरवोद्दाममदनाकुलितान्भृशम् ।। ५८ ।।(०२)

कृत्वैव केकामधुरं सङ्गीतं मधुरस्वरम्।
चित्रान्कलापान्विस्तीर्य सविलासान्मदालसान् ।। ५९ ।।

मयूरान्ददृशुर्हृष्टान्नृत्यतो वनलालसान्।(०३)
कान्ताभिः सहितान्वश्यानपश्यन्रमतस्सुखम् ।। ६० ।।

वल्लीलतासङ्कटेषु कुटजेषु स्थितांस्तथा ।
कांश्चित्प्रियाभिः सहितान्रममाणान्कलापिनः।। ६१।। (०४)

(कांश्चिच्च कुटजानां तु विटपेषूत्कटानिव )

कलापरुचिराटोपनिचितान्मुकुटानिव ।**

---

तामरसा०रसासवमदा; ताम्ररसैः सारसैश्च मदा, मानससरोरसासवमदा; तामरसासस्वादमदलालसैः; तामरसरसासवमदासवैः,,

(०१) (१) मञ्जुस्वरैर्; मधुस्वरैर्; मञ्जुस्वनैर्; मधुरैः स्वरैर् (for मधुरस्वरैर् )
(३) अपश्यंस्ते (for पश्यन्तस्ते); नरव्याघ्रा (for मनोरम्यान् ), ,

(०२) (१) पद्मखडैश्च;०खण्डेषु ; वृक्षषन्द्धैश्च; वृक्षैं श्च; (२) मण्डितांश्च (for तेषु ) (३) सहिता (for सहिता ०); (४) लतामण्डल०; मण्टप;०मदनाक(ग) लि०तान्मदे (द) नाकुलिता,

(०३) (१) श्रुत्वैव केकाविरुतं;;श्रुत्वैव मधुरोच्चाभिः; कुर्वतः केकाविरुतं; (२) सङ्गीतमधुरस्वनं; सं(स) गीतं मधुरस्वरं (नं); सङ्गति०मधुरस्वरान्; (३),केकाभिः कृतगीतकः (०गीतकं; केतकः, (४)सलीलान्सम०(र्व) दालसान्; हृष्टान् (for चित्रान् ); वनसालकान्; वन०लालसान् (सुमनोरमान्; वनलालकान्); वनवा०सिकान्; ) च वनौकसः,

(०४) (१) सहिताः; वश्यान्; पश्यन् (for अन्यान्);कांश्चित्प्रियाभिः सहितान्;
(२) (अ)पश्यद्; (अ)गच्छद्; नृपतिः;अमृतः (for रमतः);शिखीन्; सुखीन् (for सुखम् ); र( भ्र ) ममाणा०न्कलापिनः;शिखीन्; अपश्यञ्छिखिनः;शतं;
(४) कुटिलेषु; कुटजेषु; कुटचेषु; तदा; सदा (for तथा ); कुजेपूक्षितांस्तथा,

**विवरेषु तरूणां च रुचिरान्ददृशुश्च ते ।। ६२ ।।**(०१)

**सिन्धुवारांस्तथोदारान्मन्मथस्येव तोमरान्।****
**सुवर्णवर्णकुसुमान्गिरीणां शिखरेषु च ।**(०२)
**कर्णिकारान्विकसितान्कर्णपूरानिवोत्तमान् ।। ६३ ।।**

**तथापश्यन्कुरबकान्वनराजिषु पुष्पितान्।****
**कामवश्यौत्सुक्यकरान्कामस्येव शरोत्करान् ।। ६४ ।।**(०३)

तथा वनस्पतीभारं भूरिभारासमद्युतिम् ।
दधन्त्यः सगताश्चारुलतापुष्पसमागताः ।।(०४)

**तथैव वनराजीनामुदारान्रचितानिव ।****
**विराजमानांस्तेऽपश्यंस्तिलकांस्तिलकानिव ।। ६५ ।।**(०५)

**तथानङ्गशराकारान्सहकारान्मनोरमान्।****

---

(०१) (१) ते (for च);कांश्चिच्च कुटजा;कांश्चिच्च कुटजातानि;कांश्चित्प्रियाभिः सहिता; कांश्चिच्च कुटजानां तु; कांश्चिच्च कुटजोपान्ते; (२) निव; निति; नि च (for नपि); (३)पलाशरचिताटोपान् (चोपा) ;कटीपरचिता;कलापरुचिरा (रचिता)टोप०; कलापरचितटोपान् कलापात्रचितान्मूर्ध्नि;; कलापरचिताटोपा;कलापिचरिता०टोपान्; कलापरुचिराटोपान्;; (४) निचितान्कुटजानपि; निचितान्मुकुटानिव (टानि च; ०लानि च); निचितानु(न्यु)त्कटानि च;विचित्रम (मु) कुटानि च; निचितान्वि०टपानिव; वितानान्मुकुटानि च; विचित्रान्म(न्मु) ०कुटानिव;रुचिरान्; रुचिरं; मुदिता;उषि (चि);तान् (for मुदि० )।;स्म; तु (for च ),

(०२) (१) सिन्दुवारान्;अथोदारान्; तथोदारान् (for अथोद्दामान्); (२) तोरणान्; तोषणान् (for तोम); (३)सुवर्णवर्णमुकुटान्;०वर्णकुसुमान्;, कुसुमो०त्कीर्णान्,

(०३) (१) विकसिताः;विचित्राभान् (forविरचितान्); (२) कर्पूरानिव चोत्तमान्;कर्णपाशानिवोद्यतान्,

(०४) (३)तथापश्यन्; कुरवटान्; कुरुवटान्; कुरुवटान्; कुरुबकान्; कुर०वकान्; कामवेश्यैत्सुकाकारान् कामव( वे )श्यौत्सुककरान्; कामस्येवोत्सुक (for ) करान् ;कामवश्यो( ०श्यौ )त्सव०करान्; कामवश्यान्मधुकरान्; कामवश्यौत्सुक्यकरान्; कामस्यैवोत्सवकरान्; कामवश्योत्करांश्चैव;तथैव वनरा०जितान् ,(०जिषु; जिनां); तथैवाभिविराजिकान्,

(०५) (१) तांस्त्वलङ्कारमधुरं (रान्); तांस्त्वलं (स्त्वेवं) काममधुरान्; (२) मुकुटान्; कुसुमान् कुमुदान् (for उदारान् );रुचितानिव; निचिता;सङ्गीतं सुमनोहरं; सङ्गी (ग) तान्सुमनोहरान्; (४) कानने; रुचिरान् ( तिलकान् ),

**अपश्यन्भ्रमरारावान्मञ्जरीभिर्विराजितान् ॥ ६६ ॥[०१]**

**हिरण्यसदृशैः पुष्पैर्दावाग्निसदृशैरपि।****
**लोहितैरञ्जनाभैश्च वैदूर्यसदृशैरपि ॥ ६७ ॥[०२]**

**तथा शालांस्तमालांश्च पाटलान्बकुलानपि।****
**माला इव समासक्ताः शैलानां शिखरेषु च ॥ ६८ ॥[०३]**

**एवं क्रमेण ते वीरा वीक्षमाणाः समन्ततः ।**
**गजसङ्घसमाकीर्णं सिंहव्याघ्रसमाकुलम् ॥ ६९ ॥[०४]**

शरभोन्नादसङ्घुष्टं नानाविहगनादितम्।

**पीता भास्करवर्णाभा बभूवुर्वनराजयः ॥ ७० ॥**

**नात्र कण्टकिनः केचिन्न च विद्यन्त्यपुष्पिताः ।****

**स्निग्धपत्रफला वृक्षा गन्धमादनसानुषु**

**सर्वर्तुफलपुष्पाढ्यं गन्धमादनसानुषु ॥[०५]**

भ्रमरारावमधुरा नलिनीः फुल्लपङ्कजाः

**विलोड्यमानाः पश्येमाः करिभिः सकरेणुभिः ।****
**पश्येमां नलिनीं चान्यां कमलोत्पलमालिनीम्**

---

(०१) (२) मनोहरान्; (३)भ्रमरा (रान्) राजन्; भ्रमराकीर्णान्; (४) द्विरेफाभिविरा ,
(०२) (१) पत्रैर् (for पुष्पैर्); (४) हिरण्यं; वैदूर्य,
(०३) (१) शालान्; सालान्; तस्य (for तथा); तालान्;,सालान् (for शालान्); (२) पाटला; पाटलान्; पाटलीर् (for पाटल्यो);निगु०डानि च;निकुडानि च; वगुडानि च; बकुलानपि (०न्यपि; निव); कुटजां०स्तथा (for बकुलानि च); (४) वै; (अ)पि (for च),
(०४) ((३)गजराज (स्कन्ध) समावासं सिंह०व्याघ्रगणायुतं,
(०५) (१) संयुक्तं; (२) नानामृगनिनां; नानारुतविना;० (३)भाराढ्या
/*(१) पीतभास्कर; पीता भास्कर; पीतभास्वरं; पीता भास्करं; (३)फलाक्रमाः० ;कण्टकिताः ४)न च (for नात्र);विद्यन्ते ना प्य०पुष्पिताः; न च विद्यन्त्य; पत्र०पलाशश्च,पत्रलता वृक्षा०,

स्रग्धरां विग्रहवतीं साक्षाच्छ्रियमिवापराम्।**
नानाकुसुमगन्धाढ्यास्तस्येमाः काननोत्तमे

उपगीयमाना भ्रमरै राजन्ते वनराजयः ।[०१]

विमलस्फाटिकाभानि पाण्डुरच्छदनैर्द्विजैः ।
कलहंसैरुपेतानि सारसाभिरुतानि च ।। ७१ ।।

सरांसि बहुशः पार्थाः पश्यन्तः शैलसानुषु ।[०२]
विविशुः क्रमशो वीरा अनन्यं शुभकाननम् ।
पश्यन्ती विविधान्वृक्षांस्तत्र कृष्णा मनोहरान् ।
अन्तिकस्थमथ प्रीत्या भीमसेनमुवाच ह ।
पद्मोत्पलविमिश्राणि सुखशीतजलानि च ।। ७२ ।।

गन्धवन्ति च माल्यानि रसवन्ति फलानि च ।**
अतीव वृक्षा राजन्ते पुष्पिताः शैलसानुषु ।। ७३ ।।[03]
विविशुः पाण्डवाः सर्वे विस्मयोत्फुल्ललोचनाः ।
कमलोत्पलकह्लारपुण्डरीकसुगन्धिना।
सरांसि च मनोज्ञानि वृक्षांश्चातिमनोरमान्।
सेव्यमाना वने तस्मिन्सुखस्पर्शेन वायुना।
ततो युधिष्ठिरो भीममाहेदं प्रीतिमद्वचः ।
अहो श्रीमदिदं भीम गन्धमादनकाननम्।

---

(०१) (बहुला (for मधुरा);(इ)मां (अ)न्यां; हासिनीं (for मालिनीम् ), उद्गीयमाना;पश्येह; पश्येमा (for राजन्ते);वनराजी विलोकय,

(०२) (१) स्फाटि०काम्भोभिः;(०स्फाटिकाश्चैव);स्फाटिका०भानि;० स्फाटिका भान्ति; (२) पाण्डर; (३)कल (for राज); द्रौपदी;बहुशः (for सरितः); सर्वे (for पार्थाः,

(०३) (१) विमिश्राणि; सुचित्राणि; (२) शीतं (for स्पर्श); (३) (अ)थ (for च); (४) पश्यन् (for वृक्षान् ),

वने ह्यस्मिन्मनोरम्ये दिव्याः काननजा द्रुमाः ।
लताश्च विविधाकाराः पत्रपुष्पफलोपगाः ।। ७४ ।।(०१)

भान्त्येते पुष्पविकचाः पुंस्कोकिलकुलाकुलाः ।

युधिष्ठिरस्तु तान्वृक्षान्पश्यमानो नगोत्तमे ।
भीमसेनमिदं वाक्यमब्रवीन्मधुराक्षरम् ।। ७८ ।।(०२)

गन्धवन्त्यथ माल्यानि रसवन्ति फलानि च ।

युधिष्ठिरः

पश्य भीम शुभान्देशान्देवाक्रीडान्समन्ततः ।**
अमानुषगतिं प्राप्ताः संसिद्धाः स्म वृकोद ।। ७९ ।।(०३)

लताभिः पुष्पिताग्राभिः पुष्पिताः पादपोत्तमाः ।**
संश्लिष्टाः पार्थ शोभन्ते गन्धमादनसानुषु ।। ८० ।।(०४)

शिखण्डिनीभिश्चरतां सहितानां शिखण्डिनाम्।**
नदतां शृणु निर्घोषं भीम पर्वतसानुषु ।। ८१ ।।(०५)

चकोराः शतपत्राश्च मत्तकोकिलसारिकाः ।**
पत्रिणः पुष्पितानेतान्सम्पतन्ति महाद्रुमान् ।। ८२ ।।(०६)

रक्तपीतारुणाः पार्थ पादपाग्रगताः खगाः ।**

---

(०१) (१) वने ह्यस्मिन्मनो (वनेस्मिन्मदनो) रम्ये; (२) दिव्याः (दिव्य); पश्य (for तत्र )कनक for कानन); (४) ०फलोदकाः; पत्रपुष्प (पुष्पपत्र ) फलोपगाः; फलोदयाः,

(०२) (२) वीक्षमाणो; वीक्ष्यमाणो नगोत्तमं,

(०३) (१) पश्य चेमाज्; पश्ये०मांश्च (for पश्य भीम); शुचीन्देशान् (न्देव);वनोद्देशान्
(२) क्रीडारण्यान् (रण्य०);,देवक्रीडान्; देव०क्रीडाश्च सर्वतः;
(३) अमानुषीं गतिं; (४) सु (for सं); स्मो (for स्म),

(०४) (१) बहुभिः;लताभिः पुष्पिताग्राभिः,

(०५) (३) नन्दतां; नदतां; घोषं च (for निर्घोषं); (४) गन्धमादनसानुषु,

(०६) (२) सारिकाः; (४) सम्पतति; आश्लिष्यन्ति,

परस्परमुदीक्षन्ते बहवो जीवजीवकाः ॥ ८३ ॥(०१)

हरितारुणवर्णानां शाद्वलानां समीपतः ।**
सारसाः प्रतिदृश्यन्ते शैलप्रस्रवणेष्वपि ॥ ८४ ॥(०२)

वदन्ति मधुरा वाचः सर्वभूतमनोरमाः ।**
भृङ्गराजोपचक्राश्च लोहपृष्ठाः पतत्त्र*णि ॥ ८५ ॥(०३)

चतुर्विषाणाः पद्माभाः कुञ्जराः सकरेणवः ।**
एते वैदूर्यवर्णाभं क्षोभयन्ति महत्सरः ॥ ८६ ॥(०४)

बहुतालसमुत्सेधाः शैलशृङ्गपरिच्युताः ।**
नानाप्रस्रवणेभ्यश्च वारिधाराः पतन्ति च ॥ ८७ ॥

भास्कराभः(भाः) पभाभीमाः(भिश्च) शारदाभ्रघनोपमाः ।
शोभयन्ति महाशैलं नानारजतधातवः ॥ ८८ ॥

क्वचिदञ्जनवर्णाभाः क्वचित्काञ्चनसन्निभाः ।**
धातवो हरितालस्य क्वचिद्धिङ्गुलकस्य च ॥ ८९ ॥(०५)

मनःशिलागुहाश्चैव सन्ध्याभ्रनिकरोपमाः ।**

---

(०१) (१) पीतरक्तारुणाः; रक्तासितारुणाः; (२) खगाः(for द्विजाः);
(३) निरीक्षन्ते (for उदी० ); (४) जीविकाः,

(०२) (२) शाड०लानां; शार्दूलानां;समीपतः; (३)सम्प्रदृश्यन्ते;,प्रत्य०दृश्यन्त; (४) प्रश्रवणेषु (अ) मी;, च(for (अ)पि),

(०३) ((२) मनोरमाः; (४) लोहपृष्ठाः;पतत्रिणः,

(०४) (१) लसद्विषाणाः;पद्माद्याः; (२) सकरेणुकाः; चापतन्त्यधः; (३)सित०(for एते);वैदूर्य, ०वर्णाभां; ०वर्णाभाः

/*((१) सालं (for ताल); (२) शैल०श्टङ्गपरिच्युताः; (४) पतन्ति च ( त्यतः); पतन्त्यमी पतन्त्यधः; पतन्त्युत,

/*(१) भास्कराभ्रप्रभा; भीमाः; हैमाः (for भीम);भास्कराभाः;प्रभाभिश्च,

(०५) ((२) रजतं; अञ्जनं; काञ्चनसप्रभाः; (४) क्वचिद्धिङ्गुलिकप्रभाः (कस्य वा),

शशलोहितवर्णाभाः क्वचिद्गैरिकधातवः ।। ९० ।।(०१)

शोभयन्ति महाशैलं नानारजितधातवः ।

सितासिताभ्रप्रतिमा बालसूर्यसमप्रभाः ।**
एते बहुविधाः शैलं शोभयन्ति महाप्रभाः ।। ९१ ।।(०२)

गन्धर्वाः सह कान्ताभिर्यथोक्तं वृषपर्वणा।** }
दृश्यन्ते शैलशृङ्गेषु पार्थ किम्पुरुषैः सह ।। ९२ ।।(०३)

गीतानां समतालानां तथा साम्नां च निःस्वनः ।**
श्रूयते बहुधा भीम सर्वभूतमनोहरः ।। ९३ ।।(०४)

महागङ्गामुदीक्षस्व पुण्यां देवनदीं शुभाम्।**
कलहंसगणैर्जुष्टामृषिकिन्नरसेविताम् ।। ९४ ।।(०५)

धातुभिश्च सरिद्भिश्च किन्नरैर्मृगपक्षिभिः ।**
गन्धर्वैरप्सरोभिश्च काननैश्च मनोरमैः ।। ९५ ।।(०६)

व्यालैश्च विविधाकारैः शतशीर्षैः समन्ततः ।**
उपेतं पश्य कौन्तेय शैलराजमरिन्दम ।। ९६ ।।(०७)

वैशम्पायनः

---

(०१) (१) शुभा;,गुणा;,निभा (for गुहा); (२) निचयो; शिखरो; रुधिरो (for निकरो) ३) क्वचिद्धरिद्र;,सर्वे लोहित; (४) संनिभाः;सम्भवाः;सप्रभाः,

(०२) (४) महाप्रभं,,

(०३) (२) यथेष्टं (for यथोक्तं);भीम०वित्र्तमाः;भीमवित्र्तमः,

(०४) (१) वीणानां (for गीतानां); चैव त्तालानां;,ललनानां वै;;समतालानां; करं०; कलं ताल;
(२) गीतसाश्नं च; तथा साश्नं च;,लतानां चैव;निःस्वनाः,निस्वनाः, नस्वनं, निस्वनः,
(३)श्रूयन्ते; (४) मनोरमाः; मनोहराः; वल्लकीनां च निस्वनाः; सर्वभूतमनोरमः,

(०५) (२) नाक (for देव); (३)रवैर्;जनैर्; कलैर् (for गणैर्); (४) मुनिं (for ऋषि),

(०६) (१) धातुमद्भिश्च सद्भिश्च; (२) वानरैर् (for किंनरैर्),

(०७) (४) शैलं देवनिषेवितं,

ते प्रीतमनसः शूराः प्राप्ता गतिमनुत्तमाम्।**
नातृप्यन्पर्वतेन्द्रस्य दर्शनेन परन्तपाः ।। ९७ ।।(०१)

द्रौपद्या सहिता वीरास्तैश्च विप्रैर्महात्मभिः ।

उपेतमथ माल्यैश्च फलवद्भिश्च पादपैः ।**
आर्ष्टिषेणस्य राजर्षेराश्रमं ददृशुस्तदा ।। ९८ ।।(०२)

ततस्ते तिग्मतपसं कृशं धमनिसन्ततम्।**
पारगं सर्वधर्माणामार्ष्टिषेणमुपागमन् ।। ९९ ।।(०३)

अस्मिन् पर्वणि १३१अध्याये ९९श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां आरण्यके पर्वणि यक्षयुद्धपर्वणि एकत्रिंशदधिकशततमोऽध्यायः ।। १३१ ।।

(यक्षयुद्धपर्वणि .. अध्यायः)

# १३२. द्वात्रिंशदधिकशततमोऽध्यायः

**आर्ष्टिषेणेन राजर्षिणा युधिष्टिरं प्रति अर्जुनागमनपर्यन्तं स्वाश्रम एव निवासचोदना ।। आर्ष्टिषेणस्य कुशलप्रश्नव्याजेन युधिष्ठिरं प्रत्युपदेशः ।।**

वैशम्पायनः

युधिष्ठिरस्तमासाद्य तपसा दग्धकिल्बिषम्।**
अभ्यवादयत प्रीतः शिरसा नाम कीर्तयन् ।। १ ।।(०४)

---

(०१) (१) सर्वे (for शूराः ),

(०२) ((२) दारुभिः (for पादपैः); (३)आर्षिषेणस्य; आर्ष्णिसेन (०र्ष्टिसेन०; ष्णिषेण) स्थ,

(०३) (१) दीप्त; दीर्घ; निष्ठ (for तीव्रं); ततोग्रतपसं शां (दां)तं; ततस्ते तिग्मतपसं ३)सर्व०वेदानाम्; भूतानाम्;; विद्यानाम्; (४) आर्ष्णिसेनम् ( षेणम् ),

(०४) ((१) तु धर्मात्मा (for तमासाद्य ,

ततः कृष्णा च भीमश्च यमौ च सुतपस्विनौ।**
शिरोभिः प्राप्य राजर्षिं परिवार्योपतस्थिरे ।। २ ।।(०१)

तथैव धौम्यो धर्मज्ञः पाण्डवानां पुरोहितः ।**
यथान्यायमुपाक्रान्तस्तमृषिं संशितव्रतम् ।। ३ ।।(०२)

अन्वजानात्स धर्मज्ञो मुनिर्दिव्येन चक्षुषा।**
पाण्डोः पुत्रान्कुरुश्रेष्ठानास्यतामिति चाब्रवीत् ।। ४ ।।

कुरूणामृषभं पार्थं पूजयित्वा महातपाः ।**
सह भ्रातृभिरासीनं पर्यपृच्छदनामयम् ।। ५ ।।(०३)

आर्ष्टिषेणः

नानृते कुरुषे भावं कच्चिद्धर्मे प्रवर्तसे।**
मातापित्रोश्च ते वृत्तिः कच्चित्पार्थ न सीदति ।। ६ ।।(०४)

कच्चित्ते गुरवः सर्वे वृद्धा वैद्याश्च पूजिताः ।**
कच्चिन्न कुरुषे भावं पार्थ पापेषु कर्मसु ।। ७ ।।(०५)

सुकृतं प्रतिकर्तुं च कच्चिद्धातुं च दुष्कृतम्।**
यथान्यायं कुरुश्रेष्ठ जानासि न विकत्थसे ।। ८ ।।(०६)

यथार्हं मानिताः कच्चित्त्वया नन्दन्ति साधवः ।**

---

(०१) ((२) चैव ( चापि );सुतप०स्विनौ;, पुरुषर्षभौ (for (अ)पि यशस्विनौ);तपं (for यश);(३) तदा तं (for शिरोभिः);राजर्षे; (४) संनिधायोप; प्रणिपत्योप,,

(०२) ((३)उपाफ्रामन्;; उपफ्रामत्;उपाफ्रामत्;;उपफ्रान्तसू;; (४) मुनिं (for ऋषिं);शंसित,

(०३) ((१) प्राप्तं;; राजन्;; प्राज्ञः,

(०४) (; (२) धर्मेण; धर्मेषु (for धर्मे च);प्र० (for च);वर्तते,

(०५) (२) विप्रा; सिद्धा (for वृद्धा ); (३)पापं (for भावं),

(०६) (१) प्रतिपत्तुं;; प्रतिहर्तुं; (२) स्थातुं;;उक्तं;,पार्थ०; नास्ति;,क्षन्तुं (for हातुं);न; (इ)ति;हि (for च); (४) च न; न वि०; त्वं न (for न च);विजानासि न हीयसे,

वनेष्वपि वसन्कच्चिद्धर्ममेवानुवर्तसे ॥ ९ ॥(०१)

कच्चिद्धौम्यस्त्वदाचारैर्न पार्थ परितप्यते।**
दानधर्मतपःशौचैरार्जवेन तितिक्षया ॥ १० ॥(०२)

पितृपैतामहं वृत्तं कच्चित्पार्थानुवर्तसे।**
कच्चिद्राजर्षियातेन पथा गच्छसि पाण्डव ॥ ११ ॥

स्वे स्वे किल कुले जाते पुत्रे नप्तरि वा पुनः ।**
पितरः पितृलोकस्थाः शोचन्ति च हसन्ति च ॥ १२ ॥(०३)

किं तस्य दुष्कृतेऽस्माभिः सम्प्राप्तव्यं भविष्यति।**
किञ्चास्य सुकृतेऽस्माभिः प्राप्तव्यमिति शोभनम् ॥ १३ ॥(०४)

पिता माता तथैवाग्निर्गुरुरात्मा च पञ्चमः ।**
यस्यैते पूजिताः पार्थ तस्या लोकावुभौ जितौ ॥ १४ ॥(०५)

भगवन्नार्य माहैतद्यथावद्धर्मनिश्चयम्।
यथाशक्ति यथान्यायं क्रियते विधिवन्मया। (०६)

आर्ष्टिषेणः

अब्भक्षा वायुभक्षाश्च प्लवमाना विहायसा।**

---

(०१) ((१) यथा सं (for यथार्हं); (२) त्वयि (for त्वया); कर्हिचित् (for साधवः),
(०२) (१) तवाचारैर्;,तवाचारे (for त्वदाचारैर्); (२) कच्चिन्न (for न पार्थ);दानधर्मार्जवधनै वन्दनेन तितिक्षया,
(०३) (४) मोदन्ति (for शोचन्ति ); रमन्ति (for हसन्ति ,
(०४) (१) त्वस्य;; तस्य;; त्वद्य;; न्वद्य (for न्वस्य);किं नु दुष्कृतमस्माभिः; (२) प्राप्तव्यं वै (for सम्प्रा० ); (३)वास्य;; त्वस्य (for चास्य); सुकृतैरपि तस्यैव;;किं वा सुकृतमस्माभिः; (४) अति०(for इति );प्राप्तव्यमथ वा भवेत्; सम्प्राप्तव्यं सुशोभनं,
(०५) (१) पिता माता; (२) दाराः (for आत्मा ),
(०६) (आर्यम् (for न्याय्यम्); यथा धर्मीवनिश्चयं; विधिवन् (for ऽयं विधिर् ,

जुषन्ते पर्वतश्रेष्ठमृषयः पर्वसन्धिषु ।। १५ ।।[०१]

कामिनः सह कान्ताभिः परस्परमनुव्रताः ।**
दृश्यन्ते शैलशृङ्गस्था यथा किम्पुरुषा नृप ।। १६ ।।[०२]

अरजांसि च वासांसि वसानाः कौशिकानि च ।**
दृश्यन्ते बहवः पार्थ गन्धर्वाप्सरसां गणाः ।। १७ ।।[०३]

विद्याधरगणाश्चैव स्रग्विणः प्रियदर्शनाः ।**
महोरगगणाश्चैव सुपर्णाश्चोरगादयः ।। १८ ।।[०४]

अस्य चोपरि शैलस्य श्रूयते पर्वसन्धिषु।**
भेरीपणवशङ्खानां मृदङ्गानां च निःस्वनः ।। १९ ।।[०५]

इहस्थैरेव तत्सर्वं श्रोतव्यं भरतर्षभाः ।**
न कार्या वः कथञ्चित्स्यात्तत्राभिगमने मतिः ।। २० ।।[०६]

न चाप्यतः परं शक्यं गन्तुं भरतसत्तमाः ।**
विहारो ह्यत्र देवानाममानुषगतिस्तु सा ।। २१ ।।[०७]

ईषच्चपलकर्माणं मनुष्यमिह भारत।**

---

(०१) (आर्ष्टिषेण उ; विहायसं; (३)श्रयन्ते; जुषन्तः; (४) सर्वसन्धिषु;; सर्वसानुषु,,
(०२) (४) यथा (for तथा ),
(०३) (१) वस्त्राणि (for वासांसि); (२) (अ)पि ; वा (for च),
(०४) (३)रम (for चर) माणा यथाकामं; (४) चोरगाशनाः ( शिनः; शनः); चारणादयः"

सुपर्णानां गणाश्च ते ,
(०५) (१) श्कङ्गस्य (for शैल); (२) श्रूयन्ते; (३)मृदङ्गशब्दानां ; पणव सङ्खानां; (४) पणवानां"
(for मृदङ्गानां); निःस्वनः, नि( निः) स्वनाः,
(०६) (२) र्षभ; (३)कार्यं (for कार्या); वा;; हि (for वः); (४) गमने (for सरणे);मनः,
(०७) (शक्यं ,गन्तुं; (३)विषयो;; विहारास्; ह्येष;; तत्र;;यत्र (for ह्यत्र); (४) सामानुषन मानुष
(for अमानुष); हि सः; हि सा; ततः ( तथा) (for तु सा),मानुषाणां न वै गतिः,

द्विषन्ति सर्वभूतानि ताडयन्ति च राक्षसाः ।। २२ ।।[०१]

अस्यातिक्रम्य शिखरं कैलासस्य युधिष्ठिर।**
गतिः परमसिद्धानां देवर्षीणां प्रकाशते ।। २३ ।।[०२]

चापलादिह गच्छन्तं पार्थ यानमितः परम्।**
अयः शूलादिभिर्घ्नन्ति राक्षसाः शत्रुसूदन ।। २४ ।।[०३]

अप्सरोभिः परिवृतः समृद्ध्या नरवाहनः ।**
इह वैश्रवणस्तात पर्वसन्धिषु दृश्यते ।। २५ ।।

शिखरस्थं समासीनमधिपं यक्षरक्षसाम्।**
प्रेक्षन्ते सर्वभूतानि भानुमन्तमिवोदितम् ।। २६ ।।[०४]

देवदानवसिद्धानां तथा वैश्रवणस्य च ।**
गिरेः शिखरमुद्यानमिदं भरतसत्तम ।। २७ ।।

उपासीनस्य धनदं तुम्बुरोः पर्वसन्धिषु।**
गीतसामस्वनस्तात श्रूयते गन्धमादने ।। २८ ।।[०५]

---

(०१) (१) कर्माणि; (२) मानुषं त्विह;;मानुषाणीह (for मनुष्य); (४) युधिष्ठिर; च भारत च पार्थिव (for च पाण्डव) (for च राक्षसाः),

(०२) (१) अत्यति; अस्याति; अभ्यभि;;अत्यभि (for अभ्यति );शिरसं (for शिखरं) (२) कैलासस्य (for शैल);महावने (for युधि );शैलस्य विषमाणि च; महर्षीणां (for देव);तापस्ये वर्तमानानामियं तात परा गतिः,

(०३) (१) चापल्याद्;;चपलाद्; अथ गन्तव्यं ; हि न गन्तव्यं (for इह गच्छन्तं); (२) प्रार्थयानम्; ,प्रार्थयानासू; प्रार्थयामि (for पार्थ यानम्); इतः; ततः (for अतः); (३)तीक्ष्णैर् (for घ्नन्ति);अयःशूल ाासिभिस्तीक्ष्णैद्;अयः( नूनं ; अधः) शिलाभिर्निघ्नन्ति; अयःशूला०भिर्निघ्नन्ति; अतः शूलैर्हि निघ्नन्ति; (४) दुष्टचेतसः; तत्र पाण्डव(for शत्रु );घ्नन्ति रक्षांसि पाण्डव (भारत; पाण्डवाः),

(०४) (१) शिखरं तं;शिखरेस्मिन्; शिखरस्थं; शिखरे चैवमासीनं; (२) यक्ष (for सर्व); (३)प्रेक्षन्ति,

(०५) ((१) सततं (for धनदं); उपासन्तीह सततं; (२) तुम्बरोः;तुम्बराद्याश्च गायनाः; (३)गीतं सामस्वनस;गीते साम०;;गीता ( तः ) सामध्वनिम्;;गीतः सामस्वनम्;तत्र (for तात); (४) पर्वते (for श्रूयते),

**एतदेवंविधं चित्रमिह तात युधिष्ठिर ।**
**प्रेक्षन्ते सर्वभूतानि बहुशः पर्वसन्धिषु ।। २९ ।।**(०१)

**भुञ्जाना मुनिभोज्यानि रसवन्ति फलानि च ।****
**वसध्वं पाण्डवश्रेष्ठा यावदर्जुनदर्शनात् ।। ३० ।।**(०२)

**न तात चपलैर्भाव्यमिह प्राप्तैः कथञ्चन।**

उषि(अपि)त्वेह यथाकामं यथाश्रद्धं विहृत्य च ।

ततः शस्त्रजितां तात पृथिवीं पालयिष्यसि।

**चपलः सर्वभूतानां द्वेष्यो भवति मानवः ।। ३१ ।।***(०३)

**इहोषित्वा यथाकामं यथाश्वद्धं विहृत्य च ।**
**ततश्शस्त्रभृतां श्रेष्ट पृथिवीं पालयिश्यसि ।। ३२ ।।**

अस्मिन् पर्वणि १३२अध्याये ३२श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि यक्षयुद्धपर्वणि

द्वात्रिंशदधिकशततमोऽध्यायः ।। १३२ ।।

यक्षयुद्धपर्वणि .. अध्यायः

**महाभारततात्पर्यनिर्णये २२ अध्याये**

**वसत्सु तत्र पार्थेषु पुनः कतिपयैर्दिनैः ।**

**उवाच भीमसेनस्य यशोधर्माभिवृद्धये ।। २९२ ।।**

**पञ्चवर्णानि पुष्पाणि कृष्णा वीक्ष्या हृतानि तु ।**

**मारुतेन कुबेरस्य गृहान्नृभिरगम्यतः ।। २९३ ।।**

---

(०१) (१) तात; तत्र (for चित्रम्); (२) (आ)श्रयं (for तात); धनदं नरवाहनः; (३) प्रेक्षन्ति;,रक्षन्ति (for प्रेक्षन्ते),

(०२) (१) मुनि (for सर्व ); (४) अर्जुनदर्शनात्,

(०३) (३)इहोषित्वा; शस्त्रजितां;पार्थ०; तात (for श्रेष्ठ ),

अगम्योऽयं गिरिः सर्वैः कुबेरेणाभिपालितः ।
अद्य त्वयैव गन्तव्यो विधूयाखिलराक्षसान् ।। २९४ ।।
इत्युक्त आशु सगदः सधनुः सबाणो भीमो गिरीन्द्रमजितोरुबलो विगाहे ।
प्राप्तं निशम्य बलदैवतसूनुमत्र पञ्चत्रयं न्यरुणदुद्धतराक्षसानाम् ।। २९५ ।।
अग्रे निधाय मणिमन्तमजेयमुग्रं
शम्भोर्वराद् विविधशस्त्रमहाभिवृष्ट्या ।
तान् सर्वराक्षसगणान् मणिमत्समेतान्
भीमो जघान सपदि प्रवरैः शरौघैः ।। २९६ ।।
अवध्यांस्तान् क्षणेनैव हत्वा भीमो महाबलः ।
रणे क्रोधवशान् सर्वानतिष्ठद् गिरिमूर्द्धनि ।। २९७ ।।
ते हता भीमसेनेन प्रापुरन्धन्तमोऽखिलाः ।
हताः सौगन्धिकवने मणिमांश्च पुनः कलौ ।
जातो मिथ्यामतिं सम्यगास्तीर्याऽपस्तमोऽधिकम् ।। २९८ ।।

# १३३. त्रयस्त्रिंशदधिकशततमोध्यायः

**पाण्डवानामार्ष्टिषेणाश्रमे निवासः । कदाचन गरुडपक्षवातानीताद्भुताम्बुज-दर्शिन्या द्रौपद्या तादृशवहुपुष्पानयनं तथा दुष्टयक्षराक्षसरक्षणं च प्रार्थितेन भीमेन तदर्थं गन्धमादनशिखरारेहणम् ।। १ ।। तथा स्वीयशङ्खध्वनिश्रवणेनाभिद्रुतवतां मणिमदादीनां युद्धे हननम् ।। २ ।।**

जनमेजयः

**पाण्डोः पुत्रा महात्मानः सर्वे दिव्यपराक्रमाः ।**
**कियन्तं कालमवसन्पर्वते गन्धमादने ।। १ ।।**

आर्ष्टिषेणाश्रमे तस्मिन्मम पूर्वपितामहाः ।

किं च चक्रुर्महावीर्याः सर्वेऽतिबलपौरुषाः ।

कानि चाभ्यवहार्याणि तत्र तेषां महात्मनाम्।**
वसतां लोकवीराणामासंस्तद्ब्रूहि सत्तम ।। २ ।।(०१)

विस्तरेण च मे शंस भीमसेनपराक्रमम्।
यद्यच्चक्रे महाबाहुस्तस्मिन्हैमवते गिरौ ।। ३ ।।

न खल्वासीत्पुनर्युद्धं तस्य यक्षैर्द्विजोत्तम।(०२)
नदाध्युषिते नित्यं वसतस्तत्र पर्वते। ।। ४ ।।

कच्चित्समागमस्तेषामासीद्वैश्रवणस्य च ।**
तत्र ह्यायाति धनद आर्ष्टिषेणो यथाब्रवीत् ।। ५ ।।(०३)

एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन।**
न हि मे शृण्वतस्तृप्तिरस्ति तेषां विचेष्टितम् ।। ६ ।।(०४)

वैशम्पायनः

एतदात्महितं श्रुत्वा तस्याप्रतिमतेजसः ।**
शासनं सततं चक्रुस्तथैव भरतर्षभाः ।। ७ ।।(०५)
भुञ्जाना मुनिभोज्यानि रसवन्ति फलानि च ।
शुद्धबाणहतानां च मृगाणां पिशितानि च ।। ८ ।।

---

(०१) (१) कार्याणि चाभ्यहार्याणि; कानि भोज्यानि चार्हाणि;वसतां वीरलोकानां गतस्त्वं ब्रूहि स,

(०२) (१) (ए)व; हि (for च); मां (for मे);पुनर्ब्रूहि (for च मे शंस); (३)क्क खल्वा ( तेषां चा ),

(०३) (१) कश्चित्; क्वचित् (for कच्चित्); (२) वैश्रवणस्य; ह (for च); (३)(अ)भि०(for हि); आयाति धनदस्तत्र; (४) आर्ष्णि०(०र्ष्टि) सेनो; ह्यार्ष्टिषेणो;यदा (for यथा),

(०४) (२) द्विजो०त्तम (for तपो); (३) (अ)स्ति (for हि); (४) इह; इति (for अस्ति),

(०५) (१) एतच्च वचनं; ते तदात्महितं; (३)ते ततश् (for सततं); वचनं चक्रु०रव्यग्रासू ४) आर्ष्टिषेणस्य पाण्डवाः,

मेध्यानि हिमवत्पृष्ठे मधूनि विविधानि च ।
एवं ते न्यवसंस्तत्र पाण्डवा भरतर्षभाः ।
रसायनसमृद्धानि तत्रोषुस्ते स्म भारताः ।। ९ ।।(०१)

तथा निवसतां तेषां पञ्चमं वर्षमभ्यगात्।**
शृण्वतां लोमशोक्तानि वाक्यानि विविधान्युत ।। १० ।।(०२)

कृत्यकाल उपस्थास्य इति चोक्त्वा घटोत्कचः ।**
राक्षसैः सह सर्वैश्च पूर्वमेव गतः प्रभो ।। ११ ।।(०३)

आर्ष्टिषेणाश्रमे तेषां वसतां वै महात्मनाम्।**
अगच्छन्बहवो मासाः पश्यतां महदद्भुतम् ।। १२ ।।

तैस्तत्र विहरद्भिश्च रममाणैश्च पाण्डवैः ।**
प्रीतिमन्तो महाभागा मुनयश्चारणास्तथा ।। १३ ।।(०४)

आजग्मुः पाण्डवान्द्रष्टुं शुद्धात्मानो यतव्रताः ।**
ते तैः सह कथां चक्रुर्दिव्यां भरतसत्तमाः ।। १४ ।।(०५)

ततः कतिपयाहस्य महाह्रदनिवासिनम्।**
ऋद्धिमन्तं महानागं सुपर्णः सहसाऽऽहरत् ।। १५ ।।(०६)

प्राकम्पत महाशैलः प्रामृद्यन्त महाद्रुमाः ।**

---

(०१) ( पुरुषं (for भरतं);रसायनसमर्था (मुत्था०; मृद्धा) नि तत्रोषुस्ते स्म भारताः,

(०२) (४) काम्यानि; वचांसि (for वाक्यानि); (उ)त; (अ) पि (for च),

(०३) (१) कृतकाल; कृत्वा काल; कृतकार्य;; (३)राक्षसैः सह सर्वैश्च० (४) प्रभुः (for प्रभो),

(०४) ((१) तत्रैव (for तैस्तत्र );(२) रममाणै ; विहरद्भि; तथा च रममाणानां ( वसमानानां,सुखं विहरता तदा;; (४) ऋषयश्( (for मुनयश्);चचार मुनयस्तथा (चारणा मुनयस्तथा,

(०५) (२) यतात्मानो;; शुद्धात्मानो; (३)ते तैः; एतैः (for तैस्तैः); सहितास्ते (for तैस्तैः सह);कथाश्चक्रुर्; (४) दिव्यां; श्रवणभूषणाः(for भरत); पाण्डवैः सह भारत,

(०६) (१) कतिपयाहःसु; (३)महानादं,

ददृशुः सर्वभूतानि पाण्डवाश्च तदद्भुतम् ।। १६ ।।[०१]

ततः शैलोत्तमस्याग्रात्पाण्डवान्प्रति मारुतः ।**
अवहत्सर्वमाल्यानि गन्धवन्ति शुभानि च ।। १७ ।।

तत्र पुष्पाणि दिव्यानि सुहृद्भिः सह पाण्डवाः ।**
ददृशुः पञ्चवर्णानि द्रौपदी च यशस्विनी ।। १८ ।।[०२]

भीमसेनं ततः कृष्णा काले वचनमब्रवीत्।**
विविक्ते पर्वतोद्देशे सुखासीनं महाभुजम् ।। १९ ।।

द्रौपदी

सुपर्णानिलवेगेन श्वसनेन महाब(च)लात्।**
पञ्चवर्णानि पात्यन्ते पुष्पाणि भरतर्षभ ।। २० ।।[०३]

दिव्यवर्णानि दिव्यानि दिव्यगन्धवहानि च ।
मदयन्तीव गन्धेन मनो मे भरतर्षभ ।। २१ ।।

येषां तु दर्शनात्स्पर्शो सौरभ्याच्च तथैव च ।**
नश्यतीव मनो दुःखं ममेदुं शत्रुतापनम् ।। २२ ।।

ईदृशैः कुसुमैर्दिव्यैः दिव्यगन्धवहैशुभैः ।**
देवतान्यर्चयित्वा ह निश्चेयं सङ्गमं त्वया ।। २३ ।।

इदं तु पुरुषव्याघ्र विशेषेणाम्बुजं शुभम्।**

---

(०१) (२) अ०प्राकम्पन्त,प्रमृद्यन्त;; प्रानृत्यन्त;;प्रादह्यन्त;; प्रापन्तत३)वहत्,,

(०२) (१) तानि; ततः (for व); पुष्पाणि; दिव्यानि;फुल्लानि; पुष्पाणि;माल्यानि(for दिव्यानि);
(२) रभीण्येव पाण्डवाः; (३)बहुवर्णानि;;सर्वभूतानि,

(०३) ( प्रत्यक्षं सर्वभूतानां नदीमश्वरथां प्रति। द्रौपद्युवाच; १)मनसस्तुल्य; सुवर्णानिल; (२) द्रावने;
चले; भुज; चलात्; बल; बलः (३)कुतोप्यत्रैव पात्यन्ते; (४) च फलानि च;; विविधानि च (for भरत ),

गन्धसंस्थानसम्पन्नं मम मानसवर्धनम् ।। २४ ।।[०१]

वासुदेवसहाय्येन वासुदेवप्रियेन च ।
खाण्डवे सत्यसन्धेन भ्रात्रा तव महात्मना ।। २५ ।।

गन्धर्वोरगरक्षांसि वासवश्च निवारितः ।। २६ ।।

हता मायाविनश्चोग्रा धनुः प्राप्तं च गाण्डिवम्।[०२]
तवापि सुमहत्तेजो महद्बाहुबलं च ते।**
अविषह्यमनाधृष्यं शक्रतुल्यबलोपमम्(पराक्रम) ।। २७ ।।[०३]

त्वद्बाहुबलवेगेन त्रासिताः सर्वराक्षसाः ।**
हित्वा शैलं प्रपद्यन्तां भीमसेन दिशो दश ।। २८ ।।[०४]

ततः शैलोत्तमस्याग्रं चित्रमाल्यधरं शिवम्।**
व्यपेतभयसम्मोहाः पश्यन्तु सुहृदस्तव ।। २९ ।।

साशनं सततं कुर्युस्तथैव भरतर्षभ ।

एवं प्रणिहितं भीम चिरात्प्रभृति मे मनः ।**
द्रष्टुमिच्छामि शैलाग्रं त्वद्बाहुबलपालिता ।। ३० ।।[०५]

इच्छामि च नरव्याघ्र पुष्पं प्रत्यक्षमीदृशम्।**
आनीयमानं क्षिप्रं वै त्वया भरतसत्तम ।। ३१ ।।

---

(०१) (सवलोकस्य०; अश्म०कां; अश्वतरीं; मन्दाकिनीं; अश्ववतीं; वैस्तावकां; अश्वनिकां; अन्वश्मकीं;अश्वसता; दीवश्चकारां; प्रति;; ह्यदृश्यत मां प्रति,

(०२) (महात्मना; जनेश्वर (for नरे); पाण्डवेन तव भ्रात्रा सत्यसन्धेन मानद; (४) पुरन्दरः पराजितः; महारथः (for निवा); जित्वा; हत्वा; मायाविदं;निहता मायिनश्चोग्राः,,

(०३) (१) तथा हि; तथापि; तथा त्वं ,(for तवापि );सुमहातेजो; (२) महाबाहु; (३)अविषह्यतमं लोके; (४) शक्रतुल्य०बलोपमं ( पराक्रमं); शतक्रतुबलोपम,

(०४) (१) वीर्येण (for वेगेन); (३)नाशिताः; चकिताः; ताडिताः (for त्रासिताः);हताः सर्वे हि राक्षसाः,,

(०५) (४) ०बलपालिता,

वैशम्पायनः

ततः क्षिप्तमिवात्मानं द्रौपद्या स परन्तपः ।**
नामृष्यत महाबाहुः प्रहारमिव सद्गवः ।। ३२ ।।(०१)

सिंहर्षभगतिः श्रीमानुदारः कनकप्रभः ।**
मनस्वी बलवान्दृप्तो मानी शूरश्च पाण्डवः ।। ३३ ।।(०२)

लोहिताक्षः पृथुव्यंसो मत्तवारणविक्रमः ।**
सिंहदंष्ट्रो बृहत्स्कन्धः शालपोत इवोद्गतः ।। ३४ ।।(०३)

महात्मा चारुसर्वाङ्गः कम्बुग्रीवो महाभुजः ।**
रुक्मपृष्ठं धनुः खड्गं तूणांश्चापि परामृशत् ।। ३५ ।।(०४)

स केसरीव चोत्सिक्तः प्रभिन्न इव वारणः ।**
व्यपेतभयसम्मोहः शैलमभ्यपतद्बली ।। ३६ ।।(०५)

तं मृगेन्द्रमिवायान्तं प्रभिन्नमिव वारणाम्।**
ददृशुः सर्वभूतानि बाणकार्मुकधारिणम् ।। ३७ ।।(०६)

द्रौपद्या वर्धयन्हर्षं गदामादाय पाण्डवः ।**
व्यपेतभयसम्मोहः शैलराजं समाश्रितः ।। ३८ ।।(०७)

---

(०१) (वैशं० उं; /*(१) ततः सन्तप्तमात्मानं; ततश्चा (for श्च) क्षिप्तमात्मानं; (४) सद्धनुः; शत्रवः; सङ्गरः; सद्गजः; सद्गतिः; सद्धचः (for सद्गवः),

(०२) (२) उदार० (for उदारः);,

(०३) (१) पृथुभुजो; पृथुग्रीवो; पृथुः प्रांशुर्; (३)वृषस्कन्धः; महास्कन्धः; (४) सालपोत,

(०४) (२) हनुः (for भुजः ); (३)गृह्य; बिभ्रत्; शङ्खं (for खड्गं); (४) तूणं; खड्गं; तूणौ; तूणी ( तूणान् );परा०मृषन्; मृषत्; मृशन्,

(०५) (१) सकेसरी (for केसरीव); यथोत्सृष्टः; (इ) व चोत्सिक्तः; चोत्सिक्तः; बलात्सिक्तः वधोत्सिक्तः (for यथोत्सिक्तः); (२) कुञ्जरः (for वारणः); (३)प्रणम्य भयसन्त्रासः; द्रौपदीवचसंमोहात् ; (४) गिरिम् (for शैलम् ),

(०६) (४) बाणकार्मुकधारिणं;;, पार्थं खड्गधनुर्धरं,

(०७) (३)स्रन्त्रासः; (४) शैलराजं समाश्रितः ( क्षिप्रमेवापतद्बली),

न ग्लानिर्न च कार्तर्यं न वैक्लव्यं न मत्सरः ।**
कदाचिज्जुषते पार्थमात्मजं मातरिश्वनः ।। ३९ ।।(०१)

तदेकायनमासाद्य विषमं भीमदर्शनम्।**
बहुतालोच्छ्रयं शृङ्गमारुरोह महाबलः ।। ४० ।।(०२)

सकिन्नरमहानागमुनिगन्धर्वराक्षसान्।**
हर्षयन्पर्वतस्याग्रमारुह्य स महाबलः ।। ४१ ।।(०३)

ततो वैश्रवणावासं ददर्श भरतर्षभः ।**
काञ्चनैः स्फाटिकैश्चैव वेश्मभिः समलङ्कृतम् ।। ४२ ।।(०४)

प्राकारेण परिक्षिप्तं सौवर्णेन समन्ततः ।
सर्वरत्नद्युतिमता सर्वोद्यानवता तथा ।। ४३ ।।

शैलादभ्युच्छ्रयवता चयाट्टालकशोभिना।
द्वारतोरणनिर्व्यूहध्वजसंवाहशोभिना।
विलासिनीभिरत्यर्थं नृत्यन्तीभिः समन्ततः ।
वायुना धूयमानाभिः पताकाभिरलङ्कृतम्।
धनुष्कोटिमवष्टभ्य वक्रभावेन बाहुना।
पश्यमानः स खेदेन द्रविणाधिपतेः पुरम्।।
मोदयन्सर्वभूतानि गन्धमादनसम्भवः ।

---

(०१) (१) मात्सर्य (for कातर्यं); (२) च क्लमः; सम्भ्रमः (for मत्सरः०) न भयं न च सम्भ्रमः;, (३)भजते (for जुषते),

(०२) (१) मृगव्यालसमाकीर्ण; तदैकार्तिसमा० साद्य; (४) महागिरेः (वृकोदरः) (for महां);,

(०३) ((१) सकिंनरमहाभागमुनिगन्धर्वराक्षसान्;;महानागगन्धर्वमुनिराक्षसान्;;(२) ०महाभागानृषिगन्धर्व सर्किनरान्महाभागान्मुनीन्गन्धर्व; (३) ख०आरूरोह महाबाहुस् श्वङ्गं बहुगुणान्वितम् । धर्ष (for हर्ष); (४) आरुह्य स; आरुरोह (for आससाद ); परन्तपः (for महा ),

(०४) (१) ततो (for तत्र); (२) ददृशे पाडवस्तथा ; (३)स्फटिका० कारैर्;; स्फाटिकैश्चैव;काचनस्फ (०स्फा) टिका,

सर्वगन्धवहस्तत्र मारुतः सुसुखो ववौ।[०१]

चित्रा विविधवर्णाभाश्चित्रमञ्जरिधारिणः ।**
अचिन्त्या विविधास्तत्र द्रुमाः परमशोभिनः ।। ४४ ।।[०२]

रत्नजालपरिक्षिप्तं चित्रमाल्यविभूषितम्।**
राक्षसाधिपतेः स्थानं ददृशे भरतर्षभः ।। ४५ ।।[०३]

गदाखड्गधनुष्पाणिः समभित्यक्तजीवितः ।**
भीमसेनो महाबाहुस्तस्थौ गिरिरिवाचलः ।। ४६ ।।[०४]

ततः शङ्खमुपाध्मासीद्द्विषतां लोमहर्षणम्।**
ज्याघोषतलशब्दं च कृत्वा भूतान्यमोहयत् ।। ४७ ।।[०५]

ततः प्रहृष्टरोमाणस्तं शब्दमभिदुद्रुवुः ।**
यक्षराक्षसगन्धर्वाः पाण्डवस्य समीपतः ।। ४८ ।।[०६]

गदापरिघनिस्त्रिंशशूलशक्तिपरश्वधाः ।**
प्रगृहीता व्यरोचन्त यक्षराक्षसबाहुभिः ।। ४९ ।।[०७]

ततः प्रववृते युद्धं तेषां तस्य च भारत।**
संरब्धानां महाघोषं सिंहानामिव नर्दताम् ।। ५० ।।

---

(०१) ((१) मादयन्; ह्लाद (मान)यन्; (४) सुसुखं; स सुखो; सुमुखो; मारुतः सुखशीतलः; मारुतः प्रववौ सुखं; मारुतः सुसुखोचित।,

(०२) (१) चित्रान्विविधवर्णाभान्; (२) फल०(फुल्ल )माल्यसमाचिताः; नानाफलसमाचिताः; फल०मालासमाचितान्; (४) शोभिनः (for शोभनाः); मनसापि महाद्रुमाः(मान्) मनसोपि महाद्रुमाः,

(०३) (२) माल्यविभूषितं; (४) ददृशे (for ददर्श);पवनात्मजः;भरतर्षभ,

(०४) (१) तदा; महा०(for गदा); (२) सततं समरप्रियः; स भीमस्त्यक्तसाध्वसः समभिद्रुत्य वेगतः,

(०५) (१) उपाध्माय; (२) रोमहर्षणं; (३)ज्याघोषं तलघोषं च; ज्याघोषः(षं) तलशब्दं चघोषांश्च, (४) (अ)कम्पयत् (for (अ)मोह); नादयामास पर्वतं,

(०६) (१) प्र (for सं); (२) शब्दं तं;; समभिदुद्रुवुः; तमनुशुश्रुवुः; तमभिशुश्रुवुः; तदभिदुद्रुवुः,

(०७) (२) ०शूलशक्तिपरश्व( स्व )धाः; (३)व्यराजन्त; व्यदृश्यन्त; व्यशोभन्त (for व्यरो); (४) ०किनैरौ,

तै प्रयुक्तान्महामायैः शूलशक्तिपरश्वधान्।
भल्लैर्भीमः प्रचिच्छेद भीमवेगतरैस्ततः ।। ५१ ।।[०१]

अन्तरिक्षगतानां च भूमिष्ठानां च गर्जताम्।**
शरैर्विव्याध गात्राणि राक्षसानां महाबलः ।। ५२ ।।[०२]

शोणितस्य ततः पेतुर्घनानामिव भारत।
गात्रेभ्यः प्रत्युत धाराः राक्षसानां समन्ततः ।। ५३ ।।

सा लोहितमहावृष्टिरभ्यवर्षन्महाबलम्।
कायेभ्यः प्रच्युता धारा राक्षसानां समन्ततः ।। ५४ ।।[०३]

गदापरिघपाणीनां रक्षसां कायसम्भवाः ।। ५५ ।।[०४]

भीमबाहुबलोत्सृष्टैरायुधैर्यक्षरक्षसाम्।**
विनिकृत्तानि दृश्यन्ते शरीराणि शिरांसि च ।। ५६ ।।[०५]

प्रच्छाद्यमानं रक्षोभिः पाण्डवं प्रियदर्शनम्।**
ददृशुः सर्वभूतानि सूर्यमभ्रगणैरिव ।। ५७ ।।[०६]

स रश्मिभिरिवादित्यः शरैरिरिनिघातिभिः ।**
सर्वानाच्र्छन्महाबाहुर्बलवान्सत्यविक्रमः ।। ५८ ।।[०७]

---

(०१) ((३)तैः प्रमुक्तान्; निर्मुक्तांस्तैः; तैर्विमुक्तान्;महा०मायैः; महाकायान्; (४) शूलशक्तिपरश्व( स्व) धान्;सितैर्भल्लैश्च चिच्छेद;भीमवेगपरा०क्रमः; भीमो भीमतरैर्नृप ( रैस्ततः); भीम०वेगशरैस्तथा (दा); तरै( जवै )स्तदा,

(०२) (१) गतानां च; (२) भूमिस्थाना०; तर्जता,

(०३) ((१) मयी (for महा); (२) महात्मनां; महाबलः; महाचलं,

(०४) (३)गात्रे (for काये); घोरा (for धारा),

(०५) (२) विशिखैर्; आयुधैर्;सायकैर् (forबहुधा);(३)विनि०कृन्तानि;;शरैः कृन्तानि;;हश्यन्ते,

(०६) (४) धनैर् (for गणैर्),

(०७) (१) स्व;ते (for स); (२) शरैर्बहुभिराचितः (०चितैः; वृतः); ररिभिराचितः;०रग्निशिखोपमैः; ररिनिपातितैः;०रिव (०रभि०; ०ख०) निपातिभिः; शरैर्मर्मविदारणै; (४) भीमसेनः प्रतापवान्,

अभितर्जयमानाश्च रुवन्तश्च महारवान्।**
न मोहं भीमसेनस्य ददृशुः सर्वराक्षसाः ।। ५९ ।।(०१)

यक्षा विकृतसर्वाङ्गा भीमसेनभयार्दिताः ।**
भीममार्तस्वरं चक्रुर्विप्रकीर्णमहायुधाः ।। ६० ।।(०२)

उत्सृज्य ते गदाशूलानसिशक्तिपरश्वधान्।**
दक्षिणां दिशमाजग्मुस्त्रासिता दृढधन्वना ।। ६१ ।।(०३)

तत्र शूलगदापाणिर्व्यूढोरस्को महाभुजः ।**
सखा वैश्रवणस्यासीत्मणिमान्नाम राक्षसः ।। ६२ ।।(०४)

आदर्श यत्प्रतीतिकारं(अदर्शयदधीकारं) पौरुषं च महाबलः ।
स तान्दृष्ट्वा परावृत्तान्स्मयमान इवाब्रवीत् ।। ६३ ।।(०५)

राश्रसः

एकेन बहवः सङ्ख्ये मानुषेण पराजिताः ।**
प्राप्य वैश्रवणावासं किं वक्ष्यथ धनेश्वरम् ।। ६४ ।।(०६)

वैशम्पायनः

एवमाभाष्य तान्सर्वानभ्यवर्तत राक्षसः ।**

---

(०१) (१) अभिगर्जयमानाश्च;०तर्जयमानस्य (श्च); ससर्जमानस्य तदा; अभितर्जयमानानां; , गर्जमानां बहवः;०सन्तर्जमानाश्च; (२) रवन्त; रुवत;रवतो भैरवान्नवान्; तत्र तत्र महा,३)न भयं; न ग्लानिं; संनादं; अमोघं; संनाहं (for न मोहं);न सेहिरेथ तं नादं; (४) भयार्ताश्च प्रदुद्रुवुः,

(०२) (१) ते शरैः कृत्तसर्वाङ्गाः; यक्षा विकृ (क्ष) तसर्वाङ्गाः; ते हि वि ( ते भीम०;ते तु वि०तेभितः) क्षत;; (२) बलार्दिताः,

(०३) (१) गदाशूलानि; (२) असिचक्र०; पाशशक्ति०;०स्वधान्; (४) भीमधन्वना; दृढधन्विना; गिरिव ासिनः;स्थिरधन्विना;वैशं० उ०,,

(०४) (१) ततः (for तत्र ); (२) ०बलः; हनुः(for भुजः); (४) यक्षराट् (for राक्षसः),

(०५) (१) दर्शयन्स ( यानः); प्रतीकारं; (२) आददानं च पौरुषं; (३)तान्स्म; तांस्तु (for स तान् ),

(०६) (मणिमानुवाच; (१) सङ्के; सङ्घे; (३)गत्वा (for प्राप्य); वैश्रवणाभ्यासं; (४) धनाधिपं नराधिपं; नरेश्वरं,

शक्तिशूलगदापाणिरभ्यधावत्स पाण्डवम् ।। ६५ ।।(०१)

तमापतन्तं वेगेन प्रभिन्नमिव वारणम्।**
वत्सदन्तैस्त्रिभिः पार्श्वे भीमसेनः समार्दयत् ।। ६६ ।।(०२)

मणिमानपि सङ्क्रुद्धः प्रगृह्य महतीं गदाम्।**
प्राहिणोद्भीमसेनाय परिगृह्य महाबलः ।। ६७ ।।(०३)

विद्युद्रूपां महाघोरामाकाशे महतीं गदाम्।**
शरैर्बहुभिरभ्यार्च्छद्भीमसेनः शिलाशितैः ।। ६८ ।।(०४)

**प्रत्यहन्यन्त ते सर्वे गदामासाद्य सायकाः ।****
न वेगं धारयामासुर्गदावेगस्य वेगिताः ।। ६९ ।।(०५)

गदायुद्धसमाचारं बु(ब)द्ध्यमानः स वीर्यवान्।**
व्यंसयामास तं तस्य प्रहारं भीमविक्रमः ।। ७० ।।(०६)

ततः शक्तिं महाघोरां रुक्मदण्डामयस्मयीम्।**
तस्मिन्नेवान्तरे धीमान्प्रजहाराथ राक्षसः ।। ७१ ।।(०७)

सा भुजं भीमनिर्ह्रादा भित्त्वा भीमस्य दक्षिणम्।**

---

(०१) ( (२) अभ्यवर्तत; समवर्तत (for न्यवर्तत स); (४) स पाण्डवं; वृकोदरं (for च पाण्डवम्) योधयि०ष्यन्व्उ (हे) कोदरं ; अभ्यधावत पाण्डवं,

(०२) (१) सम्प्रेक्ष्य (for वेगेन); (३)पार्थो (for पार्श्वे); (४) समार्दयत्; समर्दं; ,(अ)भ्यताड्यत,

(०३) (१) अथ (for अपि); (२) प्राहिणोन् (for प्रगृह्य); (४) परिगृह्य (समुत्क्षिप्य); परिक्षिप्त्वा; परिक्षिप्तान्,

(०४) ((३)अध्यार्छद्; आनर्छद्;,आजघ्ने; आच्छन्नो; अभ्यघ्नन्; अभ्यार्छद्,

(०५) (१) अभ्यहन्यन्त; (२) आदाय (for आसाद्य); राक्षसाः (for सायकाः);गदया भीमसायकाः; समासाद्य गदां शराः;, (४) तस्य वै (for वेगिताः,

(०६) ((१) समाचाराद्; समाचारान्; समारब्धं; (२) वध्यमानः; युध्य; बुद्धिमांश्च (for बुध्य); (३)ध्वंसयामास;कल; व्यथ; तत्सर्वं०; तत्रस्थः; तत्तस्य; (४) लघु (for भीम),

(०७) (२) अयोमयीं; (३)तस्मै ( भीमं) (for धीमान्); (४) प्रजहाद्; प्राहिणोद्; प्रचिक्षेप (for प्रजहार); स (for (अ)थ);प्राक्षिपद्राक्षसो बली; ,प्रचिक्षेप निशाचरः,

सा‍ग्निज्वाला महारौद्रा पपात सहसा भुवि ।। ७२ ।।[०१]

सोऽतिविद्धो महेष्वासः शक्त्यामितपराक्रमः ।**
गदां जग्राह कौन्तेयः क्रोधपर्याकुलेक्षणः ।। ७३ ।।[०२]

रुक्मपट्टपिनद्धां तां शत्रूणां भयवर्धिनीम् ।

प्रगृह्याथ नदन् भीमः सर्वशैक्यायसीं गदाम् ।**
तरसा चाभिदुद्राव मणिमन्तं महाबलम् ।। ७४ ।।[०३]

लक्षालङ्कारः- सर्वशैक्यायसीं गदाम् इत्यत्र सर्वं सर्वाङ्गं शैक्ये शिक्ये यस्याः सा च सा आयसी च ।

दीप्यमानं महाशूलं प्रगृह्य मणिमानपि।
प्राहिणोद्भीमसेनाय वेगेन महता नदन् ।। ७५ ।।

भङ्क्त्वा शूलं गदाग्रेण गदायुद्धविशारदः ।**
अभिदुद्राव तं हन्तुं गरुत्मानिव पन्नगम् ।। ७६ ।।[०४]

सोऽन्तरिक्षमवप्लुत्य विधूय सहसा गदाम्।**
प्रचिक्षेप महाबाहुर्विनद्य रणमूर्धनि ।। ७७ ।।[०५]

ततस्तं गदया भीमो मणिमन्तं निशाचर ।

जघान सहसा मूर्ध्नि स पपात ममार च ।

---

(०१) (१) भीमसङ्काशं; (३)अग्नि (for साग्नि),

(०२) (१) सोभिविद्धो; स निर्विद्धो; (३)कौन्तेयो (forकौरव्यो);गदायुद्धेषु कुशलः; (४) क्रोधपर्याकुलेक्षणः,

(०३) (१) प्रगृह्याथ; स प्रगृह्य (for तां प्रगृह्य); नदद्;,नदन्; (अ)नदद् (for (उ)न्नदन्); (२) ख०सर्वशैक्यायसीं, सैक्या० (for ०शैक्या० ); शैक्यां ( प्रेक्ष्य) सर्वा०यसीं गदां; सर्वशक्त्या (for काल) यसीं गदां; (३)ततस्तं (for तरसा सः);च (for सः),

(०४) (१) भित्वा; हत्वा; (२) विभागवित्; (३)तं हन्तुं ;वेगेन; तं भीमो (for तं तूर्णं),

(०५) (१) अव (for अभि); (३)चिक्षेप च; प्रजग्राह (for प्रचिक्षेप); (४) विनदन्नग( श्रण)मूर्धनि,

**सेन्द्राशनिरिवेन्द्रेण विसृष्टा वातरंहसा।**
**हत्वा रक्षः क्षितिं प्राप्य कृत्येव निपपात ह ॥ ७८ ॥**

**तं राक्षसं भीमबलं भीमसेनेन पातितम्।****
**ददृशुः सर्वभूतानि सिंहेनेव गवां परितम् ॥ ७९ ॥**(०१)

**तं प्रेक्ष्य निहतं भूमौ हतशेषा निशाचराः ।****
**भीममार्तस्वरं कृत्वा जग्मुः प्राचीं दिशं प्रति ॥ ८० ॥**(०२)

अस्मिन् पर्वणि १३३अध्याये ८०श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि

त्रयस्त्रिंशधिकशततमोऽध्यायः ॥ १३३ ॥

यक्षयुद्धपर्वणि .. अध्यायः

**महाभारततात्पर्यनिर्णये २२ अध्याये**

**ततो वैश्रवणो राजा महापद्मत्रये हते ।**

**राक्षसानामवध्यानां सखाये मणिमत्यपि ।**

**आरुरोह रथं दिव्यं योद्धुकामो वृकोदरम् ॥ २९९ ॥**

**असुरावेशतस्तस्य भीमे क्रोधो महानभूत् ।**

**स आजगाम भीमेन योद्धुं वित्तपतिः स्वयम् ॥ ३०० ॥**

**तस्मिन् काले भीमसेनस्य घोषं श्रुत्वा राजाऽपृच्छदाशु स्म कृष्णाम् ।**

**क्व भीम इत्येव तयोदितं च श्रुत्वा जगामाऽशु रक्षोंससंस्थः ॥ ३०१ ॥**

**सभ्रातृके मुनिभिः कृष्णया च गते राजान्यत्र भीमं कुबेरः ।**

**दृष्ट्वाऽसुरावेशतो धर्मजं च किञ्चिन्मुक्तः स्नेहयुक्तस्तथाऽस ॥ ३०२ ॥**

---

(०१) (२) भीमसेन (ने) निपातितं; भीम०सेनबलाहतं; (४) महाद्विपं (for गवां पतिम्),
(०२) (१) पतितं (for निहतं ),

# १३४. चतुस्त्रिंशदधिकशततमोऽध्यायः

भीमादर्शनेन दुर्मनायमानैः युधिष्ठिरादिभिः पर्वताग्रारोहणेन भीमसमीपगमनम् ॥ १ ॥ भीमहतावशिष्टैर्निवेदितमणिमदादिवधेन कुबेरेण युयुत्सया भीमं प्रत्यागमनम् ॥ २ ॥ तत्र युधिष्ठिरादिदर्शनेन शान्तमन्युना तेन तान् प्रति स्वस्यागस्त्यशापावाप्तिकथनपूर्वकं भीमसेनकार्यानुमोदनम् ॥ ३ ॥

वैशम्पायनः

श्रुत्वा बहुविधैः शब्दैर्नाद्यमानां गिरेर्गुहाम्।**
अजातशत्रुः कौन्तेयो माद्रीपुत्रावुभावपि ॥ १ ॥(०१)

धौम्यः कृष्णा च विप्राश्च सर्वे च सुहृदस्तथा।**
भीमसेनमपश्यन्तः सर्वे विमनसोऽभवन् ॥ २ ॥(०२)

द्रौपदीमार्ष्टिषेणाय सम्प्रधार्य महारथाः ।**
सहिताः सायुधाः शूराः शैलमारुरुहुस्तदा ॥ ३ ॥(०३)

ततः सम्प्राप्य शैलाग्रं वीक्षमाणा महारथाः ।**
ददृशुस्ते महेष्वासा भीमसेनमरिन्दमाः ॥ ४ ॥(०४)

स्फुरतश्च महाकायान्गतसत्त्वांश्च राक्षसान्।**
महाबलान्महासत्त्वान्भीमसेनेन पातितान् ॥ ५ ॥(०५)

---

(०१) (१) वाक्यैर्; नादैर् (for शब्दैर्); (२) भ्राम्यमाना;; नाद्यः(नर्द्य)मानां; गुहां उभौ माद्रीसुतावपि,

(०२) (२) ते (for च); (४) भृशं (for सर्वे),

(०३) (१) आर्ष्णिसेनाय; (२) प्रदाय च; सम्प्रधार्य( समावेश्य); सम्प्रदाय; परिदाय (for प्रदाय तु); (३)वीरा (for शूराः),

(०४) (२) महारथं (समन्ततः); (३)महात्मानं; महेष्वासं; (४) अरिन्दमाः (for अवस्थितं ,

(०५) (१) परितश्च; समन्ताच्च; स्फुरन्तश्च; पुरत०(for स्फुरत);मणिमत्प्रमुखाच्छरान्; (३) महावर्णान्; कायान्; ०सत्वान्; महोत्साहान्; महेष्वासान्; महावीर्यान् (for घोरान्) ४)भीमसनेनिपाति ( बलार्दि) तानू ,

शुशुभे स महाबाहुर्गदाखड्गधनुर्धरः ।**
निहत्य समरे सर्वान्दानवान्मघवानिव ॥ ६ ॥

ततस्ते भ्रातरं दृष्ट्वा परिष्वज्य महारथाः ।**
तत्रोपविविशुः पार्थाः प्राप्ता गतिमनुत्तमाम् ॥ ७ ॥[०१]

तैश्चतुर्भिर्महेष्वासैर्गिरिशृङ्गमशोभत।**
लोकपालैर्महाभागैर्दिवं देववरैरिव ॥ ८ ॥[०२]

कुबेरसदनं दृष्ट्वा राक्षसांश्च निपातितान्।**
भ्राता भ्रातरमासीनमब्रवीत्पृथिवीपतिः ॥ ९ ॥[०३]

युधिष्ठिरः

साहसाद्यदि वा मोहाद्भीम पापमिदं कृतम्।**
नैतत्ते सदृशं वीर मुनेरिव मृषा वधः ॥ १० ॥[०४]

राजद्विष्टं न कर्तव्यमिति धर्मविदो विदुः ।**
त्रिदशानामिदं द्विष्टं भीमसेन त्वया कृतम् ॥ ११ ॥[०५]

अर्थधर्मावनादृत्य यः पापे कुरुते मनः ।
कर्मणां पार्थ पापानां स फलं विन्दते ध्रुवम् ॥ १२ ॥ [०६]

---

(०१) (१) सम भिक्रम्य; भ्रातरं दृष्ट्वा; (२) महारथा (for वृकोदरम्),

(०२) (२) गिरेः शृङ्गम्;गिरिशृङ्गैरिवोद्गगतैः; (३)महा०वेगैर्; महेष्वासैर् (for महाभागैर्); (४) स्वर्गो; दिवि; दिव्यैर् (for दिवं);देवगणैरिव;द्यौर्देवप्रवरैरिव,

(०३) (१) कुबेरभवनं; (४) अब्रवीत्पृथिवीपतिः; अथोवाच (उवाच स) युधिष्ठिरः,

(०४) (युधिष्ठिर उ; (४) वधः(for वचः),

(०५) (१) राज्ञानिष्टं (for राजद्विष्टं); (३)यदिदं कृतवान्भीम;; (४) त्वया कृतं;विद्विष्टं तद्दिवौकसां; भीम यद्विहितं त्वया०,

(०६) (१) अर्य कामा; धर्माधर्मा;; (३)तात;कृत०(for पार्थ); दुष्टानां; सर्वेषां; सर्वस्मात् (for पापानां),

साहसं बत भद्रं ते देवानामपि चाप्रियम्।[०१]

कर्मणां पार्थ सर्वेषां न पापात्परिक्लयसे ।

साहसं बत भद्रं ते देवानामपि चाप्रियम् ।

पुनरेवं न कर्तव्यं मम चेदिच्छसि प्रियम् ।। १३ ।।

वैशम्पायनः

एवमुक्त्वा स धर्मात्मा भ्राता भ्रातरमच्युतम्।
भीमसेनं महाबाहुमप्रपृश्य पराक्रमम् ।। १४ ।।[०२]

अर्थतत्त्वविभागज्ञः कुन्तीपुत्रो युधिष्ठिरः ।**
विरराम महातेजास्तमेवार्थं विचिन्तयन् ।। १५ ।।[०३]

ततस्ते हतशिष्टा ये भीमसेनेन राक्षसाः ।**
सहिताः प्रत्यपद्यन्त कुबेरसदनं प्रति ।। १६ ।।[०४]

ते जवेन महावेगाः प्राप्य वैश्रवणालयम्।**
भीममार्तस्वरं चक्रुर्भीमसेनभयार्दिताः ।। १७ ।।[०५]

न्यस्तशस्त्रायुधाः क्लान्ताः शोणिताक्ततनुच्छदाः ।**
प्रकीर्णमूर्धजा राजन्यक्षाधिपतिमब्रुवन् ।। १८ ।।[०६]

राक्षसाः

गदापरिघनिस्त्रिंशंतोमरप्रासयोधिनः ।
राक्षसा निहताः सर्वे तव देव पुरःसराः ।। १९ ।।

---

(०१) ( (४) लभते (for विन्दते);पापान्न परिमुच्यते,

(०२) (३)अर्थधर्मविधान (०भाग)ज्ञः; अर्थतत्वविभाव (धान)ज्ञः,

(०३) (२) अग्रजः; अच्युतः; उत्तमं,

(०४) (१) ते (for तु);हतशेषा; हतचित्ता; (४) कुबेर०भ (०भु)वनं,

(०५) (१) महाभागाः (राज); (४) गदार्दिताः,

(०६) (१) न्यसञ्छस्त्रायुधाः; न्यस्तसर्वायुधाः;;क्लान्ताः; क्रान्ता;; (२) शोणितौघ( तेन ) परिप्लुताः; ताक्ततनुच्छदाः; तार्द्रपरिच्छदाः; (४) रक्षाधि; धनाधि (for यक्षाधि);धनाधिपमथाशुवन्,

प्रमृद्य तरसा शैलं मानुषेण धनेश्वर।
एकेन सहिताः सङ्ख्ये रणे क्रोधवशाः गणाः ।। २० ।।(०१)

प्रवरा राक्षसेन्द्राणां यक्षाणां च नराधिप।**
शेरते निहता देव गतसत्त्वाः परासवः ।। २१ ।।(०२)

लब्धशेषा वयं मुक्ता मणिमांस्ते सखा हतः ।**
मानुषेण कृतं कर्म विधत्स्व यदनन्तरम् ।। २२ ।।(०३)

वैशम्पायनः

स तच्छ्रुत्वा तु सङ्क्रुद्धः सर्वयक्षगणाधिपः ।}
कोपसंरक्तनयनः कथमित्यब्रवीद्वचः ।। २३ ।।

द्वितीयमपराध्यन्तं भीमं श्रुत्वा धनेश्वरः ।**
चुक्रोध यक्षाधिपतिर्युज्यतामिति चाब्रवीत् ।। २४ ।।(०४)

अथाभ्रघनसङ्काशं गिरिशृङ्गमिवोच्छ्रितम्।**
रथं संयोजयामासुर्गन्धर्वैर्हेममालिभिः ।। २५ ।।(०५)

तस्य सर्वगुणोपेता विमलाक्षा हयोत्तमाः ।
तेजोबलगुणोपेता नानारत्नविभूषिताः ।(०६)
शोभमाना रथे युक्तास्तरिष्यन्त इवाशुगाः ।। २६ ।।

---

(०१) (१) आक्रम्य;, प्रविश्य;प्रभज्य (for प्रमृद्य);तु महा०;च महा०; सहसा (for तरसा) ३)निहता (for सहिताः);सर्वे; सङ्गे (for सङ्ख्ये); (४) रणे;,सर्वे;,मृताः(for हताः),

(०२) (२) नराधिप; धनेश्वर; (३)तत्र (for देव); (४) पुरमासाद्य सर्वशः,

(०३) (१) क्षुब्धः; रुद्धाः; दगधः; भग्नः(for लब्धः);लब्धशैला (लो); लब्धशेषा; हतशेषा क्षिप्ता; भग्ना (for मुक्ता);लब्धशैलः इति गौडपाठे तु लब्धो भीमेनजितः शैलः, २)त्वत्० (for ते),

(०४) (२) धना (नरा)धिपः(for धने); (४) युध्यताम्;युज्यतां मे रथस्त्विति,

(०५) (२) गिरिशृगम्; (३)रथं (for हयैः);संयोजयामास; (४) गन्धर्वैर्;; हेम०मालिभिः;रथमुत्तमं,

(०६) (२) मल्लिकाक्षा (ख्या);महाहयाः (for हयो०); (३)तेजोजवसमायुक्ता; जव०बलोपेता; ०बलगुणोपेता, ० ,

ह्लेषयामासुरन्योन्यं ह्लेषितैर्विजयावहैः ।[०१]

ततस्ते तु महायक्षाः क्रुद्धं दृष्ट्वा धनेश्वरम्।।
हर्षयामासुरन्योन्यम् इङ्गितैर्विजयावहैः ।। २७।।[०२]

स तमास्थाय भगवान्राजराजो महारथम्।**
प्रययौ देवगन्धर्वैः स्तूयमानो महाद्युतिः ।। २८ ।।[०३]

तं प्रयान्तं महात्मानं सर्वे यक्षा धनाधिपम्।
अनुजग्मुर्महात्मानं धनदं घोरदर्शनाः ।। २९ ।।*}[04]
रक्ताक्षा हेमसङ्काशा महाकाया महाबलाः ।[०५]
सायुधा बद्धनिस्त्रिंशा यक्षा दशशतावराः ।। ३० ।।

ते जवेन महावेगाः प्लवमाना विहायसा।[०६]
गन्धमादनमाजग्मुः प्रकर्षन्त इवाम्बरम् ।। ३१ ।।

तत्केसरिमहाजालं धनाधिपतिपालितम्।
रम्यश्चैव गिरेः शृङ्गमासेदुर्यत्र पाण्डवाः ।। ३२ ।।

कुबेरं च महात्मानं यक्षरक्षोगणावृतम्।
ददृशुर्हृष्टरोमाणः पाण्डवाः प्रियदर्शनम् ।। ३३ ।।[०७]

कुबेरस्तु महासत्त्वान्पाण्डोः पुत्रान्महारथान्।**

---

(०१) (१) रणे (for रथे); (२) पतिष्यन्त (for तरि०);(अ)वहन्; (अ)भवन् (for आशुगाः),
(०२) (३)शोभ०; हेष (for हर्षे); (४) हेषितैर् (for इङ्गिन्तैर्),
(०३) (२) महारथ; रथोत्तमं; (४) महात्मभिः (for द्युतिः),
(०४) (( महात्मानो; यक्षरक्षोगणाधिपाः);; (३)राक्षसा (for रक्ताक्षा); (४) जवाः (for बलाः),
(०५) (१) प्रयातं;महा०बाहुं; (२) सर्वेयक्षधनाधिपं; सर्वयक्षगणा (जना)धिपं,
(०६) (१) समन्ताद् (for सायुधा);धृत (for बद्ध); (२) यक्षास्तस्य महाबलाः;यक्षास्तस्य शतावराः; यक्षास्तस्य सतासताः;यक्षा दशशतावराः; (३) तेजवेन महावे(०भा)गाः; (४) प्लवमाना विहायसा ( सं),
(०७) (ते (for तं) तं महात्मान०मायान्तं; तमायान्तं महात्मानं; कुबेरं च महात्मानं यक्षरक्षोगणावृतं (धिपं); (४) प्रियदर्शना०;,वादिनः,

आत्तकार्मुकनिस्त्रिंशान्दृष्ट्वा प्रीतोऽभवत्तदा ॥ ३४ ॥[०१]

सर्वे चेमे नरव्याघ्राः पुरन्दरसमौजसः ।[०२]
देवकार्यं चिकीर्षन्स हृदयेन तुतोष ह ॥ ३५ ॥[०३]

ते पक्षिण इवापेतुर्गिरिशृङ्गं महाजवाः ।**
तस्थुस्तेषां समभ्याशे धनेश्वरपुरःसराः ॥ ३६ ॥[०४]

ततस्तं हृष्टमनसं पाण्डवान्प्रति भारत।**
समीक्ष्य यक्षगन्धर्वा निर्विकारमवस्थिताः ॥ ३७ ॥[०५]

पाण्डवाश्च महात्मानः प्रणम्य धनदं प्रभुम्।**
नकुलः सहदेवश्च धर्मपुत्रश्च धर्मवित् ॥ ३८ ॥[०६]

अपराद्धमिवात्मानं मन्यमाना महारथाः ।**
तस्थुः प्राञ्जलयः सर्वे परिवार्य धनेश्वरम् ॥ ३९ ॥

स ह्यासनवरं श्रीमत्पुष्पकं विश्वकर्मणा।**
विहितं चित्रपर्यन्तमातिष्ठत धनाधिपः ॥ ४० ॥[०७]

तमासीनं महाकायाः शङ्कुकर्णा महाजवाः ।**
उपोपविविशुर्यक्षा राक्षसाश्च महस्रशः ॥ ४१ ॥[०८]

शतशश्चापि गन्धर्वास्तथैवाप्सरसां गणाः ।**

---

(०१) (१) महासत्वः; (२) पाण्डु (for पाण्डोः);महाबलान्,

(०२) ((स मत्वेमे; समं त्विमे; स तु मेने,),

(०३) (( करिष्यन्ति (for चिकीर्षन्स),

(०४) (१) इवाश्वस्य; इवागम्य; इवापेतुर्; इवाकाशे; इवो त्प्लुत्य;; (२) गिरिशृङ्ग; गिरेः शृगान्, महाबलाः;सर्वे सङ्कल्परंहसः; (३)समाभ्यासे; सकाशे (शं) वै ; समभ्यासे,

(०५) (१) ततः सं (तस्ते ) हृष्टमनसः; (४) निर्विशेषं;निर्विशङ्का;निर्विकारमवस्थिताः,

(०६) (१) पाण्डवास्तं;वास्ते; वापि;महात्मानं; (४) धर्मराजश्च,

(०७) (१) स ह्या (ज्या)सनवरं; शय्यासनधरं; ०युतं; गतं;श्रीमान्, (२) पुष्पके,

(०८) (२) बलाः (for जवा),

परिवार्योपतिष्ठन्ति तथा देवाः शतक्रतुम् ।। ४२ ।।[०१]

काञ्चनीं शिरसा बिभ्रद्भीमसेनः स्रजं शुभाम्।**
पाशखड्गधनुष्पाणिरुदैक्षत धनाधिपम् ।। ४३ ।।[०२]

भीमसेनस्य न ग्लानिर्विक्षतस्यापि राक्षसैः ।**
आसीत्तस्यामवस्थायां कुबेरमपि पश्यतः ।। ४४ ।।[०३]

आददानं शितान्बाणान्योद्धुकाममवस्थितम्।**
दृष्ट्वा भीमं धर्मसुतमब्रवीन्नरवाहनः ।। ४५ ।।[०४]

कुबेरः

विदुस्त्वां सर्वभूतानि पार्थ भूतहिते रतम्।**
निर्भयश्चापि शैलाग्रे वस त्वं भ्रातृभिः सह ।। ४६ ।।[०५]

न च मन्युस्त्वया कार्यो भीमसेनस्य पाण्डव ।**
कालेनैते हताः पूर्वं निमित्तमनुजस्तव ।। ४७ ।।[०६]

व्रीडा चात्र न कर्तव्या साहसं यदिदं कृतम्।**
दृष्टश्चापि सुरैः पूर्वं विनाशो यक्षरक्षसाम् ।। ४८ ।।[०७]

न भीमसेने कोपो मे प्रीतोऽस्मि भरतर्षभ।**
कर्मणा भीमसेनस्य मम तुष्टिरभूत्पुरा ।। ४९ ।।[०८]

---

(०१) (१) चैव (for चापि); (३)स्म तिष्ठन्ति; (उ)पतिष्ठेति; (४) देवं,
(०२) (२) शिवां (for शुभाम्); (३)पाश;,प्रास० (for बाण); (४) नावैक्षत,
(०३) (१) भीमसेनस्य न ग्लानिर्; (२) विक्षिप्तस्यापि; विक्षि; ईक्षि०; वीक्षि,
(०४) (२) इव (for अव०),
(०५) ( कुबेर उ; १)त्वा (for त्वां); (३)चैव (for चापि); (४) भ्रातृभिः सह; सह रक्षभिः,
(०६) (१) तु (for च); (२) ०सेनाय; (३) (ए)व (for (ए)ते);सर्वे (for पूर्वं),
(०७) (१) च ते; चापि (for चात्र); (२) साहसं; यदिदं; (३)दिष्टश्; दिष्टं,
(०८) (२) प्रीतोहं;पुरुषर्षभ (for भरतं); प्रीतश्चास्मि नरर्षभ; (३)कर्मणो भीमसेनस्य ४)परा (for पुरा),

वैशम्पायनः

एवमुक्त्वा तु राजानं भीमसेनमभाषत ॥ ५० ॥

कुबेरः

नैतन्मनसि मे तात वर्तते कुरुसत्तम।
यदिदं साहसं भीम कृष्णार्थे कृतवानसि ॥ ५१ ॥[०१]

मामनादृत्य देवांश्च विनाशं यक्षरक्षसाम्
स्वबाहुबलमाश्रित्य तेनाहं प्रीतिमांस्त्वयि।**
शापादद्य विनिर्मुक्तो घोरादस्मि वृकोदर ॥ ५२ ॥[०२]

अहं पूर्वमगस्त्येन क्रुद्धेन परमर्षिणा।**
शप्तोऽपराधे कस्मिंश्चित्तस्यैषा निष्कृतिः कृता ॥ ५३ ॥[०३]

दृष्टो हि मम सङ्क्लेशः पुरा पाण्डवनन्दन।**
न तवात्रापराधोऽस्ति कथञ्चिदपि पाण्डव ॥ ५४ ॥[०४]

युधिष्ठिरः

कथं शप्तोऽसि भगवन्नगस्त्येन महात्मना।**
श्रोतुमिच्छाम्यहं देव तवैतच्छापकारणम् ॥ ५५ ॥[०५]

---

(०१) ( वैशं० उ (उ); १)स एवमुक्त्वा राजानं;तात (for भीम);कृष्णार्थं,

(०२) (१) देवानां (for देवांश्च ); (२) विनाशं कृतवानसि; विनाशयसि राक्षसान्;०(३)बलवीर्येण; (४) तव (for त्वयि );अद्य; अपि; चाहं ( अस्माद्)(for अस्मि);विमुक्तोद्य (for विनिर्मुक्तो);अस्मि; अस्माद्; चाहं (for अद्य),

(०३) (४) निःकृतिः; परा; किल; ध्रुवं; पुरा; ध्रुवा (for कृता),

(०४) (१) दिष्टो (for दृष्टो );दृष्टोयं मे (ष्टो धर्मे) परिक्लेशः; (३)तव नात्रा; न ते वात्रा तत्तवात्रा; तवात्र ना; (४) न किञ्चि०दपि (for कथं); पाण्डव० भारत (for शत्रुं),

(०५) (कथं शप्तः; त्वं (for (अ)सि);महर्षिणा (for महां);किमर्थं वाशपत्क्रुद्धस्त्वामगस्त्य स्तपोधनः; (३) (अ)हं सर्वं; (अ)शेषेणः;(अ)हं राजन् (for (अ)हं देव); (४) तथै; यथै (for तवै० ); तत् (for (ए)तत्);तव शापस्य कारणं,

इदं चाश्चार्यभूतं मे यत्क्रोधात्तस्य धीमतः ।**
तदैव त्वं न निर्दग्धः सबलः सपदानुगः ।। ५६ ।।(०१)

धनेश्वरः

देवतानामभून्मन्त्रः कुशवत्यां नरेश्वर ।। ५७ ।।

वृतस्तत्राहमगमं महापद्मशतैस्त्रिभिः ।
यक्षाणां घोररूपाणां विविधायुधधारिणाम्।(०२)
अध्वन्यहमथापश्यमगस्त्यमृषिसत्तमम् ।। ५८ ।। (०३)

उग्रं तपस्तप्यमानं यमुनातीरमाश्रितम्।(०४)
नानापक्षिगणाकीर्णं पुष्पितद्रुमशोभितम् ।। ५९ ।।

तमूर्ध्वबाहुं दृष्ट्वैव सूर्यस्याभिमुखे स्थितम्।**
तेजोराशिं दीप्यमानं हुताशनमिवैधितम् ।। ५७ ।।(०५)

राक्षसाधिपतिः श्रीमान्पणिमान्नाम मे सखा।
मौर्ख्यादज्ञानभावाच्च दर्पान्मोहाच्च पार्थिव ।। ६१ ।। (०६)

न्यष्ठीवदाकाशगतो महर्षेस्तस्य मूर्धनि।(०७)

---

(०१) (१) तु (for च)आश्चर्यमेतद्भगवन्; (३)तस्मिन्क्षणे; तथैव त्वं; (४) सभृत्यः; सहयः (सा) (for सबलः); च सवाहनः; बलवाहनः (for सपदा),

(०२) (धनेश्वर उ; धनद उं; कुबेर उ० (उ); १)सत्रं; मन्त्रं; (२) मेरुपृष्ठे; कुशावत्यां; जनाधिप; , नराधिप (for नरे); (३)तत्राहूतो०; वृतस्ताता (for वृतस्तत्रा); (४) वृतः (for त्रिभिः); कामरूपाणां; राक्षसानां च;पाणिनां,

(०३) (३)तप्यमानं (for तपस्यन्तं),

(०४) (४) नानाद्रुमविभूषितं; यमुनातीरमाश्रित्य (साद्य); ० पुण्यं ब्रह्मा ( देव) र्षिसङ्कुलं,

(०५) (१) अथो (for तम् ); (ए)व; च; तं (for तु); /*(१) (अ) भिमुखे०;
अगस्त्वमृषिसत्तमं
४)इवेधितं; इवानलं,

(०६) (१) तत्राधिपो राक्षसानां; (४) मोहाद्दर्पाच्च; दर्पमोहा; पार्थिव (for भारत),

(०७) (अष्ठीवद् (for न्यष्ठी०);ष्ठीवता;काशगस्तस्य; परमर्षेः स मूर्धनि,

**ततः क्रुद्धः स भगवानुवाचेदं तपोधनः ।। ६२ ।।**

**लक्षालङ्कारः- न्यष्ठीवताकाशगत इत्यत्र न्यष्ठीवत निष्ठीवनमकरोत् ।**

**अगस्त्यः**

स कोपान्मामुवाचेदं दिशः सर्वा दहन्निव ।

**मामवज्ञाय दुष्टात्मा यस्मादेष सखा तव ।(०१)**

**धर्षणां कृतवानेतां पश्यतस्ते धनेश्वर ।। ६३ ।।**

**तस्मात्सहैभिः सैन्यैस्ते वधं प्राप्स्यति मानुषात्।(०२)**

**त्वं चाप्येभिर्हतैः सैन्यैः क्लेशं प्राप्येह दुर्मतिः ।। ६४ ।।(०३)**

**तमेव मानुषं दृष्ट्वा किल्बिषाद्विप्रमोक्ष्यसे ।। ६५ ।।**

**सैन्यानां तु तवैतेषां पुत्रपौत्रबलान्वितम्।****

**न शापं प्राप्स्य(प्य)ते घोरं तत्तवाज्ञां करिष्यति ।। ६६ ।।(०४)**

**कुबेरः**

**एष शापो मया प्राप्तः प्राक्तस्मादृषिसत्तमात्।****

**स भीमेन महाराज भ्रात्रा तव विमोक्षितः ।। ६७ ।।(०५)**

अस्मिन् पर्वणि १३४ अध्याये ६७श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि यक्षयुद्धपर्वणि**

**चतुस्त्रिंशदधिकशततमोऽध्यायः ।। १३४ ।।**

---

(०१) (स कोपात् ;प्रदहन्निव तेजसा; ततः क्रुद्धः स भगवानुवाचेदं तपोधनः; (४) देव (for एष),

(०२) (१) धर्षणं;एनां;,एवं;, एष;,एतत् (for एतां); (३)सैन्यं;तैर् (for ते); (४) मानवात्,

(०३) (२) प्राप्येह; प्राप्नुहि (for प्राप्स्यसि); दुर्मतिः,

(०४) (२) पुत्रपौत्रं बलान्वितं (नुगं); (३)ते शापं; तं शापं; विशापं; नानाशं (for न शापं) प्राप्यते ०(४) तत्तवा (तोव)ज्ञां (for गच्छतेज्ञां),

(०५) (२) तत्तस्माद् ; अगस्त्याद्; पुरास्माद् (for प्राक्तस्माद्);मुनि (for ऋषि०); (३)महाबाहो,

यक्षयुद्धपर्वणि .. अध्यायः

महाभारततात्पर्यनिर्णये २२ अध्याये

धृतायुधं भीममीक्ष्यापि किञ्चिद् दैत्यावेशाद् बहु मेने न भीमम् ।
अगस्त्यशापं चावदत् स्वस्य पूर्वं सखायनाशे कारणं राजराजः ।। ३०३ ।।
दैत्यावेशादुज्झितः शान्तभावो ददौ निजं स्थानमेषां सुतुष्टः ।
आवासार्थं तेऽवसंस्तत्र पार्थास्तथाऽन्येषां दैवतानां गृहेषु ।। ३०४ ।।
तत्रैव तेषां वसतां महात्मनामानन्दिनामब्दचतुष्टये गते ।
पञ्चाब्दमध्याप्य महान्ति चास्त्राणीन्द्रो गुर्वर्थं फल्गुनेनार्थितोऽभूत् ।। ३०५ ।।

# १३५. पञ्चत्रिंशदधिकशततमोऽध्यायः

कुबेरेण युधिष्ठिरानुशासनपूर्वकं स्वभवनगमनम् ।। १ ।। कुबेराज्ञया राक्षरपूजितैर्युधिष्ठिरादिभिस्तद्रात्रौ तद्गृहे सुखवासः ।। २ ।।

धनदः

युधिष्ठिर धृतिर्दाक्ष्यं देशकालपराक्रमाः ।**
लोकतन्त्रविधानानामेष पञ्चविधो विधिः ।। १ ।।(०१)

धृतिमन्तश्च दक्षाश्च स्वे स्वे कर्मणि भारत।**
पराक्रमविधानज्ञा नरा कृतयुगेऽभवन् ।। २ ।।(०२)

धृतिमान्देशकालज्ञः सर्वधर्मविधानवित्।**

---

(०१) (धनद उ कुबेर उ; (२) कालं पराक्रमं; काल०पराक्रमाः; (३)लोकतन्त्रविधानं च विभागानाम्; (४) (अ)प्येष (for एष);नयः (for विधिः),

(०२) (३)विभागज्ञा,

क्षत्रियः क्षत्रियश्रेष्ठ प्रशास्ति पृथिवीं चिरम् ।। ३ ।।(०१)

य एवं वर्तते पार्थ पुरुषः सर्वकर्मसु।**
स लोके लभते वीर यशः प्रेत्य च सद्गतिम् ।। ४ ।।

देशकालान्तरप्रेप्सुः कृत्वा शक्रः पराक्रमम्।**
सम्प्राप्तस्त्रिदिवे राज्यं वृत्रहा वसुभिः सह ।। ५ ।।(०२)

यस्तु केवलसंरम्भात्प्रपातं न निरीक्षते।

पापात्मा पापबुद्धिर्यः पापमेवानुवर्तते।**
कर्मणामविभागज्ञः प्रेत्य चेह विनश्यति ।। ६ ।।(०३)

अकालज्ञः सुदुर्मेधाः कार्याणामविशेषवित्।**
वृथाऽऽचारसमारम्भः प्रेत्य चेह विनश्यति ।। ७ ।।(०४)

साहसे वर्तमानानां निकृतीनां दुरात्मनाम्।**
सर्वसामर्थ्यलिप्सूनां पापो भवति निश्चयः ।। ८ ।।(०५)

अधर्मज्ञोऽवलिप्तश्च बालबुद्धिरमर्षणः ।**
निर्भयो भीमसेनोऽयं तं शाधि पुरुषर्षभ ।। ९ ।।(०६)

तच्छ्रुत्वा धनदो वाक्यं पाण्डवानां समागमम् ।

उत्थाय स ह तैः सार्धं चलितस्तत्क्षणादृतम् ।

---

(०१) (२) सर्वध (क)र्मविभागवित; (४) हि; ह (for वै);प्रशास्ति पृथिवी चिरं; पृथिवीमनुशासति,

(०२) (देशकालोत्तरं (०त्तरः); चितं)शक्रः, तात (for शक्रः); (४) बधु०; बहु० (for वसु ) मरुद्भिः सह वृत्रहा,

(०३) (१) च (for य); (४) स प्रेत्ये (for प्रेत्य चें);वि०(for च),

(०४) (१) हि; स (for सु); (२) अविधानवित्; अवि०भागवित; (३)दुर्वृत्ताचारसंरम्भी (वृथाचारसमारम्भात्), (४) स प्रत्येह; सोचिरेण,(for प्रेत्य चेह);वि०(for च),

(०५) (२) निकृतानां(प्राकृतानां);प्रवृत्तीनां;(३)सर्वसामर्थ्यलुप्ता(लिप्सानां;सर्वेषामर्थलिप्सानां; सर्वेषामर्थ०लिप्सूनां; स त्वस्मान्सत्वलिप्सूनां; (४) पातो; पापे (for पापो);निश्चितः नित्यशः,

(०६) (२) पाप (for बाल); (४) पुरुषो०त्तमं; पुरुषर्षभं;त्वं शाधितुमिहार्हसि,,

कुबेरः प्राप्य राजानं युधिष्ठिरमभाषत ।

**आर्ष्टिषेणस्य राजर्षेः प्राप्य भूयस्त्वमाश्रमम्।****
**तामिस्रं प्रथमं पक्षं वीतशोकभयो वस ।। १० ।।**[०१]

**अलकाः सह गन्धर्वैर्यक्षाश्च सह किन्नरैः**
**मन्नियुक्ता मनुष्येन्द्र सर्वे च गिरिवासिनः ।**
**रक्षिष्यन्ति महाबाहो सहितं द्विजसत्तमैः ।। ११ ।।**

गमिष्यामि महाबाहो त्वं चापि बदरीं व्रज ।[०२]

**साहसादनुसम्प्राप्तः प्रतिबुध्य वृकोदरः ।****
**वार्यतां साध्वयं राजंस्त्वया धर्मभृतां वर ।। १२ ।।**[०३]

**अतः परं च वो राजन्द्रक्ष्यन्ति वनगोचराः ।****
**उपस्थास्यन्ति वो राजन्रक्षिष्यन्ते च वः सदा ।। १३ ।।**[०४]

**तथैव चान्नपानानि स्वादूनि च बहूनि च ।****
**आहरिष्यन्ति मत्प्रेष्याः सदा वः पुरुषर्षभाः ।। १४ ।।**[०५]

**यथा जिष्णुर्महेन्द्रस्य यथा वायोर्वृकोदरः ।****
**धर्मस्य त्वं यथा तात योगोत्पन्नो निजः सुतः ।। १५ ।।**

---

(०१) (१) आर्ष्णिसेनस्य; (२) प्राप्य भूयः० ;तथा (for त्वमा); (३)तामिश्रं; त्वरितं प्राप्य (for पक्षं); तमिस्रा प्रथमां प्राप्य ( तत्र ),

(०२) (१) अलका; अलकां; आलकाः; अलङ्कां;अकालः; आलकैः; (२) यक्षाश्च; किंनरैः(for राक्षसैः); (४) सर्वैश्च गिरिवासिभिः;रक्षन्ति; रक्षन्ते; रक्षितुं; रक्षिष्यन्ति (for रक्षन्तु त्वा);त्वां(for त्वा),

(०३) (१) साहसे चापि सन्तिष्ठन्; साहसं स्वयमातिष्ठन्; साहसादनुसम्प्राप्तः (सा); तं साहसेषु न कर्त० यं; (२) प्रतिबुध्य; प्रति०हर्षं; प्रतिबुद्धान्; त्वया शैले (for इह शैले) (४) स्वयं (भीमो) (for त्वया),

(०४) (१) अतः (for इतः);वःसर्वान्; वः सर्वे; वो राजन्(for राजेन्द्र); (२) प्रेक्ष्यन्ति; रक्ष्यन्ति(३)वः सर्वान्; वो राजन्; च तदा (for च सदा); (४) रक्षिष्यन्ते; संरक्ष्यन्ति;वः सदा (for सर्वशः);रक्षांसि तव सर्वशः,

(०५) (२) विविधानि; च फलानि (for च बहूनि); (३)वै गृह्य; च सदा;(उ)पादाय (for वो गृह्य); आहरिष्यन्तिमप्रेष्याः; (४) भृत्याः (for ०प्रेष्याः);भरतर्षभ;सदा वः (सदाराः)पुरुषर्षभाः,

आत्मजावात्मसम्पन्नौ यमौ चोभौ यथाश्विनो: ।**
रक्ष्यास्तद्वन्ममापीह यूयं सर्वे युधिष्ठिर ।। १६ ।।(०१)

अर्थतत्त्वविधानज्ञः सर्वधर्मविधानवित् ।**
भीमसेनादवरजः फाल्गुनः कुशली दिवि ।। १७ ।।(०२)

फाल्गुनः

याः काश्चन मता लोके स्वर्ग्याः परमसम्पदः ।**
जन्मप्रभृति ताः सर्वाः स्थितास्तात धनञ्जये ।। १८ ।।

दमो दानं बलं बुद्धिर्ह्रीर्धृतिस्तेज उत्तमम्।**
एतान्यपि महासत्त्वे स्थितान्यमिततेजसि ।। १९ ।।(०३)

न मोहात्कुरुते जिष्णुः कर्म पाण्डव गर्हितम्।**
न पार्थस्य मृषोक्तानि कथयन्ति नरा नृषु ।। २० ।।(०४)

स देवपितृगन्धर्वैः कुरूणां कीर्तिवर्धनः ।**
मानितः कुरुतेऽस्त्राणि शक्रसद्मनि भारत ।। २१ ।।(०५)

योऽसौ सर्वान्महीपालान्धर्मेण वशमानयत् ।। २२ ।।

स शान्तनुर्महातेजाः पितुस्तव पितामहः ।**

---

(०१) (२) धर्मौ (for यमौ );तथा (for यथा);(अ) श्विनौ; (३)ते तन्; तावन्;,तथा (for तद्वन्); मया (for ममा); रक्ष्यास्तद्धर्ममप्येह; (४) स्वयं (for यूयं),

(०२) (१) विधानज्ञः; (२) विभागवित्; विधानवित्; (३)भीमादवरजः श्रीमान्; सेनोदयं राजन्; (४) /*( मता लोके; महाबुद्धेर् ( द्धचा),(for मता लोकेषु);काश्चित्सर्वमता लोके; याः काश्चित्संमता लोके; बुद्धेः; स्वर्ग्याः; वश्याः (for (अ)म्याः),

(०३) (१) दमो दानं; (२) धृतिस्तेज पराक्रमः (ज अनुत्तमं); (३)हि (for (अ)पि) महाबुद्धे; स्थितानि हि यथा त्वयि,

(०४) (४) नरा नृप; नरोत्तम,

(०५) (३)आनीतं; आनीतः (for मानितः); (४) पाण्डवः;मानद (for भारत),

**प्रीयते पार्थ पार्थेन दिवि गाण्डीवधन्वना।**(०१)
**सम्यक्चासौ महावीर्यः कुलधुर्येण पार्थिवः ॥ २३ ॥**(०२)

**पितन्देवानृषीन्विप्रान्पूजयित्वा महातपाः ।****
**सप्त मुख्यान्महामेधानाहरद्यमुनां प्रति ॥ २४ ॥**(०३)

**अधिराजः स राजंस्त्वां शान्तनुः प्रपितामहः ।****
**स्वर्गजिच्छक्रलोकस्थः कुशलं परिपृच्छति ॥ २५ ॥**(०४)

**वैशम्पायनः**

**एतच्छ्रुत्वा तु वचनं धनदेन प्रभाषितम्।**
**प्राध्वं कृत्वा नमश्चक्रे कुबेराय वृकोदरः ॥ २६ ॥**

**लक्षालङ्कारः- अंसे प्राध्वत् इत्यत्र प्रकर्षेण आ सम्यक् ध्वत् पातयन्, स्थापयन्नित्यर्थः ।**

पाण्डवाश्च ततस्तेन बभूवुः सम्प्रहर्षिताः ।
ततः शक्ति गदां खड्गं धनुश्च भरतर्षभः ।
एतच्छ्रुत्वा तु वचनं धनदेन प्रभाषितम् ।
पाण्डवाश्र ततस्तेन बभूवुः सम्प्रहर्षिताः ।(०५)

**ततोऽब्रवीद्धनाध्यक्षः शरण्यः शरणागतम् ॥ २७ ॥**

**धनदः**

---

(०१) (३)शान्तनुर्;धन्विना,
(०२) (१) सभ्यक्चापे (सन्त्यक्त्वासौ);समागम्य महाकीर्तिः; (२) यथा मेरुर् (for कुल) (उ)त्थितः (for स्थितः);कुलधर्मेण पार्थिवः; कुलधु (धै)र्येण पार्थिवः,
(०३) (३)ऋषीन्विप्रान्; पूजयित्वा (for तथा विप्रान्); (४) यतः स्वर्ग (for पूजयित्वा) महातपाः;अनु (for प्रति),
(०४) (१) अति राज्ञां (ज्ञः) स; अथ आह च; अतिराजसु; अधिराजसु; अति०राजा स; राजंस्त्वा; राजेन्द्रः; (२) शान्तनुः;त्वां (for प्र); (३)स्वर्ग (for शक्र),
(०५) (२) भरतर्षभः, (३)प्रह्वं;,प्रध्मं;,पादौ;,पादे; प्राश्वं; प्राज्यं ( ज्यारहितं) (for प्राध्वं ४)पूजयित्वा (for कुबे);महात्मने (for वृको),

मानहा भव शत्रूणां सुहृदां नन्दिवर्धनः ।(01)
विभयस्ताप शैलाग्रे वशानस्सः बन्धुभिः ।। २८ ।।

सुवर्णपितृदेवानां सततं मानकृत्भवः ।
ऋजुं पश्यत मा वक्रं सत्यं वदत मानृतम् ।। २९ ।।

दीर्घं पश्यत मा ह्रस्वं परं पश्यत मा परम्।
स्वेषु वेश्मसु रम्येषु वसताम(मि)त्रतापनाः ।
कामान्न परिहास्यन्ति यक्षा वो भरतर्षभाः ।। ३० ।।(०२)

शीघ्रमेव गुडाकेशः कृतास्त्रः पुनरेष्यति।**
साक्षान्मघवता सृष्टः सम्प्राप्स्यति धनञ्जयः ।। ३१ ।।(०३)

वैशम्पायनः

एवमुत्तमकर्माणमनुशिष्य युधिष्ठिरम्।**
हस्तं(श्वेतं) गिरिवरश्रेष्ठं प्रययौ गुह्यकाधिपः ।। ३२ ।।(०४)

तं परिस्तोमसङ्कीर्णैर्नानारत्नविभूषितैः ।**
यानैरनुययुर्यक्षा राक्षसाश्च सहस्रशः ।। ३३ ।।(०५)

पक्षिणामिव निर्घोषः कुबेरसदनं प्रति।**

---

(०१) (१) तमब्र (for ततोऽब्र);राजराजा (for धना); (२) शरणैषिणां; शरणङ्गतः ४)सुहृदानन्दं; सुहृदां मान,

(०२) (१) सर्वेषु (for रम्येषु); (२) कर्षणाः(for तापनाः); (३)कामान्न परिहास्यन्ति; कामान्न प्रहरिष्यन्ति; कामानभिहरि०ष्यन्ति; (४) मम शासनात् ( भरं ),

(०३) (१) चापि (for एव); (२) पुनरेष्यति (for पुरु); (३)स्वयं (for साक्षान्);पृष्टः;दृष्टः;(उ)त्सृष्टः; सृष्टं,

(०४) (१) एवमुत्तमधर्माणम् (उत्त्वैवं शुभकर्माणम्);, एवमुत्तमकुर्वाणम्; (२) अनुशास्य, ३)श्वेतं; वस्तुं (for अस्तं);अस्तङ्गिरिगते सूर्ये; अस्तं गिरिमिवादित्यः (साद्य) ४)प्रयातो;,

(०५) (१) तं (ते) परिस्तोमसंस्तीर्णैर्;,परिवृत्तोथ सङ्कीर्णैर् ;तं परिव्यो०मसं, (२) नानारजत (नानाकनक०; महारजत)भूषितैः,

बभूव परमाश्वानामैरावतपथे यथाम् ।। ३४ ।।(०१)

लक्षालङ्कारः- ऐरावणपथे यताम् इत्यत्र ऐरावणाख्यः कुबेरसखा, तस्य पथे यतां गच्छताम्
।

ते जग्मुस्तूर्णमाकाशं धनाधिपतिवाजिनः ।**
प्रकर्षन्त इवाभ्राणि पिबन्त इव मारुतम् ।। ३५ ।।

ततस्तानि शरीराणि गतसत्त्वानि रक्षसाम्।**
अपाकृष्यन्त शैलाग्राद्धनाधिपतिशासनात् ।। ३६ ।।(०२)

तेषां हि शापकालः स कृतोऽगस्त्येन धीमता।**
समरे निहतास्तस्माच्छापस्यान्तोऽभवत्तदा ।। ३७ ।।(०३)

पाण्डवाश्च महात्मानस्तेषु वेश्मसु ताः क्षपाः(तां क्षपाम्)।
सुखमूषुर्गतोद्वेगाः पूजिताः सर्वराक्षसैः ।। ३८ ।।(०४)

अस्मिन् पर्वणि १३५अध्याये ३८श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि यक्षयुद्धपर्वणि पञ्चत्रिंशदधि
कशततमोऽध्यायः ।। १३५ ।।

(यक्षयुद्धपर्वणि ... अध्यायः)

# १३६. षट्त्रिंषदधिकशततमोऽध्यायः

**आर्ष्टिषेणेन युधिष्ठिरं प्रति मेरुमन्दरवर्णनपूर्वकं सप्तर्षिदक्षादिप्रजापतिमेरुशिखरस्थि तचतुर्मुखसदनवर्णनं कृत्वा प्रकृतेः परस्ताद्वर्तमानस्य श्रीवैकुण्ठस्य च वर्णनपूर्वकं**

(०१) (३)माश्चर्यम् (for माश्वानाम्); (४) ऐरावणपथे;यथा (for यताम्),

(०२) (३)व्यपा; अप,

(०३) ( वैशं०; (१) स (for हि);नाश (for शाप);(अ)पिः; हि; स (तु);(अ)यं (for सौ); तेषामयं शापकालः; (४) शापस्यान्तोभवत्तदा,

(०४) (१) पाण्डवापि; वाश्च; वाः० सु; (२) स्वेषु (for तेषु);ताः क्षपाः; (४) ताः सह (ता यक्ष०) राक्षसैः,

चन्द्रसूर्यादिगतिप्रकारनिरूपणम् ।।

वैशम्पायनः

ततः सूर्योदये धौम्यः पाञ्चालीसहितांश्च तान् ।**
आर्ष्टिषेणेन सहितः पाण्डवानभ्यवर्तत ।। १ ।।(०१)

लक्षालङ्कारः- अभ्यवर्तत अभिययौ ।

तेऽभिवाद्यार्ष्टिषेणस्य पादौ धौम्यस्य चैव ह ।**
ततः प्राञ्जलयः सर्वे ब्राह्मणांस्तानपूजयन् ।। २ ।।(०२)

आर्ष्टिषेणं परिष्वज्य पादौ धौम्यस्य चैवः ।(०३)
ततो युधिष्ठिरं धोम्यो गृहीत्वा दक्षिणे करे।
प्राचीं दिशमभिप्रेक्ष्य महर्षिरिदमब्रवीत् ।। ३ ।।(०४)

आर्ष्टिषेणः

असौ सागरपर्यन्तां भूमिमावृत्य तिष्ठति।**
शैलराजो महाराज मन्दरोऽति विराजते ।। ४ ।।(०५)

इन्द्रवैश्रवणावेतां दिशं पाण्डव रक्षतः ।। ५ ।।(०६)

पर्वतैश्च वनान्तैश्च काननैश्चैव शोभिताम्।(०७)

एतदाहुर्महेन्द्रस्य राज्ञो वैश्रवणस्य च ।**

---

(०१) (२) पाञ्चाली शुभदर्शना;,पाञ्चाली सुहृदश्च ते (तान्); पाञ्चालीस०हितांश्च तान् (तश्च ते; तश्च तान्); (३)आर्ष्णि०सेनेन;सहिताः; तं; तान्, कृत्वाऽऽह्निकमरिन्दम

(०२) (२) हि (for ह),

(०३) (( भरतर्पभ,),

(०४) (धर्म०राजं स्पृशन्पाणौ पाणिना स महातपाः; (३)अथो०दीक्ष्य (for अभिप्रेक्ष्य),

(०५) (३)महावीर्य (for राज); (४) (ऽ)तिविराजते (ति);हि विराजते; (ऽ)भि (हि)विराजयन्,

(०६) (१) ईद्रवैश्रवणावेतौ; णोपेतां; इन्द्रो वैश्रवणोपेतो; (२) रक्षितः; रक्षितां; रक्षत (तं);ति,

(०७) (४) च,(ए)व (for (उ)प); शोभितं,

ऋषयः सर्वधर्मज्ञाः सद्म तात मनीषिणः ॥ ६ ॥(०१)

अतश्चोद्यन्तमादित्यमुपतिष्ठन्ति वै प्रजाः ।**
ऋषयश्चापि धर्मज्ञाः सिद्धाः साध्याश्च देवताः ॥ ७ ॥(०२)

यमस्तु राजा धर्मज्ञः सर्वप्राणभृतां प्रभुः ।**
प्रेतसत्त्वगतिं ह्येनां दक्षिणामाश्रितो दिशम् ॥ ८ ॥(०३)

एतत्संयमनं पुण्यमतीवाद्भुतदर्शनम्।**
प्रेतराजस्य भवनमृद्ध्या परमया युतम् ॥ ९ ॥

यं प्राप्य सविता राजन्सत्येन प्रतितिष्ठति।**
अस्तं पर्वतराजानमेतमाहुर्मनीषिणः ॥ १० ॥(०४)

लक्षालङ्कारः- अस्तं वर्पतराजानम् इत्यत्र मेरोः प्राचीदिशि स्थितानाम् अस्तमयपर्वतम् ।

एतं पर्वतराजानं समुद्रं च महोदधिम्।**
आवसन्वरुणो राजा भूतानि परिरक्षति ॥ ११ ॥(०५)

उदीचीं दीपयन्नेष दिशं तिष्ठति वीर्यवान्।**
महामेरुर्महाभाग शिवो ब्रह्मविदां गतिः ॥ १२ ॥(०६)

यस्मिन्ब्रह्मसदश्चैव भूतात्मा चावतिष्ठते।**

---

(०१) (१) एताम्;! एतम्; एवम् (for एतद्); (३)चापि;,चैव (for सर्व); (४) सर्वे (for सद्म); संयुक्ताश्च मनी,

(०२) (२) उपातिष्ठन्त; उदतिष्ठन्ति;द्विजाः(for प्रजाः) (३)चाथ; चैव (for सर्व) (for चापि,

(०३) (१) च (for तु);राजन्;धर्मज्ञः(for धर्मात्मा०); (२) वरः (for प्रभुः); (३)प्रेतसत्वैर्ग( र्यु)ताम्; प्रेतैः सत्वैर्गतैर् (ताम्); अगस्तिसेविताम्; प्रेतसत्व (०सिद्ध)गतिम्; गती;ह्येतां; ह्येनां (for एतां); (४) दक्षिणां आश्रितो; आश्रितः दिशं;आस्थितो,

(०४) (१) तं; सं०; स (for यं); (४) एतद् (for एतम्),

(०५) (१) एवं; एनं; स तं (for एतं),

(०६) (२) वीर्यवान् (भानुमान्); मूर्तिमान्; (३)गिरिवरः; महाराज; महाभागः,

प्रजापतिः सृजन्सर्वं यत्किञ्चिज्जङ्गमागमम् ।। १३ ।।[०१]

यानाहुर्ब्रह्मणः पुत्रान्मानसान्दक्षसप्तमान्।**
तेषामपि महामेरुः शिवं स्थानमनामयम् ।। १४ ।।[०२]

अत्रैव प्रतितिष्ठन्ति पुनरत्रो(रेवो)दयन्ति च ।**
सप्त देवर्षयस्तात वसिष्ठप्रमुखाः सदा ।। १५ ।।[०३]

देशं विरजसं पश्य मेरोः शिखरमुत्तमम्।**
यत्रात्मतृप्तैरध्यास्ते देवैः सह पितामहः ।। १६ ।।[०४]

यमाहुः सर्वभूतानां प्रकृतेः प्रकृतिं ध्रुवम्।**
अनादिनिधनं देवं प्रभुं नारायणं परम् ।। १७ ।।[०५]

ब्रह्मणः सदनात्तस्य परं स्थानं प्रकाशते।**
देवाश्च(देवा) यं(अपि) न पश्यन्ति सर्वतेजोमयं शुभम्।। १८ ।।[०६]

अत्यर्कानलदीप्तं तत्स्थानं विष्णोर्महात्मनः ।**
स्वयैव प्रभया राजन्दुष्प्रेक्ष्यं देवदानवैः ।। १९ ।।

प्राच्यां नारायणस्थानं मेरावतिविराजते ।। २० ।।[०७]

---

(०१) (१) अस्मिन्;ब्रह्मविदश्चैव;यस्मिन्ब्राह्मणसङ्घैश्च; (२) तिष्ठति;(ए)व; (अ)थ; वै (for च); भूतात्मा चावतिष्ठते (ति); (३)भूतानि;;सर्गं; विश्वं;स्वर्गं (for सर्वं);प्रजापतिः सूजन्सर्वं,

(०२) (२) मानुषान्;ऋषिसत्त०मान्; दक्षसत्तमान्; (३)महद्ध्येतत्; महासेतुः; महामेरोः (रौ) ४)स्थानमेतद्; शिवं स्थानम्;;अनुत्तमम्,

(०३) (२) अभ्यु०; एवो (for अत्रो); (३)पार्थ (for तात); (४) तथा; ततः; तदा,

(०४) (१) एतद्; एतं; देवं; एवं (for देशं); (३)यत्रास्ते भगवान्देवो; आत्मतृप्तैर्य (श्च) तैर्यत्र; (४) नित्यमास्ते (for देवै सह),

(०५) (२) धुवां;;प्रवृत्ति प्रकृतेः परां (रं); प्रकृतिं ( तिः) प्रकृतेः परं; प्रवृत्ति प्रकृतेर्भुजं प्रकृतिं प्रकृतेर्धुव; (४) प्रभुं;हरिं (for परम्),

(०६) (३)यज्ञात्; युक्तान् (for यत्नात्);अपि देवा न गच्छन्ति; देवा अपि न पश्यन्ति देवापि यं न पश्यन्ति; अपि देवा यं न यान्ति; (४) सर्व०(for दिव्यं);शुभं (for शिवम्);तत्र मायामयं शिवं,

(०७) (( नारायणस्तात (for स्थानं); मेरोरथ; मेरावत्र; मेरावभि०; मम राजन्;मेरावति०),

**यत्र भूतेश्वरस्तात सर्वप्रकृतिरात्मभूः**
**भासयन्सर्वभूतानि सुश्रियाभिविराजते ।। २१ ।।**

**नात्र ब्रह्मर्षयस्तात कुत एव महर्षयः ।**
**प्राप्नुवन्ति गतिं ह्येतां यतीनां कुरुसत्तम ।। २२ ।।** (०१)

**न तं ज्योतींषि सर्वाणि प्राप्य भासन्ति पाण्डव ।****
**स्वयं प्रभुरचिन्त्यात्मा तत्र ह्यतिविराजते ।। २३ ।।**(०२)

**यतयस्तत्र गच्छन्ति भक्त्या नारायणं हरिम्।****
**परेण तपसा युक्ता भाविताः कर्मभिः शुभैः ।। २४ ।।**(०३)

**योगसिद्धा महात्मानस्तमोमोहविवर्जिताः ।****
**तत्र गत्वा पुनर्नेमं लोकमायान्ति भारत।**(०४)
**स्वयम्भुवं महात्मानं देवदेवं सनातनम् ।। २५ ।।***

**स्थानमेतन्महाभाग ध्रुवमक्षयमव्ययम्।****
**ईश्वरस्य सदा ह्येतत्प्रणमात्र युधिष्ठिर ।। २६ ।।**(०५)

एनं त्वहरहर्मेरुं सूर्याचन्द्रमसौ ध्रुवम्।

प्रदक्षिणमुपावृत्य कुरुतः कुरुनन्दनः ।

ज्योतींषि चाप्यशेषेण सर्वाण्यनघ सर्वतः ।

---

(०१) ((१) भावयन्;;चाग्र (for भासयन्);स्व०(for सु०);कुतो ब्रह्मर्षयस्तथा; नात्र देवर्षयः कुतः;कुतो देवर्षयस्तथा;प्राप्स्यति च (for प्राप्नु );ह्येषां; ह्येनां;यतीनां भावितात्मनां,), (भावितात्मनाम्)

(०२) (१) न तज्; न तं; नात्र (for तद्वै);नात्र ज्योतींषि शास्त्राणि; (२) पाण्डव;,भारत (for नोऽपि च) प्राप्य ना०भान्ति तेजसा (प्राप्य तिष्ठन्ति पाण्डव); (३)स्वयं प्रभुः (विष्णु) रचित्यात्मा; अयं वीरः स्व भगवान्; (४) ह्यति;; (ए)वाभि०(for ह्यभि);स्वयमत्र विराजते,

(०३) (२) भक्ता; देवं (for भक्तया);विभुं; शुभं; प्रभुं (for हरिम्);भक्ता नारायणाश्रमं,

(०४) (१) जिता; यता (for महा०); (२) ततो (for तमो०);अत्र (for तत्र); नेमं लोकं,

(०५) (१) महाभाव; महाराज; (३)सदाप्यत्र (for सदा ह्येतत्); (४) प्राणिकर्तुर्; प्राणमात्रं प्रणम त्वं; प्रणमाशु,

सङ्घशः संशयः (forसर्वतः);सर्वाण्यनाम;;सङ्घशः;

परियान्ति महाराज गिरिराजं प्रदक्षिणम्।

उपावृत्य;कुरु०नन्दन;ज्योतींष्यनेन मार्गेण;

(अ)स्य च (for (अ)नघ);

संर्वाण्येनमसंशयः; सर्वा०ण्येतानि नित्यतः,

**एतं ज्योतींषि सर्वाणि प्रकर्षन्भगवानपि।****
**कुरुते वितमस्कर्मा आदित्योऽभिप्रदक्षिणम्** ।। २७ ।।(०१)

**अस्तं प्राप्य ततः सन्ध्यामतिक्रम्य दिवाकरः ।****
**उदीचीं भजते काष्ठां दिशमेष विभावसुः** ।। २८ ।।(०२)

**स मेरुमनुवृत्तः सन्पुनर्गच्छति पाण्डव ।****
**प्राङ्मुखः सविता देवः सर्वभूतहिते रतः** ।। २९ ।।(०३)

**स मासान्विभजन्काले बहुधा पर्वसन्धिषु।****
**तथैव भगवान्सोमो नक्षत्रैः सह गच्छति** ।। ३० ।।(०४)

**एवमेतं त्वतिक्रम्य महामेरुमतन्द्रितः ।****(०५)
**सोमश्च विभजन्कालं बहुधा पर्वसन्धिषु** ।। ३१ ।।

---

(०१) (१) एनं; एतज्; एवं; एष (for एतं); (३)वितमः कर्ता;, मस्कत्वं; मः कर्म; मः कामं,

(०२) (२) युधिष्ठिर (for दिवा); (३)राजन्; पूर्वं; पूर्वा; काले (for काष्ठां); (४) एव (for एष); बहुधायं विभावसुः; बहुधा पर्वसन्धिषु,

(०३) (१) सुमेरु,स (for सन्);मेरुमेतमुपावृ (श्रि)त्य; समेतामुपवृत्तः स; (२) उपा (प)गच्छति , (for पुनर्गच्छति); (३)स तदा;, सहितं;सततं (for सविता),

(०४) (१) समं सं०; स मासान्; सदा सं०; स सम्यग् (for समासं);काले; कालान् (for कालं); (२) विभजन् (for बहुधा);सर्व (for पर्व); (३)तमेव विभ०जन् (for तथैव भगवान्);देवो (for सोमो),

(०५) (१) एतं; एनं; एवं (for एष); अतिक्रम्य; त्वतिक्रम्य;ह्यति;परिक्रा०;मन्,

भावयन्सर्वभूतानि पुनर्गच्छति मन्दरम्  ।। ३२ ।।(०१)

तथा तमिस्रहा देवो मयूखैर्भावयञ्जगत्।**
मार्गमेतदसम्बाधमादित्यः परिवर्तते  ।। ३३ ।।(०२)

सिसृक्षुः शिशिराण्येव दक्षिणां भजते दिशम्।**
ततः सर्वाणि भूतानि कालोऽभ्यर्च्छति शैशिरः  ।। ३४ ।।(०३)

स्पृशति शैशिरः; काल०स्त्वृच्छति वै शिरः,

स्थावराणां च भूतानां जङ्गमानां च तेजसा।**
तेजांसि समुपादत्ते निवृत्तः स विभावसुः  ।। ३५ ।।

ततः स्वेदक्लमौ तन्द्री ग्लानिश्च भजते नरान्।**
प्राणिभिः सततं स्वप्नो ह्यभीक्ष्णं च निषेव्यते  ।। ३६ ।।(०४)

एवमेतदनिर्देश्यं मार्गमावृत्य भानुमान्।**
पुनः सृजति वर्षाणि भगवान्भावयन्प्रजाः  ।। ३७ ।।(०५)

वृष्टिमारुतसन्तापैः सुखैः स्थावरजङ्गमान्।**
वर्धयन्सुमहातेजाः पुनः प्रतिनिवर्तते  ।। ३८ ।।

एवमेष चरन्पार्थ कालचक्रमतन्द्रितः ।**

---

(०१) (३) भास (for भाव०); (४) मन्दिरं; सागरं (for मन्दरम्),

(०२) (१) तथा तस्मिन्प्रभा देवो० ; (२) भास (for भाव); (३)एतम्; एनम्; एवम् (for एतद्),

(०३) (१) विसृजञ् (for सिसृक्षुः);शिशिरं ह्येष ( षु);शिशिराण्येव; शन्नयेषु; यैव; (२) दक्षिणां भजते; (४) काले; कालं;शैशिरम्;अर्छति (for ऋच्छति);कालमर्छन्ति शैशिरं; , कालोभ्यर्छति शैशिरः; कालः

/*(१) पुनराद (ध) त्ते; समुपादत्त०;(४) स (for सन्),

(०४) (१) स्वेदक्लमौ; स्वेदक्लमसू;; प्राणिनः (for भिः);,स्वप्ने (for स्वप्नो);स्वप्ने ष्वभीष्टं; स्वप्ने स्वभीष्टं; स्वप्नमभीक्ष्णं; स्वप्नान०भीक्ष्णं समु (for पर्यु)पासते,

(०५) (१) एवम्; एतम् (for एतद्); (४) प्लाव; पाल (for भाव),

प्रकर्षन्सर्वभूतानि सविता परिवर्तते ।। ३९ ।।

सन्तता गतिरेतस्य नैष तिष्ठति पाण्डव ।**
आदायैव तु भूतानां तेजो विसृजते पुनः ।। ४० ।।(०१)

विभजन्सर्वभूतानामायुः कर्म च भारत।**
अहोरात्रं कलाः काष्ठाः सृजत्येष सदा विभुः ।। ४१ ।।(०२)

अस्मिन् पर्वणि १३६ अध्याये ४१श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि यक्षयुद्धपर्वणि षट्त्रिंशदधिकशततमोऽध्यायः ।। १३६ ।।

(यक्षयुद्धपर्वणि ... अध्यायः)

# १३७. सप्तत्रिंशदधिकशततमोऽध्यायः

इन्द्रादधिगतास्त्रेणार्जुनेन स्वर्गाद् गन्धमादननिवासियुधिष्ठिरादीन् प्रत्यगमनम् ।। १ ।।
अर्जुनेन युधिष्ठिरादीन् प्रति संक्षेपेण स्वकीयस्वर्गनिवासप्रकारकथनम् ।। २ ।।

वैशम्पायनः

तस्मिन्नगेन्द्रे वसतां तु तेषां महात्मनां स(म)द्व्रतमास्थितानाम्।
रतिः प्रमोदश्च बभूव तेषामाकाङ्क्षतां दर्शनमर्जुनस्य ।। १ ।।(०३)

तान्वीर्ययुक्तान्सुविशुद्धकामांस्तेजस्विनः सत्यधृतिप्रधानान्।

---

(०१) (३)आदधत्स (न्स)र्वभूतानां; आदावेव तु भू;; आददत्स०(न्स) र्वभू ; आदायैवं तु भू ४)तेजांसि विसृजन्पुनः( ०न्प्रभुः),

(०२) (१) विसृजन्; भगवन् (for विभजन्); (२) पाण्डव (for भारत); (३)अहोरात्रं; अहोरात्राः०, (४) (ए)व (for (ए)ष);भवत्प्रभुः;विभावसुः(for सदा विभुः); प्रभुः; हरिः(for विभुः),

(०३) (२) धर्मा (for महा); सत्यवतां कुरूणां; भारत पाण्डवानां; सद्व्रतमाश्रि०तानां; (३)राजन् (for तेषाम्); (४) अच्युतस्य (for अर्जुनस्य),

सम्प्रीयमाणा बहवोऽभिजग्मुर्गन्धर्वसङ्घाश्च महर्षयश्च ।। २ ।।(०१)

तं पादपैः पुष्पधरैरुपेतं नगोत्तमं प्राप्य महारथानाम्।**
मनः प्रसादः परमो बभूव यथा दिवं प्राप्य मरुद्गणानाम् ।। ३ ।।(०२)

मयूरहंसस्वननादितानि पुष्पोपकीर्णानि महाचलस्य।**
शृङ्गाणि सानूनि च पश्यमाना गिरेः परं हर्षमवाप्य तस्थुः ।। ४ ।।(०३)

साक्षात्कुबेरेण कृताश्च तस्मिन्नगोत्तमे संवृतकूलरोधसः ।
कादम्बकारण्डवहंसजुष्टाः पद्माकुलाः पुष्करिणीरपश्यन् ।। ५ ।।(०४)

क्रीडाप्रदेशांश्च समृद्धरूपान्क्यसवेदिकांस्ते न्यवसन्सुवेशान्।
सुचित्रमाल्यावृतजातशोभान्।
मणिप्रकीर्णश्च मनोरमांश्च यथा भवेयुर्धनदस्य राज्ञः
।। ६ ।।(०५)

अनेकवर्णैश्च सुगन्धिभिश्च महाद्रुमैः सन्ततमभ्रजालैः ।**
तपः प्रधानाः सततं चरन्तः शृङ्गं गिरेश्चिन्तयितुं न शेकुः ।। ७ ।।(०६)

---

(०१) (१) सत्यसन्धान् (for वीर्ययुक्तान्);स०(for सु);कामान् (for सत्त्वान्);वीर्यान्वितांस्त ाांश्च विशुद्ध; (२) महौजसः पाण्डुसुतांस्तदानीं; तेजस्विनः;साधुधृतिप्रधानान्;,नः सत्यविधिप्रमाणान्; तेजः (तप)स्विनः शस्त्रभृतां वरिष्ठान्; (३)सम्प्रीयमाणान्; बहुधा, (for बहवो); (४) गन्धर्वमुख्या;, ससिद्धसङ्घा,

(०२) (१) पुष्पवरैर्; फलैर्;०वनैर्, (३) क०ख०घ०प्रथमो (for परमो),

(०३) (१) स्वरनादितानि;०स्वनवन्तितानि;,०प्रतिनादितानि; (२) पुष्पप्रकीर्णानि; पुष्पोपकीर्णस्य; पुष्पावकीर्णानि,, महाबलस्य०;,चलानि; (४) गिरेरपारं परमाप्य तस्थुः,,

(०४) (१) स्वयं (for साक्षात्);च सत्कृताश्च (for कृताश्च तस्मिन्); कृतार्था (for च तस्मिन्); (२) कूल०रोधाः;०कूटगुप्ताः; गूढगुल्माः;०गूढगुप्ताः (कूटगुल्माः) (forकूलरोधसः);(३)कादम्बकारण डवहंसयुक्ताः; कारण्डकादम्बकहंसजुष्टाः; (४) पद्मान्विताः; समाकुलाः; पद्माकराः,

(०५) (१) समृद्ध; (२) सदेविकांसोद्यतपत्रवेगान्; सवेदिकांस्ते न्यवसन्सुवेशा (वेश्मा; गुप्ता)न् ३)मणिप्रवेकप्रगृही०तजालान्; मणिप्रवेणान्सुमनोहरांश्च; मणिप्रकीर्णांश्च मनोरमांश्च; मणिप्रकीर्णान्सुमनो०हरांश्च,

(०६) (२) महाधनैः;संवृतम्;,सङ्गतम् (for सन्ततम्); अभ्रमा०लिहन्; अभ्रमालिनं;अभ्र जालैः; अभ्रमालि (ली);,अभ्रवन्नु; अभ्रलेहिभिः; (३)प्रभावात् ( वं) (for प्रधानाः) ४)सर्वं; शृगान्,

स्वतेजसा तस्य नगोत्तमस्य महौषधीनां च तथा प्रभावात्।
विभक्तभावो न बभूव कश्चिद्क्यनिशामुखं प्राज्य नरर्षभाणाम्क्य
अहोनिशानां पुरुषप्रवी ।। ८ ।।(०१)

यमास्थितः स्थावरजङ्गमानि विभावसुर्भावयतेऽमितौजाः ।
तस्योदयं चास्तमनं च वीरास्तत्र स्थितास्ते ददृशुर्नृसिंहाः ।। ९ ।।(०२)

रवेस्तमिस्रागमनिर्गमांस्ते तथोदयं चास्तमनं च वीराः ।**
समावृताः प्रेक्ष्य तमोनुदस्य गभस्तिजालैः प्रदिशो दिशश्च ।। १० ।।(०३)

स्वाध्यायवन्तः सततक्रियाश्च धर्मप्रधानाश्च शुचिव्रताश्च ।
सत्ये स्थितास्तस्य महारथस्य सत्यव्रतस्यागमनप्रतीक्षाः ।। ११ ।।(०४)

इहैव हर्षोऽस्तु समागतानां क्षिप्रं कृतास्त्रेण धनञ्जयेन।**
इति ब्रुवन्तः परमाशिषस्ते पार्थास्तपोयोगपरा बभूवुः ।। १२ ।।

दृष्ट्वा विचित्राणि गिरौ वनानि किरीटिनं चिन्तयतामभीक्ष्णम्।
बभूव रात्रिर्दिवसश्च तेषां संवत्सरेणैव समानरूपः ।। १३ ।।(०५)

यदैव धौम्यानुमते महात्मा कृत्वा जटां प्रव्रजितः स जिष्णुः ।
तदैव तेषां न बभूव हर्षः कुतो रतिस्तद्गतमानसानाम्।। १४ ।।(०६)

---

(०१) (३)विभिन्नभावो;विभ (विवि )क्तरूपः सविता बभूव; (४) अहोनि०शानां; दिवानिशं प्राप्य नरर्षभाणां,

(०२) (१) यस्तेजसा; समास्थितः; जङ्गमानां; (२) भावयन्नेव भा(या)ति; भातिनिशा;;भावयते महौजाः (च यानि; महात्मा);,भासयन्नेव याति; भावयिता हरीशः; (३)चास्तमनं; , पार्थासू;;वीर, (for वीरासू); (४) (आ)श्रिता; उषिता (for स्थिता),

(०३) (१) ०निर्गमानां;, निर्गमं ते (for ०निर्गमांस्ते);च (for ते); (२) तस्योदयं;चास्तमनं (३)समागताः,

(०४) (३) रता (for स्थिता),

(०५) (१) गिरेर् (for गिरौ); (४) (इ)व,(for (ए)व);समानकल्पः,

(०६) (१) यथैव (for यदैव); धौम्यानुमतो; (२) जटां,

**भ्रातुर्नियोगात्तु युधिष्ठिरस्य वनादसौ वारणमत्तगामी।****
**यत्काम्यकात्प्रव्रजितः स जिष्णुस्तदैव ते शोकहता बभूवुः ।। १५ ।।**(०१)

सन्त्यज्य कामान्प्रव्रजितास्तदैव पार्थास्तदा शोकपरा बभूवुः ।(02)

**तथैव तं चिन्तयतां सिताश्वमस्त्रार्थिनं वासवमभ्युपेतम्।**
**मासोऽथ कृच्छ्रेण तदा व्यतीतस्तस्मिन्नगे भारत भारतानाम्।। १६ ।**(०३)

उषित्वा पञ्च वर्षाणि सहस्राक्षनिवेशने।
अवाप्य दिव्यान्यस्त्राणि सर्वाणि विबुधेश्वरात्।(०४)
आग्नेयं वारुणं सौम्यं वायव्यमथ वैष्णवम्।
ऐन्द्रं पाशुपतं ब्राह्मं पारमेष्ठ्यं प्रजापतेः ।
यमस्य धातुः सवितुस्त्वष्टुर्वैश्रवणस्य च ।
तानि प्राप्य सहस्राक्षादभिवाद्य शतक्रतुम्।
अनुज्ञातस्तदा तेन कृत्वा चापि प्रदक्षिणम्।
आगच्छदर्जुनः प्रीतः प्रहृष्टो गन्धमादनम्।। २० ।।

**ततः कदाचिद्धरिसम्प्रयुक्तं महेन्द्रवाहं सहसोपयातम्।****

---

(०१) (१) क०घ०नास्त्ययं श्लोकः,निदेशात् (for नियोगात्);च; स (for तु); (२) जिष्णुर्वनाद्; वनाज्जिष्णुर्;,वनादगाद् (for वनादसौ); यदा वनगमत्तगजेद्रगामी; (३) स (for यत्);स पार्थः; तदैव;तथैव (for स जिष्णुस्);,

(०२) ((२) पार्थाः सर्वे; पार्थास्च ते; पार्थास्तदा (for तदैव ते ); शोकपरा, तदैव शोको महतां बभूव; तदैव शोकोपहता बभूवुः,

(०३) (१) एवं (for तथा);हि; एव (for तु);अभीक्ष्णम् (for सिताश्वम्); (२) अभ्युपैति (३)व्यपेतस्, (for व्यतीतस्); कालः स कृच्छ्रेण महानतीतः; मासाश्च कृछ्रेण तथा व्यतीताः; (४) तस्मिन्वने; नगोत्तमं,

(०४) ((१) वासवस्य (for सहस्राक्ष);(२) अधीत्य सर्वशास्त्राणि दृष्ट्वा च विबुधेश्वरात; (३)वायव्यम (व्यं चा) स्त्रमायुधं;चाभि०(for चापि);(४) हृष्टो द्वैतवनं सरः,

विद्युत्प्रभं प्रेक्ष्य महारथानां हर्षोऽर्जुनं चिन्तयतां बभूव ।। १७ ।।(०१)

स दीप्यमानः सहसान्तरिक्षं प्रकाशयन्मातलिसङ्गृहीतः ।
बभौ महोल्केव घनान्तरस्था शिखेव चाग्नेर्ज्वलिता विधूमा।। १८ ।।(०२)

तमास्थितः सन्ददृशे किरीटी स्रग्वीनवान्याभरणानि बिभ्रत्।
धनञ्जयो वज्रधरप्रभावः श्रिया ज्वलन्पर्वतमाजगाम।। १९ ।।(०३)

स शैलमासाद्य किरीटमाली महेन्द्रवाहादवरुह्य तस्मात्।**
धौम्यस्य पादावभिवाद्य धीमानजातशत्रोस्तदनन्तरं च ।। २० ।।(०४)

वृकोदरस्यापि च वन्द्यपादौ माद्रीसुताभ्यामभिवादितश्च ।
समेत्य कृष्णां परिसान्त्व्य चैनां प्रह्वोऽभवद्भ्रातुरुपह्वरे सः ।। २१ ।।(०५)

बभूव तेषां परमः प्रहर्षस्तेनाप्रमेयेण समागतानाम्।**
स चापि तान्प्रेक्ष्य किरीटमाली ननन्द राजानमभिप्रशंसन्।। २२ ।।(०६)

यमास्थितः सप्त जघान पूगान्दितेः सुतानां नमुचेर्निहन्ता।
तमिन्द्रवाहं समुपेत्य पार्थाः प्रदक्षिणं चक्रुरदीनसत्त्वाः ।। २३ ।।(०७)

---

(०१) ( वेशं उ; (३)नरर्ष० भाणां (for महा),

(०२) (१) सं०; प्र० (for स),

(०३) (१) समा (for तमा); (२) नवान्या; समाल्या (for वराण्या); (४) पर्वतमाससाद मेरुमथाजगाम,

(०४) (३)विप्रर्षभाणाम् (for धौम्यस्य पादाव्);अभिनन्द्य; अभिवन्द्य;धीमान्; पादान् (for पूर्वम्),

(०५) (१) (अ)भिननन्दः;(अ)भिववन्दः;(अ)थ ववन्द (for अपि ववन्द);च वन्द्य; ( अभिवन्द्य (for ववन्द);पादौ ववन्दे (for ववन्द पादौ),

(०६) (१) परमः प्रमोदम्; परम०प्रहर्षस्; (२) येन (for येण); समेत्य तत्र (for समा); (३) सं (for तान्); (४) इति; अति (for अभि ),

(०७) (१) यमाश्रितः; यानास्थितः; समा; सैन्यान् (for पूगान्); (३)तानिन्द्र० वाहान्,

ते मातलेश्चक्रुरतीव हृष्टाः सत्कारमग्र्यं सुरराजतुल्यम्।**
सर्वान्यथावच्च दिवौकसस्ते पप्रच्छुरेनं कुरुराजपुत्राः ।। २४ ।।(०१)

तानप्यसौ मातलिरभ्यनन्दत्पितेव पुत्राननुशिष्य पार्थान्।
ययौ रथेनाप्रिमप्रभेण पुनः सकाशं त्रिदिवेश्वरस्य ।। २५ ।।(०२)

गते तु तस्मिन्नरदेववर्यः शक्रात्मजः शक्ररिपुप्रमाथी।
साक्षात्सहस्राक्ष इव प्रतीतः श्रीमान्स्वदेहादवमुच्य जिष्णुः ।। २६ ।।(०३)

शक्रेण दत्तानि ददौ महात्मा महाधनान्युत्तमरूपवन्ति।**
दिवाकराभाणि विभूषणानि प्रियः प्रियायै सुतसोममात्रे।। २७ ।।(०४)

लक्षालङ्कारः- प्रियायै श्रुतसोममात्र इत्यत्र पञ्चकुमारेष्वेकः क्षुतसोमाख्यः तस्य माता द्रौपदी तस्यै ।

ततः स तेषां कुरुपुङ्गवानां तेषां च सूर्याग्निसमप्रभाणाम् ।
विप्रर्षभाणामुपविश्य मध्ये सर्वं यथावत्कथयाम्बभूव ।। २८ ।।

देवैस्तु दत्ता हि यथास्त्रमुख्याः प्रख्यापयद्वल्कलचीरवासाः ।

अर्जुनः

एवं मयास्त्राण्युपशिक्षितानि शक्राच्च वाताच्च शिवाच्च साक्षात्।
तथैव शीलेन समाधिनाथ प्रीताः सुरा मे सहिताः सहेन्द्राः ।। २९ ।(०५)

सङ्क्षेपतो वै स विशुद्धकर्मा तेभ्यः समाख्याय दिवि प्रवासम्।

---

(०१) (१) अदीनसत्वाः (for अतीव हृष्टाः); (३) सर्वे; सर्वान् (for सर्वं); दिवौकसन्धं (धां ; घा) दिवौकसां ते (for दिवौकसस्तान्);ते (for तान्),

(०२) (२) अनुशास्य०;चैतान्; पार्थान् (for चैनान्); (४) त्रिदशेश्वरस्य,

(०३) (०कराभानि;प्रियः (for प्रीतः);प्रीतो यमाभ्यामथ याज्ञसेन्याः;प्रीतः प्रियायै शतशः प्रहृष्टः,

(०४) (१) नरदेववर्यः(र्य); नरदेववाहे; (२) शक्र०; तस्य (for सर्व),

(०५) (१) च शस्त्रा (for मयास्त्रा); (२) वायोश्च (for वाताच्च); (३) (अ)थ (for च); (४) मुदिताः (for सहिताः);बभूवुः; सुरेन्द्राः (for सहेन्द्राः),

माद्रीसुताभ्यां सहितः किरीटी सुष्वाप तामावसतिं प्रतीतः ।। ३० ।(०१)

अस्मिन् पर्वणि १३७ अध्याये ३०३लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि यक्षयुद्धपर्वण्यर्जुनाभिगमने सप्तत्रिंशदधिकशततमोऽध्यायः ।। १३७ ।।

महाभारततततात्पर्यनिर्णये २२ अध्याये

वधं वव्रे स्वशत्रूणामिन्द्रः पार्थात् स्वरूपतः ।
निवातकवचाख्यानां येषां ब्रह्मा ददौ वरम् ।
अवध्यतां सुरैर्दैत्यैर्गन्धर्वैः पक्षिराक्षसैः ।। ३०६ ।।
पुनरिन्द्रेणार्थितोऽदाज्जहीमान् नरदेहवान् ।
इति तेनार्जुनं शक्रः स्वात्मानं नरदेहगम् ।
जगाद तान् जहीत्येव किरीटं स्वं निबद्ध च ।। ३०७ ।।

# १३८. अष्टात्रिंशदधिकशततमोऽध्यायः

**अर्जुनस्य गन्धमादनशिखरमागम्य भ्रातृभिः सह समागमः । इन्द्रेण सभ्रातृकं युधिष्ठिरमेत्य जयाशीश्शंसनपूर्वकं पुनः स्वर्गं प्रति गमनम् ।।**

7वैशम्पायनः

एतस्मिन्नेव काले तु सर्ववादित्रनिःस्वनः ।**

---

(०१) ( वैशं उ; १)सुविशुद्धं;; स ( सु०) विशुद्धभावसू;,स विशुद्धधर्मा; (२) दिवः (for दिवि) प्रवासं (३) (for प्रवेशम्); (३)माद्र्याः सुताभ्यां; (४) सुखेन;,प्रतीत्य (for प्रतीतः);सुष्वाप तां वसतिं सुः (for रजनीं सं) प्रतीतः,

बभूव तुमुलः शब्दस्त्वन्तरिक्षे दिवौकसाम् ॥ १ ॥

ततो रजन्यां व्युष्टायां धर्मराजं युधिष्ठिरम्।

भ्रातृभिः सहितः सर्वैरवन्दत धनञ्जयः ।(०१)

रथनेमिस्वनश्चैव घण्टाशब्दश्च भारत।**

पृथग्व्यालमृगाणां च पक्षिणामिव सर्वशः ॥ २ ॥(०२)

रवोन्मुखास्ते ददृशुः प्रीयमाणाः कुरूद्वहाः ।

मरुद्भिरन्वितं शक्रमापतन्तं विहायसा ॥ ३ ॥(०३)

ते समन्तादनुययुर्गन्धर्वाप्सरसां गणाः ।**

विमानैः सूर्यसङ्काशैर्देवराजमरिन्दमम् ॥ ४ ॥(०४)

ततः स हरिभिर्युक्तं जाम्बूनदपरिष्कृतम्।**

मेघनादिनमारुह्य श्रिया परमया ज्वलन्।(०५)

पार्थानभ्याजगामाशु देवरागः पुरन्दरः ॥ ५ ॥

आगत्य च सहस्राक्षो रथादवरुरोह वै ॥ ६ ॥(०६)

तं दृष्ट्वैव महात्मानं धर्मराजो युधिष्ठिरः ।**

भ्रातृभिः सहितः श्रीमान्देवराजमुपागमत् ॥ ७ ॥(०७)

---

(०१) ((निशायां (for रजन्यां); अभ्यर्चत (for अवन्दत) ) १)ततः प्रभातसमये; एतेनैव तु कालेन; (२) निःस्वनः; (३)तुमलः भीमस् (for शब्दस्),

(०२) (३)तथा (for पृथग्) ;भुजङ्गव्याघ्रसिंहानां; (४) चापि; इव (for चैव);नित्यशः; भारत (for सर्वश),

(०३) (( ददृशुः (for सम्प्रेक्ष्य),),

(०४) (१) ते (for तं); अभि (for अनु); (२) प्सरसां (for पसरसस्) ;तदा; गणाः (for तथा); (३) विमाने,

(०५) (२) परिष्कृतम्; (३)मेघस्यदनम्; मेधमारुतम्;,मेघना०दितम्०,

(०६) (१) (अ)थ (for (आ)शु ); (३)आगम्य;; सुगन्धाच् (for आगत्य); (४) स्थन्दनादवरुह्य च,

(०७) (१) च (for (ए)व); (२) धर्मपुत्रो;,देवराजं (for धर्म०राजो),

पूजयामास चैवाथ विधिवद्भूरिदक्षिणः ।**
यथार्हममितात्मानं विधिदृष्टेन कर्मणा ।। ८ ।।

धनञ्जयश्च तेजस्वी प्रणिपत्य पुरन्दरम्।**
भ्रातृ(भृत्य)वत्प्रणतस्तस्थौ देवराजसमीपतः ।। ९ ।।

आघ्राय तं(आप्यायत) महातेजाः कुन्तीपुत्रो युधिष्ठिरः ।
धनञ्जयमभिप्रेक्ष्य विनीतं स्थितमन्तिके ।। १० ।।(०१)

जटिलं देवराजस्य तपोयुक्तमकल्मषम्।**
हर्षेण महताऽऽविष्टः फाल्गुनस्याथ दर्शनात् ।। ११ ।।(०२)

बभूव परमप्रीतो देवराजं च पूजयन्।

तं तथादीनमनसं राजानं हर्षसम्प्लुतम्।**
उवाच वचनं धीमान्देवराजः पुरन्दरः ।। १२ ।।(०३)

इन्द्रः

त्वमिमां पृथिवीं राजन्प्रशासिष्यसि पाण्डव ।**
स्वस्ति प्राप्नुहि कौन्तेय काम्यकं पुनराश्रमम् ।। १३ ।।(०४)

अस्त्राणि लब्धानि च पाण्डवेन सर्वाणि मत्तः प्रयतेन राजन्।
कृतप्रियश्चास्मि धनञ्जयेन जेतुं न शक्यस्त्रिभिरेष लोकैः ।। १४।।(०५)

एवमुक्त्वा सहस्राक्षः कुन्तीपुत्रं युधिष्ठिरम्।**
जगाम त्रिदिवं हृष्टः स्तूयमानो महर्षिभिः ।। १५ ।।

---

(०१) (१) आघ्राय तं; मूहर्याघ्रातो; आहूय तं;, आज्ञाय तं;, आस्थाय तं;,अजायत (for आप्यायत),

(०२) (४) फाल्गुनस्य,,

(०३) (१) दीन०वदनं; (२) हर्षगद्गदं; संयुतं; (४) देवराजं; प्रेक्ष्य राजा;,धर्मराजं (for देव),

(०४) (द्रः; (२) भोक्षसे हतकण्टकां; (३)चाप्नुहि (for प्राप्नुहि),

(०५) (१) प्राप्तान्यथास्त्राणि; अस्त्राण्यवाप्तानि (for अस्त्राणि लब्धानि); धनञ्जयेन (for च पाण्डवेन); (२) प्रवरेण राजन्; गिरिशाष्ठ देवात् (for प्रयतन राजन्); (४) एव (for एष),

धनेश्वरगृहस्थानां पाण्डवानां समागमम्।**
शक्रेण य इदं विद्वानधीयीत समाहितः ।। १६ ।।[०१]

संवत्सरं ब्रह्मचारी नियतः संशितव्रतः ।**
स जीवेद्धि निराबाधः स सुखी शरदां शतम् ।। १७ ।।[०२]

अस्मिन् पर्वणि १३८ अध्याये १७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि

अष्टात्रिंशदधिकशततमोऽध्यायः ।। १३८ ।।

## १३९.एकोनचत्वारिंशदधिकशततमोऽध्यायः

**अर्जनेन स्वस्य किरातरूपिणा महादेवेन सह युद्धप्रकारस्व पाशुपतास्त्रलाभप्रकारस्य च कथनम् ।।**

वैशम्पायनः

यथागतं गते शक्रे भ्रातृभिः सह सङ्गतः ।**
कृष्णया चैव बीभत्सुर्धर्मपुत्रमपूजयत् ।। १ ।।[०३]

अभिवादयमानं तं मूर्ध्न्युपाघ्राय पाण्डवम्।**
हर्षगद्गदया वाचा प्रहृष्टोऽर्जुनमब्रवीत् ।। २ ।।[०४]

---

(०१) (१) धनेश्वरालय०स्थानां; (३)इदं (for इमं);धीमान् (for विद्वान्),
(०२) (२) संयतेंद्रियः; शंसितव्रतः; (३) ख०पुत्रपौत्रैः परिवृतः श्वया परमया युतः। जीवते; जीवेद्धि; जीवति (for जीवेत); स जीवेद्भरतश्रेष्ठ (ष्ठः); (४) स सुखी;, सुमुखं; स भूमौ, (for सुसुखी),
(०३) (३)सह;,चापि (for चैव); (४) धर्मराजम्; युधिष्ठिरम् (for धर्मपुत्रम्);उपागमत् (for अपूजयत्),
(०४) (१) तं (for तु); (२) मूर्ध्यापघ्राय;,मूर्धन्याघ्राय;पाण्डवः; भारत; धर्मवित्; पार्थिवः (for पाण्डवम्);आसने समुपावेश्य पर्यपृच्छत धर्मराट्,

युधिष्ठिरः

कथमर्जुन कालोऽयं स्वर्गे व्यतिगतस्तव ।**
कथं चास्त्राण्यवाप्तानि देवराजश्च तोषितः ।। ३ ।।(०१)

सम्यग्वा ते गृहीतानि कच्चिदस्त्राणि पाण्डव ।**
कच्चित्सुराधिपः प्रीतो रुद्रो वास्त्राण्यदादुतव ।। ४ ।।(०२)

यथा दृष्टश्च ते शक्रो भगवान्वा पिनाकधृक्।**
यथैवास्त्राण्यवाप्तानि यथैवाराधितश्च ते ।। ५ ।।(०३)

यथोक्तवांस्त्वां भगवान्शतक्रतुररिन्दम।
कृतप्रियस्त्वयास्मीति तस्य ते किं प्रियं कृतम्।**
एतदिच्छाम्यहं श्रोतुं विस्तरेण महाद्युते ।। ६ ।।(०४)

यथा तुष्टो महादेवो देवराजस्तथानघ ।। ७ ।। (०५)

यच्चापि वज्रपाणेस्तु प्रियं कृतमरिन्दम।**
एतदाख्याहि मे सर्वमखिलेन धनञ्जय ।। ८ ।।(०६)

अर्जुनः

---

(०१) (२) ह्यति;,(ऽ)प्यति; प्रति (for ० व्यति ०);त्वया (for तव),
(०२) (२) पाण्डव (for भारत); (३) श्रीमान् (for प्रीतो); (४) शक्रश् (for रुद्रश्); वा (for च); दत्तवान् (for (अ)दात्तव),
(०३) (२) च (for वा) पिनाकभूत्; धृत्; (३) (ए) व; वा;(for च);०शस्त्राणि (for चास्त्राणि); वाप्तानि (for (अ)वाप्तानि); (४) वा; (ए)व (for च);आराधिताश्;हरः; त्वया (for च ते),
(०४) (१) यच्चो (for यथो);त्यं महाप्राज्ञ (for त्वां भगवान्); (२) अरिन्दमः, (३)प्रीतस् (for प्रियम्); तथा (for त्वया); (४) तस्य; यच्च (for तच्च);तेति०(for ते किं);प्रियं, कृतम्; धनञ्जय; महामते (for द्युते),
(०५) (१) दृष्टो (for तुष्टो); (२) सुर (for देव);तथा (for च ते); तथा तव; च तोषितः (for च ते नघ),
(०६) (३) यद्यच; यश्चापि; वज्रपाणेः ते; तु;,तत् (for ते);(४) प्रियं,कृतं, ;आचक्ष्व (for आख्याहि),

शृणु हन्त महाराज विधिना येन दृष्टवान्।**
शतक्रतुमहं देवं भगवन्तं च शङ्करम् ।। ९ ।।(०१)

विद्यामधीत्य तां राजस्त्वयोक्तामरिमर्दन।**
भवता च समादिष्टस्तपसे प्रस्थितो वनम् ।। १० ।।(०२)

भृगुतुङ्गमथो गत्वा काम्यकादास्थितस्तपः ।**
एकरात्रोषितः कश्चिदपश्यं ब्राह्मणं पथि ।। ११ ।।(०३)

स मामपृच्छत्कौन्तेय कासि गन्ता ब्रवीहि मे।**
तस्मा अवितथं सर्वमब्रुवं कुरुनन्दन ।। १२ ।।(०४)

स तथ्यं मम तच्छ्रुत्वा ब्राह्मणो राजसत्तम।**
अपूजयत मां राजन्प्रीतिमांश्चाभवन्मयि ।। १३ ।।(०५)

ततो मामब्रवीत्प्रीतस्तप आतिष्ठ भारत।**
तपस्वी नचिरेण त्वं द्रक्ष्यसे विबुधाधिपम् ।। १४ ।।(०६)

ततोऽहं वचनात्तस्य गिरिमारुह्य शैशिरम्।**
तपोऽतप्यं महाराज मासं मूलफलाशनः ।। १५ ।।(०७)

---

(०१) ( धनञ्जय (for अर्जुन); १)श्रूयतां मे;,श्रृणु मत्तो; श्रृणु सर्वं; शृणुष्व त्वं;,शृणु त्वं हि (for शृणु हन्त);शृणुष्वावहितो राजन्; (३)सुरेशानं;महादेवं; देवराजं (for अहं देवं,

(०२) (२) धौम्यो (for त्वयो); (३) तपसा (for भवता),

(०३) (१) भृगुतुन्दम्; अहं (for अथो); (२) आस्थितः तपः;काम्यकात्प्रस्थितस्ततः,

(०४) (२) मही०पते; वदस्व मे (for ब्रवीहि मे); (३)तस्मायवितथं; तन्मयेवि; तस्माच्चावि;,तस्मै ह्यवि०; तस्मादवि;,तस्मै यथोचितं; ,तस्मै चाविगमं;, तस्मै नावितथं;,तस्मै चापि तथा (for तस्मा अवितथं); (४) अब्रवं;कुरुसत्तम ,

(०५) (२) मुनिसत्तमः(for राज); (३) मा (for मां),

(०६) (१) स तु (for ततो); (२) तप्यस्व; तप्यं हि (for आतिष्ठ);शृणु मत्तो कुलोद्वह; तपः कुरुकुलोद्वह; ततः कुरुकुलोद्वह (for ऋव); (३) (ए)व; (इ)व (for त्वं);तपस्य (स्वि) न्नचिरेण त्वं,

(०७) (३)तपोतपं; तपोतपे; तपस्तपं; तपस्तेपे (for तपोऽतप्यं);गिरौ तस्मिन् च कौरव्य (for महा); (४) मासमेकं ज (फ)लाशनः,

द्वितीयश्चापि मे मासो जलं भक्षयतो गतः ।**
निराहारस्तृतीयेऽथ मासे पाण्डवनन्दन ।। १६ ।।[०१]

ऊर्ध्वबाहुश्चतुर्थं तु मासमस्ति स्थितस्तदा।**
न च मे हीयते प्राणस्तदद्भुतमिवाभवत् ।। १७ ।।[०२]

पञ्चमे त्वथ सम्प्राप्ते प्रथमे दिवसे गते।**
वराहसंस्थितं भूतं मत्समीपं समागमत् ।। १८ ।।[०३]

निघ्नन्प्रोथेन पृथिवीं विलिखंश्चरणैरपि।**
सम्मार्जञ्जठरेणोर्वीं विवर्तंश्च मुहुर्मुहुः ।। १९ ।।[०४]

अनु तस्यापरं भूतं महत्कैरातसंस्थितम्।**
धनुर्बाणासिमत्प्राप्तं स्त्रीगणानुगतं तदा ।। २० ।।[०५]

ततोऽहं धनुरादाय तथाक्षय्ये महेषुधी।**
अताडयं शरेणाथ तद्भूतं लोमहर्षणम् ।। २१ ।।[०६]

युगपत्तं किरातस्तु विकृष्य बलवद्धनुः ।**
अभ्याजघ्ने दृढतरं कम्पयन्निव मे मनः ।। २२ ।।[०७]

---

(०१) (३)तृतियं च; ये च; यं तु; योथ (for येऽथ); (४) मासं;मासः(for मासे),

(०२) (१) च (for तु); (३)हियते (for हि),

(०३) (१) पञ्चमे; समतिकान्ते; त्वभ्यति; त्वय सम्प्राप्ते; त्वप्यतिकान्ते; मास्यति; हतिनिष्कान्ते ३)वारहं संस्थितो; वारहसंस्थितो; वारहसंस्थितं;रुपं;भीमं (for भूतं); वारहं रूपमास्थाय; (४) अथा (इहा) गमत्;इहागत;समागमत् (for उपा),

(०४) (१) पोत्रेण; रोषेण; ओष्ठेन (for प्रोथेन);चरणैर् (for पृथिवीं); (२) विकि०रन्;,विकरन्;, उत्किरन् (for विलिखन्);विलिखन्नपि मेदिनीम्; (३)संमार्ज्य;(अ)पि (for (उ)र्वीं); समार्गमचिरेणापि; (४) निवर्तंश्च; निवर्तं च; विवर्तं स; विवर्तयन् (for विवर्तंश्च),

(०५) (२) वपुः (for महत्);कैरातमास्थितं;,कैरात्तसञ्ज्ञितं; (३) धनुष्पाण्यसि; (४) स्त्रिया चानु,

(०६) (२) तच्च; तदा (for तथा);(अ)क्षय ;(अ)क्षथ्ये;(for (अ)क्षय्यौ); (४) रोमहर्षणं,

(०७) (१) युगपत्तु; युगपत्तं;किरातस्य; किरातस्तु; (२) सुमहद्धनुः; (३) क०अनुतस्यापरं भूतं महत् कैरातमास्थितम्; अभ्याहनद्; अभ्याजघ्नद्; , अभ्य०जघ्ने; ,अभिजघ्ने; (४) मर्दिनीं (for मे मनः),

स तु मामब्रवीद्राजन्मम पूर्वपरिग्रहः ।**
मृगयाधर्ममुत्सृज्य किमर्थं ताडितस्त्वया ।। २३ ।।

एष ते निशितैर्बाणैर्दर्पं हन्मि स्थिरो भव ।**
स वर्षवान्महाकायस्ततो मामभ्यभावत ।। २४ ।।[०१]

लक्षालङ्कारः- स वर्षवान्महाकाय इत्यत्र वर्षवान् शरवर्षवान् ।

ततो गिरिमिवात्यर्थमावृणोन्मां महाशरैः ।**
तं चाहं शरवर्षेण महता समवाकिरम् ।। २५ ।।[०२]

ततः शरैर्दीप्तमुखैर्यन्त्रितैरनुमन्त्रितैः ।**
प्रत्यविध्यमहं तं तु वज्रैरिव शिलोच्चयम् ।। २६ ।।[०३]

तस्य तच्छतधा रूपमभवच्च सहस्रधा।**
तानि चास्य शरीराणि शरैरहमताडयम् ।। २७ ।।[०४]

पुनस्तानि शरीराणि एकीभूतानि भारत।**
अदृश्यन्त महाराज तान्यहं व्यधमं पुनः ।। २८ ।।[०५]

अणुर्बृहच्छिरा भूत्वा बृहच्चाणुशिराः पुनः ।**
एकीभूतस्तदा राजन्सोऽभ्यवर्तत मां युधि ।। २९ ।।[०६]

---

(०१) (३) क० स तु वर्षं; ख०स वर्मवान्; घ०स धनुष्मान् (धर्मवान्) (for वर्ष्मवान्);पार्वतीयो महामायस्; (४) तथा माम्; अभ्यभाषत; अभिभाष्य वै,

(०२) (१) मेघैर् (for ततो);गिरिर् (for गिरिम्); (२) स (for मां); (४) सहसा (for महता),

(०३) (२) क०ख०घ० पतितैरनुमन्त्रितै : सपत्रैर्; सुपत्रैर्; यन्त्रितैर् ; प्रहितैर्; पातितैर्;,पतितैर्;नागैरिव विषोल्बणैः,

(०४) (३)तस्य (for चास्य); (४) अपीडयं (for अताडयम्,),

(०५) (१) ततं (for पुन); (२) चैकी०भूतानि; त्वेकी; (३)अभ्यपश्यन् (for अदृश्यन्त) ४)शरैः (for पुनः),

(०६) (२) खयं पादो..नन्तरश्च न स्तः,महान् (for बृहत्);तथा; ततः (for पुनः); (३)एकीभूतं; एकीभूत्वा० ;महानेकः; तथानेकः (for तदा); राजन्,

यदाभिभवितुं बाणैर्न च शक्नोमि तं रणे।**
ततो महास्त्रमातिष्ठं वायव्यं भरतर्षभ ।। ३० ।।(०१)

न चैनमशकं हन्तुं तदद्भुतमिवाभवत्।**
तस्मिन्प्रतिहते चास्त्रे विस्मयो मे महानभूत् ।। ३१ ।।(०२)

भूय एव महाराज सविशेषमहं ततः ।**
अस्त्रपूगेन महता रणे भूतमवाकिरम् ।। ३२ ।।(०३)

स्थूणाकर्णमथो भाजं शरवर्षमथोल्बणम् ।
शलभास्त्रमश्मवर्षं समास्थायाहमभ्ययाम् ।। ३३ ।।(०४)

लक्षालङ्कारः- स्थूणाकर्णमयोभाजम् इत्यत्र स्थूणावत् कर्णौ अयसः पार्श्वदेशौ यस्य तम् ।

जग्रास प्रसभं तानि सर्वाण्यस्त्राणि मे नृप।
(४) (अ)हमर्दयं;(अ)हमभ्यगां (for हमभ्ययाम्) समादायाहमभ्ययां; समास्थायास्त्र०मभ्ययां; वेगमास्थाय शस्त्रवित्;जग्राह; संयामे (for जग्रास);प्राग्रसत्; प्रसभं; प्रथमं (for प्रहसन्); मे नृप (शृणु); वै नृप; भारत (for मेऽनघ)
तेषु सर्वेषु जग्धेषु ब्रह्मास्त्रं महदादिशम् ।। ३४ ।।

ततः प्रज्वलितैर्बाणैः सर्वतः सोपचीयते।**

---

(०१) (२) न वै; न च (for नैव);(अ)हं (for तं) (३) महास्त्रम् (for ऽहमस्त्रम्); ततो ह्यस्त्रं समातिष्ठं,

(०२) (१) तेनापि ना (for न चैनम);जेतुं ;, योद्धुं;,वोढं (for हन्तुं); (२) तद्भूतमतिवीर्यवत् (वान्,

(०३) (१) भूयश्चैनं; भूय एव; तत्रापि च; (३)अस्त्रजालेन; योगेन; स्तेन;पूतेन; वर्षेण,

(०४) (१) स्थूणाकर्णं च जालं च; भूतं चराजालं; कले य राजा च; कर्णमथो जालं; कर्णमथो बाणं; कर्णमिवाजालं; कारं महोजालं;; (२) शरवर्षं रणोद्धटं; वर्षा रणोद्भवं; वर्षरणोद्भवं; वर्षमथोल्बणं; वर्षं महो; (३) क०घ०शलभास्त्रमयं वर्षं समास्थायाहमभ्यगाम् । तु (for च);शलभास्त्रं चाप्मवर्षं; ,शलभास्त्रमश्मवर्षं; , शैलास्त्रेणात्मवर्षं तु;;शलभास्त्रमहावर्षं,

उपचीयमानश्च मया महास्त्रेण व्यवर्धत ।। ३५ ।।[०१]

ततः सन्तापिता लोका मत्प्रसूतेन तेजसा।**
क्षणेन हि दिशः खं च सर्वतो हि विदीपितम् ।। ३६ ।।[०२]

तदप्यस्त्रं महातेजाः क्षणेनैव व्यशातयत्।**
ब्रह्मास्त्रे तु हते राजन्भयं मां महदाविशत् ।। ३७ ।।

ततोऽहमपतं महीम् । ततः प्रहस्य तद्भूतं,[०३]

ततोऽहं धनुरादाय तथाक्षय्ये महेषुधी।**
सहसाभ्यहनं भूतं तान्यप्यस्त्राण्यभक्षयत् ।। ३८ ।।[०४]

हतेष्वस्त्रेषु सर्वेषु भक्षितेष्वायुधेषु च ।**
मम तस्य च भूतस्य बाहुयुद्धमवर्तत ।। ३९ ।।[०५]

व्यायामं मुष्टिभिः कृत्वा तलैरपि समागतैः ।**
अपारयंश्च तद्भूतं निश्चेष्टमगमं महीम् ।। ४० ।।[०६]

ततः प्रहस्य तद्भूतं तत्रैवान्तरधीयत।**

---

(०१) (१) दग्धेषु; जग्धे; ग्रस्ते (for शान्ते); (२) महद् (for अहम्); (४) पर्वतः (for सर्वतः); स्मोपचीयते; सोपचीयते; चोपचीयते; सर्वस्तैरूपचीयत;अपचीयमान;तु (for च); तदा;,तथा (for मया);सहा (मया) स्त्रेणाभ्यवर्तत,

(०२) (१) ततः सन्तापिता लोका;,ततः सन्दीपितं लोके; (२) मद्विसृष्टैः सुतेजनैः(सैः); तत्प्रसूतैः सुतेजनैः; (३)दिवं (for दिशः); (४) सुविदी; हि विदी; ,दिवि दी; (अ)भिविराजितं; (अ)पि विदी,

(०३) (२) व्यनाशयत्;, व्यशाम; (३) च; नि (for तु);ब्रह्मास्त्रेण च ते राजन्,

(०४) (२) तथाक्षवये; तावक्षय्यौ; तदाक्षय्यौ; (४) अपि अस्त्राणि; तत्तानि;,तानि च (for तान्यपि,

(०५) (१) तेष्वस्त्रेषु च सर्वेषु; एतेष्वस्त्रेषु भूतेन (सर्वेषु); (२) (अ)पि (for च);भक्षिते चायुधे तदा; (३)धर्मतस्तस्य भू,

(०६) (२) अभि०(for अपि);समाहनत्; हरत्; गतैः; हनम्; गतौ; ततौ; ०दितौ (for हतौ) प्रहरंश्च तलैरपि(३) अपारयन्; तु (for च);तद्रूपं;, तं भूतं; मां भूतं (for तज्ज्ञं); (४) निश्चेष्टोभ्यगमन्; निश्चेष्टमगमं;(निश्चेष्टो न्यपतन्); निश्चेष्टश्चागमन्;अहं चापतयंनिस्चेष्टश्चापतं; निश्चेष्टश्चागमं,

**सह स्त्रीभिर्महाराज पश्यतो मेऽद्भुतोपमम्** **।। ४१ ।।**

ततश्चिन्तां समगमं पूजयिष्याम्यहं पुनः ।

इति पुष्पाणि सङ्गृह्य सैकतं शङ्करं प्रभुम् ।[०१]

पूजयिष्यस्तमद्राक्षं किरातं पुष्पधारिणम् ।

ततश्चान्यानि पुष्पाणि पूजयिष्यन्पुनः पुनः ।[०२]

तानि सर्वाणि दृष्ट्वाहं किरातस्य च मूर्धनि ।

इति कृत्वा महादेवं प्रणतोऽस्मि पुनः पुनः ।।[०३]

ततः (for सह); (४) पश्यतो मेऽद्भुतं महत्; तदद्भुतमिदं महत्; तदद्भुत०मिवाभवत्

**एवं कृत्वा स भगवांस्ततोऽन्यद्रूपमास्थितः ।****
**दिव्यमेव महाराज वसानोऽद्भुतमम्बरम्** **।। ४२ ।।**[०४]

**हित्वा किरातनुं तां च भगवांस्त्रिदशेश्वरः ।****
**स्वरूपं दिव्यमास्थाय तस्थौ तत्र महेश्वरः** **।। ४३ ।।**[०५]

लक्षालङ्कारः- हित्वा मृगतनुम् इत्यत्र मुगयोः लुब्धकस्य तनुम् ।

**अदृश्यत ततः साक्षाद्भगवान्गोवृषध्वजः ।****
**उमासहायो व्यालधृग्बहुरूपः पिनाकधृक्** **।। ४४ ।।**[०६]

---

(०१) ((१) ख० ततश्चिन्तां समगमं पूजयिष्याम्यहं पुनः ।।(२) ततः पुष्पाण्युपाहॉत्य सैकतं सङ्करं प्रभुम्,

(०२) ((१) पूजयिष्यंस्तमद्राक्षं किरातं पुष्पधारिणम् ।।(२) ततश्चन्यानि पुष्पाणि पूजयिष्यन् पुनःपुनः ।,

(०३) ( तानि सर्वाणि दृष्ट्वा..हं किरातस्य मूर्धनि ।। इति कृत्वा महादेवं प्रणतो..स्मि पुनः पुनः ।,

(०४) (१) मुख्यं (for एवं); (२) आस्थितः(for आत्मनः); (३)एकं;चैव (for एव);, दि० यमप्रतिमं चित्रं; (४) वसानाबेर०मुत्तमं,

(०५) (१) तद्रन्थपरूपं; मृगतनुं (युतां) तां (for किरातरूपं);तद्; स (for च); (३)स्वं रूपं, (४) तस्थौ तत्र,

(०६) (१) सोदृश्यत; (२) भगवान्वै (न्मे) वृषध्वजः;भगवान्वृषभध्वजः; (३)वृषधृग्;;व्याडधृग् व्यालधृद्; व्यालधृग् (for हरिदृग्); धनुर्गृह्य तथा पाणौ; (४) पिनाकधृत,

स मामभ्येत्य समरे तथैवाभिमुखं स्थितम्।**
शूलपाणिरथोवाच तुष्टोऽस्मीति परन्तप ।। ४५ ।।[०१]

ततस्तद्धनुरादाय तूणौ चाक्षय्यसायकौ।**
प्रादान्ममैव भगवान्धारयस्वेति चाब्रवीत् ।। ४६ ।।[०२]

श्रीमहेश्वरः

तुष्टोऽस्मि तव कौन्तेय ब्रूहि किं करवाणि ते।
यत्ते मनोगतं वीर तद्ब्रूहि वितराम्यहम्।**
अमरत्वमपाहाय ब्रूहि यत्ते मनोगतम् ।। ४७ ।।[०३]

लक्षालङ्कारः- अमरत्वमपाहाय इत्यत्र अमरत्वं मर्त्यदेहेन सहैव अमरत्वम् ।

अर्जुनः

ततः प्राञ्जलिरेवाहमस्त्रेषु गतमानसः ।**
प्रणम्य मनसा शर्वं ततो वचनमाददे ।। ४८ ।।[०४]

भगवान्मे प्रसन्नश्चेदीप्सितोऽयं वरो मम
अस्त्राणीच्छाम्यहं ज्ञातुं यानि देवेषु कानिचित्। ।। ४९ ।।[०५]

ददानीत्येव भगवानब्रवीत्त्र्यम्बकश्च माम्।[०६]
रौद्रमस्त्रं मदीयं त्वामुपस्थास्यति पाण्डव ।। ५० ।।

---

(०१) (१) भग०वान् (for समरे); (२) च (for (ए)व);मुखस्थितः;; मुखं स्थितः;मुखः स्थितः,

(०२) (१) तु; स्वं (for तद्); (२) तूणी (for तूणौ);तूणौ तौ चाक्षय्यौ तथा; तृणौ तौ चाक्षयौ शरैः (रः); तूणौ तावेव चाक्षयौ; (३) प्राणान् (for प्रादान्); (४) धारय (for वरय),

(०३) (३)तात;,वत्स (for वीर);मनोगतं वीर यत्ते (४) तद् ब्रूहि;०मपास्यैकं;० मपाशैकं ०मपास्याद्य; मपास्थान्यद्,

(०४) (२) कृतमानसः; (३)सहसा; मनसा (for शिरसा); सर्वं;, सर्वे; शम्भुं; देव (for शर्वं); मूर्ध्ना प्रसाद्य वरदं; (४) अब्रवीत्; अब्रुवम्; अब्रुवन् (for आददे);अस्त्रार्थं समनोदयं,

(०५) (१) भगवन् (for भगवान्),

(०६) ( (४) सन्ति हि; सन्ति वै (for कानिचित्); ददा०नी; ददामीं; तदा; तथा (for च मां),

**प्रददौ च मम प्रीतः सोऽस्त्रं पाशुपतं महत्।**(०१)
**उवाच च महादेवो दत्त्वा मेऽस्त्रं सनातनम् ।। ५१ ।।**

श्रीमहेश्वरः

**न प्रयोज्यं भवेदेतन्मानुषेषु कथञ्चन।**(०२)
जगद्विनिर्दहेदेवमल्पतेजसि पातितम्।
**पीड्यमानेन बलवत्प्रयोज्यं स्याद्धनञ्जय ।। ५२ ।।**

**अस्त्राणां प्रतिघाते च सर्वथैव प्रयोजयेत् ।। ५३ ।।**(०३)

अर्जुनः

**तदप्रतिहतं दिव्यं सर्वास्त्रप्रतिषेधनम्।****
**मूर्तिमन्मे स्थितं पार्श्वे प्रसन्ने गोवृषध्वजे ।। ५४ ।।**(०४)

**उत्सादनममित्राणां परसेनानिकर्तनम्।****
**दुरासदं दुष्प्रसहं सुरदानवराक्षसैः ।। ५५ ।।**(०५)

**अनुज्ञातस्त्वहं तेन तत्रैव समुपाविशम्।****
**प्रेक्षतश्चैव मे देवस्तत्रैवान्तरधीयत ।। ५६ ।।**(०६)

अस्मिन्  पर्वणि १३९अध्याये ५६श्लोकाः सन्ति

---

(०१) (श्रीरुद्र उ; (३) (अ)पि; मे (for मम);प्रददौ परमप्रीतः; अथ प्रादान्मम प्रीतः, ४)विभुः; महत्; च तत्; तदा (for प्रभुः),
(०२) (२) दत्वा चास्त्रं; दत्वास्त्रं ने (रौद्रास्त्रं मे); (४) मा (म)नुष्येषु,
(०३) (१) बलिना (for बलवत्); (२) प्रयोज्यं स्याद्; प्रयोक्तव्यं (for प्रयोज्यं ते);परन्तप (for धनं); (३)तु (ते) प्रतीघाते (for प्रतिघाते च); (४) प्रयोज०येत्; ०जय,०,
(०४) (१) तमप्रतिहतं; ततो०; तदा; ततः प्रीतियुतं; (२) वारणं; बाधनं; षेधकं; (४) न्ने वृषभध्वजे,
(०५) (२) विकर्षणं; ०नि०कृन्तनं; विनाशनं;,०सैन्यविकर्तन,
(०६) (३)प्रेक्ष्य(०क्ष) माणस्य;; पश्यतश्चैव (for प्रेक्षतश्चैव);पश्यतश्च स मे देवस् स पश्यतश्च मे देवस,

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि निवातकवचयुद्धपर्वणि गन्धमादनवासे युधिष्ठिरार्जुनसंवादे एकोनत्रिंशदधिकशततमोऽध्यायः ।। १३९ ।।

# १४०. चत्वारिंशदधिकशततमोऽध्यायः

अर्जुनेन स्वस्येन्द्रलोकगमनप्रकासस्य तत्र निवासप्रकारकथनपूर्वकमिन्द्रादस्त्रप्राप्तिप्रकारस्य च कथनम् ।। १ ।। अस्त्रविद्यासमाप्तौ सहस्त्राक्षेण गुरुदक्षिणात्वेन निवातकवजानां क्षपणं भिक्षितेनार्जुनेन तदर्थं प्रार्थनम् ।। २ ।।

अर्जुनः

ततस्तामवसं प्रीतो रजनीं तत्र भारत।**
प्रसादाद्देवदेवस्य त्र्यम्बकस्य महात्मनः ।। १ ।।(०१)

व्युषितो रजनीं चाहं कृत्वा पौर्वाह्णिकीः क्रियाः ।**
अपश्यं तं द्विजश्रेष्ठं दृष्टवानस्मि यं पुरा ।। २ ।।(०२)

तस्मै चाहं यथावृत्तं सर्वमेव न्यवेदयम्।**
भगवन्तं महादेवं समेतोऽस्मीति भारत।(०३)
स मामुवाच राजेन्द्र प्रीयमाणो द्विजोत्तमः ।। ३ ।।

ब्राह्मणः

दृष्टस्त्वया महादेवो यथा नान्येन केनचित् ।। ४ ।।

---

(०१) (१) अथ सं०; अथ सु०(for अवसं);रात्रि (for प्रीतो); (२) प्रीतोहं (for रजनीं) ३)प्रसादं देवदेवाद्वै; (४) तं प्राप्य विपुलं तदा,

(०२) (१) व्युष्य तां; व्युषितां; उष्यतां; उषित्वा (for व्युषितो ); (२) पूर्वान्हिकक्रिया; , पौर्वान्हिङ्कीक्रिया; पौर्वाह्णिकीं क्रियां; पूर्वान्हिकी (कीं) क्रियां; पौर्वाह्णि (न्द्रि)कीः क्रियाः; पूर्वाह्णिकीं क्रियां; पूर्वान्हिकक्रियः; पूर्वाह्णिकक्रियं; (३)अथ तं विप्रं (for तं द्विजश्रेष्ठं); (४) पथि (for पुरा),

(०३) (१) तस्याहं तद्; तस्मादहं (for तस्मै चाहं);पुरा० (for यथा०); (४) समीतो (for समेतो); कौरव (for भारत),

समेत्य लोकपालैस्तु सर्वैर्वैवस्वतादिभिः ।**
द्रष्टास्यनघ देवेन्द्रं स च तेऽस्त्राणि दास्यति ॥ ५ ॥[०१]

एवमुक्त्वा स मां राजन्नाश्लिष्य च पुनः पुनः ।**
अगच्छत्स यथाकामं ब्राह्मणः सूर्यसन्निभः ॥ ६ ॥[०२]

अथापराह्णे तस्याह्नः प्रावात्पुण्यः समीरणः ।**
पुनर्नवमिमं लोकं कुर्वन्निव सपत्नहन् ॥ ७ ॥[०३]

दिव्यानि चैव माल्यानि सुगन्धीनि नवानि च ।**
शैशिरस्य गिरेः पादे प्रादुरासन्समीपतः ॥ ८ ॥[०४]

वादित्राणि च दिव्यानि सुघोराणि समन्ततः ।**
स्तुतयश्चेन्द्रसंयुक्ता अश्रूयन्त मनोहराः ॥ ९ ॥[०५]

गणाश्चाप्सरसां तत्र गन्धर्वाणां तथैव च ।**
पुरस्ताद्देवदेवस्य जगुर्गीतानि सर्वशः ॥ १० ॥[०६]

मरुतां च गणास्तत्र देवयानैरुपागमन्।**
महेन्द्रानुचरा ये च ये च सद्मनिवासिनः ॥ ११ ॥[०७]

ततो मरुत्वान्हरिभिर्युक्तैर्वाहैः स्वलङ्कृतैः ।**

---

(०१) (१) समेतं (तैर्);त्वं (for तु);पश्चाद् (for (अ)नघ),
(०२) (१) तु; च (for स); महाराज (for स मां राजन्); (२) समाश्लिष्य (for आश्लष्य च); (३)स गच्छत; प्रत्यागच्छद् (for अगच्छत्स);च (for स);महाकायो (for यथा),
(०३) (१) अथापराह्णे ; (२) प्रवात्; प्रायात;पुण्य (for पुण्यः); (३) कुर्वन् (for लोकं); (४) कुर्व० न्वितिमिरा दिशः; पुण्यगन्धान्समुद्वहन्,
(०४) (२) बहूनि; वनानि (for नवानि ); (२) न (for सु) राधिप; समन्ततः (for समीपतः),
(०५) (१) सर्वाणि (for दिव्यानि); (२) सुघोराणि; (४) श्रूयन्ते स्म (for अश्रूयन्त),
(०६) (१) गणै (for गणा);गणैश्चाप्सरस०स्तस्य; (३) पुरःसरा (परस्परं) देवपतेर्;,
(०७) (२) स्वलङ्कृतैः (for उपागमन्); (४) ये च (for देव),

शचीसहायस्तत्रायात्सह सर्वैस्तदामरैः ।। १२ ।।[०१]

एतस्मिन्नेव काले तु कुबेरो नरवाहनः ।**
दर्शयामास मां राजँल्लक्ष्म्या परमया युतः ।। १३ ।।[०२]

दक्षिणस्यां दिशि यमं प्रत्यपश्यं व्यवस्थितम्।**
वरुणं देवराजं च यथास्थानमवस्थितम् ।। १४ ।।[०३]
ते मामूचुर्महाराज सान्त्वयित्वा नरर्षभ ।। १४ ।।[०४]

देवः

सव्यसाचिन्निरीक्षास्माँल्लोकपालानवस्थितान् ।। १५ ।।[०५]

सुरकार्यार्थसिद्ध्यर्थं दृष्टवानसि शङ्करम्।**
अस्मत्तोऽपि गृहाण त्वमस्त्राणीति समन्ततः ।। १६ ।।[०६]

अर्जुनः

ततोऽहं प्रयतो भूत्वा प्रणिपत्य सुरर्षभान्।**
प्रत्यगृह्णं तदास्त्राणि महान्ति विधिवद्विभो।[०७]
गृहीतास्त्रस्ततो देवैरनुज्ञातोऽस्मि भारत ।। १७ ।।[०८]

---

(०१) (२) वातयुक्तैः; दिव्यैर्वाहैः; युक्तवाहे; ,युक्तोवाहैः; युक्ते वाहे (for युक्तैर्वाहैः);अलङ्कृतैः; स्वलङ्कृतः, (३)तत्रासीत तत्रागात् (for तत्रायात्); (४) दिवालयैः; सुरैस्तदा (for तदामरैः),
(०२) (३)चत्मानं; तं कालं (for ०मां राजन्),
(०३) (१) अपर (for दक्षिण); (२) स्थितं यमं (for व्यव); (३) पावकं चैव; देवराजानं (for देवराजं च); (४) अवस्थितौ; व्क्यस्थितं (for अवस्थितम्),
(०४) (२) नरर्षभ (for सुर),
(०५) (३) समीक्षास्मान्; निरीक्षास्मान् (for समीक्षस्व); (४) व्यवस्थितान्,
(०६) (१) कार्यप्रवृत्यर्थं; कार्यप्रसिद्ध्यर्थं० ; (३)तदस्मत्तो (for अस्मत्तोऽपि),
(०७) (१) प्रणतो (for प्रय); (३) तदस्त्राणि; महाराजः;महास्त्राणि (for ०अहं राजन्) ४)शस्त्राणि; अस्त्राणि (for महान्ति); विधिवद्विभो ; विविधानि च,
(०८) (३)देवाश्चापि (for अथदेवा),

अथ देवा ययुः सर्वे यथागतमरिन्दम ।। १८ ।।[०१]

मघवानपि देवेशो रथमारुह्य सुप्रभम्।**
उवाच भगवान्स्वर्गं गन्तव्यं फाल्गुन त्वया ।। १९ ।।[०२]

इन्द्रः

पुरैवागमनादस्माद्वेदाहं त्वां धनञ्जय।**
अतः परं त्वहं वै त्वां दर्शये भरतर्षभ ।। २० ।।[०३]

त्वया हि तीर्थेषु पुरा समाप्लावः कृतोऽसकृत्।**
तपश्चेदं महत्तप्तं स्वर्गं गन्तासि पाण्डव ।। २१ ।।[०४]
भूयश्चैव च तप्तव्यं तपश्चरणमुत्तमम् ।। २२ ।।[०५]

दुश्चरं घोरमस्त्राणां तपोबलकरं तव ।

तपोवलकरं तव; तपसश्चोपपादनं
स्वर्गं त्ववश्यं गन्तव्यं त्वया शत्रुनिषूदन।[०६]
मातलिर्मन्नियोगात्त्वां त्रिदिवं प्रापयिष्यति। ।। २३ ।।

---

(०१) ((१) ;गत (for ययुः); केचिद् (for सर्वे),

(०२) (१) भगवान् (for मघवान्);अय (for अपि); मां देवो (देवेशो);सुप्रभः (for सुप्रभम्); (३) स्वर्ग; स्वर्गे (for वाक्यं);अवोचद्वाक्यं मधुरं; उवाच वाक्यं भगवान् मधुरं; (४) महायशाः(for सुरां); गन्तव्यं फाल्गुन पाण्डव त्वया,

(०३) (१) गमनाद् (for अ गमनाद्);तात (for अस्माद्); (२) त्वा (for त्वां); (३) इतः; ततः (for अतः);च वेदाहं; वेत्तासि; वै नाहं त्वां; चैवाहं त्वां (for त्वहं वै त्वां); (४) दर्शने; नं; येद् (for ०ये),

(०४) (१) त्वया तीर्थेषु सर्वेषु; त्वया हि पुण्य हिरण्य तीर्थेषु; त्वया तीर्थानि च पुरा २)कृतः पूर्वं समाप्लव; सकृदाप्लवनं कृतं; सदा (मा) क्रातमिवासकृत्; समाक्रान्तानि चासकृत्; समाक्रान्तमिहा (मतो) सकृत्;, (३) (ए) वं (for (हि) दं);पुनम्; महत् (for पुरा); (४) ततो तपो (for स्वर्गं);भारत (for पाण्डव),

(०५) (१) च; हि; (अ) भि (for तु);कर्तव्यं (for तप्तव्यं); (२) तपश्चरणमुत्तमं,

(०६) ((स्वर्ग (for स्वर्गस्);गन्तव्य (for व्यस्); निसूदन; निवर्हण; ) ३)शत्रुस् (for सर्वं); (४) तपश्चरणमुत्तमं; देवानां च पुरन्दरः,

विदितस्त्वं हि देवानां मुनीनां च महात्मनाम्।[०१]
इहस्थः पाण्डवश्रेष्ठ तपः कुर्वन्सुदुष्करम् ॥ २४ ॥

अर्जुनः

ततोऽहमब्रुवं शक्रं प्रसीद भगवन्मम।**
आचार्यं वरयेयं त्वामस्त्रार्थं त्रिदशेश्वर ॥ २५ ॥[०२]

इन्द्रः

क्रूरकर्मास्त्रवित्तात भविष्यसि परन्तप।**
यदर्थमस्त्राणीप्सुस्त्वं तं कामं पाण्डवाप्नुहि ॥ २६ ॥[०३]

अर्जुनः

ततोऽहमब्रुवं नाहं दिव्यान्यस्त्राणि शत्रुहन्।**
मानुषेषु प्रयोक्ष्यामि विनास्त्रप्रतिघातनात् ॥ २७ ॥[०४]

तानि दिव्यानि मेऽस्त्राणि प्रयच्छ विबुधाधिप।**
लोकांश्चास्त्रजितान्पश्चाल्लभेयं सुरपुङ्गव ॥ २८ ॥[०५]

इन्द्रः

परीक्षार्थं मयैतत्ते वाक्यमुक्तं धनञ्जय।**

---

(०१) (१) च; त्वा (for त्वां); (२) दिवं त्वां; स्वर्गं त्वां; (for त्रिदिवं) ४)मुनीनां (for ऋषीणां); , भावितात्मना;च (for महा),

(०२) (१) अब्रवं! (३)वरयेहं त्वाम्; यं त्वाम् (४) त्रिदिवे (for त्रिदशे ),

(०३) (१) क्रूर (for क्ररं); भवि (for करि); न संशय; (३) यदस्त्रम्; (for र्धैम); अस्त्रलिप्सुस्त्वं; अर्थलिप्सुस्त्वं; अस्त्राणि परित;अस्त्राणीहतं, (४) तं कामं समवाप्स्यसि, तत्कामं समवाप्नहि; त्वं तत्समं समाप्नहि,

(०४) (१) अब्रवं; होतमबुवं पुनरहं; (४) क०ख०घ०कृन्तनम्, विनास्त(स्त्र) प्रतिवारणं; ०प्रतिधातनात्; भुक्त्वास्त्रं प्रतिवारणं; विनाखं निवारणं; स्त्रप्रतिकृन्तनं,

(०५) (१) तेन (for तानि); दिव्यानि; मेऽक्ष्याणि; (२) ददस्व हि पुरन्दर ३)शक्रजितान्; शस्त्रजितान्; अस्त्रजितान्; चास्त्रविदां (for चास्त्रजितान्); सर्वान् (for पश्चात्); (४) कामयेहं सुरर्षभ; कर्मणाप्रतिपादये,

ममात्मजस्य वचनं सूपपन्नमिदं तव ।। २९ ।।[०१]

शिक्षामि(शिक्ष मे) भवनं गत्वा सर्वाण्यस्त्राणि भारत।**
वायोरग्नेर्वसुभ्योऽपि वरुणात्समरुद्गणात् ।। ३० ।।[०२]

साध्यं पैतामहं चैव गन्धर्वोरगरक्षसाम्।
वैष्णवानि च सर्वाणि नैरृतानि तथैव च ।**
मद्गतानि च जानीहि सर्वास्त्राणि कुरूद्वह ।। ३१ ।।[०३]

अर्जुनः

एवमुक्त्वा तु मां शक्रस्तत्रैवान्तरधीयत ।। ३२ ।।

अथापश्यं हरियुजं(तं) रथमैन्द्रमुपस्थितम्।**
दिव्यं मायामयं पुण्यं यत्तं मातलिना नृप।[०४]
लोकपालेषु यातेषु मामुवाचाथ मातलिः ।। ३३ ।।[०५]

मातलिः

द्रष्टुमिच्छति शक्रस्त्वां देवराजो महाद्युते ।। ३४ ।।[०६]

संसिद्ध्यस्व महाबाहो कुरु कार्यमनन्तरम्।**

---

(०१) (२) एवम् (for वाक्यम्); परन्तप; (for धनं० ); (४) सु,

(०२) (१) मद् (for मे); (२) दिव्यान्य (for सर्वाण्य); (३) (अ) पि; च (अ) थ); (४) मरुतां गणात (for समरु०),

(०३) (१) साध्यात् पैतामहाचू, दैव देवं (for चैव); (२) राक्षसं;, ०राक्षसा; राक्षसान्, (३) वैष्णवादीनि; ०न्यथ (for नि च); (४) नैऋत्यानि; दैतेयानि; (अ)पराणि; (आ) सुराणि (for तथैव); ) मरुद्गतानि; मरुद्गणानि; मद्गागानीह; मदीयानि च (for मद्गतानि च) जानीहि; याम्यानि; (for यानीह); सर्वाण्यपि; णहि; शु कौतेयास्त्राण्यवाप्स्य , स्त्राणि समाप्सै.() क०व०मद्गतानि च याम्यानि कौन्तेयास्त्राण्यवाण्स्यथ । ख०मदीयानि च यानीह कौन्तेयास्त्राण्यवाप्स्यसि । ,

(०४) (२) ततै (for तत्रै) (३) हरियुत; (४) उपस्तिता (for उपस्थितम् ) महा (for दिव्यं) दिव्य(for पुण्यं) यन्त्रा; युक्तं; युतं; (for यत्तं); तदा, (for न्रुप),

(०५) (१) गतेषु लोकपालेषु,

(०६) ( (२) स (for (अ) थ; (४) पुरन्दर; महाघुत,

पश्य पुण्यकृताँल्लोकान्सशरीरो दिवं व्रज ।। ३५ ।।[०१]

देवराजः सहस्राक्षस्त्वां दिदृक्षति भारत।

अर्जुनः

इत्युक्तोऽहं मातलिना गिरिमामन्त्र्य शैशिरम्।
प्रदक्षिणमुपावृत्य समारोहं रथोत्तमम् ।
चोदयामास स हयान्मनोमारुतरंहसः ।। ३६ ।।

मातलिर्हयतत्त्वज्ञो सर्वशास्त्रविशारदः(यथावद्भूरिदक्षिणः)।[०२]
अवैक्षत च मे वक्रं स्थितस्याथ स सारथिः ।। ३७ ।।

तथा भ्रान्ते रथे राजन्विस्मितश्चेदमब्रवीत् ।। ३८ ।।[०३]
अत्यद्भुतमिदं त्वद्य विचित्रं प्रतिभाति मे।**
यदास्थितो रथं दिव्यं पदान्न चलितः पदम् ।। ३९ ।।[०४]

देवराजोऽपि हि मया नित्यमत्रोपलक्षितः ।**
विचलन्प्रथमोत्पाते हयानां भरतर्षभ ।। ४० ।।[०५]

त्वं पुनः स्थित एवात्र रथे भ्रान्ते कुरूद्वह ।**
अतिशक्रमिदं सर्वं तवेति प्रतिभाति मे ।। ४१ ।।[०६]

अर्जुनः

---

(०१) (१) ससिन्दस्वां; द्रस्ता; ध्वस्यं; (२) अनन्तर (for अनुतमम्) (३) कृताल्ललोकन्,
(०२) ((१) नौदयामास; सहसा; ( क्यस हयान्); (३) हयत त्वज्ञो (४) तत्र वाजिन; भूरिदक्षिण्। दक्षिण्।,
(०३) ((३)अत्र०न्तरे; तत्र भ्रान्त; प्रतत्राभ्रान्तं, मातलिः,
(०४) (१) मन्यं; त्वद्य; तेद्य; नोद्य (for मेद्य); (२) च; मे; चै; ते; मा (for माम्) यथा; (३) तथा (for यदा); (४) पदान् तदा (for पदा); पदं (for भवान्),
(०५) ((१) हि (for पि); मघवान्; भगवान्; (for हि मया); (२) एवो (for अत्रो),
(०६) (१) स्थिर (for स्थित); (अ) द्य (for (अ) त्र); (२) न वै ( नैव्) भ्रातः (for भ्रान्ते); (३)सवं (for सत्त्वं); अतिसर्वमिदकर्म,

**इत्युक्त्वाऽऽकाशमाविश्य मातलिर्विबुधालयान्।****
**दर्शयामास मे राजन्विमानानि च भारत ।। ४२ ।।(०१)**

स रथो हरिभिर्युक्तो ह्यूर्ध्वमाचक्रमे ततः
ऋषयो देवताश्चैव पूजयन्ति नरोत्तम।
ततः कामगमाँल्लोकानपश्यं वै सुरर्षिणाम्।
गन्धर्वाप्सिरसां चैव प्रभावममितौजसाम्।

**नन्दनादीनि देवानां वनान्युपवनानि च ।****
**दर्शयामास मे शीघ्रं मातलिः शक्रसारथिः ।। ४३ ।।(०२)**

**ततः शक्रस्य भवनमपश्यममरावतीम्।****
**दिव्यैः कामफलैर्वृक्षै रत्नैश्च समलङ्कृताम् ।। ४४ ।।(०३)**

**न तत्र सूर्यस्तपति न शीतोष्णे न च क्लमः ।****
**न बाधते तत्र रजस्तत्रास्ति न जरा नृप ।। ४५ ।।(०४)**

**न तत्र शोको दैन्यं वा दौर्बल्यं चोपलक्ष्यते।****
**दिवौकसां महाराज न ग्लानिररिमर्दन।(०५)**
**न क्रोधलोभौ तत्रास्तां सुरादीनां विशाम्पते ।। ४६ ।।(०६)**

---

(०१) (१) आरूहा (for आविश्य),

(०२) (१) दिव्यानि (for देवानां); (२) विविधानि; विबुधानि; (उ) पवनानि; विपुलानि; ,सुबहूनि; बहुलानि (for बहुलानि); च (for (उ) त); (३) राजन् शीघ्रं ) (for प्रीत्या); प्रेक्ष्यमाणान्समेत्याहँ

(०३) (३) क०घ० कनकबन्धैश्व,दिव्य; सर्व (for दिव्यै); दिव्यै; कमलगन्धैश्च; दिव्यैः कनकबद्धैश्च; दिव्यैः कमलषडैश्च; (४) वृक्षैरन्यैरलङ्कृता,

(०४) (१) न तत्र सूर्यस्तपति; (२) शीतोष्णी; ष्णौ; ष्णो (३)पकौ; पङ्के (for पङ्को) न बाधत तत्र रजः,

(०५) (१) च (for वा); (२) दौर्बल्यं; वैवपर्यशू (for वैवर्ण्यं); वोप; नोप०; चोपलक्षितं (४) न ग्लानिररिमर्दन,

(०६) (२) गतानां वै०; गताधीनां; शुभ ( भा ) धीनां; सुरादीनां; सुद्धीनां; अशुभंश्च for अशुभं च )

नित्यतुष्टाश्च ते राजन्प्राणिनः सुरवेश्मनि।[०१]
नित्यपुष्पफलास्तत्र पादपा हरितच्छदाः ।। ४७ ।।

पुष्करिण्यश्च विविधाः पद्मसौगन्धिकायुताः ।
शीतस्तत्र ववौ वायुः सुगन्धी जीवनः शुचिः ।। ४८ ।। [०२]

सर्वरत्नविचित्रा च भूमिः पुष्पविभूषिता।[०३]
मृगद्विजाश्च बहवो रुचिरा मधुरस्वराः ।। ४९ ।।[०४]

विमानगामिनश्चात्र दृश्यन्ते बहवोऽम्बरे ।। ५० ।।[०५]

ततोऽपश्यं वसून्रुद्रान्साध्यांश्च समरुद्गणान्।**
आदित्यानश्विनौ चैव तान्सर्वान्प्रत्यपूजयम् ।। ५१ ।।[०६]

ते मां वीर्येण यशसा तेजसा च बलेन च ।**
अस्त्रैश्चाप्यन्वजानन्त सङ्ग्रामे विजयेन च ।। ५२ ।।[०७]

प्रविश्य तां पुरीं दिव्यां देवगन्धर्वपूजिताम्।**
देवराजं सहस्राक्षमुपातिष्ठं कृताञ्जलिः ।। ५३ ।।[०८]

ददावर्धासनं प्रीतः शक्रो मे ददतां वरः ।**

---

(०१)(३) नित्यं (for नित्य); तुष्टा; हृष्टा; प्र (for च); तेराजन् (for हृष्टाश्च); (४) सुरवेश्मिन /*((४) पद्मसौगन्धिकप्रभाः; कस्तथा; कैर्युता,

(०२) (१) सुखो (for ववौ); शीतलश्च (स्तत्र); सुखो वायुः; (२) सुगन्धी; विरजाः; (for जीवनः); सौगंधिजीवन; शुभः; सुगन्धो वीजते शुभ; (सुखं शुभं),

(०३) (४) पद्म (for पुष्प),

(०४) ((२) मधुरस्वनाः,

(०५) ( (३) विमानगामिनशू; (४) च तथा (for बहवो) (अ बरे; (अ)परे (for (अ) मरा),

(०६) (२) साध्या० न्देवमरु, (३) तत्र (for चैव),

(०७) (१) तेषां (for ते मां) (२) ; (अ) मलेन (for बलेन); (३) (अ) नुजानन्त; (अ) त्यजानन्त; (अ)न्व (नु) जानन्वै (for (अ) न्वजानन्त); (४) सङ्गामे (for सङ्गाम),

(०८) (१) दिव्यां (for रम्यां); (२) पूजितां,

बहुमानाच्च गात्राणि पस्पर्श मम वासवः ।। ५४ ।।[०१]

तत्राहं देवगन्धर्वैः सहितो भूरिदक्षिण।**
अस्त्रार्थमवसं स्वर्गे शिक्षाणोऽस्त्राणि भारत ।। ५५ ।।[०२]

विश्वावसोश्च वै पुत्रश्चित्रसेनोऽभवत्सखा।**
स च गान्धर्वमखिलं ग्राहयामास मां नृप ।। ५६ ।।[०३]

तत्राहमवसं राजन्गृहीतास्त्रः सुपूजितः ।**
सुखं शक्रस्य भवने सर्वकामसमन्वितः ।। ५७ ।।[०४]

शृण्वन्वै गीतशब्दं च तूर्यशब्दं च पुष्कलम्।**
पश्यंश्चाप्सरसः श्रेष्ठा नृत्यन्तीर्भरतर्षभ ।। ५८ ।।[०५]

तत्सर्वमनवज्ञाय तथ्यं विज्ञाय भारत।**
अत्यर्थं प्रतिगृह्याहमस्त्रेष्वेव व्यवस्थितः ।। ५९ ।।[०६]

ततोऽतुष्यत्सहस्राक्षस्तेन कामेन मे विभुः ।**
एवं मे वसतो राजन्नेष कालोऽत्यगाद्दिति ।। ६० ।।[०७]

कृतास्त्रमतिविस्वस्तमथ मां हरिवाहनः ।
संस्पृश्य मूर्ध्नि पाणिभ्यामिदं वचनमब्रवीत् ।। ६१ ।।[०८]

---

(०१) (()वदतां; गम (for दद); वर; रं (for रः),

(०२) ((२) संस्तुतो (for सहितो); भूरिदक्षिण; दक्षिणैः; (४) शिक्षाणो (for कुर्वाणो),

(०३) ((१) मे पुत्रः; वै; (ए) व (for मे),

(०४) (१) तत्रा (for ततो) ,

(०५) (१) अश्रौषं (for शृण्वन्वै); शृण्वन्गीतस्वनं पुण्यं, (३) (अ) प्सरसां; (४) नृत्यन्तर्भिरतर्षभ,

(०६) (३)परि (for प्रति),

(०७) (२) वै (for मे); प्रभुः; विभो (for विभुः); (३) एव गतो (for मे वसतो) ४) ) भ्यगादद; ह्यगाद् (for ऽत्यगाद्); इति (for दिवि);

(०८) (१) अभितिष्ठतम्; अतिविश्वस्तम्; अथ विश्वस्तम्; (२) मघवान्; तदा मां (for अथ मां); (३) संस्पृशन्,

इन्द्रः

न त्वमद्य युधा जेतुं शक्यः सुरगणैरपि।**
किं पुनर्मानुषे लोके मानुषैरकृतात्मभिः ।। ६२ ।।

अप्रमेयोऽप्रधृष्यश्च युद्धेष्वप्रतिमस्तथा।
अजेयस्त्वं हि सङ्ग्रामे सर्वैरपि सुरासुरैः ।। ६३ ।।

अर्जुनः

अथाब्रवीत्पुनर्देवः सम्प्रहृष्टतनूरुहः ।

इन्द्रः

अस्त्रयुद्धे समो वीर न ते कश्चिद्भविष्यति ।। ६४ ।।

अप्रमत्तः सदा दक्षः सत्यवादी जितेन्द्रियः ।**
ब्रह्मण्यश्चास्त्रविच्चासि शूरश्चासि कुरूद्वह ।। ६५ ।।(०१)

अस्त्राणि समवाप्तानि त्वया दश च पञ्च च ।**
पञ्चभिर्विधिभिः पार्थ विद्यते न त्वया समः ।। ६६ ।।(०२)

प्रयोगमुपसंहारमावृत्तिं च धनञ्जय।**
प्रायश्चित्तं च वेत्थ त्वं प्रतीघातं च सर्वशः ।। ६७ ।।(०३)

ततो गुर्वर्थकालोऽयं समुत्पन्नः परन्तप।**
प्रतिजानीष्व तं कर्तुं ततो वेत्स्याम्यहं परम् ।। ६८ ।।(०४)

---

(०१) (३)शा (for श); स्त्रविच्; मत्रविच्; (for चास्त्रविच्); चापि (for चासि); (४) चापि (for चासि); कुलोद्वह,

(०२) ((२) तु दश; च दश; (४) विद्यते न त्वया समः,

(०३) ((१) चापि (for उप); (२) वृत्तिश्चापि (for अवृत्ति च); (४) प्रतीघातं,

(०४) (१) ततो (for तव); (२) समुत्पन्नः; (for उपपन्न); (३) प्रतिजानीहि, तत् (for तं); (४) वक्ष्या (for वेत्स्या); अथ वक्ष्याम्यहं परं,

ततोऽहमब्रुवं राजन्देवराजमिदं वचः ।**
विषह्यं यन्मया कर्तुं कृतमेव निबोध तत् ॥ ६९ ॥(०१)

ततो मामब्रवीत्राजन्प्रहसन्बलवृत्रहा ।

इन्द्रः

नाविषह्यं तवाद्यास्ति त्रिषु लोकेषु किञ्चन ॥ ७० ॥(०२)

निवातकवचा नाम दानवा मम शत्रवः ।**
समुद्रकुक्षिमाश्रित्य दुर्गे प्रतिवसन्त्युत ॥ ७१ ॥(०३)

तिस्रः कोट्यः समाख्यातास्तुल्यरूपबलप्रभाः ।**
तांस्तत्र जहि कौन्तेय गुर्वर्थस्ते भविष्यति ॥ ७२ ॥(०४)

अर्जुनः

ततो मातलिसंयुक्तं मयूरसमरोमभिः ।
हयैरुपेतं प्रादान्मे रथं दिव्यं महाप्रभम् ॥ ७३ ॥

बबन्ध चैव मे मूर्ध्नि किरीटमिदमुत्तमम्।**
स्वरूपसदृशं चैव प्रादादङ्गविभूषणम् ॥ ७४ ॥(०५)

अभेद्यं कवचं चेदं स्पर्शरूपवदुत्तमम्।**
अजरां ज्यामिमां चापि गाण्डीवे समयोजयत् ॥ ७५ ॥(०६)

---

(०१) (१) अब्रवं (३)यन् (for चेन्),

(०२) (१) देव; (for राजन्); (२) प्रहसन्; बलवृत्रहा; (३) (अ) स्तीति; ह्यस्ति; (for (अ) द्यास्ति),

(०३) (२) देव; सुर (for मम); (३) आवृत्य; आगत्य; आसाद्य (for आश्रित्य); समुद्रमासाद्य सदा, (४) स्वर्गे (for दुर्गे),

(०४) (३)ताः (for तान्); पुत्र;, तु त्वं ( (for तत्र); पार्थैवं ( पार्थ त्वं);(for कौन्तेय); (४) गुर्वर्थं ते,

(०५) (३)वीर (for चैव); (४) राजन् (for अङ्ग),

(०६) (१) अभेद्य (for अभेद्यं); चैव; दिव्यं (for चेदं); (२) रूपमनुत्तमं; रूपं तदद्भुतं ३)चैव (for

ततः प्रायामहं तेन स्यन्दनेन विराजता।**
येनाजयद्देवपतिर्बलिं वैरोचनिं पुरा ।। ७६ ।।(०१)

ततो देवाः सर्व एव तेन घोषेण बोधिताः
मन्वाना देवराजं मां समाजग्मुर्विशाम्पते ।। ७७ ।।

दृष्ट्वा च मामपृच्छन्त किं करिष्यसि फाल्गुन।(०२)
तानब्रुवं यथाभूतमिदं कर्तास्मि संयुगे ।। ७८ ।।

निवातकवचानां तु प्रस्थितं मां वधैषिणम्।**
निबोधत महाभागाः शिवं चाशास्त मेऽनघाः ।। ७९ ।।(०३)

ततो वाग्भिः प्रशस्ताभिस्त्रिदशाः पृथिवीपते।*
तुष्टुवुर्मां प्रसन्नास्ते यथा देवं पुरन्दरम् ।। ८० ।।

देवाः

रथेनानेन मघवा जितवान्शम्बरं युधि ।
नमुचिं बलवृत्रौ च प्रह्लादनरकावपि ।। ८१ ।।(०४)

बहूनि च सहस्राणि प्रयुतान्यर्बुदान्यपि।**
रथेनानेन दैत्यानां जितवान्मघवा युधि ।। ८२ ।।(०५)

---

चापि),
(०१) (१) देव (for तेन); (३) बलिं देव; देवराजो;स देवेंद्रो(for ( देवपतिर्; (४) पतिट् (for बलिं),
(०२) (१) सगन्धर्वा;(for सर्व एव); (२) शब्देन (for घोषेण);कोपिताः; मोहिताः;(for बोधिताः); (४) कुरूद्वह (for विशां पते);फल्गुण; फाल्गुन; पाण्डव; फल्गुन,
(०३) ((१) अब्रवं; तथाभूतम्; तथा भूतान्; (for यथाभूतम्); त जयैषिणं (for वधै),
(०४) ((३)मघवान्; भगवान्; जितवान् (for मघवा); (४) हत; मध (for जितं); असुर नमुचिं (for शम्बरं); शम्बरं (for नमुचिं); वलवृत्रौ; प्रह्राद,
(०५) (२) (अ) युतानि; (for (अ) बुंदानि); (अ) पि (for च) ३)वै दैत्याञ्; (for दैत्यानां); (४) मघवा; मखवान्; (for मघवान्),

त्वमप्यनेन कौन्तेय निवातकवचान्रणे।**
विजेता युधि विक्रम्य पुरेव मघवा वशी ।। ८३ ।।(०१)

अयं च शङ्खप्रवरो येन जेतासि दानवान्।**
अनेन विजिता लोकाः शक्रेणापि महात्मना ।। ८४ ।।

अर्जुनः

प्रदीयमानं देवैस्तं देवदत्तं जलोद्भवम्।**
प्रत्यगृह्णं जयायैनं स्तूयमानस्तदामरैः ।। ८५ ।।(०२)

स शङ्खी कवची बाणी प्रगृहीतशरासनः ।**
दानवालयमत्युग्रं प्रय(या)तोऽस्मि युयुत्सया ।। ८६ ।।(०३)

अस्मिन् पर्वणि १४०अध्याये ८६श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि निवातकवचयुद्धपर्वण्यर्जुन वाक्ये चत्वारिंशदधिकशततमोऽध्यायः ।। १४० ।।

महाभारततात्पर्यनिर्णये २२ अध्याये

ऐन्द्रं स्यन्दनमारुह्य पार्थो मातलिसंयुतः ।
गाण्डीवं धनुरादाय ययौ हन्तुं महासुरान् ।। ३०८ ।।
शङ्खं ददुस्तस्य देवा देवदत्तः स शङ्खराट् ।
नादयन् शङ्खघोषेण धनुर्विस्फारयन् महत् ।। ३०९ ।।
दधानः कुण्डले दिव्ये शक्रदत्ते सुभास्वरे ।
आससाद पुरं दिव्यं दैत्यानामिन्द्रनन्दनः ।। ३१० ।।

---

(०१) (१) (अ) नेन; (for (ए) तेन); (२) जितवान्मघवान्; (for निवातकवचान्) युधि (for रणे); (३) विजितान् (for विजेता); (४) मघवा (for मघवान्) बली (for वशी); पुरत्रयमिवेश्वरः,
(०२) (१) तं० (च); (for तु); (३) ०गृह्णां; गृह्णञ्;(for गृह्ण); (ए) व; (इ) म; (ए) तं; (for (ए) नं); (४) तथामरैः; यथासुरैः; सदामरैः; (for तदा),
(०३) (१) सशङ्ख; (for शङ्खी); बाणै; (for बाणी),

तस्य शङ्खध्वनिं श्रुत्वा गाण्डीवस्य च निस्स्वनम् ।
अभिसस्रुर्महावीर्याः निवातकवचासुराः ।। ३११ ।।
तिस्रः कोट्यो दानावानां स्वयम्भुवरगर्विताः ।
नानायुधैः रणे पार्थमभ्यवर्षन् सुसंहताः ।। ३१२ ।।

## १४१. एकचत्वारिंशदधिकशततमोऽध्यायः

पार्थेन निवातकनचैस्सह युयुत्सया मातलिसनीथेनेन्द्ररथेन पातालस्थितं तत्पुरं प्रति गमनम् ।। १ ।। अर्जुनशङ्खध्वनिश्रवणेन सन्नद्धैर्निवातकवचैस्तेन सहयुद्धारम्भः ।।२ ।।

अर्जुनः

ततोऽहं स्तूयमानस्तु तत्र तत्र महर्षिभिः ।**
अपश्यमुदधिं भीममपां पतिमथाव्ययम् ।। १ ।।(०१)

फेनवत्यः प्रकीर्णाश्च संहताश्च समुत्थिताः ।
ऊर्मयश्चात्र दृश्यन्ते वल्गन्त इव पर्वताः ।। २ ।।

नावः सहस्रशस्तत्र रत्नपूर्णाः समन्ततः ।(०२)
नभसीव विमानानि विचरन्त्यो विरेजिरे ।। ३ ।।

तिमिङ्गिलाः कच्छपाश्च तथा तिमितिमिङ्गिलाः ।**
मकराश्चात्र दृश्यन्ते जले मग्ना इवाद्रयः ।। ४ ।।(०३)

शङ्खानां च सहस्राणि मग्नान्यप्सु समन्ततः ।**
दृश्यन्ते स्म यथा रात्रौ तारास्तन्वभ्रसंवृताः ।। ५ ।।(०४)

---

(०१) (१) च; वै (for तु); (२) सुर (for मह); (४) निधिम् (for पतिम्),
(०२) (१) वत; (for चेत्यत्र); (२) चलन्तश्च; सहिता; सभीता; सङ्गता; समुत्थिता; (३)तत्र (for चात्र); ये अदृश्यन्तोर्मयस्तत्र; (४) वपगन्त (for चलन्त); जले मग्ना इवाद्रय; समन्तत (for सहस्रश),
(०३) (२) चाति०; शापे; (अ)प्यति (for तिमि); तिमितिमिङ्गिलास्तथा तिमिङ्गिलगिलास्तथा; (३) चापि; चानु (for चात्र०); (४) तोय; जल० (for जले),
(०४) (२) सहस्रश; (for समन्ततः) (३) (अ) प्सु; () थ; () त्र;(for स्म); (४) युताः;(for

तथा सहस्रशस्तत्र रत्नसङ्घाः प्लवन्त्युत।**
वायुश्च घूर्णते भीमस्तदद्भुतमिवाभवत् ॥ ६ ॥[०१]

तमुदीक्ष्य महावेगं सर्वाम्भोनिधिमुत्तमम्।**
अपश्यं दानवाकीर्णं तद्दैत्यपुरमन्तिकात् ॥ ७ ॥[०२]

तत्रैव मातलिस्तूर्णं निपत्य पृथिवीतले।**
त्रासयन्रथघोषेण तत्पुरं समुपाद्रवत् ॥ ८ ॥[०३]

रथं तं तु समाश्लिष्य प्राद्रवद्रथयोगवित्।

रथघोषं तु तं श्रुत्वा स्तनयित्नोरिवाम्बरे।**
मन्वाना देवराजं मामाविग्ना दानवाभवन् ॥ ९ ॥[०४]

सर्वे सम्भ्रान्तमनसः शरचापधराः स्थिताः ।**
तथासिशूलपरशुगदामुसलपाणयः ॥ १० ॥[०५]

ततो द्वाराणि पिदधुर्दानवास्त्रस्तचेतसः ।**
संविधाय पुरे रक्षां न स्म कश्चन दृश्यते ॥ ११ ॥[०६]

---

वृताः),

(०१) (२) रत्नपूर्णा; फलत्युत; (३) (आ) धूर्णैते (for धूर्णते); वीर (for भीमम्),

(०२) (१) समुदी (द्वी) ०क्ष्य; तमुदीक्ष्य; (for तमतीत्य); महाभीमं; तथा भीमं; (for महावेगं) (२) ;, अथाम्भो; (for सर्वाम्भो ),

(०३) (१) तत्र वै (for तत्रैव); (२) निपात्य; पृथिवीपते; धरणीतले; निन्ये पृथ्वीतले रथं तु तं; तत्र (for तं तु); लक्ष्य (for श्लिष्य); आश्लिष्य; तां समाश्लिष्य पृथिवीं (३)त्रासयन्; दानवान्; (for नादयन्); (४) सहसा बली; समुपाद्रव,

(०४) (१) ते; तत् (for तं); (३) मां देवराजं; (४) विविग्ना; आविग्ना (उद्विग्ना); ( (for संविग्ना); स्थिता; (for (अ) भवन्,

(०५) (२) खड्ग (for शर०) ; तथा (for स्थिताः); (३)शूलाष्टि; (आ) सिशूल; (४) परिध (for मुसल ); प्रगृहीतशरासना,

(०६) (१) (अ) पिदभु; ( धन् ); (३) ते; तां (for सं); (४) किचन कश्चिन्न; (for कश्चन); विद्यते (for दृश्यते),

ततः शङ्खमुपादाय देवदत्तं महास्वनम्।**
परमां मुदमाश्रित्य प्राधमं तं शनैरहम् ।। १२ ।।(०१)

स तु शब्दो दिवं स्तब्ध्वा प्रतिशब्दमजीजनत्।**
वित्रेसुश्च निलिल्युश्च भूतानि सुमहान्त्यपि ।। १३ ।।(०२)

ततो निवातकवचाः सर्व एव स्वलङ्कृताः ।**
दंशिता विविधैस्त्राणैर्विचित्रायुधपाणयः ।। १४ ।।(०३)

आयसैश्च महाशूलैर्गदाभिर्मुसलैरपि।**
पट्टिशैः करवालैश्च रथचक्रैश्च भारत ।। १५ ।।(०४)

शतघ्नीभिर्भुशुण्डीभिः खड्गैश्चित्रैः स्वलङ्कृतैः ।**
प्रगृहीतैर्दितेः पुत्राः प्रादुरासन्सहस्रशः ।। १६ ।।(०५)

ततो वेगेन महता दानवा मामुपाद्रवन्
विमुञ्चन्तश्शितान्वाणान्शतशोऽथ सहस्रशः ।। १७ ।।

ततो विचार्य बहुशो रथमार्गेषु तान्हयान्।**

---

(०१) (१) उपाध्माय (for उपादाय); (२) रवं (for स्वनम्); (३)ख०घ०आपूरयं क०अपूरयन् समाश्लिष्य प्रभावं तं;, ख०प्रथमं तं, आविश्य; आश्रित्य; आसाद्य (for आश्लिष्य); परमां मुदमाश्रित्य;पुरमाश्लिष्य राजेन्द्र; आपूरयन्त; ) न्सा)माश्लिष्य; (४) प्रादाशं तं; प्राधमत्तं; प्रदध्म तं; प्रधमं तं; प्रभावन्तं; प्रभवन्तं (for प्राधमं तं); शनकैद् (for तं शनैर् ); शनै; अहम्,
(०२) (१) च (for तु); विद्ध; प्राप्य; गत्वा; (for स्तब्ध्वा); (३) निलीयु (for निलिल्यु ); वित्रेसुर्ये च तत्रासन्; (४) च (for सु),
(०३) (२) स्वलङ्कृताः; (for समन्ततः); (३) दंसिता; अस्त्रैद्; बाणैर् (for त्राणैद् ); (४) विचित्रायुध,
(०४) (२) गदासि (for गदाभिर् ); मुशलैद्, मुषलैद्; (३) पट्टसैः;मुद्गरैश्चैव; च त्रिशूलैश्च (for कर ); (४) करवालै; तथा चक्रै० (for रथचक्रे ),
(०५) (१) भुसुण्डीभिः; भुशण्डी; भुषुडी; भुशुण्ठी; भृशण्डी; मुखण्डी०; भुखण्डी मुसण्ठी; मुसुण्ठी; मुसृठी; (२) अलं (for स्वलं); प्रगृहीतै; प्रादुरासन्,

प्राचोदयत्समे देशे मातलिर्भरतर्षभ ।। १८ ।।(०१)

तेन तेषां प्रणुन्नानामाशुत्वाच्छीघ्रगामिनाम्।**
नान्वपश्यं तदा किञ्चित्तन्मेऽद्भुतमिवाभवत् ।। १९ ।।(०२)

ततस्ते दानवास्तत्र वादित्राणि सहस्रशः ।**
विकृतस्वररूपाणि भृशं सर्वाण्यनादयन् ।। २० ।।(०३)

तेन शब्देन सहसा समुद्रे पर्वतोपमाः ।**
आप्लवन्त गतैः सत्त्वैर्मत्स्याः शतसहस्रशः ।। २१ ।।(०४)

ततो वेगेन महता दानवा मामुपाद्रवन्।
विमुञ्चन्तः शितान्बाणान्शतशोऽथ सहस्रशः ।(०५)

स सम्प्रहारस्तुमुलस्तेषां च मम भारत।**
अवर्तत महाघोरो निवातकवचान्तकः ।। २२ ।।(०६)

ततो देवर्षयश्चैव दानवर्षिगणाश्च ये(तथान्ये च महर्षयः)।
ब्रह्मर्षयश्च सिद्धाश्च समाजग्मुर्महामृधे ।। २३ ।।(०७)

---

(०१) ((१) विदार्य वसुधां; विचार्य बहुशो;(१) रथान्; (for हयान्);(३) रथमा गेणं तस्थिवान् नो ) दयत् (for प्राचोदयत्),

(०२) (१) ए (ने ; न ) षा तत्; (for तेन तेषां); (२) मार्गमत्युग्रगामिनां; मार्गं चतुरगामिनां; (३) नादृश्यत; नान्वपश्यत्; नानुपश्यन्; पार्थपश्यं; न चापश्यं; अनपश्यन्; (श्यत्); ततो;तथा (for तदा ); किं तत्; कश्चित् (for किञ्चित् ); (४) तदद्भुतम्; तमोभूतम् (for तन्मेऽद्भुतम्); तमोभूतमभूज्जगत्,

(०३) (१) तावद् (for तत्र ); (२) तु वादित्राणि सहस्रशः; (३)विकृतस्वन; विकृतं घोर ४)वादयन् (for चोदयन्),

(०४) (१) सहसा; (for महता); (२) पर्वता इव; (for तोपमाः); (३) आप्लवन्तो; वन्ते०; वन्ति; गता; हता; (for गतैः ),

(०५) (१) तेन (for ततो); सहसा (for महता); (२) समुपा (for मामुपा); (३) विमुचति; चन्त; चन्त; शतान् (for शितान्,

(०६) (१) तुमलसू; (२) च; मम अपि च; (३)आवर्तत; प्राव,

(०७) (२) तथा (for च ये ); तथान्ये,महाप्रय; (३)मह (for ब्रह ); (४) सहस्रशः (for महा),

तेे वै मामनुरूपाभिर्मधुराभिर्जयैषिणः ।**
अस्तुवन्मुनयो वाग्भिर्यथेन्द्रं तारकामये ।। २४ ।।(०१)

अस्मिन् पर्वणि १४१अध्याये २४श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि निवातकवचयुद्धपर्वणि युद्धारम्भे एकचत्वारिंशदधिकशततमोऽध्यायः ।। १४१ ।।

# १४२. द्विचत्वारिंशदधिकशततमोऽध्यायः

अर्जुनस्य निवादकनवचैस्सह युद्धम् ।।

अर्जुनः

ततो निवातकवचाः सर्वे वेगेन भारत।
अभ्यद्रवन्मां सहिताः प्रगृहीतायुधा रणे ।। १ ।। (०२)

आच्छाद्य रथपन्थानमुत्क्रोशन्तो महारथाः ।**
आवृत्य सर्वतस्ते मां शरवर्षैरवाकिरन् ।। २ ।।(०३)

ततोऽपरे महावीर्याः शूलपट्टिशपाणयः ।**
शूलानि च भुशुण्डीश्च मुमुचुर्दानवा मयि ।। ३ ।।(०४)

तच्छूलवर्षं सुमहद्गदाशक्तिसमाकुलम्।**

---

(०१) (१) मानुप; (for मामनु ) ; (३) ऋषयो (for मुनयो); (४) वधे; मृधे (for मये),
(०२) (२) सर्वभावेन; सर्ववेगेन सङ्गता; (for भारत); (३) अभिद्रवन्; मा(for मां ); वेगेन (for सहिता),
(०३) (१) आच्छाद्य; (२) आक्रो० (for उत्क्रो ); महारवान्;(३)सर्वशम्; तेषां (for ते मां); (४) वर्षम् (for वषैर्),
(०४) (२) पट्टस (for पट्टिश ); (३) गदाश्चैव (for शूलानि च); भुसुडीश्च; मुशण्डी; भृशुडी मुघढी; मुसण्ट्य; मुसुठी मुसण्ठी; मुसृट्य; (४) युधि (for मयि,

अनिशं सृज्यमानं तैरपतन्मद्रथोपरि ।। ४ ।।(०१)

अन्ये मामभ्यधावन्त निवातकवचा युधि।**
जि(शि)तशस्त्रायुधा रौद्राः कालरूपाः प्रहारिणः ।। ५ ।।(०२)

तानहं विविधैर्बाणैर्वेगवद्भिरजिह्मगैः ।
गाण्डीवमुक्तैरभ्यघ्नमेकैकं दशभिर्मृधे ।। ६ ।। (०३)

ते कृता विमुखाः सर्वे मत्प्रयुक्तैः शिलाशितैः ।(०४)
ततो मातलिना तूर्णं हयास्ते सम्प्रचोदिताः ।। ७ ।।

मार्गान्बहुविधांस्तत्र विचेरुर्वातरंहसः ।**
सुसंयता मातलिना प्रामथ्नन्त दितेः सुतान् ।। ८ ।।(०५)

शतं शतास्ते हरयस्तस्मिन्युक्ता महारथे।**
तदा(शान्ता) मातलिना यत्ता व्यचरन्नल्पका इव ।। ९ ।।(०६)

तेषां चरणपातेन रथनेमिस्वनेन च ।**
मम बाणनिपातैश्च हतास्ते शतशोऽसुराः ।। १० ।।(०७)

---

(०१) (१) तं; ते (for तचू); सुमहत्तुमुलं वर्षं; (३)अभिसं (for अनिशं); मानं व ०माना; (२) न्यपतन्; त्वपतन्; (for अपतन्); मे रथोपरि,

(०२) (१) अन्योन्यम्; दो अथ माम् (for अन्ये माम् ); अभि; सम; अप्य० (for अभ्य) ३)जित (धृत) (for शित); वीरा; (for रौद्राः); (शि)तशस्त्र० धरा रौद्राः,

(०३) (१) निशितैर् (for विविधैर् ); (३) आविध्यम्; अहनम्; (for अभ्यघ्नम्),

(०४) (४) शितैः; शरै; (for मृधे ); त्रासिता; अथान्ये; निकृत्ता; ते कृत्ता; ते कृत्वा (for ते कृता ); अथ तेभिमुखा; सर्वे; मन्त्रयुक्तै; (for मत्प्र); शिलीमुखैः (for शिला ); वित्रस्तास्तत्र ( सर्व०) दानवा,

(०५) (२) सम्प्रनो ( णो ); दिताः; सम्प्रयोजिताः; (३)अथ (for रथ); मार्गान्बहुविधास्तत्र; (४) व्यचरन्; (व्यधमन्;ह्यचरन्) (for विचेरुर् ); सुसंयुता; सुयुक्ता; प्रमश्चत; प्रामथन्त; प्रामथंस्ते; प्राभ्य भ )घ्नन्त; प्रामथ्नतो; प्रपद्येत; प्रामृद्नत,

(०६) (१) च हयास्य; (for हरयसू); (२) तस्मि०न्युक्ते; ते नियुक्ता; (३)ततो; शाता; तथा (for तदा); यत्रा (for यत्ता); (४) विचरन्; उत्सुका इव; अल्पवद्रथं; एकवद् दृढं; एकवद्रथं (for अल्पका इव); चारयत; प्रवं दृढं,

(०७) (३)मम बाणाभि; (४) च (for ते); बहवो (for शतशो,

गतासवस्तथैवान्ये प्रगृहीतशरासनाः ।**
हतसारथयस्तत्र व्यकृष्यन्त तुरङ्गमैः ।। ११ ।।[०१]

ते दिशो विदिशः सर्वे प्रतिरुध्य प्रहारिणः ।**
अभ्यघ्नन्विविधैः शस्त्रैस्ततो मे व्यथितं मनः ।। १२ ।।[०२]

ततोऽहं मातलेर्वीर्यमपश्यं परमाद्भुतम्।**
अश्वांस्तथा वेगवतो यदयत्नादधारयत् ।। १३ ।।[०३]

ततोऽहं लघुभिश्चित्रैरस्त्रैस्तानसुरान्रणे।**
चिच्छेद सायुधान्राजन्शतशोऽथ सहस्रशः ।। १४ ।।[०४]

एवं मे चरतस्तत्र सर्वयत्नेन शत्रुहन्।**
प्रीतिमानभवद्वीरो मातलिः शक्रसारथिः ।। १५ ।।[०५]

वध्यमानास्ततस्तैस्तु हयैस्तेन रथेन च ।**
अगमन्प्रक्षयं केचिन्न्यवर्तन्त तथा परे ।। १६ ।।[०६]

स्पर्धमाना इवास्माभिर्निवातकवचा रणे।**

---

(०१) (१) (अ) न्ये च; (ए) व; (for च ); (२) हताश्च शतशोसुराः; दानवाः पाण्डवर्षभ; ( भा); (३)अथ; ततः; हताः; (for हत); (४) विकृष्यन्त; व्यकर्षन्त; प्रादृश्यत; विकृष्यंस्ते हयोत्तमैः,
(०२) (१) सर्वे;(for सर्वाः); (२) प्रतिगृह्य; सर्वे युद्ध; प्रतिनीक्; प्ररुध्यन्त (for प्रतिरुध्य); (३) निधन्तो; अभयधन्; घ्नन्ति स्म (व्यधन्ति); निशितैः; (for विविधैः); (४) ततो मामं व्यतयन्ति च (त्रिव; ति ते),
(०३) (२) अद्भुतं समदर्शयं ( अत्यद्भुदमदर्शयं); (३) तथा (ततो); वेजवतो वाहान्; (वाजीन्); (४) क०यथावक्ता न्यवारयन् ; ख०यथा यत्तनवारयम्; घ०यथावन्ता न्यवारयन्,अयत्नो य; (त्नाद्य) ०दधारयत्; यद्यत्नादन्वधार; हा यद्रथं (for थान्); धार; यथा; यत्ना (युक्ता ०वर्ता); न्यवार; ह्ययत्नाद्यदधार,
(०४) (१) विविधैशू (for लघुभिशू ); (३) चिच्छिदं; ,अच्छिदं; चिच्छिदे (for अच्छिनं); चिच्छेद सायु० धान् राक्षसांश्चिच्छेद राजन्,
(०५) (१) वि; आ (for मे ); (३)राजन्; प्रीतो; चापि (for वीरो),
(०६) (१) हयैसू (for ततस्); तैसू (for ते); (२) शरैसू (for हयैसू); रथेन च महासुराः ३)प्राक्षयं; प्रेक्षयं ; प्रत्ययं; वै क्षयं (for प्र ); यमक्षयं गताः; केचित्; (४) प्रवर्तन्त व्यवर्तन्त; अवर्तन्त,

शरवर्षैः शरार्तं मां महद्भिः प्रत्यवारयन् ।। १७ ।।[०१]

शरवेगैर्निहत्याहमस्त्रैःश्शरविघातिभिः ।

ज्वलद्भिः परमैः शीघ्रैस्तानविध्यं सहस्रशः ।

ततोऽहं लघुभिश्चित्रैर्ब्रह्मास्त्रपरिमन्त्रितैः ।**
व्यधमं सायकैराशु शतशोऽथ सहस्रशः ।। १८ ।।[०२]

ततः सम्पीड्यमानास्ते क्रोधाविष्टा महासुराः(रथाः)।**
अपीडयन्मां सहिताः शरशूलासिवृष्टिभिः ।। १९ ।।[०३]

ततोऽहमस्त्रमातिष्ठं परमं तिग्मतैजसम्।**
दयितं देवराजस्य माधवं नाम भारत ।। २० ।।[०४]

ततः खड्गत्रिशूलेन(खड्गांस्त्रिशूलांश्च) तोमरांश्च सहस्रशः ।
अस्त्रवीर्येण शतधा तैर्मुक्तानहमच्छिदम् ।। २१ ।।[०५]

छित्त्वा प्रहरणान्येषां ततस्तानपि सर्वशः ।**
प्रत्यविध्यमहं रोषाद्दशभिर्दशभिः शरैः ।। २२ ।।[०६]

---

(०१) (३)शरानस्तान्; महानस्त्रान्; शरार्ता (र्तं) मां; समग्रैर्मां (for महद्भिर्मां); (४) महद्भिः (for य;) (for समन्तात्); पर्य (for प्रत्य ); शस्त्रै;(for अस्त्रे); अवध्यं; अवीर्यान् (for अविध्यं),
(०२) (२) प्रति पर (for परि) अस्त्रैस्तान; सुराब्रणे; (३)अवधं; व्यधमत् (for व्यधमं); सायु(०व ); भानेव; सायकेनाशु,
(०३) (२) रथाः; (for सुराः); (३)प्रपीड , अपीड (for अपीड ) मा (for मां) ४)शक्ति० (for शर ); जालासि (for शुलासि); पट्टिशैः; (for वृष्टिभिः),
(०४) (१) आविष्टं; प्रायुञ्जं (for आतिष्ठं); (२) तिग्मतेजनं; तैजसं; माधवं ( गान्धर्वं; वासवं) नाम भारत (३)दधीचिं (for दयितं); (४) गान्धवं (for माधवं); ब्रक्षदण्ड० समं रणे,
(०५) (१) खड्गांश्च शूलांश्च; खङ्ग त्रिशूलेन; रवङ्गास्त्रिशूलानि; खङ्गस्त्रिशूलश्च; खड्गा सिशूलांश्च, (२) शरांश्चैव(for तोम); (३)महतो; सहसा (for शतधा ); (४) अस्तान्; युक्तान् (for मुक्तान् ); आच्छिनं; अछिदं;(for अच्छिनम्); , चिच्छिदेहं रणे तदा,
(०६) (१) भित्वा; हित्वा (for छित्वा); (२) तैरस्तान्; ततस्तानि; (for ततस्तान्); (३)प्रति (for प्रत्य); (४) हङमुष्टिकृतैः; शरैः,

गाण्डीवाद्धि तदा सङ्ख्ये यथा भ्रमरपङ्क्तयः ।**
निष्पतन्ति महाबाणास्तन्मातलिरपूजयत् ।। २३ ।।(०१)

तेषामपि तु बाणास्ते तन्मातलिपरपूजयत्।**
अवाकिरन्मां बलवत्तानहं व्यधमं शरैः ।। २४ ।।(०२)

वध्यमानास्ततस्ते तु निवातकवचाः पुनः ।**
शरवर्षैर्महद्भिर्मां समन्तात्पर्यवारयन् ।। २५ ।।(०३)

शरवेगान्निहत्याहमस्त्रैरस्त्रविघातिभिः ।**
ज्वलद्भिः परमैः शीघ्रैस्तानविध्यं सहस्रशः ।। २६ ।।(०४)

तेषां छिन्नानि गात्राणि विसृजन्ति स्म शोणितम्।**
प्रावृषीवाभिवृष्टानि शृङ्गाण्यथ धराभृताम् ।। २७ ।।(०५)

इन्द्राशनिसमस्पर्शैर्वेगवद्भिरजिह्मगैः ।**
मद्बाणैर्वध्यमानास्ते समुद्विग्नाः स्म दानवाः ।। २८ ।।(०६)

शतधा भिन्नदेहास्ते क्षीणप्रहरणौजसः ।**

---

(०१) (१) वितनान्; हि तता; हि ततः; वितताः; हि तथा (for हि तदा); गांडीवनिसुता सङ्ख्ये; गांडीवेनाङ्किता सर्वे; (३) निपन्तति; निष्पतन्त; महा (for तथा); (४) तान् (for तन्),

(०२) (१) च (for तु ); ते बाणा बाणास्तु; (२) तन्मातलिरक्शुयत्; (३)मा (for मां); (४) व्यधमत्; बलवत् (for व्यधमं,

(०३) (१) विध्य; युध्य (for वध्य ); तदा (for ततस्); (२) ततः; (for पुनः ); (३) मा (for मां),

(०४) (१) वर्षान्; (for वेगान्); (आ) शु; (आ) स्रम् (for (अ) हम्); (२) ह्यस्त्रैः; शस्त्रैः; (for अस्त्रैः); अपि; अस्त्र० (for शर० ); शरैर्विद्याभिमत्रितैः (३)खगमै; च शरैः;(for परमै ); शस्त्रैस् (for शीघ्रैस्); (४) सहस्रधा,

(०५) (१) छिन्नाग्र; जीर्णानि; (for छिन्नानि ); (२) विसृजन्नथ; (for ०न्ति स्म ); (३) (अ) ०भिवृष्टानि; ( अ तिवृष्ट्या हि, (४) (उ)त; (अ)थ (for (इ) व ); मही (for धरा),

(०६) (१) युध (for शानि); (३) बाणैश्च (for मद्बाणैट्); विध्य (for वध्य); (४) च तु (for स्म); सुरदिष (for स्म दानवा),

ततो निवातकवचा मामयुध्यन्त मायया ।। २९ ।।[०१]

अस्मिन् पर्वणि १४२अध्याये २९श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि निवातकवचयुद्धपर्वणि द्विच त्वारिंशदधिकशततमोऽध्यायः ।।१४२।।

महाभारततत्तात्पर्यनिर्णये २२ अध्याये

तेषां स शस्त्राणि किरीटमाली निवार्य गाण्डीवधनुःप्रमुक्तैः ।
शरैः शिरांसि प्रचकर्त वीरो महास्त्रशिक्षाबलसम्प्रयुक्तैः ।। ३१३ ।।
सर्वे हतास्तेन महारथेन ते दानवाः सोऽपि ययौ तथाऽन्यान् ।
पौलोमकालेयगणाभिधानान् षष्टिं सहस्राणि महारथानाम् ।। ३१४ ।।
तानस्त्रशस्त्राण्यभिवर्षमाणान् धनञ्जयः पाशुपतास्त्रतो द्राक् ।
दग्ध्वा ययौ पुनरेवेन्द्रसद्म तं सस्वजे प्रीतियुतश्च शक्रः ।। ३१५ ।।

# १४३. त्रिचत्वारिंशदधिकशततमोऽध्यायः

अर्जुनेन दिव्यास्त्रैर्मायानिरसमपूर्वकं दैत्यहननम् ।। दानवानां मायामययुद्धस्य वर्णनम्

अर्जुनः

ततोऽश्मवर्षं सुमहत्प्रादुरासीत्समन्ततः ।**
नगमात्रैः शिलाखण्डैस्तन्मां दृढमपीडयत् ।। १ ।।[०२]

---

(०१) (१) छित्र (for भित्र); देहाताः; देहास्ते; (for देहान्त्राः); (२) क्षिप्त (for क्षीण); प्राणगतौ; ०प्राणा महौ; प्रहरणौ; (for प्राणमहौ),

(०२) (३)नगमात्रं; नागमात्रैर्; ना (न); गमस्त्रं; (for नगमात्रैर्); महाघोरं; शिलाखण्डैस् ( ध्वस्तैस्);

तदहं वज्रसङ्काशैर्महेन्द्रास्त्रप्रचोदितैः ।**
अचूर्णयं वेगवद्भिः शरजालैर्महाहवे ।। २ ।।(०१)

चूर्ण्यमानेऽश्मवर्षे तु पावकः समजायत।**
तत्राश्मचूर्णान्यपतन्पावकप्रकरा इव ।। ३ ।।(०२)

ततोऽहं वारुणास्त्रेण अश्मवर्षं विशातवान् ।

ततोऽश्मवर्षे विहते जलवर्षं महत्तरम्।**
धाराभिरक्षमात्राभिः प्रादुरासीन्ममान्तिके ।। ४ ।।(०३)

नभसः प्रच्युता धारास्तिग्मवीर्याः सहस्रशः ।**
आवृण्वन्सर्वतो व्योम दिशश्चोपदिशस्तथा ।। ५ ।।(०४)

धाराणां च निपातेन वायोर्विस्फूर्जितेन च ।**
गर्जितेन च दैत्यानां न प्राज्ञायत किञ्चन ।। ६ ।।(०५)

धारा दिवि च सम्बद्धा वसुधायां च सर्वशः ।**
व्यामोहयन्त मां तत्र निपतन्त्योऽनिशं भुवि ।। ७ ।।(०६)

---

(for महाघोरैसू); (४) ते (for तन्); अपीडयन,

(०१) (१) तमहं; तानहं; (२) दिव्यै (for शरै); रिद्रास्त्रमन्त्रितैः; महेद्रास्त्रप्रचोदितैः; (३) आचूर्णयं; अधूर्णयं; (४) शरवर्षै; शरजालै; शितधारै; र्महाहवे; ( मुधे); शतधैवैकमा; शरैरेकैकमा,

(०२) (१) चूर्णे; पूर्णौ (for चूर्ण्य); (२) समपद्यत; (३)ततो (for तत्र); वर्षम् (for चूर्णम्); तत्राश्म ( ०स्य); चूर्णान्यपतन्; तत्र ( स च);तत्रापि तच्चूर्ण; (४) ०प्रवाहा इव; प्रकरो यथा; पावकः; ( कं) प्रबलोज्वलत्; प्रकुर्वन्सिक तानिव; प्रा (अ); कुर्वं सिकता इव,

(०३) (१) विहिते;(अ) भिहते; () पहते; विहिते; (२) अनन्तरं (for मह०),

(०४) (२) वेगा; (for वीर्या); समन्तत; (for सह); (४) प्र; वि; (for (उ) प) (अ( पि; च; (अ) पि व (for तथा); दिशा; सोप दिशोपि च; (शो नृप),

(०५) (१) वि (for च) (२) विष्कूर्जितेन; (३) मेघानां; (for दैत्या) ४)प्रज्ञायत; प्रायतत,

(०६) (१) धारा दिवीव; धाराश्च दिवि धारा दिशि च; धारादिभिश्च; संवृद्धा; संवन्धाष्टे; सम्बाधा (for सम्बद्धा); (३) विमोहयति; व्यालोडयन्त; मोरुडशद्वह; ऐम्रोहथन्त स्व (च); तास; मा (for मां); (४) निष्टतन्त्यो; युधि (for भुवि ); पतमाना दिवानिशं,

तत्रोपदिष्टमिन्द्रेण दिव्यमस्त्रं विशोषणम्।**
दीप्तं प्राहिणवं घोरमशुष्यत्तेन तज्जलम् ।। ८ ।।(०१)

हतेऽश्मवर्षे च मया जलवर्षे च शोषिते।**
मुमुचुर्दानवा मायामग्निं वायुं च भारत ।। ९ ।।(०२)

ततोऽहमग्निं व्यधमं सलिलास्त्रेण सर्वशः ।**
शैलेन च महास्त्रेण वायोर्वेगमधारयम् ।। १० ।।(०३)

तस्यां प्रतिहतायां तु(ते) दानवा युद्धदुर्मदाः ।**
प्राकुर्वन्विविधां मायां यौगपद्येन भारत ।। ११ ।।(०४)

ततो वर्षं प्रादुरभूत्सुमहल्लोमहर्षणम्।**
अस्त्राणां घोररूपाणामग्नेर्वायोस्तथाश्मनाम्।(०५)
सा तु मायामयी वृष्टिः पीडयामास मां युधि ।। १२ ।।(०६)

अथ घोरं तमस्तीव्रं प्रादुरासीत्समन्ततः ।। १३ ।।(०७)

तमसा संवृते लोके घोरेणावरणेन(घोरेण परुषेण) च ।**
तुरगा(हरयो) विमुखाश्चासन्प्रास्खलच्चापि मातलिः ।। १४ ।।(०८)

---

(०१) (१) ततो०; अथो (for तत्रो० ); मित्रेण; मन्त्रेण (for इन्द्रेण ) (२) सुशोभनं (for विशो); ज्वलन् ( दीप्तं ); ज्वलितं प्रक्षिप घोरम्; (४) वै (for तज्),

(०२) (१) च (for तु); तदा (for मया ); (२) तु (for च ); (४) मेनघ; भारत (for मानद ),

(०३) (२) भारत (for सर्वशः ); महता (for च महा ); (४) अवारयं; न्यवा; निवा (for अधा ),

(०४) (१) ते (for तु ); (३) विविधां मायां,

(०५) (१) वर्षां; प्रादुरासीत्; (२) रोम (for लोम ) (३); शस्त्राणां; (for अ ); (४) महात्मनां; यथाश्मनां; तदाश्मनां,

(०६) (१) बाण; मयी; मायावती,

(०७) (३)तपस् (for तमम्),

(०८) (१) संवृतो लोको; (२) परमेण; (आ) वरणेन (for परु); (३) हरयो (for तुरगा) विषमाशू (for विमुखा ); च; (४) प्रास्रव (for प्रास्खल ),

हस्ताद्धि रण्म(श्म)यश्चास्य प्रतोदः प्रापतद्भुवि।
असकृच्चाह मां भीतः किं करिष्याम इत्यपि(क्वासीति भरतर्षभ)।। १५ ।।(०१)

मां च भीराविशत्तीव्रा तस्मिन्विगतचेतसि।**
स च मां विगतज्ञानः सन्त्रस्तमिदमब्रवीत् ।। १६ ।।(०२)

सुराणामसुराणां च सङ्ग्रामः सुमहानभूत्।**
अमृतार्थं पुरा पार्थ स च दृष्टो मयानघ ।। १७ ।।(०३)

शम्बरस्य वधे चापि(घोरः) सङ्ग्रामः सुमहानभूत्।**
सारथ्यं देवराजस्य तत्रापि कृतवानहम् ।। १८ ।।(०४)

तथैव वृत्रस्य वधे सङ्गृहीता हया मया।**
वैरोचनेर्महायुद्धं दृष्टं चापि सुदारुणम् ।। १९ ।।(०५)

बलप्रह्लादयश्चापि तथान्येषां च पाण्डव ।

एते मया महाघोराः सङ्ग्रामाः पर्युपासिताः ।**
न चापि विगतज्ञानोऽभूतपूर्वोऽस्मि पाण्डव ।। २० ।।(०६)

पितामहेन संहारः प्रजानां विहितो ध्रुवम्।**

---

(०१) (१) हि रश्मय;, हि रज्वायशू (for हिरण्मयशू); (२) प्रपतद्; न्यपतद्; (३)चापि (for चाह); आह (for भीतः); (४) किं करिष्याव (म)इत्यपि ( इत्युत),
(०२) (२) विकल (for विगत ); (३)तु (for च ); विगतज्ञानं; सङ्गत; (४) सन्तप्त सन्त्रस्तम् ( क्यस्त ),
(०३) (३)अमृतार्थं०; तात (for पार्थ ); (४) वै; मे ( नो) (for च ), सुदारुणः ( , मया ,
(०४) (१) घोर; चास्य; घोरे (for चापि); (२) सङ्ग्रामस्तारकामयः,
(०५) (१) तत्रैव (for तथैव ); (२) मया हयाः; सङ्गृह्णीयामहं हयान्; (३)महा ( महद्०) (for मया); (४) चासीत् (for चापि ),
(०६) (२) समु (for पर्यु ); (३) चास्मि (for चापि); (४) () पि (for स्मि ); भारत (for पाण्डव ),

न हि युद्धमिदं युक्तमन्यत्र जगतः क्षयात् ।। २१ ।।[(०१)]

तस्य तद्वचनं श्रुत्वा संस्तभ्यात्मानमात्मना।
मोहयन्दानवेन्द्राणा महमायां महद्बलम्
(मोहयिष्यन्दानवानामहं मायाबलं महत्) ।। २२ ।।[(०२)]

अब्रुवं मातलिं भीतं पश्य मे भुजयोर्बलम्।**
अस्त्राणां च प्रभावं वै धनुषो गाण्डिवस्य च ।। २३ ।।[(०३)]

तदा(अद्या)स्त्रमाययैतेषां मायामेतां सुदारुणाम्।**
विनिहन्मि तत(म)श्चोग्रं मा भैः सूत स्थिरो भव ।। २४ ।।[(०४)]

एवमुक्त्वाहमसृजमस्त्रमायां नराधिप।
मोहनीं सर्वशत्रूणां(भूतानां) हिताय त्रिदिवौकसाम् ।। २५ ।।[(०५)]

पीड्यमानासु मायासु तासु तास्वसुरोत्तमाः ।**
पुनर्बहुविधा मायाः प्राकुर्वन्नमितौजसः ।। २६ ।।[(०६)]

पुनः प्रकाशमभवत्तमसा ग्रस्यते पुनः ।**
भवत्यदर्शनो लोकः पुनरप्सु निमज्जति ।। २७ ।।[(०७)]

---

(०१) (२) विहतो; आहितो; ध्रुवः; (३)दृष्टम् (for युक्तम्); (४) जगतां (for ०तः),

(०२) (२) संस्तम्भ्या; (३)अमोहयं दान; मोहयन् ( मोहयं; अमोघं); दानर्वेद्राणाम्; (४) अयं (for अहं ); मायाबलं महत्; मायां महद्; (for महा); बलां,

(०३) (१) अब्रवं; सूतं; तत्र; (for भीतं(२) ); विजयं (for भुजयोर्); (३) वै ( च); (for मे ),

(०४) (१) अथा०; तथा (for अद्या ); तेषां (for (ए) तिषां ); अस्त्रमाया च वै तेषां; (२) एनां; एषां (for एतां ); (३) ततश्चोग्रां (for तम ),

(०५) (३)मोहिनीं; सर्वभूतानां,

(०६) (१) पीड्यमानास्तु; मायाभिः; (२) ताभिस्तेपि; ( स्ते वै); मया तासु (for तासु तासु) सुरेश्वरा; सुरेतरा; सुरोत्तमा; (अ) सुरोत्तमा; (for सुरेश्वराः ); (३) बहुविधां मायां; (४) प्रकुर्वन्ति; प्राकुर्वत; प्राकुर्वस्ते (for प्राकुर्वन्); मही (for अमितौ० ),

(०७) (१) प्राकाश्यम्; (for प्रकाशम्); अगमत् (for अभवत्); (२) तमसश्चास्यते; तमसा गृह्यते; भवत्यदर्शनो,

सुसङ्गृहीतैर्हरिभिः प्रकाशे सति मातलिः ।**
व्यचरत्स्यन्दनाग्र्येण सङ्ग्रामे रो(लो)महर्षणे ।। २८ ।।[०१]

ततः परिपतन्त्युग्रा(पर्यपतन्नुग्रा) निवातकवचा मयि।**
तानहं विवरं दृष्ट्वा प्राहिण्वं यमसादनम् ।। २९ ।।[०२]

वर्तमाने तथा युद्धे निवातकवचान्तके।**
नापश्यं सहसा सर्वान्दानवान्माययाऽऽवृतान् ।। ३० ।।[०३]

अस्मिन् पर्वणि १४३अध्याये ३०श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि त्रिचत्वारिंशदधिकशततमोऽध्यायः ।। १४३ ।।

# १४४. चतुश्चत्वारिंशदधिकशततमोऽध्यायः

अर्जुनेन निवातकवचवधानन्तरं पुनः स्वर्गं प्रति प्रस्थानम् ।।

अर्जुनः

अदृश्यमानास्ते दैत्या योधयन्ति स्म मायया।**
अदृश्येनास्त्रवीर्येण तानप्यहमयोधयम् ।। १ ।।[०४]

गाण्डीवमुक्ता विशिखाः सम्यगस्त्रप्रयोजितैः(चोदिताः)।**

---

(०१) (१) असं (for सुसं ); (२) ०शेन स; (for शे सति ); (३) व्यरोचत्; प्रचरत्; व्यचरन्; ग्रेण; ग्रेषु (for ग्र्येण); (४) रोम० (for लोम),
(०२) (१) चरन्; तपन्; (for पतन् ); अग्रे (for उग्रा); तत; पतत्युपर्युग्रा २)युधि (for मयि ); (३) विवशान्; विवरान्; विचरन्; चरतो; विविधं (for विवरं ); (४) प्रापय (for प्राहिण्वं),
(०३) (१) वर्ध (for वर्त ); तदा (for तथा ); (२) चान्युधि; चान्तिके; (३)मातलिं (for सहसा );(४) मायया युतान्,
(०४) (१) दैत्या मां; देत्यैरत्यास्ते; (२) हि (for स्म ); मां युधि (for मायया); (३) अदृश्येनास्त्र,

अच्छिन्दन्नुत्तमाङ्गानि यत्र यत्र स्म तेऽभवन् ।। २ ।।(०१)

ततो निवातकवचा वध्यमाना मया युधि।**
संहृत्य मायां तर(सह)सा प्राविशन्पुरमात्मनः ।। ३ ।।(०२)

व्यपयातेषु दैत्येषु प्रादुर्भूते च दर्शने।**
अपश्यं दानवांस्तत्र हतान्शतसहस्रशः ।। ४ ।।(०३)

विनिष्पिष्टानि तत्रैषां शस्त्राण्याभरणानि च ।**
शतशः स्म प्रदृश्यन्ते गात्राणि कवचानि च ।। ५ ।।(०४)

हयानां नान्तरं ह्यासीत्पदाद्विचलितुं पदम्।**
उत्पत्य सहसा तस्थुरन्तरिक्षगमास्ततः ।। ६ ।।(०५)

ततो निवातकवचा व्योम सञ्छाद्य केवलम्।**
अदृश्या ह्यत्यवर्तन्त विसृजन्तः शिलोच्चयान् ।। ७ ।।(०६)

अन्तर्भूमिगताश्चान्ये हयानां चरणान्यथ।**
व्यगृह्णन्दानवा घोरा रथचक्रे च भारत ।। ८ ।।(०७)

---

(०१) (१) मुक्तैर्विशिखैः; नोदिता; योजिताः; चोदितैः; (३)अवच्छिन्; अच्छिदं; आछिदं; अकिछदं; अच्छिदं; अच्छिनं (for अच्छिन्दन्); शुत्तमागानि,

(०२) (२) युध्य (for वध्य); मया भुवि; महारणे (for मया युधि); मायां; (for मायां); तरसा (for सहसा ),

(०३) (३)अदृश्यं; (४) तत्र (for शत),

(०४) (१) विनिपिष्टानि; विनिवि; (२) (अ)पि; (उ)त (for च ); सहस्राभरणान्युत ३) ख-घ-कूटवत् प्रतिदृश्यन्तो गात्राणि च शिरांसि च ।, कोटिश; शतश; कूटवत् (for कूटश); च प्र; सम्प्र०; प्रति (for स्म प्र) ४)शस्त्राणि (for गात्राणि ); विविधानि; च शिरांसि (for कव० ,

(०५) (१) अन्तरं (for नान्तरं ); च (for हि ); (२) प्रच०; हि च (for विच) ३)उत्पेतु; (for उत्पत्य ); सहसोत्तस्थुः; (४) सममातस्थु; अन्तरीक्ष० ०चरासू; गतास् (for गमासू ); तदा; तथा (for ततः,

(०६) (तथा (for ततो); निवातकवचा व्योम ते; समासाद्य केवलं; (३) ह्यत्यव;, ह्यत्र व (for ह्यभ्यव ); अदृश्यं तेभ्यवर्तन्त,

(०७) (१) तु (for च ); (२) चरणानथ; णान्यथा; (अ) पि (for (अ) थ ); (३) अङ्गं व्य ( वि

विनिगृह्य हरीनश्वान्रथं च मम युध्यतः ।**
सर्वतो मामविध्यन्त सरथं धरणीधरैः ।। ९ ।।[०१]

पर्वतैरुपचीयद्भिः पतद्भिश्च तथापरैः ।**
स देशो यत्र वर्ताम गुहेव समपद्यत ।। १० ।।[०२]

पर्वतैश्छाद्यमानोऽहं निरूहैश्चैव वाजिभिः ।**
अगच्छं परमामार्तिं मातलिस्तदलक्षयत्।[०३]
लक्षयित्वा च मां भीतमिदं वचनमब्रवीत् ।। ११ ।।

मातलिः-
अर्जुनार्जुन मा भैस्त्वं वज्रमस्त्रमुदीरय ।। १२ ।।[०४]

ततोऽहं तस्य तद्वाक्यं श्रुत्वा वज्रमुदीरयम्।**
देवराजस्य दयितं वज्र(भीम)मस्त्रं नराधिप ।। १३ ।।[०५]

अचलं स्थानमासाद्य गाण्डीवमनुमन्त्र्य च ।**
अमुश्चं वज्रसंस्पर्शानायसान्निशितान्शरान् ।। १४ ।।[०६]

ततो मायाश्च ताः सर्वा निवातकवचांश्च तान्।**

---

);ग्उ निगृ; निगृह्य; (४) रथं; तथा; (for रथ); चक्रं च; चक्राणि चक्रैश्च (for चक्रे च); रथं च मम भारत,

(०१) (१) तान्निगृह्य; रथान्; शरान्; हयान्;(for हरीन्); अनयान्; चाथ चान्ये (for अश्वन् ); (२) शरान् (for रथं ); (३) अयुध्यन्त; अविध्यन्त; अचिन्वन्त,

(०२) (१) उपचिन्वद्भि; अपचीयद्भि; (२) पतद्भिश्च (for पतमानैस् ); (३)वर्तामो; ०मि (for म); प्राप्ताः स्म संशयं तत्र; (४) गुहैव; इहैव; (for गुहेव),

(०३) (१) हि (for हं ); (२) क-गृहीतैश्च)(३)अगच्छत्; अगच्छन्; आगच्छं; परमार्तिं समापन्नो; (४) मातलिं तु न लक्षयं,

(०४) (१) च (for तु ); (३) मा भैषीर्,

(०५) (१) अस्य (for तस्य); (२) उदैरय; उदैरयन्; (४) उदीरयन्; भीम ( दिव्य); (for वज्र ,

(०६) (१) अचल; (२) अभि (for अनु ); (३)सङ्काशान् (for संस्पर्शान् ); (४) सायकान्; आयतान् (for आयसान्); आयसाज् (for निशितान् ); बहून्; शितान् (for शरान्,

ते वज्रचोदिता बाणा वज्रभूताः समाविशन् ।। १५ ।।[०१]

ते वज्रवेगविहता दानवाः पर्वतोपमाः ।**
इतरेतरमाश्लिष्य न्यपतन्पृथिवीतले ।। १६ ।।[०२]

अन्तर्भूमौ च येऽगृह्णन्दानवा रथवाजिनः ।**
अनुप्रविश्य तान्बाणाः प्राहिण्वन्यमसादनम् ।। १७ ।।[०३]

तदा नि(हतैर्नि)वातकवचैर्निरस्तैः पर्वतोपमैः ।**
समाच्छाद्यत देशः स विकीर्णैरिव पर्वतैः ।। १८ ।।[०४]

न हयानां क्षतिः क(का)चिन्न रथस्य न मातलेः ।**
मम चादृश्यत तदा तदद्भुतमिवाभवत् ।। १९ ।।[०५]

मातलिः-

ततो मां प्रहसन्राजन्मातलिः प्रत्यभाषत।**
नैतदर्जुन देवेषु त्वयि वीर्यं यदीक्ष्यते ।। २० ।।[०६]

हतेष्वसुरसङ्घेषु दारास्तेषां तु सर्वशः ।**
प्राक्रोशन्नगरे दारा(तस्मिन्) यथा शरदि लक्ष्मणाः ।। २१ ।।[०७]

लक्षालङ्कारः- यदि शरदि लक्षण इत्यत्र 'हंसस्य योषिद्वरटा राररसस्य तु लक्षणा' इत्यभिधानात् लक्षणाः सारसपक्षिणां पत्न्यः,शरदि जलह्रासे सति रोदनं कुर्वन्ति, तद्वदित्यर्थः ।

---

(०१) (१) शुभाः; (for च ताः); (२) तथा (for च तान्); (३) नोदिता; शादिता (for चोदिता),

(०२) (१) वि; नि; (for (अ)भि), (३) आश्लिष्यन्; (४) धरणी; (for पृथिवी ),

(०३) (१) च (for तु); (३) प्रवेश्य तान्; प्रवेशितान्; बाणान्; (४) प्राहिण्वं; (for ण्वन्),

(०४) (१) तैस्तैर् (for हतैर्); (३) समासाद्य; दिशः; सर्वा; (४) पर्वतैरिव; पर्वतो पमै,

(०५) (१) तैर् (for न ); क्षिति; कृतिः; गतिः; क्षताः; (for क्षतिः); केचिन् तस्मिन्देशे गतिस्तात; (२) पर (for रथ); (३) वादृश्यत; वारुच्यत,

(०६) (१) प्रहसद्; (२) सम; ( क्यप्रत्य); (३)देवेशे (for षु); (४) अच्युत; इष्यते (for ईक्ष्यते),

(०७) (२) च (for तु ); सङ्कश; (for सर्वशः); (३) आक्रोशन्; तत्र (for तस्मिन्); (४) सरसि (for शरदि); पक्षिणः; सारसाः; लक्ष्मणाः; कुर्य इव भारत,

अर्जुनः-

ततो मातलिना सार्धमहं तत्पुरमभ्ययाम्।**
त्रासयन्रथघोषेण निवातकवचस्त्रियः ।। २२ ।।[०१]

तान्दृष्ट्वा दशसाहस्रान्मयूरसदृशान्हयान्।**
रथं च रविसङ्काशं पर्जन्यनिनदं तदा(प्राद्रवन्गणशः स्त्रियः)।। २३ ।।[०२]

ताभिराभरणैः शब्दस्त्रासिताभिः समीरितः ।**
शिलानामिव शैलेषु पतन्तीनामभूत्तदा ।। २४ ।।[०३]

वित्रस्ता दैत्यनार्यस्ताः स्वानि वेश्मान्यथाविशन्।**
बहुरत्नविचित्राणि शातकुम्भमयानि च ।। २५ ।।[०४]

तदद्भुताकारमहं दृष्ट्वा नगरमुत्तमम्।**
विशिष्टं देवनगरादपृच्छं मातलिं ततः ।। २६ ।।[०५]

इदमेवंविधं कस्माद्देवा नावासयन्त्युत।**
पुरन्दरपुराद्धीदं विशिष्टमिति लक्षये ।। २७ ।।[०६]

मातलिः

आसीदिदं पुरा पार्थ देवराजस्य नः पुरम्।**

---

(०१) (१) ततो मातलिमासाद्य; (२) त्वहं (for अहं); अभयगां (for अभ्ययाम्); (३) वज्रं (for रथ०),

(०२) (१) शत; रथ (for दश); (४) क्षणशः; शतशः; (for गणशः),

(०३) (१) आकरुण; (for आभरणैः); शब्दैस्; (४) शिलाभिर् (for शिलानाम्); शैमेन्द्रे (for शैलेषु) (४) पतन्तीभिद्; परुन्तीनाम्,

(०४) (१) विध्वस्ता (for वित्रस्ता ); (२) तानि (for स्वानि); (४) कैभ (for कुम्भ),

(०५) (१) ताकार; मयं; ०तागारमहं; वत महारम्भं; ताकारतमं; (४) तदा (for तत),

(०६) (२) देवानामिव संमत; देवा ना (नो) वासयत्युत; (३)च (for हि ); पुरन्दरस्य माहात्म्याद्; (४) आदिष्टम्; (for विशिष्टम्); उप; इव (for हति); लक्ष्यते,

**ततो निवातकवचैरितः प्रा(प्र)च्याविताः सुराः ।। २८ ।।**(०१)

**तपस्तप्त्वा महत्तीव्रं प्रसाद्य च पितामहम्।****
**प्राप्ताः पुरं(इदं वृतं) निवासाय देवेभ्यश्चाभयं युधि ।। २९ ।।**(०२)

तथा देवैरवध्यत्वं पुरस्याभेद्यत्वमेव तु ।
मनुष्याणां दुर्बलत्वादुपेक्ष्यैव महासुरैः ।

**ततः शक्रेण भगवान्स्वयम्भूरिति चोदितः ।**
**विधत्तां भगवानन्तमात्मनो हितकाम्यया ।। ३० ।।**(०३)

**तत उक्तो भगवता दिष्टमास्ते(मत्रे)ति वासवः(भारत)।****
**भवितान्तस्त्वमप्येषां देवादे(देहेना)न्येन वृत्र(शत्रु)हन्।। ३१ ।।**(०४)

**तत एषां वधार्थाय शक्रोऽस्त्राणि ददौ तव ।****
**न हि शक्याः सुरैर्हन्तुं य एते निहतास्त्वया ।। ३२ ।।**(०५)

**कालस्य परिणामेन ततस्त्वमिह भारत।****
**एषामन्तकरः प्राप्तस्तत्त्वया च कृतं तथा ।। ३३ ।।**(०६)

---

(०१) (१) पुरं (for पुरा); (२) वै० (for नः); पुरा (for पुरम्); देवराज; निवेशनं; (४) प्राच्या,( द्रा ) विताः; पुरात् (for सुराः),

(०२) (१) दुःखं प्राप्य (for तपस्तप्त्वा); तपश्चत्र महस्त्व; (३) वृत्तं; दत्तं (for मृतं); (४) चायुधं; चावृतं (for चाभयं),

(०३) (२) इति; अपि (for अभि); नोदितः; ( चोदित); विदत्तां;, व्यधत्त; विधम्भ; विधात्रा; विधत्त; दत्तवान्; (for विधत्तां); अस्त०म्; एतद्; अथ;अस्त्रम् (for अत्र ); अस्माकं; आत्मनो; चात्मनो (for ( इ) त्यात्मनो ) हितमुत्तमं (for काम्यया ),

(०४) (२) मात्रेति; मास्तेति; (for मत्रेति ); भारत (for वासव ); दिष्टमत्र पुरन्दर; अप्येषां; एतेषां (for एवैषां ); त्वमेवैषां भवतो; भविता त्वत एतेषां; त्वमप्येषां भवस्वातो; त्वमेषां भवितास्यन्तो; भवता तं तमेवैषां; (४) शत्रु० (for वृत्र ),

(०५) (१) त्वेषां; तेषां (for एषां); (४) यतस्ते (for य एते ); () त्र (for नि),

(०६) (२) गत (for तत); (३) तेषाम् (for एषाम्); पार्थ (for प्राप्तस्); (४) यत् (for तत्); (अ) पि ( च ); तथा तच्च कृतं त्वया; प्रेष्ठ त्वया तच्च कृतं तथा; त्वयेत्युपकृतं तथा; सम्प्रत्युपकृतं तथा,

दानवानां विनाशाय अस्त्राणां परमं बलम्।**
ग्राहितस्त्वं महेन्द्रेण पुरुषेन्द्र तदुत्तमम् ।। ३४ ।।(०१)

अर्जुनः

ततः प्रशाम्य नगरं दानवांश्च निहत्य तान्।**
पुनर्मातलिना सार्धमगमं(च्छं) देवसद्म तत् ।। ३५ ।।(०२)

अस्मिन् पर्वणि १४४ अध्याये ३५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि

चतुश्चत्वारिंशदधिकशततमोऽध्यायः ।। १४४ ।।

महाभारततततात्पर्यनिर्णये २२ अध्याये

ययुरन्धं तमस्तेऽपि सर्वदेवद्विषोऽसुराः ।

# १४५.पञ्चचत्वारिंशदधिकशततमोऽध्यायः

निवातकवजवधानन्तरं स्वर्गं प्रत्यागच्छता अर्जुनेन मध्येमार्गं हिरण्यपुरावलोकनम् ।। १ ।। ततस्तद्वासिनां पौलोमानां च वधानन्तरं पुनः स्वर्गं प्रत्यागमनम् ।। २ ।।

अर्जुनः

निवर्तमानेन तदा(मया) महद्दृष्टं ततोऽबलम्(परम)।**
पुरं कामगमं(चरं) दिव्यं पावकार्कसमप्रभम् ।। १ ।।(०३)

---

(०१) (१) विनाशाय; (२) अस्त्राणां परमं बलं; (३)प्रहितस्त्वं; आहित; गृहीत; सुरेन्द्रेण ४)पुरुषेण (for षेन्द्र); (ए) तद्; (इ) दम् (for तद्); उच्यतां; अद्भुतं (for उत्तमम्); पुरुषेन्द्रैखत्तमै,
(०२) (१) प्रशाम्य; शास्य (for विश्य); (२) (अ)भिभाव्य; निहन्य; (for निहत्य ); (४) आगच्छं; अगमं; ह (for तत् ),
(०३) ((१) मया (for महत्); तदा (for मया);(२) सह; मया (for महद्); (३) पुरं परं (for (अ)परम् );परं (for पुरं); गमं (for चरं);तत्पुरं कामगं दिव्यं; (४) पावकार्चि,

रत्नद्रुममयैश्चित्रैः सुस्वरैश्च पतत्रिभिः ।**
पौलोमैः कालकेयै(कञ्जै)श्च नित्यहृष्टैरधिष्ठितम् ।। २ ।।(०१)

गोपुराट्टालकोपेतं चतुर्द्वारं दुरासदम् ।
सर्वरत्नमयं दिव्यमद्भुतोपमदर्शनम् ।। ३ ।। (०२)

द्रुमैः पुष्पफलोपेतैः सर्वरत्नमयैर्वृतम्।
तथा पतत्रिभिर्दिव्यैरुपेतं सुमनोहरैः ।। ४ ।।

असुरैर्नित्यमुदितैः शूलर्ष्टिमुसलायुधैः ।
चापमुद्गरहस्तैश्च स्रग्विभिः सर्वतो वृतम् ।। ५ ।।(०३)

तदहं प्रेक्ष्य दैत्यानां पुरमद्भुतदर्शनम्।**
अपृच्छं मातलिं राजन्किमिदं वर्ततेऽद्भुतम् ।। ६ ।।(०४)

मातलिः
पुलोमा नाम दैतेयी कालका च महासुरी
दिव्यं वर्षसहस्रं ते चेरतुः परमं तपः ।। ७ ।।(०५)

तपसोऽन्ते ततस्ताभ्यां स्वयम्भूरददद्वरम्।(०६)
अगृह्णीतां वरं ते तु सुतानामल्पदुःखताम् ।। ८ ।।(०७)

---

(०१) (१) रत्नद्रुम ( द्रुमरत्न ); मयैशू्; चित्रं (for चित्रैर्); (२) भासुरैश्च; सुस्वरैश्च, ३)कालखञ्जैः; कञ्जैः; (४) मुदा युतैः; दुरासदं; (for अधिष्ठितम्),

(०२) (२) अनुत्तमं (for दुरा); सर्व (for दिव्य),

(०३) (२) ०रमं; हरं; रमैः; (for हरैः); (४) शूलाकधू्; शूलासि; शूलेष्टि० (for शूलर्ष्टि); मुशलायुधैः; मुषला,

(०४) (२) पुनद् (for पुरम् ); (४) (अ) त्र वै; पुरं (for (इ) ति वै ); किमिदं वर्ततेद्ध्वतं,

(०५) (१) पौलोमी (for पुलोमा); दैत्येया; दैत्येयी (for दैतेयी ); (२) कालिको तन्नामा; कालका (for कालका); चापि दानवी (for च महासुरी),

(०६) (३) तु (for ते); सहस्राते; (४) तप उत्तमं; (for परमं तप); अददद्वर,

(०७) (१) वरौ (for वरं ); तं; तौ (for ते); (२) दुःखितां,

अवध्यतां च राजेन्द्र सुरराक्षसपन्नगैः ।(०१)
पुरं सुरमणीयं च खचरं सुमहाप्रभम् ॥ ९ ॥

सर्वरत्नैः समुदितं दुर्धर्षममरैरपि।
महर्षियक्षगन्धर्वपन्नगासुरराक्षसैः ॥ १० ॥(०२)

सर्वकामगुणोपेतं वीतशोकमनामयम्।**
ब्रह्मणा भरतश्रेष्ठ कालकेयकृते कृतम् ॥ ११ ॥(०३)

तदेतत्खपुरं दिव्यं चरत्यमरवर्जितम्।**
पौलोमाध्युषितं वीर कालकञ्जैश्च दानवैः ॥ १२ ॥(०४)

हिरण्यपुरमित्येवं ख्यायते नगरं महत्।**
रक्षितं कालकेयैश्च पौलोमैश्च महासुरैः ॥ १३ ॥(०५)

त एते मुदिता राजन्नवध्याः सर्वदैवतैः
निवसन्त्यत्र राजेन्द्र गतोद्वेगा निरुत्सुकाः ॥ १४ ॥(०६)

मानुषान्मृत्युरेतेषां निर्दिष्टो ब्रह्मणा पुरा ।(०७)

सुरासुरैः अवध्यानां दानवानां धनञ्जय।

---

(०१) (४) सुरदानवराक्षसै,

(०२) (१) पुरं सुरमणीयं च; (२) खेचरं; सुकृतं प्रभो; सुमहाप्रभं; सुकृतप्रद, सर्वकामै;समुचितं प्रमुदितं; (४) दुर्धर्षैद्; दुर्दर्शम्; अपरैरपि; महर्षियक्षगन्धर्व; पन्नगोरग,

(०३) (१) कामफलो; कर्मगृणो; (३) ब्रह्मणो; भवनात्; (नं); श्रेष्ठे(for भरतश्रेष्ठ); (४) कृतं विभो; कृतं प्रभो,

(०४) (१) इदं (for एतत् ); खेचरं; तु पुरं; खेचरे; स्वपुरं; स्वचरं (for खचरं ); (३) पौलोम्याध्युषितं; वीरं; रम्यं (४) कालिकेयैश्च; कालक (ख) जै,

(०५) (१) (र) वं; (ए) व (for (ए) तत् ); (२) आख्यातं; भूयते (for ख्यायते); (३) रहितं; रक्ष्यते कालिकेयैश्च; कालकञ्जै; (४) पौलोम्यैश्च,,

(०६) (१) तदा ते (for त एते ); राजन् (for नित्यम्); (२) सर्वदेवतै,

(०७) (३) कौतेय (for राजेन्द्र); (४) गतदोषा; (for गतोद्वेगा); सदो; निरामया; (for निरु ),

**मानुषान्तृत्युरेतेषांनिर्दिष्टो ब्रह्मणा पुरा ।। १५ ।।(०१)**

एतानपि रणे पार्थ कालकञ्जान्दुरासदान्।

वज्रास्त्रेण नयस्वाशु विनाशं सुमहाबलान्।(०२)

**अर्जुनः**

**सुरासुरैरवध्यं तदहं ज्ञात्वा विशाम्पते।**
**अब्रुवं मातलिं हृष्टो याह्येतत्पुरमञ्जसा ।। १६ ।।(०३)**

**त्रिदशेशद्विषो यावत्क्षयमस्त्रैर्नयाम्यहम्।****
**न कथञ्चिद्धि मे पापा न वध्या ये सुरद्विषः ।। १७ ।।(०४)**

**उवाह मां ततः शीघ्रं हिरण्यपुरमन्तिकात्।****
**रथेन तेन दिव्येन हरियुक्तेन मातलिः ।। १९ ।।(०५)**

**ते मामालक्ष्य दैतेया विचित्राभरणाम्बराः ।****
**समुत्पेतुर्महावेगा रथानास्थाय दंशिताः ।। १९ ।।(०६)**

**ततो नालीकनाराचैर्भल्लैः शक्त्यष्टितोमरैः ।****
**प्रत्यघ्नन्दानवेन्द्रा मां क्रुद्धास्तीव्रपराक्रमाः ।। २० ।।(०७)**

---

(०१) (मानुषान्; मानुष्यो; निसृष्टो; (for निर्दिष्टो),

(०२) ((२) सुदारुणान्; (for दुरासदान्);(३) (आ) नयति (for नयस्व);(४) विरामं (for विनाशं),

(०३) (१) क-ख-घ-सुरैरवध्यांस्तान् सर्वान् अहं ज्ञात्वा ततः प्रभो ष अवध्यं तद् (for अवध्यांस्तान्); सुरैरवध्यांस्तान्सर्वान्; (२) विशां पते; महासुरान् (for ततः प्रभो ); (३) अब्रवं; तत्र (for हृष्टो,

(०४) (३)इमे; विशेत् (for हि मे); पापं (for पापा); (४) अवध्या; ह्यवध्या (for न वध्या); हि; च (for ये),

(०५) (१) तत्र (for तत); क्षिप्रं(for शीघ्रं); (२) अन्तिकं (for अन्तिकात्),

(०६) (१) मामलक्ष्य; ममालक्ष्य; न मालक्ष्य; दैत्येया, तेषामलक्ष्य; दैत्येया; (२) भरणायुधाः ३) भागा (for वेगा); (४) रथम् (for रथान् ); आदाय (for आस्थाय); दंसिताः,

(०७) (१) नालीक; नाराच (for नाराचैर्); (२) भल्लैः;(for भल्ल); (३) प्रत्य (for अभ्य); मा (for मां ,

तदहं शरवर्षेण महता प्रत्यवारयम्।**
शस्त्रवर्षं महद्राजन्विद्याबलमुपाश्रितः ।। २१ ।।(०१)

व्यामोहयं च तान्सर्वान्रथमार्गैश्चरन्रणे।**
तेऽन्योन्यमभिसम्मूढाः पातयन्ति स्म दानवान् ।। २२ ।।(०२)

तेषामेवं विमूढानामन्योन्यमभिधावताम्।**
शिरांसि विशिखैर्दीप्तैर्न्यहनं शतसङ्घशः ।। २३ ।।(०३)

ते वध्यमाना दैतेयाः पुरमास्थाय तत्पुनः ।**
स(ख)मुत्पेतुः सनगरा मायामास्थाय दानवीम् ।। २४ ।।(०४)

ततोऽहं शरवर्षेण महता कुरुनन्दन।**
मार्गमावृत्य दैत्यानां गतिं चैषामवारयम् ।। २५ ।।(०५)

तत्पुरं खचरं दिव्यं कामगं सूर्यसप्रभम्।**
दैतेयैर्वरदानेन धार्यते स्म यथासुखम् ।। २६ ।।(०६)

अन्तर्भूमौ निपतति पुनरूर्ध्वं प्रतिष्ठते।**

---

(०१) (१) तान्; (for तद्); शर; शस्त्र (for चास्य ); (२) समवारयं( ०वाकिरं) ३)अस्त्रवर्षं; शरवर्षं; अहं राजन्; अभूद्राजन्; महाराज; (४) बलमपा; बलसमा,

(०२) (१) व्या (व्य); मोहयन्; विमोहयं; व्यापोहयं; व्यमोहयं; (२) मार्गान् मार्ग (for मानैर् ); (३) अभिसरूढाः; अतिसंमूढाः; तेन्योन्येभ्यश्च सं; (४) दानवान्,

(०३) (१) एवं (for अहं); (२) अत्यन्तम् (for अन्योन्यम्); (३) विविधैर् (for विशिखैर्); तीक्ष्णैर् (for दीप्तैर्); शिरांसि पतुर्विशिखै; (४) क-ख-घ-च्छिनं, न्यहनं (रं); व्याहन; अच्छिदं ( अहरं); व्याहर (for व्यहरं); दीप्तै; कृत्तानि सङ्घश,

(०४) (१) हन्य (for वध्य); दैत्येया; (३) स्वनगरान् (for सनगरा,

(०५) (१) तानहं (for ततोहं); (२) कुरुनन्दन ( सत्तम); पर्य०वारय; सम (for प्रत्य ) ३)आश्रित्य (for आवृत्य); (४) तेषाम् (for चैषाम्); न्यवारयं,

(०६) (१) खेचरं; (२) सूर्य०सप्रभं; ( संनिभं; वर्चस); ग; दीप्तवर्चस; दीप्ततेजसं; (३) दैत्येयैर्; (४) चार्यते स्म; धारयन्ते; वार्यते स्म; नीयते स्म,

**पुनस्तिर्यक्प्रयात्याशु पुनरप्सु निमज्जति ।। २७ ।।**[०१]

**अमरावतिसङ्काशं तत्पुरं कामगं महत्।****
**अहमस्त्रैर्बहुविधैः प्रत्यगृह्णं परन्तप ।। २८ ।।**[०२]

**ततोऽहं शरजालेन दिव्यास्त्रनुदितेन च ।****
**व्यगृह्णं सह दैतेयैस्तत्पुरं पुरुषर्षभ ।। २९ ।।**[०३]

**विक्षत चायसैर्बाणैर्मत्प्रयुक्तैरजिह्मगैः ।****
**महीमभ्यपतद्राजन्प्रभग्नं पुरमासुरम् ।। ३० ।।**[०४]

**ते वध्यमाना मद्बाणैर्वज्रवेगैरयस्मयैः ।****
**पर्यभ्रमन्त वै राजन्नसुराः कालचोदिताः ।। ३१ ।।**[०५]

पाठान्तरे

ततो रथसहस्राणि षष्टिस्तेषाममर्षिणाम्।

**ततो मातलिरारुह्य पुरस्तान्निपतन्निव ।****
**महीमवातरत्क्षिप्रं रथेनादित्यवर्चसा ।। ३२ ।।**

---

(०१) (१) अधो भूमौ; पुनर्भूमौ; निपतति; (२) च गच्छति; प्रतिष्ठितं; प्रतिष्ठति; (३) पपाताशु; प्रधान्याशु,

(०२) (१) अमरावतीव सकाशं ह्यमरावत्या; (२) क-ख-घ-कमंच तत्, ०चर (for गम); शुभं (for तु तत्); तत्पुरं; मग महत्; (४) प्रतिग्य्ह्णं; द्रगृह्णा; , प्र प्रत्यविध्यं; , प्रत्यागृह्ण , पुरं महत्; परन्तप,

(०३) (१) शैलराजेन (for शरजालेन ); (२) क-ख-घ-मुदितेनह, दिव्यस्त्रनिवहेन; स्त्रनुदितेन; ०स्त्रादुदितेन; स्त्रपुटितेन; ०स्त्रमृदितेन; स्त्रचुदितेन; हि(for च); (३) न्यगृह्णां०; निगृह्णां; व्यगृह्णं; निगृह्ण, दैत्येयैस्; दैत्यैस्तैस्; ( दैत्येद्रैस्); (४) पुरुषं (for भरतं),

(०४) (१) छक्षितं; विकृतं; विकीर्णं; सायकैः; चाक्षयै (for चायसै० ); (२) मन्त्रयुक्तैद्; मत्प्रमुक्तैद्, महेषुभि;(for अजिह्मगै); (३) अभिपतद्; तत्तु (for राजन्); (४) अगृह्णां; प्रगृह्ण; प्रणुन्नं; प्रकचं; सुप्रभं; प्र (वि); रुग्णं (for प्रभग्नं),

(०५) (२) अजिह्मगै; अयोमयै; (for अयस्मयैः); (३)भ्राम्यन्त ( त्रास्यत); (for भ्रमन्त) ४)कालनोदिताः; ०मोहिताः॑

/*(१) आरुह्य; अप्यत्र; (for अप्याशु); भवमिति शेषः; (२) प्रकमन् (for निपतन्); (३) अवतरत्,

युयुत्सूनां मया सार्धं पर्यवर्तन्त भारत।(०१)
तान्यहं निशितैर्बाणैर्व्यधमं गार्ध्रराजितैः ।। ३३ ।। (०२)

ते युद्धे सन्यवर्तन्त समुद्रस्य यथोर्मयः ।(03)
नेमे शक्या मानुषेण युद्धेनेति प्रचिन्त्य तत् ।। ३४ ।। (०४)

ततोऽहमानुपूर्व्येण दिव्यान्यस्त्राण्ययोजयम् ।। ३५ ।।(०५)

ततस्तानि सहस्राणि रथिनां चित्रयोधिनाम्।**
अस्त्राणि मम दिव्यानि प्रत्यघ्नन्शनकैरिव ।। ३६।।(०६)

रथमार्गान्विचित्रांस्ते विचरन्तो महाबलाः ।**
प्रत्यदृश्यन्त सङ्ग्रामे शतशोऽथ सहस्रशः ।। ३७ ।।(०७)

विचित्रमुकुटापीडा विचित्रकवचध्वजाः ।**
विचित्राभरणाश्चैव नन्दयन्तीव मे मनः ।। ३८ ।।(०८)

अहं तु शरवर्षैस्तानस्त्रप्रचुदितैः रणे।**
नाशक्नुवं पीडयितुं ते तु मां प्रत्यपीडयन् ।। ३९ ।।(०९)

---

(०१) (२) क-ख-घ-महायुधि,महायुधि (त्मना); (for अमर्षिणाम्); तेषां षष्टिर्म० हामृध; (३) महाराज (for मया सार्धं),
(०२) (१) तान्यहं; विविधैर्बाणैर्; (२) न्यहनं; (for व्यधमं); गार्ध्रराजितैर ०वाजिभि; ०वासितै; गृध्रवाजितै,
(०३) ((३) तैर् (for ते); पय; सम्प्र (for संन्य),
(०४) (१) न मे; न तमे; नैते; शक्ता; शक्त्या (for शक्या); मनुष्येण; (२) युद्धे नेतुं युद्धे जेतुं (for युद्धेनेति); विचित्य (for प्र० ); च; प्र तु; ते; तत् (for वै),
(०५) (३)पूर्वेण; (४) दिव्यानि (for सर्वाणि);(अ) नोदरं; (अ)चोरं; (for (अ) योज)

(०६) (१) रथसह (for तानि सह); (२) रथिनां; (४) अपि; अथ (for इव),
(०७) (१) मार्गं विचित्रं; च (for ते); (२) ०बला; (for रथाः); (३) प्रत्य ( ति ) गृह्णत; विध्यन्त (for दृश्यन्त ),
(०८) (१) मुकुटास्ते वै; ०कुसुमापीडा; कवचा; मकुटां; (४) मम प्रीतिकराभवन्,
(०९) (२) ०प्रणुदितै; प्रमुदितान्; प्रचिदितै; मन्त्रास्त्रमुदितात्रणे; (३)नाशक्नुवन्; (४) प्रत्य; अप्य (for

तैः पीड्यमानो बहुभिः कृतास्त्रैः कुशलैर्युधि।**
व्यथितोऽस्मि महायुद्धे भयं चागान्महन्मम ।। ४० ।।[०१]

ततोऽहं परमायत्तो मातलिं परिपृष्टवान्।

किमेते मम बाणौघैर्दिव्यास्त्रप्रतिमन्त्रितैः ।
न वध्यन्ते महाघोरैस्तत्त्वमाख्याहि पृच्छतः ।। ४१ ।।

स मामुवाच पर्याप्तस्त्वमेषां भरतर्षभ।**
तानुद्दिश्याथ मर्माणि प्रतिघातं तदाच ।। ४२ ।।[०२]

एतच्छ्रुत्वा तु राजेन्द्र सम्प्रहृष्टस्तमूचिवान्।
निवर्तय रथं शीघ्रं पश्य चैतान्निपातितान् ।। ४३ ।।[०३]

एवमुक्तो रथं तत्र मातलिः पर्यवर्तयत् ।। ४४ ।।

ततो मत्वा रणे भग्नं दानवाः प्रतिहर्षिताः ।**
विचुक्रुशुर्महाराज स्वरेण महाता मुहुः ।। ४५ ।।[०४]

अभग्नः कैश्चिदप्येष पाण्डवो रणमूर्धनि।
अस्माभिस्समरे भग्न इत्येवं सङ्घशस्तदा ।। ४६ ।।[०५]

ततोऽहं देववेवाय रुद्राय प्रयतो रणे
महत्पाशुपतं दिव्यं सर्वलोकनमस्कृतम्।।[०६]
प्रयतः प्रणतो भूत्वा नमस्कृत्य महात्मने ।। ४७ ।।[०७]

पर्थ),
(०१) (३)व्याधितोस्मि; तदा (for महा),
(०२) ((१) समेतान् (for त्वमेषां);(३) परमं (for मर्माणि);,
(०३) ((२) वृतन्तत्प्रतीघातमाचर;(४) वै तान् (for चैतान्);,
(०४) ((४) महान्; मुहु; (for तदा),
(०५) (परमायत्तो०; किमतैर् (for ते); तत्वमाख्यातुमर्हसि; पर्याप्तान् (for सद्य);,
(०६) (२) प्रयतो (for णतो ); रुद्रायाद्भुतस्र्तये,
(०७) (४) प्रत्ययोजयं( प्रत्यनोवचं); समचोदयं; समनोदय; यद्रौद्रमिति; विख्यातं,

स्वस्ति भूतेभ्य इत्युक्त्वा महास्त्रं समचोदयम्।
यत्तद्रौद्रमिति ख्यातं सर्वामित्रविनाशनम्।
अहं पाशुपतं दिव्यं सर्वलोकनमस्कृतम्; ।। ४८ ।।(०१)

ततोऽपश्यं त्रिशिरसं पुरुषं नवलोचनम्।
त्रिमुखं षड्भुजं दीप्तमर्कज्वलनमूर्धजम् ।। ४९ ।। (०२)

लेलिहानैर्महानागैः कृतचौड(चीर)ममित्रहन्।
भक्तानुकम्पिनं देव नागयज्ञोपवीतिनम् ।। ५० ।।

विभो(भी)स्ततस्तदस्त्रं तु घोरं रौद्रं सनातनम्।
दृष्ट्वा गाण्डीवसंयोगमानीय भरतर्षभ ।। ५१ ।।(०३)

नमस्कृत्वा त्रिनेत्राय शर्वायामिततेजसे।**
मुक्तवान्दानवेन्द्राणां पराभावाय भारत ।। ५२ ।।(०४)

मुक्तमात्रे ततस्तस्मिन्रूपाण्यासन्सहस्रशः
मृगाणामथ सिंहानां व्याघ्राणां च विशाम्पते ।। ५३ ।।(०५)

ऋक्षाणां महिषाणां च पन्नगानां तथा गवाम्।(०६)
शरभाणां गजानां च वानराणां च सङ्घशः ।। ५४ ।।(०७)

---

(०१) ((३)महत् (for अहं,

(०२) (४) ०संनिभं (for मूर्धजम्); मूर्धजं लेलिहानागै; कृत्कपोडम्; कृतचीरम्; चिह्नम् (for शीर्षम् ),

(०३) (१) भीतस्ततस्; विभीषणं; सोहं ततम्; विचित्याहं; शं विचीयाहं (for विभीस्ततस्) ३) दृढं; स्पृष्ट्वा (for दृष्ट्व );(४) क-ख-घ- सो..हं ततस्तद,,

(०४) (१) नमस्कृत्य; (२) सर्वाया; शिवाया; (३)रुद्राया; असुरैद्राणां (for दानं ) ४)अभावायैव (for पराभावाय); अभावायपरन्तप,

(०५) (२) अस्मिन्; (for आसन्); (३)अपि (for अथ);(४) व्यालानां (for व्याघ्राणां); विशेषत,

(०६) ((१) सहस्रश; वनौकसां; (for विशां पते);(२) तथा गवाम्,,

(०७) (३) क-ख-घ- शरभाणां च चमराणा च सर्वशः,

**ऋषभाणां वराहाणां मार्जाराणां तथैव च ।****

शालावृकाणां प्रेतानां भुरुण्डानां च सर्वशः ।(०१)

**ऋक्षाश्वगजवक्त्राणामुलूकानां तथैव च ॥ ५५ ॥**

**मीनवायसरूपाणां नानावक्त्रप्रचारिणाम् ।**
**सालावृकाणां प्रेतानां मुरूण्टानां च सर्वशः ॥ ५६ ॥(०२)**

शार्दूलानां वराहाणां शरभाणां प्रवल्गताम् ।

**गृध्राणां गरुडानां च चमराणां तथैव च**

देवानां च ऋषीणां च गन्धर्वाणां च सर्वशः ।

**पिशाचानां सयक्षाणां तथैव च सुरद्विषाम् ॥ ५७ ॥(०३)**

वृक्षाणां पर्वतानां च समुद्राणां तथैव च ।(०४)

**गुह्यकानां च सङ्ग्रामे नैरृतानां तथैव च ।****
**झषाणां गजवस्त्राणामुलूकानां तथैव च ॥ ५८ ॥(०५)**

**मीनवाजिसरूपाणां नानाशस्त्रासिपाणिनाम्।****
**तथैव यातुधानानां गदामुद्गरधारिणाम् ॥ ५९ ॥(०६)**

---

(०१) (१) चा ( च ) मराणां; वानराणा; च हयानां; शरभाणां (for समं ); शरभाणां गजानां च; (२) वानराणां; चमराणां; ,ऋषभाणां; (for शर ); सहस्रश; च सङ्घश; च वाजिनां (for च स ); वृषाणां चैव वाजिनां; (३) शरभाणां (for ऋष० ); (४) शुनामपि (for तथैव च),

(०२) ((३)साला (for शाला० ); वृकानां; चण्डानां;(for प्रेतानां);(४) मुरुडानां; (कुक्कुटानां); सुषडाना; भेरुण्डानां; उरगानां; (for भुरु); तथैव् च; च बर्हिणां ( चपर्वशः) प्रेतानामपि सर्वश,

(०३) (२) च (चा) मराणां; चारणानां; भ्रमराणां (for मक ); च सर्वश; , च बर्हिणां (for तथैव च),

(०४) ( सहस्रश;(for च सर्वशः) ) (३); च (for स); (४) राक्षसानां; रक्षसां च (for तथैव च); तथैव च; (for सुरं),

(०५) (१) किंनराणां; (for च सङ्ग्रामे); गुह्यानां किंनराणां च; (३)झषाश्च; सर्पास्य (for झषाणां); सर्पाश्वखरवक्त्राणां; सर्पश्चापरवक्त्राणां; (४) अथापि वा; च भारत (for तथैव च,

(०६) (१) घ-तथा मुसलहस्तानां नानाशस्त्रास्त्रधारिणाम् । मीनावाजि; (य); मरुपाणां; मीनकुर्मसहस्त्रणा; मयुराणां; तथा मुम्वलहस्तानां; नवायरवकूर्माग्रा; (२) शस्त्रास्त्रपाणिनां; शस्त्रास्त्रधारिणां;

एतैश्चान्यैश्च बहुभिर्नानारूपधरैस्तथा।**
सर्वमासीज्जगद्व्याप्तं तस्मिन्नस्त्रे विसर्जिते ।। ६० ।।[०१]

त्रिशिरोभिश्चतुर्दंष्ट्रैश्चतुरास्यैश्चतुर्भुजैः ।
अनेकरूपसंयुक्तैर्मांसमेदोवसास्थिभिः ।। ६१ ।।[02]

अभीक्ष्णं वध्यमानास्ते दानवा नाशमागताः ।[०३]
अर्कज्वलनतेजोभिर्वज्राशनिसमप्रभैः ।। ६२ ।। [०४]

अद्रिसारमयैश्चान्यैर्बाणैरपि निबर्हणैः ।**
न्यहनं दानवान्सर्वान्मुहूर्तेनैव भारत ।। ६३ ।।[०५]

गाण्डीवास्त्रप्रणुन्नांस्तान्गतासून्नभसश्च्युतान्।**
दृष्ट्वाहं प्रणमं भूयस्त्रिपुरघ्नाय वेधसे ।। ६४ ।।[०६]

तथा रौद्रास्त्रनिष्पिष्टान्दिव्याभरणभूषितान्।**
निशम्य परमं हर्षमगमद्देवसारथिः ।। ६५ ।।[०७]

---

(४) पाणिना,

(०१) (१) भूतै ( क्य चान्यै); (२) ०रूपैर्नस (for रूपधैरम्); तदा (for तथा ) ४)विजम्भति; विजन्तभिते; प्रयोजिते; विसृज्यति (for विनजिते),

(०२) ((३)सम्पन्नैर्; (४) ख-वग्रशनिसमप्रभैः मध्ये अर्धद्वयं नास्ति,

(०३) (४) वसादिभिः; वमास्थिभिः; सुतीक्ष्णं (for अभीक्ष्ण); वा नाशमागता
वानां समा०; वात्सैभैक्षारणं,

(०४) (१) अति (for अर्क ); (२) वज्रशक्ति; वज्राशन; प्र ब्रह्माशनि; (for वज्राशनि) समस्वनै;(for समप्रभै),

(०५) (३) अद्धि; अभि(for अद्रि); हि (for च) ४)०ररिनिबर्हणै; ०रपि निबर्ष्ठणै; व्य (व्या ); हनं (for न्यहनं); मुहूर्तादेव,

(०६) (१) दानवाश्; (२) धनाशीन्; धनादीप्रद्रं०; गताशं; गतांस्तान्; (for गतासून्) ३)प्रणतौ; प्रणमं (for प्राणमं ),

(०७) (१) ततो; अथ (for तथा); प्रेष्ठ पीडांस्तान् (for निष्पिष्टान्); (२) दानवान्दारुणाकृतीन् ३) निशम्य; नियम्य (for निशाम्य),

तदसह्यं कृतं कर्म देवैरपि दुरासदम्।**
दृष्ट्वा मां पूजयामास मातलिः शक्रसारथिः ।। ६६ ।।(०१)

उवाच वचनं चेदं प्रीयमाणः कृताञ्जलिः ।
हतांस्तान्दानवान्दृष्ट्वा मया सङ्ख्ये सहस्रशः ।। ६७ ।।(०२)

मातलिः-

सुरासुरैरसह्यं हि कर्म यत्साधितं त्वया।
न ह्येतत्संयुगे कर्तुमपि शक्तः सुरेश्वरः ।। ६८ ।।(03)

ध्रुवं धनञ्जय प्रीतस्त्वयि शक्रः पुरार्दन ।। ६९ ।।(०४)

सुरासुरैरवध्यं हि पुरमेतत्खगं महत्।**
त्वया विमथितं वीर स्ववीर्यतपसो बलात् ।। ७० ।।(०५)

अर्जुनः

विध्वस्ते खपुरे तस्मिन्दानवेषु हतेषु च ।**
विनदन्त्यः स्त्रियः सर्वा निष्पेतुर्नगराद्बहिः ।। ७१ ।।(०६)

प्रकीर्णकेश्यो व्यथिताः कुरर्य इव दुःखिताः ।
कुरर्य इव वाशन्त्यो दुःखिताश्च मुहुर्मुहुः ।। ७२ ।।(०७)

---

(०१) (१) तदशक्यं; अविषह्यं (for तदसह्यं ); (२) सुदुष्करं; दुरुत्सहं; सुदुःषहं (for दुरा) ३)सं०(for मां),
(०२) ((४) (सङ्ख्ये शत; मया सङ्के (for मया सङ्ख्ये),
(०३) (१) (इ) दं च; चैवं; चैनं;, (for चेदं); वचनं चेदं; (३) अशक्यं (for असह्यं );पुरन्दर; (for सुरे); अपि शक्यं सुरेश्वरै,
(०४) ((३)( तव (for त्वयि);(४) शम्भु; (for शक्र); परार्दन),
(०५) (१) असह्यं (for अदृश्यं); (for अवध्यं); (२) स्वयं; स्वगं (for खगं); (४) स्ववीर्यतपसोबलात्; स्ववीर्यात्स्वतपोबलात्,
(०६) (१) अर्जुन; तु; स्व (for थ ); (३) विरुदन्त्य; विमर्दन्त्यः; (४) निपतन्त्य; निपेतुर्,
(०७) (पितृन् (३) (for पेतुः); पतीन् (for पितृन्),

पेतुः पुत्रान्पितन्भ्रातन्शोचमाना महीतले।[०१]
रुदत्यो दीनकण्ठ्यस्तु निनदन्त्यो हतेश्वराः ।[०२]
उरांसि परिनिघ्नन्त्यो विस्रस्तस्रग्विभूषणाः ।। ७३ ।।[०३]

तच्छोकयुक्तमश्रीकं दुःखदैन्यसमाहतम्।**
न बभौ दानवपुरं हतत्विट्कं हतेश्वरम् ।। ७४ ।।[०४]

गन्धर्वनगराकारं हतनागमिव ह्रदम्।**
शुष्कवृक्षमिवारण्यमदृश्यमभवत्पुरम् ।। ७५ ।।[०५]

मां तु संहृष्टमनसं क्षिप्रं मातलिरानयत्।**
देवराजस्य भवनं कृतकर्माणमाहवात् ।। ७६ ।।[०६]

हिरण्यपुरमुत्सृज्य निहत्य च महासुरान्।**
निवातकवचांश्चैव ततोऽहं शक्रमागमम् ।। ७७ ।।[०७]

मम कर्म च देवेन्द्रं मातलिर्विस्तरेण तत्।**
सर्वं विश्रावयामास यथाभूतं महाद्युते ।। ७८ ।।[०८]

हिरण्यपुरघातं च मायानां च निवारणम्।**

---

(०१) (१) विकीर्णकेश्यो; प्रकीर्णकेशा, मथिताः; (२) दंशिताः; (for दुःखिताः); सुदीनाः करुणस्वनाः,

(०२) (१) रुदत्यो; च; तु (for ता); (२) निनदन्त्यो; विलपन्त्यो (for विन);महीतले (for हते); नितरां चक्रुशुस्तदा,

(०३) (३) सि पक्तैनधघ्नत्यः; (४) विस्रस्त; प्रध्वस्त , (for प्रस्रस्त); प्रसुस्रुस्तत्रशोणिताः; प्रस्रस्ताबरभूषणाः,

(०४) (२) दैन्यदुःख समागतं; ०समाहितं; (४) ध्वस्तं; चिह्नं; द्विष्टं; प तिग्मं (for त्विट्कं),

(०५) (२) हृत (for हत ); (४) दुर्दर्श्य( दृश्य )म् (for अदृश्यम्); अगमत्; (for अभवत्), अदृश्यत महत्पुरं,

(०६) (१) सन्तुष्ट (for संहृष्टं ); (२) आहरत् (for आनयत्),

(०७) (१) निहत्य (for हिरण्य); आभज्य; आरुह्य; उत्सृज्य; आक्रम्य(for आरुज्य)
(२) सुरद्विष; (for महा ,

(०८) (१) स (for च ); देवेन्द्रे (४) वृत्तं (for भूतं); मते (for द्युते ),

निवातकवचानां च वधं सङ्ख्ये महौजसाम् ।। ७९ ।।[०१]

कालकेयवधश्चैव अद्भुतं रोमहर्षणम्।
तच्छ्रुत्वा भगवान्प्रीतः सहस्राक्षः पुरन्दरः ।। ८० ।।

मरुद्भिः सहिताः श्रीमान्साधु साध्वित्यथाब्रवीत्।[०२]
परिष्वज्य च मां प्रेम्णा मूर्ध्नि चाघ्राय सस्मितम् ।। ८१ ।।

ततो मां देवराजो वै समाश्वास्य पुनः पुनः ।**
अब्रवीद्विबुधैः सार्धमिदं स मधुरं वचः ।। ८२ ।।[०३]

इन्द्रः-

अतिदेवासुरं कर्म कृतमेव त्वया रणे।**
गुर्वर्थश्च कृतः पार्थ महाशत्रून्घ्नता मम ।। ८३ ।।[०४]

एवमेव सदा भाव्यं स्थिरेणाजौ धनञ्जय।
असम्मूढेन चास्त्राणां कर्तव्यं प्रतिपादनम् ।। ८४ ।।

अविषह्यो रणे हि त्वं देवदानवराक्षसैः ।**
सयक्षासुरगन्धर्वैः सपक्षिगणपन्नगैः ।। ८५ ।।[०५]

वसुधां चापि कौन्तेय त्वद्बाहुबलनिर्जिताम्।**
पालयिष्यति धर्मात्मा कुन्तीपुत्रो युधिष्ठिरः ।। ८६ ।।[०६]

---

(०१) (१) पातं च; मुत्सृज्य; पातश्च (for घातं च); (२) निपातनं (for निवा ); (३) तु (for च ); महात्मनां (for महौ०),

(०२) (३)महर्षि; महद्भिः; (for मरुद्भि); (४) च (for (अ) थ),

(०३) (१) (अ)सौ (for वै ( तत; स ( च); मां देवराजः; (३) विवरै; for विबुधैः) ४)स for सु),

(०४) (२) एव (for एतत्); (३)गुर्वर्थं च; कृत; (for महान्); पुत्र (for पार्थ) (४)महा; महाम्; हत्वा; (for कृतः); कृतो (for घ्नता ),

(०५) (२) ०पन्नगैः; (३)सयक्षोरग०; सदेवासुरं; (४) सयक्ष (for सपक्षि ); राक्षसै; (for पन्नगै ),

(०६) (१) चैव (for चापि); (२) ०रक्षितां; ०निष्ठितां,

अस्मिन् पर्वणि १४५अध्याये ८६श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि

पञ्चचत्वारिंशदधिकशततमोऽध्यायः ।। १४५ ।।

महाभारततततात्पर्यनिर्णये २२ अध्याये

अथानुज्ञाप्य पितरं रथेनैन्द्रेण भास्वता ।
सोदर्याणां सकाशं स ययौ वज्रधरात्मजः ।। ३१६ ।।
आयान्तमीक्ष्य बीभत्सुं मुमुदुर्भ्रातरोऽधिकम् ।

# १४६. षट्चत्वारिंशदधिकशततमोऽध्यायः

अर्जुनेन युधिष्टिरं प्रति इन्द्रेण स्वस्मै सानुग्रहं कवचकिरीटादिदानकथनम् ।। १ ।। तथा युधिष्टिरेण दिव्यास्त्रप्रदर्शनचोदनायां श्वःप्रदर्शनप्रतिज्ञानम् ।। २ ।।

अर्जुनः

ततो मामतिविश्वस्तं संरूढशरविक्षतम्।**
देवराजो विगृह्येदं काले वचनमब्रवीत् ।। १ ।।(०१)

दिव्यान्यस्त्राणि सर्वाणि त्वयि तिष्ठन्ति भारत।**
न त्वाभिभवितुं शक्तो मानुषो भुवि कश्चन ।। २ ।।(०२)

---

(०१) (१) अति;,अपि (for अभि); (२) संमूढ;संरूढं (for संरूढ);शरविक्षितं; (३)राजो निगृह्य; राजी विगृह्य;,राजो विसृज्य;,राजोपगूहा;(ए)तत् (for इदं); (४) कामं (for काले),

(०२) (१) दिव्यास्त्राणि च सं; (२) पुत्रक (for भारत); (३)वीक्षितुं (for भवितुं);मानुषेष्वपि क,

भीष्मो द्रोणः कृपः कर्णः शकुनिः सह राजभिः ।**
सङ्ग्रामस्थस्य ते पुत्र कलां नार्हन्ति षोडशीम् ॥ ३ ॥[०१]

इन्द्रः-

इदं च मे तनुत्राणं प्रायच्छन्मघवान्प्रभुः ।**
अभेद्यं कवचं दिव्यं स्रजं चैव हिरण्मयीम् ॥ ४ ॥[०२]

देवदत्तं च मे शङ्खं पुनः प्रादान्महारवम्।**
दिव्यं चेदं किरीटं मे स्वयमिन्द्रो युयोज ह ॥ ५ ॥[०३]

ततो दिव्यानि वस्त्राणि दिव्यान्याभरणानि च ।**
प्रादाच्छक्रो ममैतानि रुचिराणि बृहन्ति च ॥ ६ ॥[०४]

एवं सम्पूजितस्तत्र सुखमस्म्युषितो नृप।**
इन्द्रस्य भवने पुण्ये गन्धर्वशिशुभिः सह ।[०५]
ततो मामब्रवीच्छक्रः प्रीतिमानमरैः सह ॥ ७ ॥

इन्द्रः-

समयोऽर्जुन गन्तुं ते भ्रातरो हि स्मरन्ति ते ॥ ८ ॥[०६]

अर्जुनः-

एवमिन्द्रस्य भवने पञ्च वर्षाणि भारत।**

---

(०१) (१) तथा (for कृपः); (२) देव०(for सह);ससुयोधनः(for सह राजभिः); (३)तात (for पुत्र); (४) नाधति; नार्हति,

(०२) (अर्जुन उं; (२) प्रयच्छत्;भगवान् (for मघवान्);स्वय (for प्रभुः) ३)काञ्चनं (for कवचं); पः चैव (for दिव्यं),

(०३) (२) शक्रः; पुनः; देवाः (for देवः);प्रादुर्;महास्वनं; शतक्रतुः; महारथं; (३)चैतत् (for चेदं); (४) सर्वम् (for स्वयम्);च (ह),

(०४) (१) चास्त्राणि (for व); (३)समेतानि;ममेमानि (for ममै); (४) रोचनानि (for रुचिं,

(०५) (२) अध्युषितो for अस्म्यु; (३)भुवने; भुवनं; सदने (for भवने) रम्ये; पुण्यं;,दिव्ये for पुण्ये),

(०६) (३)ते गन्तुं; गन्तव्यं; (४) (ऽ)त्र (for हि),

उषितानि मया राजन्स्मरता द्यूतजं कलिम् ।। ९ ।।(०१)

ततो भवन्तमद्राक्षं भ्रातृभिः परिवारितम्।**
गन्धमादनपादस्य पर्वतस्यास्य मूर्धनि ।। १० ।।(०२)

युधिष्ठिरः

दिष्ट्या धनञ्जयास्त्राणि त्वया प्राप्तानि भारत।**
दिष्ट्या चाराधितो राजा देवानामीश्वगः(श्वरः) प्रभुः ।। ११ ।।(०३)

दिष्ट्या च भगवान्स्थाणुर्देव्या सह परन्तप।**
साक्षाद्दृष्टः स्वयुद्धेन तोषितश्च त्वयानघ ।। १२ ।।(०४)

दिष्ट्या च लोकपालैस्त्वं समेतो भरतर्षभ।**
दिष्ट्या वर्धामहे पार्थ दिष्ट्यासि पुनरागतः ।। १३ ।।(०५)

अद्य कृत्स्नां महीं देवीं विजितां पुरमालिनीम्।**
मन्ये च धृतराष्ट्रस्य पुत्रानपि वशीकृतान्।(०६)
पश्यामि भूमिं कौन्तेय त्वया मे प्रतिपादितम् ।। १४ ।।(०७)

इच्छामि तानि चास्त्राणि द्रष्टुं दिव्यानि भारत।**
यैस्तथा वीर्यवन्तस्ते निवातकवचा हताः ।। १५ ।।(०८)

---

(०१) (१) भुवने ; (३)महाराज (for मया राजन्),

(०२) (१) ततो द्रुमुमिह प्राप्तो; (३)पादस्य (for मासाद्य),

(०३) (२) सर्वशः (for भारत); (३)तात; देवो (for राजा); (४) देवराजःपुरन्दरः,

(०४) (१) शम्भुटर् (for स्थाणुर्); (२) तपः(for तप); (३)स्व०; स (for सु०);(४) स (for च),

(०५) (२) सङ्गतो;(समेतो); (३)चरामहे (for वर्धा);पार्थ (for सर्वे);दिष्ट्या च पार्थैः (पार्थैश्च) संयुक्तो; (४) त्वं; च;(for (अ)( क-घ-चार्थैश्च; ख- संयुक्तो सि);दिष्ट्या पुनरिहागतः,

(०६) (१) पृथ्वीम् (for कृत्स्नाम्);महीं (for इमां);सर्वां (for देवीं);अद्य पृथ्वी मया देवी;, अद्य कृत्स्ना महीदेवी; (२) समुद्र०; सशैल०(for विजितां);विजिता मालिनी,

(०७) ((३)अवगच्छामि (for पश्यामि भूमिं), (४) वशे (for वशी०),

(०८) (१) च (for तु);चेच्छामहे (for त्विच्छामि ते);(अ)हं (for ते);इच्छामि तानि चास्त्राणि

महाबला महामाया एकेन निहिता युधि ।

अर्जुनः

**श्वः प्रभाते भवान्द्रष्टा दिव्यान्यस्त्राणि सर्वशः ।****

**निवातकवचा घोरा यैर्मया विनिपातिताः ।। १६ ।।**(०१)

वैशम्पायनः

**एवमागमनं तत्र कथयित्वा धनञ्जयः ।****

**भ्रातृभिः सहितः सर्वै रजनीं तामुवाच ह ।। १७ ।।**(०२)

अस्मिन् पर्वणि १४६अध्याये १७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि षट्चत्वारिंशदधिकशततमो ऽध्यायः ।। १४६ ।।

# १४७. सप्तचत्वारिंशदधिकशततमोऽध्यायः

**अर्जुनेन युधिष्ठिराय दिव्यास्त्रदर्शनम् ।। १ ।। अस्त्रतेजसा जगत्क्षोभे सति इन्द्रचोदनया नारदेनार्जुनं प्रत्यस्त्रप्रदर्शनप्रतिषेधनम् ।। २ ।।**

वैशम्पायनः

**तस्यां रात्र्यां व्यतीतायां धर्मराजो युधिष्ठिरः ।****

**उत्थायावश्यकार्याणि कृतवान्भ्रातृभिः सह ।**(०३)

**ततः सञ्चोदयामास सोऽर्जुनं मा(भ्रा)तृनन्दनम् ।। १ ।।**(०४)

---

(वै द्रष्टुं; ते द्रष्टुं; द्रष्टुं वै); (२) द्रष्टुं दिव्यानि भारत; (३)हता; तदा; त्वया (for तथा); (४) त्वया (for हताः),

(०१) (कवचा; (२) भारत (for सर्वशः); (४) निहताः प्रभो (for विनिपा),

(०२) (१) तात; सर्वं (for तत्र); (३)सहितैः (for तः),

(०३) (१) ततो (for तस्यां); रात्र्यां व्यतीतायां (for रजन्यां व्यु); (३)कर्माणि (for कार्याणि,

(०४) (१) सचोद०;,संनोद०; प्रणोद० (for सञ्चोद);चोदयामास कौतेयं;(धर्मात्मा); (२) मातृ(for भ्रातृ); अर्जुनं तत्र वीर्य०वान्,

युधिष्टिरः-

दर्शयास्त्राणि कौन्तेय यैर्जिता दानवास्त्वया ।। २ ।।(०१)

वैशम्पायनः

ततो धनञ्जयो राजन्देवैर्दत्तानि पाण्डवः ।**
अस्त्राणि तानि दिव्यानि दर्शयामास भारत ।। ३ ।।(०२)

यथान्यायं महातेजाः शौचं परममास्थितः ।
नमस्कृत्य त्रिनेत्राय वासवाय च पाण्डवः ।। ४ ।।(०३)

त्रिकूबरं समुद्रं च त्रिभिर्वंशैस्त्रिवेणुकम् ।
पार्थिवं रथमास्थाय शोभमानो धनञ्जयः ।। ५ ।।(०४)

लक्षालङ्कारः- त्रिकूबरं समुद्रं च इत्यत्र मुद्रया रथलक्षणेन सहितं समुद्रम् ।

लक्षालङ्कारः- त्रिभिर्वंशैस्त्रिवेणुकम् इत्यत्र त्रिवेणुकं त्रिध्वजसहितम् ।

दिव्येन संवृतस्तेन कवचेन सुवर्चसा।**
धनुरादाय गाण्डीवं देवदत्तं स वारिजम् ।। ६ ।।(०५)

शोशुभ्यमानः कौन्तेय आनुपूर्व्यान्महाभुजः ।**

---

(०१) ( (३) पश्यामो (पश्येमा);(for दर्शया), (४) ;यैस्त्वया दानवा हताः,

(०२) (१) राजा (for राजन्); (२) पाण्डव;,भारत (for पाण्डवः); (४) पार्थिवे (for भारत),

(०३) (१) यथायोगं; गमं; अर्जुनस्तु (for यथान्यायं);यथातेजाः; (२) परमं (प्रथमं) शौचमास्थितः (स्कृत्वा (for स्कृत्य),),

(०४) (१) क-ख-घ-गिरिचक्रं पादपाङ्गं गिरिवेणुंगिरिवेणुं त्रिवेणुमत्।, (३)कूटं; चक्रं (for कूबरं);गिरिकूवरपादाक्षं (पादाङ्गं; पादाग्रं; पादाख्यं);त्रिकूबरं समुद्राश्च; (४) त्रिभिः शृङ्गैस्; शुभवेणु; शुभरेखा; गिरिवेणु (for शुभवेणु);अलङ्कृतं; त्रिवेणुमत् (णुकम्);वरं रथं समास्थाय;शोभयानो।,गिरिकूबरपादाक्षं शुभवेणु त्रिवेणुमत्।**

(०५) (१) स ; सं०(for सु);दिव्येन संवृतस्तेन; (२) च (for सु);भास्वता (for सुवर्चसा) ३) गाजीवं;स(for च,

अस्त्राणि तानि दिव्यानि दर्शनायोपचक्रमे ।। ७ ।।[०१]

अथ प्रयोक्ष्यमाणेषु दिव्येष्वस्त्रेषु तेषु वै।**
समाक्रान्ता मही पद्भ्यां समकम्पत सद्रुमा ।। ८।।[०२]

क्षुभिताः सरितश्चैव तथैव च महोदधिः ।**
शैलाश्चापि व्यदीर्यन्त न ववौ च समीरणः ।। ९ ।।[०३]

न बभासे सहस्रांशुर्न जज्वाल च पावकः ।**
न वेदाः प्रतिभान्ति स्म द्विजातीनां कथञ्चन ।। १० ।।[०४]

अन्तर्भूमिगता ये च प्राणिनो जनमेजय।
पीड्यमानाः समुत्थाय पाण्डवं पर्यवारयन् ।। ११ ।।

वेपमानाः प्राञ्जलयस्ते सर्वे विकृताननाः ।**
दह्यमानास्तदास्त्रैस्ते याचन्ति स्म धनञ्जयम् ।। १२ ।।[०५]

ततो ब्रह्मर्षयश्चैव सिद्धा ये च महर्षयः ।**
जङ्गमानि च भूतानि सर्वाण्येवावतस्थिरे ।। १३ ।।[०६]

---

(०१) (१) स शोभ; सोक्षुभ्यमाणः; शोभ०मानश्च;,शोशुध्य; शुशुभ्य (for शोशुभ्य); (२) पूर्व्या (for पूर्दर्यान्);भुज;,जनुः;यशाः(for भुजः); (३)दिव्यास्त्रतां (for स्त्राणां);ततस्तेषां; महास्त्राणि महाबाहुः; तानि दिव्यानि चास्त्राणि,

(०२) (१) तानि; तेन (for अथ);प्रयोक्ष्यमा०णानि;,प्रयो (यु)ज्यमानेन; प्रयोक्ष्यमाणेषु;, माणैस्तैर् (for माणेन); (२) दिव्येष्वस्त्रेषु (for दिव्यान्यस्त्राणि);भारत;,तेषु वै (for तेन वै);दिव्यैरस्त्रैर्महात्मना; (३) श्रमक्षान्ता मही यत्र; (४) सभाकम्पत;शतयोजनकद्रुमा,

(०३) (१) सदिश (for सरित); (२) तथा सर्वे महार्णवाः; (३)चैव (for चापि);विशीर्यत व्यदीर्यत; (अ)भ्यशीर्यत; (४) तथैव,(for न ववौ),

(०४) (१) बभ्राजे (for न बभासे); (२) न च जज्वाल;,नापि जज्वाल (for न जज्वाल च) हुताशनः(for च पावकः); (३)देवाः(for वेदाः),

(०५) (२) सर्वे ते;विकृताननाः; पीडिता जनाः; (ऽ)पि नताननाः;विनता; (३)तदस्त्रैस्; ततस्तैस्;, महास्त्रैर्; इवास्त्रैस् (for तदास्त्रैस्);च; ते (for तैर्);भजन्ति; (४) भजन्ते;याचते (for याचन्ति),

(०६) (१) मह (for ब्रह्म); (२) ये च (for चैव);मह ()३ (for सुर);(अ)पि (for च) ४) (उ)प (for (अ)व),

**देवर्षयश्च प्रवरास्तथैव च दिवौकसः ।**
**यक्षराक्षसगन्धर्वास्तथैव च पतत्रिणः ।। १४ ।।**[०१]

खेचराणि च भूतानि सर्वाण्येवावतस्थिरे।[०२]

**ततो पितामहश्चैव लोकपालाश्च सर्वशः ।**
**भगवांश्च महादेवः सगणोऽभ्याययौ तदा ।। १५ ।।**[०३]

**ततो वायुर्महाराज दिव्यैर्माल्यैः समन्वितः(सुगन्धिभिः)।**
**अभितः पाण्डवं चित्रैरवचक्रे समन्ततः ।। १६ ।।**[०४]

**जगुश्च गाथा विविधा गन्धर्वाः सुरचोदिताः ।**
**ननृतुः सङ्घशश्चैव राजन्नप्सरसां गणाः ।। १७ ।।**[०५]

देवतूर्याण्यवाद्यन्त रम्याणि मधुराणि च ।

**तस्मिंश्च तादृशे काले नारदश्चोदितः सुरैः ।**
**आगम्याह वचः पार्थं श्रवणीयमिदं नृप ।। १८ ।।**[०६]

**नारदः-**

**अर्जुनार्जुन मा युङ्क्ष्व दिव्यान्यस्त्राणि भारत।**
**नैतानि निरधिष्ठाने प्रयुज्यन्ते कथञ्चन।**[०७]

---

(०१) (१) देव (for राज);देवलोकगता ये च,

(०२) ((उप (for (अ)व)),

(०३) (२) पालै (for पाला); (४) (ऽ)पि;,हि (for अभि),

(०४) (१) महातेजा;,दिव्यगन्धो (for महाराज); (२) दिव्यमाल्यैः;समन्वितः;समन्ततः(for सुग); (३)पाडवं;,पाण्डवैः,(for पाण्डवान्);चित्रम् (for ,चित्रैर्); (४) उप; अलं (for अव०); समन्वितः (for समन्ततः),

(०५) ((१) विविधाः;गन्धर्वाः; (२) सुरनोदिताः; (३)शतश;,सर्वश (for सङ्घश); (४) चाप्सरसां (for अप्स),

(०६) (१) सु०;च (for तु);तादृशे (for तुमुले); (२) पवनः(for नारदः);सुरपूजितः; नोदितः; वन्दितः;नारदश्चोदितः सुरैः(३) आगत्य (for आगम्य),

(०७) (३)धिष्ठानैः;धिष्ठानं;धिष्ठानां० (४) प्रयोज्यन्ते;,प्रयुज्येत; प्रयुञ्जीथाः; प्रयुञ्जीत कथञ्चन,

अधिष्ठाने न वा नार्तः प्रयुञ्जीत कदाचन।
**प्रयोगेषु महान्दोषो ह्यस्त्राणां कुरुनन्दन ।। १९ ।।(०१)**

**एतानि रक्ष्यमाणानि धनञ्जय यथागमम्।****
**बलवन्ति सुखार्हाणि भविष्यन्ति न संशयः ।। २० ।।(०२)**

**अरक्ष्यमाणान्येतानि त्रैलोक्यस्यापि पाण्डव ।****
**भवन्ति स्म विनाशाय मैवं भूयः कृथाः क्वचित् ।। २१ ।।(०३)**

**अजातशत्रो त्वं चैव द्रक्ष्यसे तानि संयुगे।****
**योज्यमानानि पार्थेन द्विषतामवमर्दने ।। २२ ।।(०४)**

वैशम्पायनः

**निवार्याथ ततः पार्थं सर्वे देवा यथागतम्।****
**जग्मुरन्ये च ये तत्र समाजग्मुर्नरर्षभ ।। २३ ।।(०५)**

**तेषु सर्वेषु कौरव्य प्रतियातेषु पाण्डवाः ।****
**तस्मिन्नेव वने हृष्टास्त ऊषुः सह कृष्णया ।। २४ ।।(०६)**

---

(०१) (१) च; (ऽ)पिं (for न);नानार्तः; चानार्तः; नान्यत्र; नान्यत्तः; नात्यर्थं (for वानार्तः); अधि०ष्ठानं विना नात्र; (२) प्रयुज्यन्ते; प्रयुञ्जीथाः,कथश्चन; (३) क-अधिष्ठाने नान्यत्र प्रयुञ्जीतकथश्चन । प्रयोगे च; गे हि; षु; पि; अप्रयोगे; प्रयोगे तु;महादोषो,

(०२) (१) रक्ष्य; एतानि; रक्ष (for रक्ष्य); (२) क्रमं;गतं (for गमम्); (३)महा; यथा (for सुखा); (४) बलवन्ति (for भवि),

(०३) (१) अवेक्ष्य (for अरक्ष्य); (२) च पार्थिव (for (अ)पि पाण्डव); (३)भविष्यन्ति; प्रभवन्ति (for भवन्ति स्म),

(०४) (२) द्रक्ष्यस्येतानि संयुगे; (३)योक्ष्य०; युज्य (for योज्य);भ्रात्रा (for पार्थेन) ४)विद्विषाम् (for द्विषताम्);अवसादने; अरि मर्दन; चावमर्दने; मर्दनेन च एव मर्दने; अवमर्दन,

(०५) (वैशं उ (उ); १) (अ)स्त्रं; (ऋ)षिः(for (अ)थ);तथा (for ततः); (२) देवाः सर्वे यथागताः; (३)ते (for ये); (४) नरर्षभाः,

(०६) (१) कौतेयाः;कौरव्याः (for कौरव्य); (३)नगे (for वने); (४) तीर्थेषु; तत्रोषुः;ऊषुस्ते तदोषुः (for त ऊषुः);कृष्णया सह ; भरतर्षभाः,

अस्मिन्  पर्वणि १४७ अध्याये २४श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि**

**सप्तचत्वारिंशदधिकशततमोऽध्यायः ।। १४७ ।।**